184631

UNIVERSAL LIBRARY
OU_184631
UNIVERSAL LIBRARY

# VARENDRA RESEARCH SOCIETY

## RAJSHAHI.

### PATRON.

HIS EXCELLENCY THE GOVERNOR OF BENGAL.

### VICE-PATRONS.

THE HON'ABLE F. J. MONAHAN ESQ. I. C. S.

F. C. FRENCH ESQ. I. C. S.

MAHARAJA SIR GIRIJANATH RAY BAHADUR OF DINAJPUR.

THE HON'ABLE MAHARAJA JAGADINDRA NATH ROY OF NATTORE.

RAJA PRAMADANATH RAY OF DIGHAPATIYA.

### HONORARY VICE-PRESIDENT.

JUSTICE SIR J. G. WOODROFFE.

——:o:——

*Council of Management.*

### President

KUMAR SARATKUMAR RAY OF DIGHAPATIYA. M. A., M. R. A. S.

### Director.

BABU AKSHAY KUMAR MAITRA. B. L.

### Honorary officers.

BABU RAMAPRASAD CHANDA. B. A. ( *Secretary.* )

,, RADHAGOVINDA BASAK. M. A. ( *Librarian.* )

,, MAHENDRA KUMAR SHAHA. CHAUDHURY. B. L. (*Treasurer*)

,, KALI PRASANNA ACHARYA. B. L. ( *Keeper.* )

### Superintendent of Sanskrit MSS.

SASTRI SRISH CHANDRA CHAKRAVARTI. B. A.

गौड़ग्रन्थमाला ।

श्रीमत्कुमारशरत्कुमाररायेण प्रवर्त्तिता

श्रीमदक्षयकुमारमैत्रेयेण पर्य्यवेक्षिता च ।

अथ

# काशिकाविवरणपञ्जिका ।

बोधिसत्त्वदेशीयाचार्य्यश्रीजिनेन्द्रबुद्धिपादविरचिता

शास्त्रिश्रीश्रीशचन्द्रचक्रवर्त्तिभट्टाचार्य्येण संस्कृता ।

THE

# KASIKA VIVARANA PANJIKA

(THE NYASA)

MMENTARY ON VAMANA-JAYADITYA'S KASIKA

BY

JINENDRA BUDDHI.

EDITED

WITH OCCASIONAL NOTES

BY

[illegible] CHANDRA CHAKRAVARTI, B. A.

[illegible] OF SANSKRIT, RAJSHAHI COLLEGE,

RAJSHAHI, BENGAL.

Vol. I. Part V.

PUBLISHED BY THE VARENDRA RESEARCH SOCIETY OF RAJSHAHI.

1916.

अथ

# काशिकाविवरणपञ्जिका।

## चतुर्थोऽध्यायः।

### प्रथमः पादः।

१। ङ्याप्प्रातिपदिकात्।

अधिकारोऽयमिति। स्वरितेनासञ्जितत्वात्। आ। पञ्चमाध्यायपरिसमाप्तेरिति। अनेनाधिकारस्यावधिं दर्शयति। ततः परं नायमनुवर्त्तते। अस्वरितत्वात्। स्वादिषु कप्पर्य्यन्तेष्विति। अधिकारस्य विषयमाचष्टे। ङी इति। ङीप्ङीष्ङीनां सामान्येन ग्रहणमित्यादि। ङी इति विशेषकरानुबन्धानुत्सृज्य यत् सामान्यं ङीमात्रं तदिह गृह्यते। टाब्डाप्चापामाविति। सामान्येन ग्रहणमिति प्रकृतेन सम्बन्धः। ननु च ङ्यादीनां बहुत्वाद् बहुवचनेन भवितव्यम्। तत् कथं ङ्याप्प्रातिपदिकादित्येकवचनेन निर्द्देश इत्याह तेषामित्यादि। समाहारद्वन्द्वेनेह ङ्यादीनामयं निर्द्देशः कृत इत्यर्थः। इतरेतरयोगे हि (A) द्वन्द्वे स्याद् बहुवचनम्। नचायमितरेतरयोगे द्वन्द्वः। किं तर्हि ? समाहारे। तस्य चैकार्थत्वादेकवचनमेव युक्तम्। समाहारनिर्द्देश इति वचनमितरेतरयोगनिवृत्त्यर्थं समासान्तरनिवृत्त्यर्थञ्च। अन्यथा हि ङ्यापोः प्रातिपादिकं ङ्याप्प्रातिपदिकमित्यपि षष्ठीसमास आश्रयेत। ततो ङ्यन्तमाबन्तञ्च समासप्रातिपदिकं यत् ततः स्याद् राजकुमार्य्यादिभ्यः। न तु केवलेभ्यः कुमार्य्यादिभ्यः। ङ्यापोस्तु विधानेनैव प्रातिपादिकं प्रकृतिः स्यात्। तस्मात् समाहारद्वन्द्वेनायं निर्द्देशः। तत्र तु त्रयं प्रकृतित्वेनाधिक्रियते।

(A) द्वन्द्वपदार्थस्य बहुत्वाद् बहुवचनं स्यादिति बङ्गीयपुस्तके पाठान्तरम्।

तेन सर्व्वतो भवति । अथ कथं पुनरत्र विग्रहः ? केचिदाहुः । ङीश्च आप् च प्रातिपदिकञ्चेति । ननु चाप्रत्यय इति (१।२।४५) प्रातिपदिकसंज्ञाप्रतिषेधाद् ङीश्चेति विभक्त्युत्पत्ति न स्यात् । उच्यते । नायं प्रत्ययः । अपि तु प्रत्ययानुकरणमिदम् । एवमपि प्रकृतिवदनुकरणं भवतीति (प,३७) स्यादेव प्रतिषेधः । नैष दोषः । अनुकरणं द्वैधम् । अर्थस्य शब्दमात्रस्य चेति । ज्ञापितमाचार्य्येणैतद् द्वेधा निर्देशात् । परिव्यवेभ्यः क्रियो (१।३।१८) विपराभ्याञ्जेरितोऽयडादेशस्य (१।३।१८) करणाकरणाभ्याम् । अतोऽत्र शब्दमात्रमनुकृतम् । न त्वर्थसहितम् । तेनात्राप्रत्यय इति(१।२।४५)नास्त्यत्र प्रतिषेधः । प्रकृतिवदतिदेशस्त्वर्थवत्यनुकरणे । ननु चैवमपि हल्ङ्यादिलोपेन (६।१।६८) भाव्यम् । उच्यते । ङ्यन्तात् सुलोपः । न ङीमात्रात् । व्यपदेशिवद्भावात् स्यादिति चेत् ? न । व्यपदेशिवद्भावोऽप्राति-(प,३३) पदिकेनेत्युच्यते । प्रातिपादिकञ्चेदम् । तस्मान् ङीश्चेति । अथ प्रत्ययविधिविषयैषा परिभाषा । पूर्वादिनिः (५।२।८६) सपूर्वाच्चेत्यत्र (५।२।८७) ज्ञापितत्वात् ? न चायं प्रत्ययविधिः । कस्तर्हि ? लोपविधिरित्यतः परिभाषा न प्रवर्त्तत इत्यस्त्यत्र व्यपदेशिवद्भाव इति । ततः प्रवर्त्तते लोपशास्त्रम् । अतः सुलोपेन भवितव्यं ङी चेति । सामान्येन परिभाषाप्रवृत्तिमाश्रित्य ङीश्चेति विग्रहः । अन्यस्त्वाह । प्रयोगस्थ एव कुमारीगौरीत्यादिषु य ईकारः सोऽत्रानुकृत एव लुप्तविभक्तिकः । तेन ङी इत्येव भवति । यद्येवं कुतो ङकारः सामान्यग्रहणार्थ आसज्यते ? ननु चानुक्रियमाणेनार्थेनार्थवत्त्वात् पुनरपि विभक्त्युत्पत्तिः प्राप्नोति । ततश्च ङीश्चेति भवितव्यम् । नैतदस्ति । प्राक्कालभाविनी या विभक्तिस्तां प्रत्ययलक्षणेनाश्रित्याप्रत्यय इति (१।२।४५) प्रतिषेधात् । अत्रापि स्यात् ? न ङिसम्बुद्ध्योरिति (८।२।८) ज्ञापकात् (१।२।४५) प्रत्ययलक्षणेनाप्रत्यय इति प्रातिपदिकसंज्ञा न प्रतिषिध्यत इति । असदेतत् । नलोपविधिविषयमेवैतज् ज्ञापकम् । अतोऽत्र नास्त्येव प्रत्ययलक्षणेन प्रातिपदिकसंज्ञाप्रतिषेध इति स्थितमेतत् । ननु च प्रत्ययत्वे सति परश्चेति (३।१।२) वचनात् परे भवन्तः स्वादयः पूर्वां प्रकृतिमाक्षिप्य भवन्ति । न ह्यन्यथा परत्वमुपपद्यते । तस्य परत्वस्य पूर्वापेक्षत्वात् । न च ङ्यादिभ्योऽन्या प्रकृतिरुपपद्यते । तत्र

ङ्याप्प्रातिपदिकग्रहणमन्तरेणापि पारिशेष्यादियमेव प्रकृतिर्लभ्यते। तथाहि प्रकृतयन्तरं धातुरस्ति। तिङन्तञ्च वाक्यञ्च। प्रतयया अपि स्वादय ष्टाबादयो ऽणादयश्च। तत्र धातो स्तावत् स्वादिभिर्न भवितव्यम्। ते ह्येकत्वादिष्वर्थेषु विधीयमानास्तदन्तं शब्दमाचिपन्ति। न च धातुरेकत्वादिमान्। अथाप्यविशेषेणोत्पद्यन्ते ? उत्पन्नानां तु नियमः क्रियते। तथापि नैव तेषां धातोरुत्पत्तिर्युक्ता। सामान्यविहितानां स्वादीनां विशेषविहितैस्त्यदादिभिर्बाधितत्वात्। टाबादयस्तर्हि धातोर्भवेयुरिति चेत् ? स्यादेतत्। असति ङ्याप्प्रातिपदिकग्रहणे ऽकारान्तेभ्यो धातुभ्यो जुगुप्सादिभ्योऽत इति (४।१।४) टाप् स्यात्। उगिद्भ्यो वञ्चुप्रभृतिभ्य उगितश्चेति(४।१।६)ङीप् स्यात्। नकारान्तेभ्यो मन्प्रभृतिभ्य ऋन्नेभ्यो ङीबिति ङीपप्रत्यय इति (४।१।५)। एतच्च नास्ति। यतस्त्रियां टाबादयो विधीयन्ते। क्रियावचनश्च धातुः। क्रियायाश्चासत्त्वभूतत्वान् लिङ्गेन योगो नास्ति। तस्य द्रव्यधर्मत्वात्। एतेन तिङन्ताद् वाक्याच्च टाबादीनामुत्पत्तिः प्रतिक्षिप्ता। तयोरपि क्रियाप्रधानत्वात्। अणादीनामपि नैव धातोरुत्पत्तिरुपपद्यते। ते ह्यपत्यादिनार्थेन सम्बन्धे सति विधीयन्ते। धातुवाच्यस्यार्थस्यासत्त्वभूतत्वाद् यथा स्त्रीत्वेन योगो न सम्भवति तथाप्यपत्यादिना ह्यर्थेन। एतेन तिङन्ताद् वाक्याच्चाणादीनामुत्पत्तिर्निरस्ता। तदर्थस्यापि क्रियाप्रधानस्यापत्यादिना सम्बन्धाभावात्। देवदत्तस्य पचति यस्तस्यापत्यमिति सत्यपि सम्बन्धे तिङश्चेति (५।२।५६) ज्ञापकान्न भवति। येऽपत्यादिनार्थेन सम्बन्धे तद्धिता विधीयन्ते तेऽनन्तरोक्तया नीत्या मा भूवन्। ये तु स्वार्थे विधीयन्ते तैर्युक्तमेव भवितुमिति चेत् ? वाक्यमेतत्। यथैव हि स्वादीनां सामान्यविहितानां विशेषविहितैस्त्यदादिभिर्बाधितत्वात् तदुत्पत्तिर्नोपपद्यते तथा स्वार्थिकानामपि सामान्यविहितानां स्वार्थिकैस्तुमुन्नादिभिर्विशेषविहितैर्बाधितत्वान्नोपपद्यत एव। तिङन्तात् तर्हि के स्युरिति चेत् ? ज्ञापकान्न भविष्यन्ति। यदयं क्वचित् तद्धितविधौ तिङ्ग्रहणं करोत्यतिशायने तमबिष्ठनौ (५।२।५५) तिङश्चेति (५।२।५६)—तज् ज्ञापयति तिङन्तात् तद्धिता न भवन्तीति। वाक्यात् तर्हि भवेयुरिति चेत् ? अनभिधानान्न भविष्यन्ति। नहि देवदत्तस्याश्वक इत्युक्ते वाक्यार्थगता

अज्ञातादयोऽर्थाः कप्रत्ययेन द्योत्यन्ते । किं तर्हि ? अश्वशब्दगता एव । स्वादिभिरपि नैव तिङन्ताद् भवितव्यम् । तेषां ह्येकत्वादयोऽर्थाः । ते च तिङ्भिरेवोक्ताः । न चोक्तार्थानां प्रयोगो युक्तः । उक्तार्थानामप्रयोग इति वचनात् । ननु चोक्तार्थानामपि प्रयोगो दृश्यते यथैको द्वौ बहव इति चेत् ? युक्तोऽत्र प्रयोगो वचनग्रहणात् । प्रातिपदिकेत्यादौ हि सूत्रे (२।३।४६) वचनग्रहणस्यैतत् प्रयोजनं व्यवस्थापितं युक्तेष्वप्येकत्वादिषु प्रथमा यथा स्यादिति । इह तु यत्नाभावात् तिङन्तादुक्तार्थानां स्वादीनामुत्पत्तिर्न युक्ता । वाक्यादपि हि स्वादयो नैव भवितुमुत्सहन्ते । कर्मणि द्वितीयेत्यादिना (२।३।२) शास्त्रान्तरेणैकवाक्यात् तेषां निवर्त्तितत्वात् । नहि वाक्यार्थस्य क्रियात्मनः कर्मादौ क्वचिदन्तर्भावोऽस्ति । नापि प्रातिपदिकार्थलिङ्गादिषु । न च ङ्याप्भ्योऽन्या प्रकृतिरस्ति यत एते वक्ष्यमाणाः प्रत्यया उत्पद्येरन् । अतः पारिशेष्यादियमेव प्रकृति लभ्यते । तत् किं ङ्याप्प्रातिपादिकग्रहणेनेत्यत आह यद्यपीत्यादि । प्रत्ययपरत्वेनेति । हेतौ तृतीया । अङ्गभपदसंज्ञार्थं यच्छयोश्च लुगर्थमित्याद्युपक्षिप्य भाष्यानुसारेण तदन्यप्रयोजननिरासेन प्रत्याख्यातस्य सूत्रस्य वृत्तिकारः प्रयोजनमाह वृद्धावृद्धेत्यादिना । वृद्ध्यादीनां द्व्यच्पर्य्यन्तानां द्वन्द्वं कृत्वा लक्षणशब्देन बहुव्रीहिनिर्देशः कृतः । वृद्धादयो लक्षणं चिह्नं कारणं वा यस्य प्रत्ययविधेः स तथोक्तः । प्रत्ययविधिशब्दः प्रत्येकमभिसम्बध्यते । तत्संप्रत्ययार्थमिति । ङ्याप्प्रातिपदिकसंप्रत्ययार्थः । एतदुक्तं भवति । वृद्धादीनि ङ्याप्प्रातिपदिकविशेषणानीत्येष संप्रत्ययो यथा स्यादित्येवमर्थं ङ्याप्प्रातिपदिकग्रहणं कर्त्तव्यम् । इतरथा हीत्यादि । यदि ङ्याप्प्रातिपदिकग्रहणं न क्रियेतेत्यर्थः । समर्थविशेषणमेतत् स्यादिति । समर्थानां प्रथमाद्वेत्यनेन (४।१।८२) समर्थानां प्रत्ययविधानाद् यतः प्रत्ययो विधीयते तस्यैव समर्थस्य सुबन्तस्यैतद् वृद्ध्यादिकं विशेषणं स्यात् । ङ्याप्प्रातिपदिकविशेषणं न स्यात् । यदि ङ्याप्प्रातिपदिकग्रहणं न क्रियेत कः पुनर्वृद्ध्यादीनां समर्थविशेषणत्वे दोषो यतस्तन्नेष्यते ? तिकादिभ्यः फिञिति (४।१।१५४) वर्त्तमान उदीचां वृद्धादगोत्रादितीह (४।१।१५७) फिञ् प्रसज्येत । ज्ञानां ब्राह्मणानामपत्यमिति ज्ञशब्दोऽयमिगुपधज्ञाप्रीकिरःक

इति (३।१।१३५) कप्रत्ययान्तः । यद्यपि प्रातिपदिकावस्थायामवृद्धः समर्थावस्थायान्तु नामीति (६।४।३) दीर्घत्वे कृते वृद्ध एव भवति । इह तु न स्यादेव । ब्रयोर्ब्राह्मणयोरपत्यमिति । अत्र हि त्राशब्दष्टाबन्तो यद्यपि प्राग् वृद्धः षष्ठीद्विवचनान्तस्योसि कृतेऽयादेशे च पश्चाद् वृद्धो न भवति । ननु च प्रत्यये कृते लुप्तायां विभक्तौ वाक्यगम्यः संख्याविशेषो वृत्तौ न प्रतीयते । तत् कथं द्विवचनबहुवचनान्तात् प्रत्ययप्राप्त्यप्राप्ती चोद्येते ? वृत्तावपि कदाचिदर्थात् प्रकरणाद्वा विशेषप्रतीतिर्भवतीति युक्तं चोदयितुम् । प्राचामवृद्धात् फिन् ( ४।१।१६० ) बहुलमितीहैव स्यात् ब्रयोर्ब्राह्मणयोरपत्यमिति । एतद्धि समर्थमवृद्धं भवति । इह च न स्यात् । त्रानां ब्राह्मणानामपत्यमिति । त्राशब्दो हि प्रागवृद्धोऽपि पश्चात् समर्थावस्थायामिह वृद्धो भवति । अवर्णा—ऽत इञ् (४।१।९५) । इहैव स्यात् । दक्षस्यापत्यमिति । एतद्धि समर्थमकारान्तं भवति । इह च न स्यात् । दक्षयोर्दक्षाणामपत्यमिति । एतद्धि समर्थमकारान्तं न भवति । स्वर—ओरञ् (४।१।७१) । अनुदात्तादेश्चेति (४।३।१४०) । इहैव स्यात् त्वचो विकार इति । एतद्धि समर्थमनुदात्तादि भवति । सावेकाचस्तृतीयादिर्विभक्तिरिति (६।१।१६८) विभक्तेरुदात्तत्वे प्राप्ते शेषस्यानुदात्तत्वात् । प्रातिपदिकावस्थायां त्वेतदाद्युदात्तमेव । क्विबन्ताद् धातुस्वरेण । इह तु न स्यात् सर्वेषां विकार इति । एतद्धि सुबन्तमाद्युदात्तम् । सर्वस्य (६।१।१९१) सुपीतराद्युदात्तत्वविधानात् । प्रातिपदिकावस्थायां त्वेतदनुदात्तादि । इण्शीभ्यां वन्निति (उण्, १।१५०) वर्त्तमाने सर्वनीघृष्वरिष्वलष्वशिवपद्वप्रह्वेष्वा अस्वतन्त्रे (उण्, १।१५१) इतरान्तोदात्तस्य सर्वशब्दस्य निपातनात् । द्वाज्—नौद्व्यचष्ठन् (४।४।७) । इहैव स्यात् त्वचा तरतीति । एतद्धि समर्थं द्व्यच् । इह तु न स्याद् घटेन तरतीति । एतद्धि समर्थं द्व्यज् न भवतीति । ङ्याप्प्रातिपदिकग्रहणे तु सति यद्यपि समर्थात् प्रत्ययो विधीयते तथापि ङ्याप्प्रातिपदिकस्यैव वृद्धादिकं विशेषणं विज्ञायते । तदुपादानसामर्थ्यात् । तत्रैवमभिसम्बन्धः कर्त्तव्यः । समर्थं हि यद्वृद्धादि ङ्याप्प्रातिपदिकं तस्मात् प्रत्ययो भवतीति । ननु चाक्रियमाणे ङ्याप्प्रातिपदिकग्रहणे वृद्धादीनि

समर्थविशेषणानीति न भविष्यन्ति । ज्ञापकात् । यदयं नौ द्व्यचष्ठनिति (४।४ ७) नौग्रहणं करोति तज् ज्ञापयति नैतानि समर्थविशेषणानीति । यदि ह्येतानि समर्थविशेषणानि स्यु नौग्रहणं न कुर्य्यात् । द्व्यच एव सिद्धत्वात् । एतदपि सुबन्तं द्व्यज् भवति नावा तरतीति । नैतदस्ति । नियमार्थमपि नौग्रहणं विज्ञायेत । ओकारान्ताद् द्व्यचो नौशब्दादेव नान्यस्मादिति । तेन ग्लौशब्दात् प्रत्ययो निवर्त्तितो भवति । तस्मात् कर्त्तव्यं ङ्याप्प्रातिपदिकग्रहणम् । स्वरूपविधिविषय इति । स्वरूपाश्रयो विधिः स्वरूपविधिः । स एव विषय स्तस्य वा विषयः स्वरूपविधिविषयः । तत्रेयं परिभाषा । स्वरूपविधिस्तु यत्र प्रातिपदिकं स्वरूपेणोपादाय कार्य्यं विधीयते तत्र भवति । अतएवाह प्रातिपदिकस्वरूपग्रहणे सतीत्यादि । कथं पुनर्ज्ञायते स्वरूपविधिविषयैव परिभाषेत्यत आह तथा चेत्यादि । तथाहीत्यर्थः । पूर्वकालैकसर्वेत्यादेः सूत्रात्(२ १।४८)समानाधिकरणेनेत्यनुवर्त्तमाने युवशब्दस्य जरतीशब्देन समानाधिकरणेन युवाखलतिपलितेत्यादिशास्त्रेण (११ ६७) समासो विधीयते । स च समासो नोपपद्यते । भिन्नलिङ्गेन सामानाधिकरण्याभावात् । न च शक्यते वक्तुं युवतिशब्दस्य समासो जरतीशब्देन सामानाधिकरण्येन भवतीति। युवशब्दस्य समास उच्यमानो यथा शब्दान्तरस्य गोशब्दस्य न सिध्यति तथा युवतिशब्दस्यापि । तस्मात् तत्रैवायं ज्ञापयत्यस्तीयं परिभाषा प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणम् भवतीति । तस्यां हि सत्यां युवशब्दस्य ग्रहणे युवतिशब्दस्यापि ग्रहणं भविष्यतीति युज्यते तस्य जरतीशब्देन समानाधिकरणेन समासः । तदेवं युवशब्दस्यापि प्रादिपदिकस्य स्वरूपग्रहणे यस्मादियं परिभाषा ज्ञापिता तस्मात् स्वरूपविधिविषय एवावतिष्ठते यत्र प्रातिपदिकस्य स्वरूपेण ग्रहणम् । नचेह प्रातिपदिकस्य स्वरूपेण ग्रहणम् । अतो नोपतिष्ठते । तादृशमेवेत्यादि । यादृशोऽस्या विषयः प्रदर्शितः स्वरूपग्रहणविशिष्टस्तादृशं स्वरूपग्रहणविशिष्टमेव । यदि तर्हि स्वरूपविधिविषये परिभाषेयमुपतिष्ठते तर्हि सर्वनाम्नस्तृतीया चेत्यत्र (२।३।२७) नोपतिष्ठते । अत्र स्वरूपग्रहणाभावात् । ततश्चेहैव तृतीयाषष्ठ्यौ स्याताम् भवता हेतुना भवतो हेतोरिति । इह तु न स्याताम् भवत्या हेतुना भवत्या हेतो-

रिति। भवच्छब्दस्यैव हि सर्वनामसंज्ञा। तस्य सर्वादिषु पाठात्। नैष दोषः। सर्वादीनीत्यत्र (१।१।२७) सूत्रे यद्यपि प्रत्येकं सर्वादीनि सूत्रे न पठ्यन्ते—सर्वादिगणे तु पठ्यन्ते। तत्र गणपठितानि सर्वादीनि स्वरूपेणोपदिश्य संज्ञा विधीयमाना लिङ्गविशिष्टानामपि तेषां भवति। तत्रास्याः परिभाषाया उपस्थानात्। तेन लिङ्गविशिष्टानामपि सर्वादीनां सर्वनामकार्य्यमुपपद्यते। यद्येवमिममेव न्यायमाश्रित्य शक्यं ड्याब्ग्रहणमकर्त्तुम्। नैतदस्ति। नहि प्रातिपदिकसंज्ञा लिङ्गविशिष्टस्यार्थवतः शब्दरूपस्य भवितुमर्हति। अप्रत्यय इति (१।२।४५) प्रतिषेधात्। न च प्रातिपदिकसंज्ञाविधौ सर्वेऽर्थवन्तः संज्ञिनः स्वरूपेण शक्या दर्शयितुम्। तेषामानन्त्यात्। यद्येवं णाविष्टवत् प्रातिपदिकस्येत्यत्रापि (ग,सू,१८६) तर्हीयं परिभाषा नोपतिष्ठते। स्वरूपाग्रहणात्। ततश्च लिङ्गविशिष्टेष्विष्ठवद्भावो न स्यात्। तत्र को दोषः? कुमारीमाचष्टे कुमारीयतीत्यत्र टिलोपो न स्यात्। नैष दोषः। बहुलमिष्ठवद्भाव इष्यते। तथाच चुरादौ पठ्यते प्रातिपदिकाद् धात्वर्थे बहुलमिष्ठवच्चेति। तस्माद् बहुलवचनाल्लिङ्गविशिष्टस्यापीष्ठवद्भावो भविष्यति। किञ्चेत्यादिना प्रयोजनान्तरं समुच्चिनोति। तदिति ड्यापोः प्रत्यवमर्शः। ङ्यन्तादाबन्ताच्च तद्धितविधानं यथा स्यादित्येवमर्थञ्च ड्याब्ग्रहणम्। कालितरेति। कालशब्दाज्जनपदादिसूत्रेण (४।१।४२) ङीष्। तदन्ताद्द्विवचनविभज्येत्यादिना (५।३।५७) तरप्। घरूपकल्पेत्यादिना (६।३।४३) ह्रस्वः। हरिणितरेति। हरितशब्दाद् वर्णादनुदात्तात् तोपधात्तो न इति (४।१।३९) ङीप्। तकारस्य नकारः। अट्कुप्वाङिति (८।४।२) णत्वम्। किं पुनः कारणं न सिध्यतीत्यत आह विप्रतिषेधाङ्घीत्यादि। स्त्रीप्रत्ययस्यावकाशो यत्र स्त्रीत्वमेव विवक्ष्यते नतु प्रकर्षः कालीति। प्रकर्षप्रत्ययस्यावकाशो यत्र प्रकर्षो विवक्ष्यते नतु स्त्रीत्वं कालतर इति। उभयविवक्षायान्तूभयं प्राप्नोति। तत्र विप्रतिषेधे परं (१।४।२) कार्य्यमित्यसति ड्याब्ग्रहणे परत्वादातिशायिकः स्यात्। अस्मिंस्तु सति ड्यापोः स्तद्धितविधाने प्रकृतित्वेनाश्रयणात् पूर्वं ड्याब्भ्यां भवितव्यमिति तदन्तात् तद्धितविधिः सिध्यति। ननु चान्तरङ्गः स्त्रीप्रत्ययः। वहिरङ्गास्तद्धिताः। तथाहि समर्थानां प्रथमाद्वेत्यधिकाराद् (४।१।८२) विभक्त्यन्तास्त

उत्पद्यन्ते । विभक्तयश्च कर्माद्यपेक्षाः । कर्मादयश्च वाह्यक्रियानिमित्तत्वाद् वहिरङ्गाः । ततश्च निमित्तस्य वहिरङ्गत्वात् तद्धिता अपि वहिरङ्गाश्रया एव भवन्ति । लिङ्गस्य तु सम्बन्ध्यन्तरानपेक्षत्वादन्तरङ्गत्वञ्च । अतस्तन्निमित्ता अपि टाबादयो ऽन्तरङ्गा भवन्ति । ततश्चाऽन्तरङ्गत्वादेव टाबादिभि स्तावद् भवितव्यम् । पश्चात् तदन्तात् तद्धितैरित्यपार्थकं ङ्याब्ग्रहणम् । नैतदस्ति । तदन्तात् तद्धितविधानार्थं ङ्याब्ग्रहणमित्यत्र हि वाक्ये तद्धितग्रहणेन स्वार्थिका ये तद्धितास्त एव विवक्षिताः । इम मेवार्थं सूचयितुं कालितरा हरिणितरेति स्त्रीप्रत्ययान्तात् स्वार्थिक एव तरप्प्रत्यय उदाहृतः । स्वार्थिकेषु च समर्थानां (४।१।८२) मित्येतन्नानुवर्त्तते । तथाहि वक्ष्यति वृत्तिकारः स्वार्थिकप्रत्ययावधिश्चायमधिकारः प्राग्दिशो (५।३।१) विभक्तिरिति यावत् । स्वार्थिकेषु ह्यस्योपयोगो नास्तीति । एवञ्च सति विभक्त्युत्पत्तिमनपेक्ष्य प्रातिपदिकादेव स्वार्थिकैर्भवितव्यमिति कुतस्तेषां वहिरङ्गत्वम् ? नन्वेवमपि कालितरेत्यद्यनुदाहरणम् । तरप्प्रत्ययस्य वहिरङ्गत्वात् । स हि यद्यपि विभक्त्युत्पत्तिं नापेक्षते प्रतियोगिनन्तु वाह्यार्थमपेक्षत एव । स्त्रीप्रत्ययस्य तु न क्वचित् प्रतियोग्यपेक्षेति तस्यान्तरङ्गत्वम् । नैष दोषः । उदाहरणदिगियं वृत्तिकारेण दर्शिता । एतानि त्वत्रोदाहरणानि दर्शयितव्यानि । एनिका । श्येनिका । रोहिणिकेति । अत्र हि यदि पूर्वं तद्धितः स्यात् तदैतश्येतरोहितशब्देभ्यो ऽज्ञाताद्यर्थविवक्षायां कप्रत्यये कृते वर्णादनुदात्तात् तोपधात् तो न इत्यनेन (४।१।३९) ङीप्नकारौ न स्याताम् । यदि तर्हि ङ्याबन्तात् तद्धितविधानार्थं ङ्याब्ग्रहणं समासान्ता अपि तदन्तादेव स्युः । ततश्च बहवो गोमन्तो ऽस्यां नगर्यामिति स्याद् बहुव्रीहौ कृत उगितश्चेति (४।१।६) ङीप् । ततश्च नद्यृतश्चेति (५।४।१५३) कपि बहुगोमतीकेति रूपं स्यात् । बहुगोमत्केति चेष्यते । नैष दोषः । नहि समासान्ताः समासादुत्पद्यन्ते । किं तर्हि ? अकृत एव समासे तदर्थादुत्तरपदात् । तथाहि न कपीत्यत्र (७।४।१४) वक्ष्यति वृत्तिकारो गोस्त्रियोरुपसर्जनस्येत्ययमपि (१।२।४८) ह्रस्वः कपि न भवति । समासार्थे ह्युत्तरपदे कपि कृते पश्चात् समासेन भवितव्यमिति । ङ्याप्प्रत्ययान्तं समासात् प्रातिपदिकं न भवतीति । नच बहवो गोमन्तोऽस्यां नगर्यामित्यत्र

वाक्ये समासार्थमुत्तरपदं स्त्रियां वर्त्तत इति प्राक् कपेव भवितव्यम्। पश्चात् समासेन। ततः स्त्रीविवक्षायां स्त्रीप्रत्ययेन प्रत्ययानुपूर्व्या बहुगोमत्केति सिद्धं भवति। यदि तर्ह्युक्तत एव समासे तदर्थादुत्तरपदात् समासान्ता भवन्ति तदा नञस्तत्पुरुषादित्यत्र (५।४।७१) नञः परे वक्ष्यमाणा य ऋगादय स्तदन्तात् तत्पुरुषात् समासान्ता न भवन्तीत्येष वृत्तिग्रन्थो विरुध्यते। तेभ्य स्तत्पुरुषसमासार्थेभ्यः समासान्ता न भवन्तीति वक्तव्यं स्यात्। नास्ति विरोधः। तत्र ह्यन्तशब्दः समीपवाची। त ऋगादयोऽन्तभूताः समीपभूता यस्य स तथोक्तः। कः पुनरसौ? नञःप्रकृतत्वात् स एव विज्ञायते। तत्पुरुषादित्यत्रापि तत्पुरुषशब्दस्तादर्थ्यात् तत्पुरुषार्थे उत्तरपदे वर्त्तते। तत्र पुनर् ऋगादेः श्रुतत्वादृगादिरेव विज्ञायते। तदन्तात् तत्पुरुषादिति च व्यधिकरणे पञ्चम्यौ। ततोऽयमर्थः। नञः परे य ऋगादयस्ते समीपभूता यस्य नञ स्तस्मात् परं यत् तत्पुरुषार्थमृगादिपदं ततः समासान्तो न भवतीति। अथवाऽवयववचनोऽन्तशब्दः। समानाधिकरणे एव पञ्चम्यौ। तादर्थ्यात्। ऋगाद्यन्तं तत्पुरुषार्थं यदुत्तरपदं तदेव। तदन्तात् तत्पुरुषार्थादित्युक्तम्। ततश्चायमर्थो नञः परे य ऋगादय स्तदन्तात् तत्पुरुषार्थादुत्तरपदात् समासान्ता न भवन्तीति। तत् पुनस्तदन्ततत्पुरुषार्थम्। उत्तरपदं सामर्थ्यादृगाद्येव विज्ञायते। बहुव्रीहौ संख्येये डजबहुगणादित्यत्र (५।४।७३) तर्हि योऽयं वृत्तिग्रन्थः संख्येये योऽयं बहुव्रीहिर्वर्त्तते तस्माद् बहुगणान्ताड् डच्प्रत्ययो भवतीति तस्य विरोधः। नास्ति विरोधः। अत्र हि बहुव्रीह्यर्थमुत्तरपदमेव तादर्थ्याद्बहुव्रीहिरित्युक्तं भवति। तदयमर्थः। संख्येये यद्बहुव्रीह्यर्थमुत्तरपदं वर्त्तते तस्माड् डच्प्रत्ययो भवतीति। अनया दिशाप्यन्य एवंजातीया विरोधाः परिहर्त्तव्याः। तदेवं स्थितमेवैतत् तदन्तात् तद्धितविधानार्थं ड्याब्ग्रहणमिति। विप्रतिषेधात् तद्धितविधानार्थं ड्याब्ग्रहणमिति। विप्रतिषेधात् तद्धितबलीयस्त्वमिति। यद्येवं यूनस्तिः (४।१।७७) ऊङुत (४।१।६६) इत्येतयोरपि तूङोर्ग्रहणं कस्मान्न विज्ञायते? तदन्तात् तद्धितोत्पत्तिर्यथा स्याद् युवतितरा ब्रह्मबन्धूतरेति? नद्याः शेषस्यान्यतरस्यामितूङो (६।३।४४) विकल्पेन ह्रस्वत्वं न कर्त्तव्यम्। ड्याब्ग्रहणस्योपलक्षणार्थत्वात्।

स्त्रियामिति (४।१।३) प्रकृत्य येषां विधानं तदुपलक्षणार्थमिह ड्याब्ग्रहणम्। अत ऊङोऽपि ग्रहणमिह कृतमेव वेदितव्यम्। ड्याब्ग्रहणं यद्युपलक्षणार्थमन्यतरस्यैव ग्रहणं कर्त्तव्यम्। एकेनापि हि स्त्रीप्रत्यया उपलक्ष्यन्त एव। सत्यमेतत्। वैचित्र्यार्थन्तु द्वयोर्ग्रहणम्। यावादिभ्यः कन् (५।४।२९)। लोहितान्मणौ (५।४।३०)। वर्णे चानित्ये (५।४।३१) इत्यनेन तु विकल्पेन स्वार्थिकेन स्त्रीप्रत्ययस्य बाधनमिष्यते। तत्र यदा बाधा तदा लोहितशब्दात् कनि टापि कृते चेत्त्वे लोहितिकेति भवितव्यम्। यदा तु न बाधा तदा वर्णादनुदात्तात् तोपधात् तो न इति (४।१।३९) ङीम्नकारयोः कनि च केऽण इति (७।४।१३) ह्रस्वत्वे कृते लोहिनिकेति भवितव्यम्। तस्माद् वक्तव्यमेवैतल् लोहितालिङ्गबाधनं वेति (५।४।३०,वा)।

## २। स्वौजसमौट्छष्टाभ्याम्भिस्ङेभ्याम्भ्यस्ङसिभ्याम्भ्यस्ङसोसाम्ङ्योस्सुप्।

उकारादयोऽनुबन्धा इत्यादि। तत्र प्रथमैकवचनस्योकार उच्चारणार्थः। अनङ् साविति (७।१।९३) विशेषणार्थः कस्मान्न विज्ञायते ? व्यावर्त्त्याभावात्। जसो जकारोऽसंदिग्धोच्चारणार्थः। असति हि तस्मिन्नौकारस्यावादेशे कृते संदेहः स्यात् कीदृशस्य प्रत्ययस्योच्चारणमिति। तत्र व्याख्यानं कर्त्तव्यमापद्यते। अथ जसःशीत्यत्र (७।१।१७) विशेषणार्थः कस्मान्न विज्ञायते ? असःशीतुच्यमानेऽप्यतिप्रसङ्गाभावात्। औटष्टकारः सुडिति प्रत्याहारग्रहणार्थः। वृत्तौ त्वेष ग्रन्थो नास्ति। भवितव्यं त्वनेन। लेखकप्रमाददोषादिदानीमन्तर्हितः। शसः शकार औटष्टकारस्य खरि चेति (८।४।५५) चर्त्वेनासंदिग्धोच्चारणार्थः। शकारः सन्देहनिरासार्थः। इतरथा ह्यौड्सितुच्यमाने सन्देहः स्यात् किं टकारस्येदमुच्चारणमुत डकारस्येति। तत्र डकारोच्चारणाट्टिलोपः स्यात्। ननु च सत्यपि शकारे भवितव्यमेव सन्देहेन। किमिदं कृतचर्त्वस्य डकारस्योच्चारणं टकारस्य वेति। नैतदस्ति। यदि हि डकारस्य स्याच्छकारोच्चारणमनर्थकं स्यात्। अथ तस्माच्छसो नः पुंसीति (६।१।१०३) तत्र विशेषणार्थः शकारः कस्मान्न

भवति ? अम्ग्रहणेऽपि सत्यतिप्रसङ्गाभावात् । टा इत्यत्र टकारो विशेषणार्थः । टाङसिङसामिनात्स्याः इत्यत्र ( ७।१।१२ ) । सुपां सुलुग्पूर्वसवर्णाच्छेयाडाड्यायाजालः (७।१।३९) सुपां सुलुक् पूर्वसवर्ण आ आत् शे इतयाकारप्रश्लेषः । ततोऽसति टकारे तस्यापि ग्रहणं स्यात् । चतुर्थ्येकवचनादिषु ङकारो घेर्ङितीति (७।३।१११) विशेषणार्थः । पञ्चम्या एकवचन इकारः षष्ठेकवचनाद् विशेषणार्थः । इतरथा हि युष्मदस्मद्भ्यां ङसोऽशितत्र (७।१।२७) पञ्चम्येकवचनस्यापि ग्रहणं स्यात् । संख्याकर्मादयश्चेत्यादि । संख्या स्वादीनामर्थे विहिता बहुषु बहुवचनमित्यादिना (१।४।२१) शास्त्रान्तरेण । कर्मादयश्च कर्मणि द्वितीयेत्येवमादिना (२।३।२) । तेन सहास्यैकवाक्यतेति । कर्मणि बहुत्वे बहुवचनं शस् । कर्मणि द्वित्वैकत्वयोर्द्विवचनैकवचने औडमौ । एवमन्यत्राप्येकवाक्यता वेदितव्या । यदि तर्हि तेन सहास्यैकवाक्यता तदा यदुक्तं बहुषु बहुवचनमित्यत्र (१।४।२१) यत्र च संख्या सम्भवति तत्रायमुपदेशः । अव्ययेभ्यस्तु निःसंख्येभ्यः सामान्यविहिताः स्वादयो विद्यन्त एवेति तद् विरुध्यते । एकवाक्यतायां हि विशिष्ट एवार्थे कर्मादिसम्बन्धिन्येकत्वादौ स्वादीनां विधानात् सामान्यविहितत्वं नोपपद्यते । यदपीदं तत्रोक्तम् ङ्याप्प्रातिपदिकात् स्वादयो लस्य तिबादय इति बहुवचनं विहितं तस्यानेन बहुत्वसंख्यावाच्यत्वेन विधीयत इति तदपि विरुध्यत एव । नह्येकवाक्यतायां विहितस्य बहुवचनस्य पश्चाद् बहुत्वसंख्याया वाच्यत्वेन विधानं युक्तम् । तेन शास्त्रान्तरेणानेन च संहत्य बहुत्वसंख्यायामेव बहुवचनविधानात् पूर्वकस्तावन्नास्ति विरोधः । एकवाक्यतायामपि हि यथा स्वादीनां सामान्येन विधानमुपपद्यते तथा बहुषु बहुवचनमित्यत्रैव (१।४।२१) प्रतिपादितम् । योऽपि द्वितीयो विरोध उद्भावितः सोऽपि न भवत्येव । ङ्याप्प्रातिपदिकात् स्वादयो लस्य तिबादय इति बहुवचनं विहितमिति बहुषु बहुवचनमित्यनेन (१।४।२१) सहैकवाक्यतामापन्नेनेत्ययं तत्राभिप्रायो वेदितव्यः । तस्यानेन सूत्रेण बहुत्वसंख्या वाच्यत्वेन विधीयत इत्यत्रापि स्वादिसूत्रेण (४।१।२) लस्येत्यादिना (३।४।७७) च शास्त्रेण सहैकवाक्यतां प्रतिपन्नेनेत्येषोऽभिप्रायो द्रष्टव्यः । एवञ्च संहत्यैव बहुवचनं विहितम् ।

संख्यैव च तस्य बहुत्वसंख्या वाच्यत्वेन विधीयत इति कुतो विरोधः ? ननु च बहुषु बहुवचनमित्येकमिदं (१।४।२१) शास्त्रम् । तस्य यदि स्वादि- (४।१।२) सूत्रेणैकवाक्यता ततो लस्येत्यादिना (३।४।७७) शास्त्रान्तरेण सा नोपपद्यते । अथ तेनैकवाक्यता ? स्वादिसूत्रेण (४।१।२) सा नोपपद्यते । नैष दोषः । द्वे ह्येते वचने तन्त्रोच्चारिते । तत्रैकस्य स्वादि (४।१।२) सूत्रेणैक- वाक्यता । अपरस्य लस्येत्यादिना (३।४।७७) शास्त्रान्तरेण । अथवाऽन्यथा विरोधाभावः प्रतिपाद्यते । इह हि स्वादयोऽनेन सूत्रेण कर्म्मणि द्वितीयेत्येव- मादिकं (२।३।२) शास्त्रमनपेक्ष्य वा विधीयेरन् ? तद्वापेक्ष्य ? तेन सहैक- वाक्यतामापन्ने ते इति द्वौ पक्षौ । तत्राद्ये पक्षेऽविशिष्टैव स्वादयो विधीयन्त इति । तथा विहितानान्तु तेषां नियमः क्रियते । यत्र संख्या सम्भवति तत्रासौ बहुषु बहुवचनमित्यादिना (१।४।२१) शास्त्रान्तरेण कर्मादिसम्बन्ध्येकत्वादि- संख्यावाच्यत्वेन विधीयते । यानि तु निःसंख्यान्यव्ययानि तेभ्यः सामान्य- विहिताः स्वादयः सन्तीत्येव । द्वितीये तु पक्षे विशिष्ट एवार्थे कर्मादि- सम्बन्धिनि बहुत्वादौ स्वादयो विधीयन्ते । तत्र बहुषु (१।४।२१) बहुवचन- मित्याद्यः पक्ष आश्रितः । इह तु द्वितीय इति नास्ति विरोधः । पक्षान्तरमाश्रित्य तथाभिधानात् । अथ द्वितीये पक्षे कथमव्ययेभ्यः सुबुत्पत्तिः ? नह्येकवाक्यतायां संख्याकर्माद्यर्थरहितेभ्यः स्वाद्युत्पत्तिरुप- पद्यते । नैष दोषः । ज्ञापकाद् भविष्यति । यदयमव्ययादाप्सुप (२।४।८२) इत्यव्ययादुत्पन्नस्य सुपो लुकं शास्ति तज्ज्ञापयति भवत्यव्ययाद् विभक्त्युत्पत्ति- रिति । कुमारीति । वयसि प्रथम इति (४।१।२०) ङीप् । गौरीति । षिद् गौरादिभ्यश्चेति (४।१।४१) ङीष् । शार्ङ्गरवीति । शार्ङ्गरवाद् यञो ङीन् (४।१।७३) । खट्वेति । अजाद्यतष्टाबिति (४।१।४) टाप् । बहुराजेति । डाबु- भाभ्यामन्यतरस्यामिति (४।१।१३) डाप् । कारीषगन्ध्येति । करीषस्य गन्ध इव गन्धो यस्येति । गन्धस्येदुत्पूतिसुसुरभिभ्यः (५।४।१३५) । उपमाना- च्चेतीत्त्वम् (५।४।१३७) । करीषगन्धेरपत्यमिति । यस्येति चेत्यकारलोपः (६।४।१४८) । तद्धितेष्वचामादेरित्यादिवृद्धिः (७।२।११७) । अणिञोरनार्षयो र्गुरूपोत्तमयोरित्यादिना (२।४।५८) ष्यङादेशः । यङश्चाबिति (४।१।७४) चाप् ।

## ३ । स्त्रियाम् ।

ङ्याप्योरनेनैव विधानादिति । एतेन स्त्रियामित्यधिकृत्य प्रत्ययविधौ ङ्याबन्तायाः प्रकृतेरभावमाह । एष च प्रातिपदिकमात्रमत्र प्रकरणे सम्बध्यत इत्यत्र हेतुः । यदि हि ङ्याबन्ता प्रकृतिरिह प्रकरणे सम्भवेत् ततो ङ्यापावपि संबध्येयाताम् । सा ङ्याब्रूपा न सम्भवति । अतो न ताविह सम्बध्येते । इह च स्त्रीत्वं प्रत्याचार्य्याणां दर्शनभेदः । क्वचिच्च दर्शने दोषो दृश्यते । तत्र केषाञ्चिद् दर्शनम्—

स्तनकेशवती स्त्री स्याल्लोमशः पुरुषः स्मृतः ।
उभयोरन्तरं यच्च तदभावे नपुंसकम् ॥ १ ॥ इति ।

स्तनकेशवतीति । भूम्न्यतिशायने वा मतुप् । लोमश इत्यत्रापि लोमादिपामादिसूत्रेण (५।२।१००) शप्रत्ययः । उभयोरन्तरमिति । उभयोः स्त्रीपुंसयोः सदृशमित्यर्थः । तत् पुनः सादृश्यं लिङ्गवत्त्वेन । एवं तर्हि तदुभयं समुदितं यत्र तन्नपुंसकं प्राप्नोति । भवति हि समुदायरूपं समुदायिरूपेण लिङ्गित्वेन सदृशमित्यत आह तदभाव इति । एतदुभयं यत्र नास्ति तन्नपुंसकमिति । तेन न संभवत्येष दोषः । यदि तदभावे नपुंसकमित्येतदुच्यते ततोऽव्ययानां तिङन्तानाञ्चैव नपुंसकत्वं स्यात् । तथाप्युभयोरन्तरं यदित्येतावदुच्यत एवमपि कुक्कुटमयूर्य्यौ इत्येवमादीनां लिङ्गसमुदायवतां समुदायानां नपुंसकत्वं प्रसज्येत । तस्मादुभयोरन्तरं यत् तदभाव इति च द्वयमप्युक्तम् । तदेवं यत्र स्त्री न पुमान् लिङ्गवच्च वस्तु तन्नपुंसकमित्युच्यते ततोऽव्ययानां तिङन्तानाञ्च नपुंसकत्वं न भवतीत्युक्तं भवति । अत्र दर्शने भ्रुकुंसे च टाप् प्रसज्यते । तस्य हि स्तनकेशसम्बन्ध उपलभ्यते । भ्रुकुंसः स्त्रीवेशधारी नर्त्तकः पुरुष उच्यते । खट्वादीनाञ्च स्तनकेशाभावात् स्त्रीत्वं न स्यात् । वृक्षादीनाञ्च लोमशत्वाभावात् पुंस्त्वाभावः प्राप्नोति । खरकुट्यादीनाञ्च लोमशत्वात् पुंस्त्वम् । ततश्च खरकुटीः पश्येति तस्माच्छसो नः पुंसीति (६।१।१८) नत्वमापद्येत । अन्येषां तु दर्शनं

संस्त्यानं प्रसवः स्थितिश्चेति । संस्त्यानमपचयस्वभावं (B) स्त्रीत्वम् । तद् यत्रास्ति सोऽर्थः स्त्री । प्रसव उपचयात्मकः पुंस्त्वम् । तद् यत्रास्ति स पुमान् । उपचयापचयरहिता यावस्था तदात्मिका स्थितिर्नपुंसकत्वम् । तद् यत्रास्ति तन्नपुंसकमिति । अत्रापि दर्शने संस्त्यानादेस्त्रयस्य सर्वत्र भावादेकैकं वस्तु स्त्री पुमान् नपुंसकञ्च प्रसज्येत । संस्त्यानविवक्षायामेव स्त्रीत्वं भवति । प्रसवविवक्षायामेव पुंस्त्वम् । स्थितिविवक्षायामेव नपुंसकत्वम् । अतोऽयमदोष इति चेत् ? अयुक्तमेतत् । तथाह्युपचीयते कुमारीत्यपि कुमारी स्त्री भवति । न पुमान् । अपचीयते वृक्ष इति संस्त्यानविवक्षायामपि वृक्षः पुमानेव भवति । न स्त्री । उपचीयते कुण्डमपचीयते वेत्युपचयापचययोरन्यतरविवक्षायामपि कुण्डं नपुंसकमेव भवति। न पुमान् नापि स्त्री । तदेव माचार्य्याणां स्त्रीत्वं प्रति दर्शनभेदाद् दोषदर्शनाच्च पृच्छति स्त्रियामित्युच्यते । केयं स्त्रीत्यादि । वृत्तिकारस्तु विदिताभिप्रायो दर्शनान्तरमाश्रित्याह सामान्यविशेषा इत्यादि । सामान्यानि विशेषाश्चेति । तथा सामान्यानि च तानि तुल्यजातीयपदार्थसाधारणत्वाद् विशेषाश्च परस्परतो विजातीयेभ्यश्च विशिष्यन्ते व्यावर्त्त्यन्त इति सामान्यविशेषाः स्त्रीत्वादयो गोत्वादय इवेति । यथैव हि गोत्वादयः सामान्यविशेषा भिन्नेष्वपि स्वाश्रयेष्वभिन्नाकारबुद्ध्यभिधानहेतवस्तथा स्त्रीत्वादयोऽपि । यथैव हि गोत्वादय स्तुल्यजातीयेषु सर्वेषु वर्त्तन्ते विजातीयेभ्यस्तु व्यावर्त्तन्ते तथा स्त्रीत्वादयोऽपि । तस्मात् तद्वदेव तेऽपि सामान्यविशेषाः । ननु च सामान्य विशेषाणां सव्यक्त्यनुगतत्वादस्मिन्नपि दर्शने स एव सर्वत्र सर्वलिङ्गताप्रसङ्गः । तत् किमिति दर्शनान्तरमुत्सृज्येदं दर्शनमाश्रितमित्याह बहुप्रकारा व्यक्तय इति । व्यज्यन्त आभिरिति व्यक्तयः सामान्यविशेषाणा-

---

(B) तिरोभावोऽपचयः शुक्रक्षयः । पुरुषापेक्षया स्त्रीणां न्यूनत्वं वाऽपचयः । आविर्भाव उपचयः शुक्रवृद्धिः । उपचयापचयरहिता यावस्था शुक्रशोणितयोः साम्यावस्थेति । तथाच मनुः—

पुमान् पुंसोऽधिके शुक्रे स्त्री भवत्यधिके स्त्रियाः ।
समेऽपुमान् पुंस्त्रियौ वा क्षीणेऽल्पे च विपर्ययः ॥ ( ३।४९ ) इति ।

अत्र मेधातिथिः—शुक्रं वीर्यम् । पुरुषस्य रेतः स्त्रियाः शोणितमिति ।

माश्रयाः। बहुप्रकारा व्यक्तयो येषां सामान्यविशेषाणां ते तथोक्ताः। अनेनैतत् सूचयति। विचित्रत्वात् सामान्यविशेषाश्रयाणां व्यञ्जकानां कश्चिदेव सामान्यविशेषः केनचिदेवाश्रयेण व्यज्यते। न सर्वः सर्वेण। प्रतिनियतविषयत्वात् पदार्थशक्तीनाम्। तत्र येनार्थेन स्त्रीत्वमेव व्यज्यते न पुंस्त्वं नापि नपुंसकत्वं सा स्त्र्यत्र भवति। न पुमान् नापि नपुंसकम्। येन पुंस्त्वमेव व्यज्यते स पुमानेव। येन नपुंसकत्वं तन्नपुंसकमेव। यस्तु द्वयोस्त्रयाणां वा व्यञ्जकः स द्विलिङ्गस्त्रिलिङ्गो वेष्यते। अर्द्धर्चं मर्धर्चः। पद्मः पद्मम्। तटः तटी तटमिति। तेन नास्मिन् दर्शने पूर्वदोषावसरः। यस्तर्हि सामान्यविशेषस्याश्रयो व्यञ्जको न भवति स कथं तद्योगात् स्त्री भवति ? पुमान् नपुंसकञ्चेति ? अत आह क्वचिदित्यादि। आशात्माकाशादिषु हि सामान्यविशेषा स्त्रीत्वादयः क्वचिदुपदेशमात्रव्यङ्ग्या एव न त्वाश्रयव्यङ्ग्याः। तदाश्रयाणामतीन्द्रियत्वात्। तत्र यस्मिन्नुपदेशेन स्त्रीत्वं व्यज्यते सा स्त्री भवति यथेयमाशेति। यत्र पुंस्त्वं स पुमान् यथायमात्मेति। यत्र नपुंसकत्वं तन्नपुंसकमेव यथेदमाकाशमिति। कथं स्त्रीत्वादयः क्वचिदुपदेशमात्रव्यङ्ग्या भवन्तीत्याह यथेत्यादि। ब्राह्मणत्व-क्षत्रियत्वादीनां हि तथाविध आश्रयो नास्ति यस्तान्यभिव्यञ्जयेत्। सामान्य-विशेषाश्रयाणामाशात्माकाशादीनामतीन्द्रियत्वात्। तदाश्रयाणामन्यत्र सादृ-श्यादुपदेशमात्रादेव तु ब्राह्मणत्वादीनामभिव्यक्तिर्भवति। यथा च तेषां तथा च क्वचित् स्त्रीत्वादीनाम्। किं पुनरिदं स्त्रीत्वम्? प्रत्ययार्थ उत प्राति-पदिकविशेषणमित्याह स्त्रीत्वं चेत्यादि। यदा स्त्रीशब्दो विनापि भावप्रत्ययेन स्त्रीत्वे वर्त्तते तदा स्त्रियामभिधेयायां टाबादयो भवन्तीति स्त्रीत्वं प्रत्ययार्थो भवति। यथैव हि गोशब्दो जातिपदार्थपक्षे भावप्रत्ययरहितोऽपि गोत्वे वर्त्तते तथा स्त्रीशब्दोऽपि स्त्रीत्वे। यदा तु स्त्रीत्वं विशेषणमुपादाय तद्वति द्रव्ये स्त्रीशब्दोऽपि वर्त्तते तदायं पक्षोऽपि भवति स्त्रियां यत् प्राति-पदिकं वर्त्तते तस्मात् टाबादय इति। स्त्रीत्वं प्रकृतेर्विशेषणं भवति। उभय-थापि युज्यत इति। कथं पुनरुभयथा युज्यते? यावता स्त्रीत्वस्य प्रत्ययार्थत्वे स्त्रीत्वं प्रधानमापद्यत इति तत्र व्यतिरेकलक्षणा षष्ठी प्राप्नोति यथा स्त्रीत्वं

देवदत्ताया इति । ततश्च कुमारी देवदत्तेति सामानाधिकरण्यं न स्यात् । द्विवचने बहुवचने च कुमार्य्यौ कुमार्य्य इति न स्याताम् । एकत्वात् । स्त्रीत्वस्यानेकश्च प्रत्ययो नापपद्यते । गार्गायणी कारीषगन्ध्या कालितरेति । एकत्वात् स्त्रीत्वस्य । तस्य च प्रथमोत्पन्नेनैव ष्फष्यङादिनाभिहितत्वात् । स्त्रीति च ईकारो न प्राप्नोति । संस्त्याने स्त्यायतेर्ड्रिति ड्रट्प्रत्ययान्तेन स्त्रीत्यनेनैव प्रातिपदिकेनोक्तत्वात् । नैष दोषः । नहि सामान्यविशेषाणामाश्रयाद् भेदः स्त्रीप्रत्ययान्तेनाभिधीयते यतो व्यतिरेकलक्षणा षष्ठी स्यात् । कस्मात् पुनर्नाभिधीयते । शब्दशक्तिस्वाभाव्यात् । द्विवचनबहुवचने अपि चोपपद्येते । यस्मात् सामान्यविशेषाणामेकत्वेऽप्याश्रयसंख्यास्तद्वाचिन उपाददते । शब्दशक्तिस्वाभाव्यादेव । तेनाश्रयस्यानेकत्वाद् द्विवचनबहुवचने भविष्यतः । गार्गायणीत्येवमादौ द्वाभ्यामेव स्त्रीप्रत्ययाभ्यां स्त्रीत्वं व्यज्यते । नैकेन ष्यङादिनेत्यनेकोऽपि प्रत्ययो युक्त एव । अथवा गार्गायणीत्यत्र प्राचां ष्फस्तद्धित इति (४।१।१२) विहितस्य ष्फस्य षित्करणसामर्थ्याद् ङीष् प्रत्ययो भविष्यति । कारीषगन्ध्येति । ष्यङन्ताद् यङश्चाबिति ( ४।१।७४ ) वचनसामर्थ्याच् चाप् भविष्यति । कालितरेति । जानपदादिसूत्रविहितेन ( १।१।४२ ) ङीषा स्त्रीत्वमप्रकर्षविशिष्टमुक्तम् । नतु प्रकर्षविशिष्टम् । अतस्तस्यानभिहितत्वात् तरबन्तात् टाप् भविष्यति । स्त्रीति । स्त्रियामिति ( ४।१।३ ) निर्देशाल्लिङ्गात् टित्करणसामर्थ्याद्वा ङीब् भविष्यति । प्रकृत्यर्थविशेषणपक्षे तु प्रातिपदिकेन स्त्रीत्वविशिष्टं द्रव्यमेवोच्यते । टाबादयस्तु द्योतका इति । तत्र व्यतिरेकाभावात् षष्ठ्या अप्रसङ्गादेव द्विवचनबहुवचने अपि । अनेकत्वाद् द्रव्यस्य युक्तोऽनेकोऽपि प्रत्ययो युक्त एव । यथैव हि प्रातिपदिकेनोक्तेऽपि स्त्रीत्वे खट्वेत्यादौ टाबादयो भवन्ति तथा गार्गायणीत्यादावनेकोऽपि ष्फादयो भवन्ति । अनेनैव स्त्रीत्वस्य द्योतितत्वादिति युक्तमुक्तमुभयथापि युज्यत इति ।

## ४ । अजाद्यतष्टाप् ।

अजाद्यदन्ताच्चेति । अकारान्तादित्यर्थः । अथ स्वरूपग्रहणं कस्मान्न विज्ञायते ? अच्छब्दान्ताच् शरद्दरदित्येवमादेरिति ? लिङ्गात् । किं लिङ्गम् ?

तदाद्याचिख्यासायां (२।४।२१) यकपूर्वाया (७।३।४१) इतेवमादिनिर्देशात्। स्वरूपग्रहणे हि ते नोपपद्येरन्। पकारः सामान्यग्रहणार्थ इति। ङ्याप्प्रातिपदिकादितात्रासति (४।१।१) हि पकारेऽस्य ग्रहणं न स्यात्। टकारः सामान्यग्रहणाविघातार्थः। असति हि टकार एकानुबन्धकग्रहणे न द्व्यनुबन्धकस्येति टापैकस्यैव ग्रहणं स्यात्। न डाप्चापोः। द्व्यनुबन्धकत्वात्। शुभंयाः कीलालपा इति। अन्येभ्योऽपि दृश्यन्त इति (३।२।७५) विच्। किं पुनः स्याद् यद्यत्रापि टाप् स्यादितयाह हल्ङ्याब्भ्य इतयादि। जातिलक्षण इति। जातेरस्त्रीविषयादयोपधादिति (४।१।६३)। पुंयोगलक्षण इति। पुंयोगादाख्यायामिति (४।१।४८)। पुष्पफलोत्तरपदलक्षण इति। पाककर्णपर्णपुष्पफलमूलवालोत्तरपदाच्चेति (४।१।६४)। वयोलक्षण इति। वयसि प्रथम (४।१।२०) इति। टिल्लक्षण इति। टिड्ढाणञिति (४।१।१५)। शूद्राचामहत्पूर्वेतयादि। ननु चान्महत इतयादिनात्त्वेनात्र (६।३।४६)। भवितव्यम्। अत एवं वक्तव्यममहापूर्वेति। नैतदस्ति। अर्थप्रधानस्य हि तदात्त्वमुच्यते। शब्दप्रधानश्चायम्। महच्छब्दः पूर्वो यस्याः सा महत्पूर्वेति। महत्पूर्वस्य प्रतिषेध इति। अमहत्पूर्वेतयस्यार्थमाचष्टे। अत्रापि जातिरिति सम्बध्यते। जातिवचनस्य प्रतिषेधो यथा स्यात्। इह मा भूत्। महती शूद्रा महाशूद्रेति। अत्र ह्युत्तरपदं शूद्रशब्दो जातौ वर्त्तते। न समुदायो महतीशूद्रारूपः। कथं पुनर्जातिरितुयच्यमाने महत्पूर्वस्य प्राप्तिः? यतः प्रतिषेध उच्यत इत्याह। महाशूद्रशब्दो ह्याभीरजातिवचन इति। महाशूद्रशब्दएव हि समुदायो जातौ वर्त्तते। अतएव महाशूद्रीति जातेरस्त्रीत्यादिना (४।१।६३) ङीष् भवति। नन्वेवमपि नास्त्येव टापः प्राप्तिः। शूद्रशब्दाद्धि प्रत्यय उत्पद्यमानः कथं महाशूद्रात् प्राप्नोतीत्यत आह तत्र तदन्तविधिनेत्यादि। कथं तदन्तविधिरिति? न कथञ्चित्। ग्रहणवता प्रातिपदिकेन तदन्तविधिप्रतिषेधादिति मन्यते। अतिधीवरी। अतिपीवरीति। दधातेः पिवतेश्चातो मनिन्क्वनिब्वनिपश्चेति (३।२।७४) क्वनिप्। ईत्वं घुमास्थादिसूत्रेण (६।४।६६)। धीवानमतिक्रान्ता पीवानमतिक्रान्तेति कुगतिप्रादय इति (२।२।१८) समासः। अत्र तदन्तविधौ

ज्ञापिते सति वनो र चेति (४।१।७) ङीब्रौ न भवतः। यदि पुनस्तदन्तविधिर्न ज्ञाप्येत तदा वन इति प्रत्ययग्रहणमेतत्। ततश्च प्रत्ययग्रहणे यस्मात् स विहितस्तदादेस्तदन्तस्य च ग्रहणं भवतीति वचनादिहैव स्यातां धीवरी पीवरीति। अतिधीवरीतिपीवरीत्यत्र तु न स्याताम्। अतिभवती। अतिमहतीति। भवतुशब्दः केवल उगित् सर्वादिषु पठ्यते। महदिति गौरादौ (C)। तत्रासत्यस्मिन् ज्ञापके केवलाभ्यामेव भवन्महच्छब्दाभ्यामुगिद् गौरादिलक्षणौ ङीब्ङीषौ स्याताम्। अतिभवती। अतिमहतीत्यत्र तु न स्याताम्। ज्ञापके तु सति भवतः। यद्येवं पञ्चानामजां समाहारः पञ्चाजीति द्विगोरपि तदन्तविधिना टाप् प्राप्नोति! नैष दोषः। अजादिभिः स्त्रियामिति विशेषयिष्यामः। अजाद्यत इति हि षष्ठी। तत्रैवमभिसम्बन्धः कर्त्तव्यः। अजादीनां या स्त्री। अजादिशब्दानां वाच्येऽर्थे यत् स्त्रीत्वं समवायसम्बन्धेन वर्त्तमानं तत्र टाबिति। न च पञ्चाजीत्यत्राजाशब्दस्यार्थे वाच्ये स्त्रीत्वं समवेतम्। किं तर्हि? समाहारे वाच्ये। पूर्वापहाणा। (D) अपरापहाणा। टिदिति। ल्युडन्तत्वात्। प्राक्पुष्पेति। प्राञ्चन्तीति प्राञ्चि। ऋत्विग्दधृगित्यादिना (३।२।५९) क्विन्। प्राञ्चि पुष्पाणि यस्याः सा प्राक्पुष्पा।

## ५। ऋन्नेभ्यो ङीप्।

ङकारः सामान्यग्रहणार्थ इति। असति हि तस्मिन् ङ्याप्प्रातिपदिकादित्यत्र (४ २।१) ङीति ङीन्ङीषोरेव ग्रहणं स्यात्। न ङीपः।

## ६। उगितश्च।

यथा कथञ्चिदिति। येन केनचित् प्रकारेण यदि वर्ण उगित् सम्भवति यदि प्रत्ययो ऽथापि प्रातिपदिकं सर्वथा यत्रैषामन्यतमः सम्भवति तदुगिच्छब्दरूपमिति। अनेनोगिच्छब्दरूपस्य विशेषणं न प्रातिपदिकस्येति

---

(C) मिश्रस्त्विदं प्रत्याचष्ट—'केचिद् गौरादिपाठान् ङीषं वर्णयन्ति। तदयुक्तम्। अनुपसर्जनाधिकारात्। किञ्च गौरादिपाठस्य प्रयोजनमपि न पश्यामः।"—इति पदमञ्जरी।

(D) मुद्रितकाशिकायान्तु पूर्वापहारणा। अपरापहारणेति मुद्राकरभ्रान्तिः।

दर्शयति। यदि प्रातिपदिकस्यैव विशेषणं स्यादिहैव स्याद् भवती महतीति। अर्वतीत्यत्र तु न स्यात्। अर्वणस्त्रसावनञ इति (६।४।१२७) नकारस्य त्रादेशः कृत इति वर्ण एव तकार उगित्। न प्रातिपदिकम्। गोमतीत्यत्र च न स्यात्। अत्रापि हि मतुप् प्रत्यय एवोगित्। न प्रातिपदिकम्। तस्मादुगिच्छब्दरूपस्यैव विशेषणं युक्तमित्यभिप्रायः। तच्चोगिच्छब्दरूपं प्रातिपदिकस्य विशेषणम्। विशेषणेन च तदन्तविधिर्भवतीत्याह तदन्तादित्यादि। यदि तर्ह्युगिच्छब्दरूपान्तात् प्रातिपदिकाद् ङीब् भवत्येवं सति भवतीति न सिध्यति। न ह्यत्रोगिच्छब्दरूपान्तं प्रातिपदिकम् भवति। भवच्छब्दान्तादुगितः प्रातिपदिकादन्यस्य तदन्तस्याभावात्। नैष दोषः। व्यपदेशिवद्भावात् तदन्ताद् भविष्यति। ननु च व्यपदेशिवद्भावोऽप्रातिपदिकेनेति (प, ३३) व्यपदेशिवद्भावेन नात्र भवितव्यम्। नैतदस्ति। न ह्युगिदिति प्रातिपदिकग्रहणम्। किं तर्हि? प्रातिपदिकाप्रातिपदिकग्रहणम्। वर्णप्रत्यययोरप्युगितोर्ग्रहणात्। पचन्ती यजन्तीति। शबन्ताद् ङीप्। धातोरुगितः प्रतिषेध इति। प्रतिपाद्यत इति शेषः। अञ्चतेश्चोपसंख्यानमिति। अञ्चतेर्ङीप्प्रत्ययस्य प्रतिपादनं कर्त्तव्यमित्यर्थः। तत्रेदमुभयत्र प्रतिपादनम्। पादोऽन्यतरस्यामिति (४।१।८) सूत्रेऽन्यतरस्यामिति योगविभागः करिष्यते। स चोगितश्च वनो र च पादोऽन्यतरस्यामित्येतेषां त्रयाणामपि (४।१।६।७।८) योगानां शेषः। व्यवस्थितविभाषा च सा। तेन प्रातिपदिकादुगिच्छब्दरूपान्ताद् धातूगिच्छब्दान्तादञ्चतेरेव नित्यं ङीब् भवति। ततोऽन्येभ्यस्तु न भवतेरवेति। अन्ये त्वन्यथा प्रतिपादनं कुर्वन्ति। उखास्रत् पर्णध्वदिति क्रियाकारकसम्बन्धमात्रं विवक्षितम्। न स्त्रीत्वमिति ङीब् न भवति। स्त्रीशब्दसामानाधिकरण्यात् तु स्त्रीत्वप्रतीतिरापद्यते। न च स्त्रियामित्यत्र (४।१।३) स्त्रीसामानाधिकरण्यपक्षः स्थितः। प्राचीत्यादिषु तु स्त्रीत्वं विवक्षितम्। तेनेह भवतीकार इति। उखास्रत् पर्णध्वदिति। उखेन स्रंभते पर्णानि ध्वंसत इत्यन्येभ्योऽपि दृश्यन्त इति (३।२।७५) क्विप्। अन्येषामपि दृश्यत (६।२।१२७) इत्युखस्य दीर्घत्वम्। प्राचीति प्रपूर्वादञ्चतेः क्विन्। अच इत्यकारलोपः (६।४।१३८)। चावितुरपसर्गस्य (६।३।१३८) दीर्घत्वम्।

## ७ । वनो र च ।

वन इति क्वनिब्वनिपोः प्रत्यययोर्ग्रहणम् । अथ वन षण सम्भक्तौ वनु याचन इत्याभ्यामन्येभ्योऽपि दृश्यन्त इति (३।२।७५) विचि कृते यद्रूपं वन्निति निष्पद्यते तत् कस्मान्न गृह्यते । गृह्यते यदि ताभ्यां विज् दृश्यते । स तु न दृश्यते । अनभिधानात् । शर्व्वरीति । शॄ हिंसायाम् । अन्येभ्योऽपि दृश्यन्त इति (३।२।७५) वनिप् । गुणो रपरत्वम् । परलोकदृश्वरीति । दृशेस्तेनैव सूत्रेण (E) क्वनिप् । वनो न हश इति । क्वचिदिति शेषः । हशः परो यो वनिब् हशन्ताद् धातोर्विहितस्तदन्तात् प्रातिपदिकात् क्वचिद् ङीब्-रेफश्चान्तादेशो न भवति । सहयुध्वेति । युध संप्रहारे । दृशेः क्वनिप् (३।२।९४) । राजनि युधिकृञः (३।२।९५) । सहे चेति (३।२।९६) क्वनिप् । नोपधायाः ( ६।४।७ ) । सर्वनामस्थान इति ( ६।४।८ ) दीर्घः । न लोपः प्रातिपदिकान्तस्य (८।२।७) । क्वचित् तु प्रतिषेधो न भवत्येव । शर्वरीति । अत्र रेफाद्धशः परो वनिप् । अवावरीति । अत्रापि हशन्ताद् धातोर्वनिब् विहितः । तथापि प्रतिषेधो न भवति । ओणृ अपनयने । अन्येभ्योऽपि दृश्यन्त (३।२।७५) इति वनिप् । विड्वनोरनुनासिकस्यादित्यात्त्वम् (६।४।४१) । अवादेशः । न च वनो न हश इत्येव वक्तव्यं कर्त्तव्यम् । यस्मात् पादोऽन्यतरस्यामित्यन्यतरस्यां (४।१।८) ग्रहणमस्यापि योगस्य शेषः । सा च व्यवस्थित-विभाषा विज्ञायते । तेन यत्र ङीब्रेफौ नेष्येते तत्र न भविष्यतः ।

## ८ । पादोऽन्यतरस्याम् ।

पादिति कृतसमासान्तः पाच्छब्दो निर्दिश्यत इति । अथ पद गतावित्य-स्माण्ण्यन्तादन्येभ्योऽपि दृश्यत इति (३।२।१७८) क्विपि कृते यत् पादिति रूपं निष्पद्यते तस्य ग्रहणं कस्मान्न विज्ञायते ? विज्ञायते यदि पादयतेः क्विब् दृश्येत । स तु न दृश्यते । अनभिधानात् । द्विपाद् द्विपदीति । द्वौ पादावस्या इति बहुव्रीहिः । पादस्य लोप(५।४।१३८) इत्यनुवर्त्तमाने संख्यासु-पूर्व्वस्येत्यकारलोपः (५।४।१४०) । पादः पदिति पद्भावः (६।४।१३०) ।

---

(E) वस्तुतस्तु दृशेः क्वनिब्विति सूत्रेण (३।२।९४) ।

## ९। टाबृचि।

ऋचीत्यभिधेयनिर्देश इति विषयनिर्देशाशङ्कां निराकरोति। यदि हि विषयनिर्देशः स्यात् तत ऋचि विषय ऋग्ग्रन्थे यः पाच्छब्दस्तदन्तात् प्रातिपदिकाट् टाब् भविष्यतीत्येषोऽर्थः स्यात्। तथाच ऋग्वेद एव स्यात्। नान्यत्र। अभिधेयनिर्देशे तु सर्वत्र भवतीति भावः।

## १०। न षट्स्वस्रादिभ्यः।

यो यतः प्राप्नोति स सर्वः प्रतिषिध्यत इति ङीपोऽनन्तरत्वात् तस्यैवायं प्रतिषेध इत्याशङ्काया निरासार्थमिदमुक्तम्। ननु चात्र टाबृचीति (४।१।९) टाबेवानन्तरः। तत् कुतो ङीपोऽनन्तरत्वम्? अस्वरितत्वात्। अस्य टापो ङीप एवानन्तर्य्यं युक्तम्। ननु च षट्संज्ञाः संख्याः शब्दाः। संख्याश्च भेदमात्रं द्रव्यस्य प्रत्याययन्ति। न स्त्रीत्वम्। या तु तस्य स्त्रीत्वप्रतीतिः सा शब्दान्तरेण सामानाधिकरण्याद् भवति। न च स्त्रीसमानाधिकरणपक्षः स्त्रियामिति (४।१।३) सूत्रे स्थितः। तथाच तेभ्यः स्त्रीप्रत्ययस्य प्राप्तिरेव नास्तीत्यपार्थकः प्रतिषेधः। नैतदस्ति। संख्या हि गुणः। संख्यापरिमाणानि पृथक्त्वं संयोगविभागाविति वैशेषिकाणां गुणसूत्रे पाठात्। गुणवचनानां चाश्रयतो लिङ्गवचनानि भवन्ति यथा शुक्ला शाटी शुक्लः कम्बलः शुक्लं वस्त्रम्। शुक्लः शुक्लौ शुक्ला इति। तथा सति प्रतिषेधे यथा शुक्लादिशब्देभ्यः स्त्रीप्रत्ययो भवति तथा षट्संज्ञकेभ्योऽपीति स्याद् यथा पञ्च ब्राह्मण्य इति। षड्भ्यो लुगिति (६।१।२२) जसो लुक्। स्वसेति। अनङ् सौ (७।१।९३)। सर्व्वनाम्नोपधाया इति (६।४।७) दीर्घः। तिसृचतसृशब्दावपि स्वस्रादिषु पठ्येते। तयोः किमर्थः पाठः? यावता विभक्तौ परत स्त्रिचतुरोः स्त्रियां तिसृचतसृविति (७।२।९९) तिसृचतसृभ्यां भवितव्यम्। तत्र यदि तावृकारान्तलक्षणं ङीपं प्रति निमित्तभावं प्रतिपद्येयातां विभक्तेरानन्तर्य्यं ताभ्यां विहन्येत। एतच्च सन्निपातलक्षणो विधिरनिमित्तं (प, ९८) तद्विघातस्येत्ययुक्तम्। तस्मात् सन्निपातलक्षणपरिभाषयैव ङीब् न भविष्यतीति किं प्रतिषेधेन। एवं तर्ह्येतज् ज्ञापयत्यनित्यैषा परिभाषेति। तेन या सेति सिद्धं भवति।

अत्रापि हि विभक्तौ त्यदाद्यत्वमित्यकारष्टापो निमित्तं न स्यात्। टापि हि सति विभक्तेरानन्तर्यं विहन्यते। परिभाषायास्त्वनित्यत्वेनैव टाब् भवति। षट्संज्ञानामित्यादि। पञ्च ब्राह्मण्य इत्यादावनन्तरस्य विधिर्भवति प्रतिषेधो वेति (प, ६२) ङीपोऽनन्तरस्य प्रतिषेधे कृते नलोपः प्रातिपदिकान्तस्येति (८।२।७) नकारे लुप्ते सत्यकारान्ततायामुपजातायां टाबुत्पत्तिः कस्मान्न स्यात्? स्यादेव निमित्तस्य सन्निधानात्। नलोपस्यासिद्धत्वान्न स्यादिति चेत्? नैतदस्ति। नलोपः सुप्स्वरसंज्ञातुग्विधिषु कृतीति (८।२।२) परिगणितेष्वेव विधिषु नलोपस्यासिद्धत्वमुच्यते। न च टाब्विधिस्तत्र परिगण्यते। तत् कुतस्तत्र नलोपस्यासिद्धत्वम्? टाब्विधिरपि तत्र परिगण्यत एवेति दर्शयन्नाह प्रत्याहारादित्यादि। चाबिति। चाप् सम्बन्धिनं पकारमुपलक्षयति। तदेतदुक्तं भवति सुबिति। तत्र न सप्तमी बहुवचनसम्बन्धिना सुपः पकारेण प्रत्याहारो गृह्यते। किं तर्हि यङश्चाबिति (४।१।७४) चाप्सम्बन्धिना। तस्मात् टापो विधिरपि सुब्विधिरेव। टापोऽपि प्रत्याहारान्तर्भावात्। ततश्च टाब्विधावपि नलोपस्यासिद्धत्वेन भवितव्यमिति सिद्धं सर्वमिष्टम्। सिध्यत्येव। दोषस्त्विति। बहूनि चर्माण्यस्यां नगर्यामिति बहुव्रीहिः। शेषाद्विभाषेति (५।४।१५४) कप्। टाप्। नलोपः। अत्रेदानीं प्रत्ययस्थात् कादित्यनेनेत्त्वमिष्यते (७।३।४४) बहुचर्मिकेति यथा स्यात्। तच्च न प्राप्नोति। न ह्यत्र कात् पूर्वोऽकारः। नलोपस्यासिद्धत्वात्। तत्र हि राजभ्यामित्यत्र सुपि चेति (७।३।१०२) दीर्घत्वं मा भूदिति नलोपस्यासिद्धत्वार्थं सर्वविभक्त्यन्तः समास आश्रितः। सुपो विधिः सुब्विधिः। सुपि वा विधिः सुब्विधिरिति। यदि च टाबपि सुप् स्यात् ततस्तत्रापि परत्रावस्थित इत्त्वमुच्यत इति। तदपि सुब्विधिः स्यात् सुपि विधिरिति कृत्वा। ततस्तस्मिन्नपि कर्त्तव्ये नलोपस्यासिद्धत्वं स्यात्। तदयुक्तश्चापा प्रत्याहारः। तस्मान्नोभाविति। यस्मादेवं चापा सह प्रत्याहारे दोषस्तस्मादुभावपि टाब्ङीपौ न भवत इति प्रतिषिद्धौ। कथमिह हि स्त्रियामित्यर्थोऽपेक्ष्यते? अस्मिन्नर्थे यदुक्तं तन्न भवतीति स्वार्थे चोभौ ङीप्टापावुक्तावितुरभावपि भवतः।

## ११। मनः।

दामा पामेति। ददातेः पिबतेश्चातो मनिन्क्वनिब्वनिपश्चेति (३।२।७४) मनिन्। पूर्ववन्नोपधाया दीर्घः। अथ सीमा सीमानौ सीमानोऽतिमहि-मातिमहिमानावतिमहिमान इत्यत्र कथं प्रतिषेधः ? यावता मन इत्यर्थवतो मन एतद्ग्रहणम्। न च यथा दामा पामेत्यत्र मनः प्रत्ययार्थेनार्थवत्त्वं तथा सीमेत्यवमादौ न केनचिदर्थेनार्थवत्त्वम्। तथाहि सीमाशब्दस्तावदव्युत्पन्नं प्रातिपदिकम्। तस्यैव चार्थवत्त्वम्। न तदवयवभूतस्य मनः। अतिमहिमेत्य-त्रापि नैव मनोऽस्त्यवयर्थम्। तथाहि महतो भाव इत्यर्थविवक्षायां पृथ्वादिभ्य इमनिजिति (५।१।१२२) महच्छब्दादिमनिज् विहितः। तत्र चेमनिच एवार्थवत्त्वम्। न तदेकदेशस्य मन इत्यत आह अनिनस्मन्ग्रहणानीत्यादि। एतद्वाक्यं पठता वाक्यकारेण अन् इन् अस् मन् इत्येतेषां ग्रहणे ऽर्थवद्-ग्रहणपरिभाषा न व्याप्रियते। तेनैषामनर्थकानामपि ग्रहणं भवत्येभिश्चानर्थकैः सार्थकैश्च तदन्तविधिर्भवतीत्युक्तं भवति। ततश्च सीमाऽतिमहिमेत्यादावपि प्रतिषेधः सिद्धो भवति।

## १२। अनो बहुव्रीहेः।

अनुपधालोपी बहुव्रीहिरिहोदाहरणमिति। कथं पुनरेतल्लभ्यते ? यावता नात्र विशेष उपात्त इत्याह उपधालोपिनो हीत्यादि। यस्मादन उपधालो-पिनो (४।१।२८) ऽन्यतरस्यामित्युपधालोपिनो विकल्पं वक्ष्यति तस्मात् पारिशेष्यादनुपधालोपी बहुव्रीहिरस्यावकाश इति। तस्य चोदाहरणं सुपर्वेत्यादि। शोभनं मस्याः पर्व शोभनं चर्मास्या इति बहुव्रीहिः। अयञ्च न संयोगादमन्तादित्यल्लोपी (६।४।१३७) न भवति। अतिराजीति। अत्यादयः क्रान्ताद्यर्थे द्वितीययेति (२।२।१८,वा) कुगतिप्रादय इति (२।२।१८) तत्पुरुषोऽयम्।

## १३। डाबुभाभ्यामन्यतरस्याम्।

इहान्यतरस्यांग्रहणस्य डापा मुक्ते पक्षे प्रतिषेधोऽपि यथा स्यादित्येतद्वा

प्रयोजनं स्यात् ? डाप्प्रतिषेधाभ्यां मुक्ते पक्षे ङीबपि यथा स्यादित्येतद्वा ? तत्राद्यं तावदयुक्तम् । डाबपि ह्युच्यते । प्रतिषेधोऽपि । तावुभावपि वचनसामर्थ्याद् भविष्यतः । द्वितीयमप्ययुक्तम् । अन्यतरस्यांग्रहणेन ह्यनुपधालोपिनो वा बहुव्रीहेः पक्षे ङीब् विधीयते ? उपधालोपिनो वा ? तत्र प्रथमस्तावत् पक्षो नोपपद्यते । यदि ह्यत्रानुपधालोपिनः पक्षे ङीब् विधीयेत प्रतिषेधवचनमनर्थकं स्यात् । द्वितीयोऽपि नोपपद्यते । अत्र उपधालोपिनोऽन्यतरस्यामिति ( ४।१।२८ ) प्रतिपदं विकल्पेन ङीपो विधास्यमानत्वात् । न च तदन्यतरस्यांग्रहणं न करिष्याम इतीहान्यतरस्यांग्रहणं कर्त्तुं युक्तम् । तद्ध्यवश्यमेव कर्त्तव्यम् । उपधालोपिनो हि ङीपा मुक्ते डाप्प्रतिषेधौ यथा स्याताम् । बहुराज्ञ्यौ बहुराजानौ बहुराजे इति । इतरथा हि डाप्प्रतिषेधौ सुपर्वादिष्वनुपधालोपिषु सावकाशौ परत्वाद् ङीपा बाध्येयाताम् । तस्माद् वक्ष्यमाणमप्यन्यतरस्यांग्रहणं कर्त्तव्यमेवेति तत् सर्वं मनसि कृत्वाह अन्यतरस्यांग्रहणं किमर्थमिति ? निरर्थकमिति भावः । बहुव्रीहाविल्यादि । वनो र चेत्यनेन ( ४।१।७ ) यत् कार्य्यं विधीयते तस्यापि बहुव्रीहौ विकल्पो यथा स्यादित्येवमर्थमन्यतरस्यांग्रहणम् । यद् यद् प्राप्तं तत् तद् विकल्पेन प्रत्युपस्थापयितव्यम् । ङीब्रेफावप्राप्तौ । अनो बहुव्रीहेरिति (४।१।१२) प्रतिषेधात् । तस्मात् तद्विधानार्थमन्यतरस्यांग्रहणं कर्त्तव्यम् । कथमन्यतरस्यामिति ? योगविभागोऽत्र क्रियते । तत्र बहुव्रीहिग्रहणमनुवर्त्तते । वनो र चेत्येतच्च (४।१।७) मण्डूकप्लुतिन्यायेन । तेन वन्नन्ताद् बहुव्रीहेरन्यतरस्यां ङीब् रेफश्चान्तादेशो लभ्यत इति बहुपीवा बहुधीवा बहुपीवरी बहुधीवरीत्यादि सिद्धम् भवति । अपरे त्वाहुः । उभाभ्यांग्रहणसहितादन्यतरस्यांग्रहणाद् वन्नन्ताद् बहुव्रीहेर्ङीब्रेफौ लभ्येते । उभाभ्यामिति नेयं पञ्चमी । किं तर्हि ? तृतीया । वन्नन्ते बहुव्रीहौ स्त्रीत्वमुभाभ्यां ङीब्रेफाभ्यां करणाभ्यां प्रयोक्ता प्रत्याययितव्यमिति । ननु च मन्नन्तात् प्रातिपदिकादन्नन्ताच्च बहुव्रीहेर्डाबुभाभ्यामित्येतदुभाभ्यांग्रहणस्य प्रयोजनम् । एवं मन्यते । स्वरितत्वादेवोभाभ्यामिति वचनमन्तरेणाप्युभाभ्यामेव प्रत्ययो लभ्यत एवेति ।

## १४ । अनुपसर्जनात् ।

इहानुपसर्जनादिति विधिर्वानेनोत्तरत्र क्रियते ? उपसर्जनादन्यस्मादनुपसर्जनाद् ङीबादयो भवन्तीति ? प्रतिषेधो वा ? उपसर्जनान्न भवतीति ? तत्र यद्याद्यः पक्ष आश्रीयेत कुक्कुटीपाद इति न सिध्येत् । पूर्वपदस्योपसर्जनत्वात् । उपसर्जनत्वं तस्य षष्ठीति (२।२।८) समासशास्त्रे प्रथमानिर्देशात् । कुक्कुटीत्येतदपि न सिध्येत् । प्रधानं ह्यनुपसर्जनम् । नचात्र जातिः प्रधानम् । अप्रधानापेक्षया हि प्रधानं भवति । नचात्र किञ्चिदप्रधानमस्ति यदपेक्षया जातेः प्राधान्यं स्यात् । तस्माद् विधिपक्षोऽयं दुष्ट इति मत्वा प्रतिषेधपक्षमाश्रित्याह उत्तरसूत्रेषूपसर्जनप्रतिषेधं करोतीति । कुरुचरीति । कुरुषु चरतीति चरेष्ट इति ( ३।२।१६ ) टः । उपपदमतिङिति ( २।२।१९ ) तत्पुरुषसमास इत्यस्योत्तरपदप्रधानत्वादप्रथमानिर्दिष्टत्वाच्च समासशास्त्रे चरशब्द इहोपसर्जनं न भवतीति । बहुकुरुचरेति । बहवः कुरुचरा अस्यामिति । अस्यान्यपदार्थप्रधानत्वात् प्रथमानिर्दिष्टत्वाच्च शास्त्रे समासपदानामत्रावयव उपसर्जनम् । जाते ङीषिति । जातेरस्त्रीविषयादयोपधादित्यनेन ( ४।१।६३ ) । बहुकुक्कुटेति बहुव्रीहिः । अत्रापि पूर्ववज्जातिशब्द उपसर्जनम् । ननु च बहुकुरुचरेत्यत्र समुदायः स्त्रियां वर्त्तते । नावयवः । न च समुदायष्टित् । किं तर्हि ? अवयवः । तत्र टित उच्यमान ईकारः केन पुनः समुदायादटितः स्यात् ? बहुकुक्कुटेत्यत्रापि समुदायः स्त्रियां वर्त्तते । नावयवः । नच समुदायो जातिवचनः । किं तर्हि ? अवयवः । तत्र जातिवाचिन उच्यमानः प्रत्ययः केनाजातिवाचिनः समुदायात् स्याद् यत्प्रतिषेधार्थमिदमुच्यत इति मन्यमान आह कथमित्यादि । तदन्तविधिनेति परिहारः । तत्रैतत् स्यात् । ग्रहणवता प्रातिपदिकेन तदन्तविधिः प्रतिषिध्यत ( प, ३२ ) इत्यत आह ज्ञापितञ्चेत्यादि । शूद्रा चामहत्पूर्वा जाति (ग.सू ८८) रित्यत्र महत्पूर्वेत्यनेनास्मिन् प्रकरणे तदन्तविधिरिति ज्ञापितमेतत् । तथाचेति । एवं सतीत्यर्थः । यस्मात् पूर्वं तदन्तविधिरिह प्रकरणेऽस्तीति ज्ञापितमेतत् । अनेन च सूत्रेणोपसर्जनेन

तदन्तविधिः प्रतिषिध्यते । नानुपसर्जनेन । एवञ्च सति प्रधानेन तदन्तविधिर्भवत्येव । तेन कुम्भकारी नगरकारीति सिद्धं भवति । तत्र हि कारशब्दोऽणन्तः प्रधानम् । तदन्तात् समासाद् टिड्ढाणञितीकारः (४।१।१५) स्यादेव । ननु चाणित्यत्राणिति कृद्ग्रहणम् । ततश्च कृद्ग्रहणे गतिकारकपूर्वपदस्यापि ग्रहणं भवतीत्यनया (प,२८) परिभाषयैव कुम्भकारशब्दात् कारान्तादीकारः सिध्यति । ततो नेदं तदन्तविधिज्ञापनस्य प्रयोजनमित्यत आह नचेत्यादि । कथं नेत्याह नह्नितोऽप्यस्तीति । तस्याप्यत्र ग्रहणम् । अन्यथा स्त्रौपगवीति न सिध्येत् । तस्मान्नेदं कृद्ग्रहणम् । किं तर्हि? कृदकृद्ग्रहणम् । तत्र यदि तदन्तविधि र्न ज्ञाप्यते तदाणिति प्रत्ययग्रहणम् । प्रत्ययग्रहणे यस्मात् स विहित स्तदादेस्तदन्तस्य च ग्रहणं भवतीतीहैव ( प, २४ ) स्यादौपगवीति । इह तु न स्यात् कुम्भकारीति । अत्र हि धातोरण् विहितः । तदन्तश्च स्त्रियां न वर्त्तते । तावन्मात्रस्य कारशब्दस्य प्रयोगाभावात् । या वा स्त्रियां वर्त्तते सोपपदम् । न तस्मात् प्रत्ययो विहितः । तदन्तविधौ तु ज्ञापिते कारशब्दान्तादपीकारः सिध्यति ।

## १५ । टिड्ढाणञ्द्वयसज्दघ्नञ्मात्रच्तयप्ठक्ठञ्कञ्क्वरपख्युनाम् । (F)

सर्व्वत्रेति । स्त्रीप्रकरणे । ननु च पत्युर्नोयज्ञसंयोग (४।१।३३) इतो मनुष्यजातेरित्यादौ (४।१।६५) नानुवर्त्तते । तस्यात इत्यस्यासम्भवाद् विशेषणं नोपपद्यत इत्याह तत् सतीत्यादि । यत्र सम्भवति तत्र विशेषणम् भवति । यत्र तु न सम्भवति तत्रोत्तरार्थमेवानुवर्त्तते । इह कस्मान्न भवति पचमानेति? स्थानिवद्भावेन शानचष्टित्त्वमस्ति । अत स्तदन्तादपि ङीपा भवितव्यमित्यभिप्रायः । द्व्यनुबन्धकत्वाल्लट इति । तेनैकानुबन्धग्रहणे न द्व्यनुबन्धक-

(F) टिड्ढेत्यारभ्य कञ्क्वरप इत्यन्त एवार्षः पाठः । अङ्गानामपि पारायणं धर्म इति तु सौगतानां न नियामकम् । वेदबाह्यत्वेन तेषां निरङ्कुशत्वात् । यथा हि पारायणभङ्गे न धर्महानिं भय मेवञ्च पाठस्यार्षत्वं सम्प्रदायानुगतत्वाद्यपि तेषां न गणनीयमिति काशिकायां बहुत्र वार्त्तिकप्रक्षेपादिना सूत्राणामन्यथाकरणमिति बोद्धव्यम् । अत्र हरदत्तः—"भाष्ये तु कञ् क्वरप इत्येतावद् सूत्रम् । ख्युनः पाठोऽनार्ष इति तस्याप्युपसंख्यानमेव कृतम् ।"—

स्येत्येतया परिभाषया लटोऽत्र ग्रहणं नास्तीति दर्शयति। तस्य ह्यकारो द्वितीयोऽनुबन्धोऽस्ति। लुग्ड़ादिषु कथमिति ? ईकारो भवतीति शेषः। आदिशब्देन गापोष्टगित्येवमादयो (३।२।८) गृह्यन्ते। लुग्ड़ादीनामपि द्व्यनुबन्धकत्वात् टिद्ग्रहणेन न भवितव्यम्। अत स्तदन्तेभ्यो ङीम् न स्यात्। ततश्च करणी सामगीत्यादि न सिध्येत्। टित्करणसामर्थ्यादिति। यदि तेषामपि टिद्ग्रहणेन ग्रहणं न स्यात् टित्करण मनर्थकं स्यात्। प्रयोजनान्तरासम्भवात्। तस्मात् सत्यपि द्व्यनुबन्धकत्वे टित्करणसामर्थ्याल् ल्युड़ादयो गृह्यन्त इत्यदोषः। लटोऽपि तर्हि टित्करणसामर्थ्यादेव ग्रहणेन भवितव्यमित्यत आह इतरत्रेत्यादि। लटि हि टित्करणस्य टित आत्मनेपदानां टेर इति (३।४।७९) टेरेत्वं फलम्। अतो यद्यपि तस्येदं ग्रहणं न भवति तथापि नैव टित्करणस्य वैयर्थ्यं प्रसज्येत। तस्मात् टित्करणस्य चरितार्थत्वादयुक्तं तस्येदं ग्रहणम्। पठिता विद्येति। अत्रापि कथमिति सम्बध्यते। इड़ागमस्य हि प्रत्ययभक्तत्वात् प्रत्ययस्य टित्त्वमस्ति। ततश्च ङीपा भवितव्यम्। तत् कथं पठितेत्येतद् रूपं भवतीति ? आगमटित्त्वमनिमित्तमिति। प्रकृतत्वान् ङीपइति विज्ञायते। कथं ज्ञायते ऽयमनिमित्तमित्याह ट्युट्युलावित्यादि। तुड् वेत्यागमटित्त्वेनैव सिद्धे ङीपि सायंचिरंप्राह्ण इत्यादिसूत्रे (३।४।७९) ट्युट्युलाविति पुनः प्रत्यययोष्टित्करणं ज्ञापकमागमटित्त्वमनिमित्तं ङीप इति। सौपर्णेयी। वैनतेयीति। सुपर्णीशब्दाज्जातिलक्षणङीषन्ताद् विनताशब्दाच्च टाबन्तात् स्त्रीभ्यो ढगिति (४।१।१२०) ढक्। आयन्नादिसूत्रेणेयादेशः (७।१।२)। ननुच निरनुबन्धकग्रहणे न सानुबन्धकस्येति (प,८२) ढको ग्रहणेन न भवितव्यमित्यत आह निरनुबन्धको ढशब्द इत्यादि। ननु चायं निरनुबन्धकोऽस्ति शिलाया ढ इति (५।३।१०२)। नैतदस्ति। स्वभावत एव ह्ययं नपुंसके वर्त्तते। अयं तर्ह्यस्ति स्वाभाव्यात्। सभाया ढश्छन्दसीति (४।४।१०६)। अयमपि नैव स्त्रियां वर्त्तते। छन्दसि सभेयीशब्दस्य प्रयोगादर्शनात्। तस्मान् निरनुबन्धको ढशब्दः स्त्रियां नास्तीति नेह निरनुबन्धपरिभाषोपतिष्ठते। अन्यथा हि ढग्रहण मनर्थकं स्यात्। णेऽपीति। अणि यत् कार्य्यं कृतं तण् णेऽपि

क्वचिदिति वचनात् क्वचिन्न भवतीत्युक्तं भवति । क्व पुन र्णेऽप्यण्कृतं कार्य्यं भवतीति ? ताच्छीलिके । तथाहि कार्मस्ताच्छील्य इत्यत्र ( ६।४।१७२) ज्ञापितमेतण् णेऽप्यण्कृतं कार्य्यं भवतीति । कथम् ? कार्मशब्दो हि ताच्छील्ये टिलोपार्थं निपात्यते । यदि च णेऽप्यण्कृतं कार्य्यं न स्यान् निपातनमनर्थकं स्यात् । कर्मशब्दात् कर्म शीलमस्येति च्छत्रादिभ्यो ण इति (४।४।६२) णे कृते न स्तद्धित (६।४।१४४) इत्येवं टिलोपस्य सिद्धत्वात् । अनिति (६।४।१६७) प्रकृतिभावान्न सिध्यतीति चेत् ? नैतदस्ति । अणि हि प्रकृतिभाव उच्यते । तत्रेनण्यनपत्य ( ६।४।१६४ ) इत्यतोऽणीत्यनुवर्त्तते । तदेवं ताच्छीलिके णेऽप्यणि कृतं कार्य्यं भवतीत्यस्यार्थस्य ज्ञापितत्वात् तत्रैवाण्कृतं कार्य्यं भवति । नान्यत्र । चौरी तापसीति । चुरा शीलमस्यास्तपः शीलमस्या इति च्छत्रादिभ्यो ण इति (४।४।६२) णेऽप्यण्कृतं भवतीति ङीप् । दाण्डा मौष्टा इति । दण्डः प्रहरणमस्यां मुष्टिः प्रहरणमस्यां क्रीडायामिति तदस्यां प्रहरणमिति ( ४।२।५७ ) क्रीडायां णः । अथाणित्यकारादारभ्य लणो णकारात् प्रत्याहारग्रहणं कस्मान्न भवति ? टिदादीनां पुनर्ग्रहणात् । प्रत्याहारग्रहणे हि तेषां ग्रहणमनर्थकं स्यात् । अणन्तादेव सिद्धत्वात् । औत्सी । औदपानीति । उत्सस्योदपानस्येयमित्युत्सादिभ्योऽञित्यञ् (४।१।८६) । अथ शार्ङ्गरवाद्यञो ङीनित्यत्र (४।१।७३) पुनरञ्ग्रहणं किमर्थं क्रियते ? यावतानेनैव सिद्धम् । तदेव हि रूपं स एव हि स्वरः । तथाहि ङीनि सति ञ्नित्यादिर्नित्य (६।१।१९७) मितग्राद्युदात्तं भवति । औत्सीत्यत्राप्युत्सशब्दादञन्तात् ञित्स्वरेणाद्युदात्ताद् ङीपि कृते तदेवाद्युदात्तत्वं भवतीत्याह शार्ङ्गरवाद्यञ इत्यादि । विदस्यापत्यं गोत्रं स्त्रीत्यनृष्यानन्तर्य्ये विदादिभ्योऽञित्यञि कृते (४।१।१०४) तस्य गोत्रञ्च चरणैः सहेति (४।१।६३, भा) जातित्वाज्जातेरस्त्रीविषयादयोपधादिति (४।१।६३) ङीष् प्राप्नोति । तद्बाधनार्थं पुनः शार्ङ्गरवाद्यञो ङीनित्यत्राञो (४।१।७३) ग्रहणं क्रियते । यद्येवमिहाञ्ग्रहणं न कर्त्तव्यम् । तेनैवौत्सीत्यादेरपि सिद्धत्वात् । नैतदस्ति । जातिग्रहणं तत्रेतो मनुष्यजातेरित्यतोऽ (४।१।६५) नुवर्त्तते । पुंयोगादाख्यायामिति (४।१।४८) ङीषो

बाधा मा भूदित्येवमर्थम् । विदस्यापत्यमित्यनृष्यानन्तर्य्ये इत्यादिनाञ् (४।१।१०४) वैदः । तस्य भार्य्या वैदीति । तस्य पुंयोगे ङीषेवेष्यते । तस्मात् तत्र जातिग्रहणमनुवर्त्तनीयम् । तस्मिंश्चानुवर्त्तमान औत्सीत्यौत्सस्येयमित्यर्थविवक्षायामञि कृतेऽजातित्वादीकारस्तत्र न प्राप्नोति । तस्मादिहाप्यञ्ग्रहणं कर्त्तव्यमेव । द्वयसजादीनामनुबन्धोच्चारणं प्रत्ययपरिग्रहार्थम् । प्रातिपदिकान्यपि द्वयसजादीनि सन्ति । तत्रासत्यनुबन्धोच्चारणे तेषामपि ग्रहणं विज्ञायेत । तयशब्दोऽप्यय वय तय नय गताविति तयो धातोरजन्तं प्रातिपदिकं सम्भवति । अतस्तन्निवृत्त्यर्थं पकारोच्चारणम् । ऊरुद्वयसीत्यादि । ऊरुप्रमाणमस्या जानुप्रमाणमस्या इति प्रमाणे द्वयसज्दघ्नञ्मात्रच इति (५।२।३७) द्वयसजादयः प्रत्ययाः । पञ्चतयीति । पञ्चावयवा अस्या इति संख्याया अवयवे तयप् (५।२।४२) । आक्षिकी शालाकिकीति । अक्षैर्दीव्यति शलाकाभिर्दीव्यतीति तेन दीव्यति खनतीत्यादिना (४।४।२) ठक् । ठस्येकादेशः । लावणिकीति । लवणं पण्यमस्या इति लवणाट्ठञ् (४।४।५२) । अथ किमर्थं ठक्ठञोर्भेदेनोपादानम् ? न विशेषकराननुबन्धानुत्सृज्य ठ इति सामान्येनैव ग्रहणं क्रियेतेत्यत आह भेदेनेत्यादि । ठ इति सामान्येन ग्रहणे सति ठनादीनामपि ग्रहणं स्यात् । अतस्तन्निवृत्त्यै भेदेन ग्रहणम् । आदिशब्दो ञिठादीनां परिग्रहाय । तेन दण्डोऽस्यास्तीत्यत इनिठनाविति (५।२।११५) ठनि कृते दण्डिकीति न भवति । काशीषु भवेति काश्यादिभ्य ठञ्ञिठाविति (४।२।११६) ञिठे प्रत्यये कृते काशिकीति न भवति । कञोऽनुबन्धकरणमातोऽनुपसर्गे क (३।२।३) इत्येवमादीनां निवृत्त्यर्थम् । यादृशी तादृशीति । त्यदादिषु दृशोरनालोचने कञ्चेति (३।२।६०) कञ् । आ सर्वनाम्न इति (६।३।९१) यत्तदोरात्वम् । क्वरपोऽनुबन्धोच्चारणं स्थेशभासेत्यादिना (३।२।१७५) विहितस्य वरचो निवृत्त्यर्थम् । यद्येवमेक एवानुबन्ध उच्चारणीयः । एकेनापि वरचो निवृत्तिः सिद्धत्येव । सत्यमेतत् । तथापि मन्दबुद्धीनां सुखप्रतिपत्तयेऽनुबन्धद्वयोच्चारणम् । इत्वरी नश्वरीति । इण्नशजिसर्त्तिभ्यः क्वरप् (३।२।१६३) । ह्रस्वस्य तुक् । ख्युनोऽनुबन्धोच्चारणं लाघवार्थम् ।

अन्यथा हि षष्ठीबहुवचने कृते नुटि नामि दीर्घत्वे च गुरूच्चारणं स्यात् । आढाङ्करणीति । अनाढ आढाः क्रियतेऽनयेत्याढासुभगेत्यादिना (३।२।५६) ख्युन् । अरुर्द्विषदजन्तस्य मुम् (६।३।६७) । नञ्स्नञीकक् इत्यादि । उपसंख्यानशब्दस्य प्रतिपादनमर्थः । तत्रेदं प्रतिपादनम् । उत्तरसूत्रे चकारोऽनुक्तसमुच्चयार्थः । तेन नञादिभ्योऽपि भविष्यतीति । स्त्रैणी पौंस्नीति । स्त्रिया इयम् पुंस इयमिति स्त्रीपुंसाभ्यां नञ्स्नञौ भवनादिति (४।१।८७) नञ्स्नञौ । शाक्तीकी याष्टिकीति । शक्तिः प्रहरणमस्या इति यष्टिः प्रहरणमस्या इति शक्तियष्ट्योरीकक् (४।४।५९) । तरुणी तलुनीति । अत्र वयो न विवक्षितम् । तरुणी सुरा तलुनी सुरेति । अत्र सुरादौ विषये तरुणतलुनशब्दाभ्यां ङीब् वेदितव्यः । नहि सुरादीनां वयोऽस्ति । तस्य प्राणिधर्म्मत्वात् । अभिनवत्वमात्रं सुरादीनां तरुणतलुनशब्दाभ्यां गम्यते । यदा तु वयो विवक्ष्यते तदा गौरादिपाठान् ङीषा भवितव्यम् । तत्र स्वरे विशेषः । तरुणतलुनशब्दौ हि कॄवृदारिभ्य उनन् ( उण्, ३।१४३ ) तो रश्च लो वेत्युननप्रत्ययान्तौ ( उण्, ३।३४ ) व्युत्पादितौ । अतो नित्स्वरेणाद्युदात्तौ । तत्र ङीपि सत्याद्युदात्तत्वं भवति । ङीषि तु सति प्रत्ययस्वरेणान्तोदात्तत्वम् ।

## १६ । यञश्च ।

गार्गी । वात्सीति । गर्गवत्सशब्दाभ्यां स्त्रियामपत्ये गर्गादिभ्यो यञिति ४।१।१०५ ) यञ् । ङीप् । यस्येति चेत्यकारस्य ( ६।४।१४८ ) लोपः । हलस्तद्धितस्येति ( ६।४।१४० ) यकारस्य च । अपत्यग्रहणं कर्त्तव्यमिति । अपत्यं गृह्यते येन तदपत्यग्रहणम् । व्याख्यानमेतदुक्तं भवति । तथा व्याख्यानं कर्त्तव्यं यथा यञो विशेषणमपत्यं गृह्यते । तत्रेदं व्याख्यानम् । उत्तरसूत्रे विकल्पार्थं प्राचामिति वचनमनेनापि योगेन सम्बध्यते । व्यवस्थितविभाषा च सा विज्ञायते । तेनापत्येऽर्थे यो यञ् विहित स्तदन्तान्नित्यं भवति । यस्तु द्वीपशब्दाज्जातादावर्थे विहितस्तदन्तान् न भवतीति । अथ योगविभागः किमर्थः ? न पूर्वसूत्र एव यञ्ग्रहणं क्रियेतेत्यत

आह योगविभाग उत्तरार्थं इति। उत्तरसूत्रे यञन्तादेव ष्फो यथा स्यात्। टिदादिभ्यो मा भूदिति।

## १७। प्राचां ष्फस्तद्धितः (G)।

षकारो ङीषर्थ इति। षिद्‌गौरादिभ्यश्चेति (४।१।४१) ङीष् यथा स्यात्। ननु च क्रियमाणेऽपि षकारे नैव ङीषा भवितव्यम्। ष्फप्रत्ययेनैव स्त्रीत्व-स्याभिव्यक्तत्वादित्यत आह प्रत्ययद्वयेनेत्यादि। नहि केवलः ष्फः स्त्रीत्वमभि-व्यङ्क्तुं समर्थ इति ङीषमपेक्षते। तेन सहिताभ्यामिव ताभ्यां स्त्रीत्वं व्यज्यत इति ङीषा भवितव्यम्। तद्धितग्रहणमित्यादि। कृत्तद्धितसमासाश्चेति (१।२।४६) प्रातिपदिकसंज्ञा यथा स्यादित्येवमर्थं तद्धितग्रहणम्। प्राति-पादिकसंज्ञा तु ङीष् यथा स्यादित्येवमर्थम्। ननु च विनापि तया षित्-करणसामर्थ्यादेव ङीष् भविष्यति। अन्यथा हि षित्करणमनर्थकं स्यात्। प्रयोजनान्तराभावात्। न च त्रपूष् लज्जायामित्यतोऽपि धातोः स्यादित्यति-प्रसङ्ग आशङ्कनीयः। धातोः षित्करणस्य षिद्भिदादिभ्योऽङिताङ्-(३।३।१०४) विधौ चरितार्थत्वात्। अत इति चाधिकारात्। सत्यमेतत्। प्रतिपत्तिगौरवं तु स्यात्। तस्मात् सुखप्रतिपत्तये तद्धितग्रहणम्। सर्वत्रग्रहणमितरादि। उत्तरसूत्रे सर्वत्रग्रहणमनर्थकम्। तद्धि सर्वेषामाचार्याणां मतेन यथा स्यादित्येवमर्थं क्रियते। एतच्चाप्रयोजनम्। अस्वरितत्वादेव हि प्राग्ग्रहणस्य सर्वेषां मतेन भवितव्यमिति। तस्मादुत्तरसूत्रे सर्व्वत्र ग्रहणमनर्थकम्। अतस्तदित्यानुक्रमते। किमर्थमितराह बाधकबाधनार्थमिति। आवत्याश्चापं वक्ष्यतीतरादिना बाधकबाधनार्थमितरस्यैवार्थं विस्पष्टीकरोति। आवत्याश्चापो-ऽवकाश उदीचां मतेनावट्येति। अवटशब्दाद् गर्गादियञन्ताच्चाप्। प्राचां ष्फस्तद्धित इतरस्यावकाशो गार्ग्यायणीति। आवत्यात् प्राचामुभयप्रसङ्गे परत्वाच् चाप् स्यात्। सर्वत्रग्रहणात् ष्फ एव भविष्यति। आवत्यायनीति।

## १८। सर्व्वत्र लोहितादिकतन्तेभ्यः।

स्वतन्त्रमिति। यो ह्यन्यस्यावयवभूतो न भवति केवलः कतशब्द

---

(G) प्राचां ष्फ तद्धित इति न बहुत पाठः।

स्तत् स्वतन्त्रं प्रातिपदिकम्। यस्तु कुरुकतशब्दस्यावयवः कतशब्दस्तस्य स्वातन्त्र्यं नास्ति। समुदायप्रतिबद्धत्वात्। कः पुनरसौ कतशब्दः स्वतन्त्रं प्रातिपदिकमित्यत आह कपिशब्दादित्यादि। लौहित्यायनी शांसित्यायनीति। लोहितशंसितशब्दाभ्यां गर्गादित्वाद् यञ्। बाभ्रव्यायणीति। अत्रापि बभ्रुशब्दात् मधुबभ्र्वोर्ब्राह्मणकौशिकयोरिति (४।१।१०६) यञ्। ओर्गुणः (६।४।१४६)। वान्तो यि प्रत्यय (६।१।७९) इति वान्तादेशः। यञन्तेभ्यः ष्फः। कण्वात्त्वित्यादि। कण्वशब्दात् पूर्वः शकलशब्द इष्यते। कतशब्दात् तूत्तरः। किमेवं सति भवतीत्याह पूर्वोत्तरावित्यादि। एवं सति पूर्वोत्तरौ गणौ तदन्तादी भवतः। तच्छब्देन शकलशब्दः प्रत्यवमृश्यते। शकलशब्दोऽन्त आदिश्च यथाक्रमं ययोः पूर्वोत्तरयोर्गणयोस्तौ तदन्तादी पूर्वोत्तरगणौ। लोहितादिः शकलशब्दान्तो भवति पूर्वो गणः। उत्तरो गणः कण्वादिः शकलशब्दादि र्भवति। किं पुनः पूर्वोत्तरयोर्गणयो स्तदन्तादित्वे प्रयोजन मित्याह ष्फाणौ तत्र प्रयोजनमिति। पूर्वस्य गणस्य शकलान्तत्वे ष्फः प्रयोजनम्। उत्तरस्य शकलादित्वेऽण् प्रयोजनम्। प्रातिपदिकेष्वन्यथा पाठ इति। कपि। कत। कुरुकत। अनडुह्। कण्व। शकल इत्यनयानुपूर्व्या प्रातिपदिकेषु पाठः। स एवं व्यवस्थापयितव्य इति। कण्वात्तु शकलः पूर्व्व इत्यादिना यानुपूर्वी दर्शिता तया व्यवस्थापयितव्यः। अत एतदुक्तं भवति। कुरुकत। अनडुह् इत्येतावन्यस्मिन् स्थाने पठितव्यौ। शकल-शब्दस्तु कतकण्वशब्दयोर्मध्ये पठितव्यः। मन्यत इति। श्लोकवार्त्तिककारः। कथं पुनरेवंपाठे सति शकलशब्दात् ष्फाणौ सिध्यत इत्यत आह कतन्तेभ्य इत्यादि। कतस्यान्तः कतन्त इति तत्पुरुषः। कतन्तेभ्य इति निपातनात् पररूपत्वम्। कतशब्दोऽन्तो येषां लोहितादीनां ते कतन्ता इति बहुव्रीहिः। कतन्तश्च शकलशब्दः कतन्ताश्च लोहितादय इति कतन्तश्च कतन्ताश्चेति सरूपाणामेकशेषः। तथेत्यादिना यथा कतन्तेभ्य इत्यत्र बहुव्रीहि-तत्पुरुषयोरेकशेष स्तथा कण्वादिभ्य इत्यत्रापीति दर्शयति। कण्वस्यादिः कण्वादिः शकलशब्दः। कण्वशब्द आदिर्येषां गोकक्षादीनां ते कण्वादयः। कण्वादिश्च कण्वादयश्च कण्वादयः। पूर्ववदेकशेषः। तत्पुरुषवृत्त्या संगृहीत

इति। कतन्तेभ्य इत्यत्र कण्वादिभ्य इत्यत्र तत्पुरुषवृत्त्येति। तत्पुरुषसमासेन। मध्यपातीति। कतकण्वशब्दयो र्गणयो र्वा। प्रत्ययद्वयमिति। ष्फप्रत्ययमण्‌ प्रत्ययञ्च। प्रतिपद्यत इति। प्राप्नोति। तत्पुरुषवृत्त्या हि तस्य संग्रहे म-त्वस्य सूत्रस्यायमर्थो जायते। कतन्ताच्छकलशब्दात्‌ तथा यञन्तात्‌ कतन्तेभ्यश्च लोहितादिभ्यो यञन्तेभ्यः स्त्रियां ष्फप्रत्ययो भवतीति। तेन ष्फप्रत्ययं प्रतिपद्यते शकलशब्दः। शाकल्यायनीति। कण्वादिभ्यो गोत्र इत्यत्रापि (४।२।१११) तत्पुरुषवृत्त्या शकलशब्दस्य संग्रहे सत्ययमर्थो भवति। कण्वादेः शकलशब्दान्ताद्‌ गोत्रप्रत्ययान्तात्‌ कण्वादिभ्यो गोकच्च न्तेभ्यो गोत्रप्रत्ययान्तेभ्यः शैषिकेष्वर्थेष्वण्प्रत्ययो भवतीति। तेनाण्प्रत्ययमपि शकलशब्दः प्रतिपद्यते। शाकल्यस्येमच्छात्राः शाकला इति।

## १९। कौरव्यमाण्डूकाभ्याञ्च।

कथं कौरवीति? कौरव्यशब्दादेवात्र ङीप्‌ विहित इति मन्यमानस्य प्रश्नः। कुरुशब्दादेवात्राणन्ताद्‌ ङीप्‌ विहित इति दर्शयन्नाह तस्येदमित्यादि। कौरव्यमाण्डूकयोरित्यादि। कौरव्यमाण्डूकयोरनेन सूत्रेण यत्‌ कार्य्यं विधीयते तस्यासुरेरप्युपसंख्यानम्‌ प्रतिपादनं कर्त्तव्यम्‌। आसुरेरपि ष्फः प्रतिपादयितव्य इति यावत्‌। तत्रेदं प्रतिपादनम्‌। चकारोऽत्र क्रियते। स चानुक्तसमुच्चयार्थः। तेनासुरिशब्दादपि ष्फो भविष्यतीति। आसुरायणीति। असुरस्यापत्यमित्यत इञ्‌ (४।१।९५)। तदन्तात्‌ ष्फः। इञश्च—(४।१।११२) त्यणि प्राप्त इति। तत्र प्रस्थोत्तरपदपलद्यादिकोपधादणित्यतोऽण्ग्रहणानुवृत्तेः (४।२।११०)। छप्रत्यय इष्यत इति। कथं स लभ्यते? न द्व्यचः प्राच्य-भरतेष्वित्यत्र (४।२।११३) नेति योगविभागः कर्त्तव्यः। तेनासुरिशब्दादणि प्रतिषिद्धे वृद्धाच्छ (४।२।११४) इतिच्छ एव भविष्यति। आसुरिणा प्रोक्त आसुरीयः कल्प इति।

## २०। वयसि प्रथमे।

यौवनादिरिति। आदिशब्दो वृद्धत्वाद्युपसंग्रहार्थ इति। अनद्य वर्त्तत इति। यत्‌ प्रातिपदिकं श्रवणमात्रेणैव प्रकरणाद्यनपेक्षं प्रथमं वयः

प्रत्याययति तदत्र श्रुत्या वर्त्तते । कुमारीति । ननुच नायं कुमारीशब्दः प्रथमे वयसि वर्त्तते । क्व तर्हि पुंयोगाभावे । तथाहि वृद्धायामपि हि प्रयुज्यते वृद्धा कुमारीति । नैतदस्ति । कुमारीशब्दो हि प्रथम एव वयसि रूढः । यस्तु वृद्धायामपि तस्य प्रयोगस्तत्र कुमारीसाधर्म्यात् । नतु पुंयोगाभावात् । भवति हि ताद्धर्म्यात् ताच्छब्द्यं यथा गौर्वाहीक इति । वयस्यचरम इति । अचरमेऽनन्त्ये वयसि ङीप् भवतीत्येतदर्थरूपमस्य सूत्रस्य व्याख्यानमित्यर्थः । तत्रेदं व्याख्यानम् । प्रथमवयोग्रहणमिहाचरमस्य वयस उपलक्षणम् । तेनान्यत्राप्यचरमे वयसि ङीब् भवतीति । किं पुनः कारणं प्रथम एव वयसि गृह्यमाणे न सिध्यति ? येनैवं सूत्रार्थो व्याख्येय इत्याह । द्वितीयवयोवचनावितावित्यादि । इह केचिच्चत्वारि वयांसीच्छन्ति । कौमारयौवनमध्यत्ववृद्धत्वानि ।

तथाचाहुः—

प्रथमे वयसि नाधीतं द्वितीयेनार्जितं धनम् ।
तृतीये न तपस्तप्तं (II) चतुर्थे किं करिष्यति ॥ १ ॥ इति ।

अन्ये त्रीणीच्छन्ति । कौमारयौवनस्थाविराणि । तथाचाहुः—

पिता रक्षति कौमारे भर्त्ता रक्षति यौवने ।
पुत्रस्तु स्थाविरे भावे (I) न स्त्री स्वातन्त्र्यमर्हति ॥ १ ॥ इति ।

केचिद्बाल्यमध्यत्ववृद्धत्वानीति त्रीणीच्छन्ति । तथाचाहुः—

आ षोड़शाद् भवेद् बालो यावत् क्षीरान्नवर्त्तकः ।
मध्यमः सप्तति यावत् परतो वृद्ध उच्यते ॥ १ ॥ इति ।

एतेषु सर्वेषु यौवनं द्वितीयं वयो भवति । ननु प्रथमवयोवचनौ तु वधूटी-चिरण्टीशब्दावित्यतो न प्राप्नोति । तस्मादचरमस्य वयस इहोपलक्षणं प्रथमं वय इति व्याख्येयमिति केचित् । यस्तु मन्यते केचित्तु द्वे एव वयसी इच्छन्तीति । यावत्यो वृद्धिमत्योऽवस्था स्ताः सर्वा राशीकृत्य प्रथमं वयो व्यवस्थाप्यते । यास्त्वपचयवत्योऽवस्था स्ताः सर्वा राशीकृत्य द्वितीयं वयः । तथाचोक्तम्—वर्द्धते यावदन्नेन तावद् वर्द्धितव्यं पश्चादपायेन योक्ष्यतइतीतरदेव

---

(II) तृतीये नार्जितं पुण्यमिति बङ्गीयपुस्तके पाठः ।

(I) स्थविरोभाव इति च क्वचित पाठान्तरम् ।

दर्शनमाश्रित्यैतत् सूत्रं प्रणीतमिति । तेन वधूटीचिरण्टीत्यत्रापि ङीब् भवतीति तेन द्वितीयवयोवचनावेतौ प्राप्तयौवना स्त्र्यभिधीयत इत्यस्य ग्रन्थस्याविरोधाय यतितव्यम् । नह्यस्मिन्दर्शने यौवनं द्वितीये वयस्यन्तर्भवति । यौवनावस्थाया वृद्धिमतीत्वात् । अथ कथमुत्तानशया लोहितपादिकेति ? यावता बाल्यमत्र गम्यते । बालैव ह्युत्तानशया लोहितपादिका भवति । तस्माद् भवितव्यमेव ङीपेत्यत आह नैता वयःश्रुतय इति । नैते वयोवचनाः शब्दा इत्यर्थः । इह तावदुत्तानशयेति प्रातिपदिकश्रवणमात्रेण क्रिया-कारकसम्बन्धमात्रं प्रतीयत उत्ताना शेत इत्युत्तानशया । हरतेरनुद्यमने-ऽजित्यतोऽ (३।२।९) ज्ग्रहणेऽनुवर्त्तमाने ऽधिकरणे शेतेरि-(३।२।१५) त्यतो-त्तानादिषु कर्त्तृष्विन्त्युपसंख्यानादच् । स्त्रियाः पुंवदिति (६।३।३४) पुंवद्भावः । सर्वोत्ताना शेते । उच्यते चेदमुत्तानशयेति । तत्र नियमो गम्यते । अन्यथा शयितुमसामर्थ्यादुत्तानैव या शेते सोत्तानशयेति गम्यते । अवगतेऽप्यस्मिन्नियमे सन्देह एव किमसौ बाला वृद्धा वेति । वृद्धापि हि कदाचिदन्यथा शयितुम-शक्ता स्यात् । उत्तानैव च शेते । तस्माद् यदोत्तानैव शेत इति नियम-प्रतीतिर्भवति वृद्धत्वाभावश्च कुतश्चित् प्रकरणादेरवसितो भवति तदा बाल्यं गम्यते । लोहितपादिकेति । अत्रापि लोहितौ पादावस्या इत्यन्यपदार्थमात्रं तावत् तच्छब्दात् प्रतीयते । यदा तु प्रकरणादिना स्वभावत एवास्या रक्तौ पादौ नालक्तकरसादिनेति प्रतीतिर्भवति तदा बालेति गम्यते । इतिशब्दः प्रकारार्थः । एवंप्रकारा नैता वयःश्रुतय इत्यर्थः । कथं बाला वत्सेति । अजादित्वाट्टाब् भविष्यति । ननु वचनसामर्थ्यादनेन ङीबपि प्राप्नोति । नैतदस्ति । तस्यान्यत्र कुमारी किशोरीत्यादौ चरितार्थत्वात् ।

## २१ । द्विगोः ।

पञ्चपूलीति । पञ्चानां पूलानां समाहार इति । तद्धितार्थोत्तरपद-समाहारे चेति (२।१।५१) समाहारद्विगुः । अकारान्तोत्तरपदो द्विगुः स्त्रियां भाष्यत इति (२।४।३०, वा) स्त्रीलिङ्गता । त्रिफलेति । त्रयाणां फलानां समाहार इति । पूर्ववद् द्विगुः ।

## २२ । अपरिमाणविस्ताचितकम्बलेभ्यो न तद्धितलुकि ।

तद्धितलुकि सतीति । एतेन तद्धितलुकोऽत्येषा विषयसप्तमीति दर्शयति । परसप्तम्यत्येषा नोपपद्यते । लुकोऽभावरूपत्वात् । अभावे च पौर्वापर्य्याभावात् । सर्वतो मानं परिमाणमिति परिशब्दः सर्वतो भावे सर्वत आरोहतः परिणाहतश्च मीयते परिच्छिद्यते येन तत्परिमाणं प्रस्थादिः । पञ्चाश्वेति । तद्धितार्थे द्विगुः । तेन क्रीतमित्यार्हीयष्ठक् (५।१।३७) । अध्यर्धपूर्वाद् द्विगोर्लुक् (५।१।२८) । कालः संख्या च न परिमाणमिति । नहि ताभ्यामारोहतः परिणाहतश्च मीयते । ज्ञापकाच्च न तयोः परिमाणत्वमवसीयते । यदयं परिमाणान्तस्यासंज्ञाशाणयोरिति (७।३।१७) सिद्धायामुत्तरपदवृद्धौ संख्यायाः संवत्सरसंख्यस्य (७।३।१५) चेति संख्यासंवत्सरग्रहणं करोति तज् ज्ञापयति कालः संख्या च न परिमाणं भवतीति । विस्तादि च परिमाणविशेष एव गृहीतव्यः । अतो वृत्तिग्रन्थः परिमाणार्थं ग्रहणमिति । काण्डस्य वा परिमाणत्वे तूत्तरसूत्रेण नियमार्थता न विरुध्यते । यद्येवं कालाः परिमाणिनेत्यत्र ( २।२।५ ) सामर्थ्यात् परिमाणवचनाः कालशब्दाः समस्यन्त इति यदुक्तं तद्विरुध्यते । नास्ति विरोधः । उपचारेण तथान्यत्र परिमाणवाचिना सुबन्तेनाभिधानात् । इह हि मुख्यं कालस्य परिमाणत्वं निषिध्यते । तत्र ह्यौपचारिकं कालस्य परिमाणत्वमाश्रित्य परिमाणवचनाः कालशब्दा इत्युक्तं कालाः परिमाणिनेति ब्रुवता । परिमाणवचनत्वं कालशब्दानामुपयुक्तं भवति । नहि तेन विना परिमाणपिचयोरुत्तरपदस्य परिमाणिव्यपदेश उपपद्यते । न च कालस्य मुख्यं परिमाणत्वमस्ति । अतः सामर्थ्यादौपचारिकं परिमाणत्वमाश्रितमिति गम्यते । उपचारस्य हेतुः परिच्छेदस्य हेतुत्वमात्रम् परिमाणस्य साधर्म्यम् । कालो हि मासादि जातादिसम्बन्धिनीमादित्यगतिं गमयतीति भवति परिच्छेदस्य हेतुः । अतः परिमाणसाधर्म्यादुपपद्यते तत्र च परिमाणोपचारः । द्विवर्षा । त्रिवर्षेति । द्वे वर्षे भूतेति तमधीष्टो भृतो भूतो भावीत्यनेन ( ५।१।८० ) विहितस्य ठको वर्षाल्लुगिति ( ५।१।८८ ) लुक् पाक्षिकः । चित्तवत्त्वे तु प्रत्ययार्थस्य विवक्षिते

चित्तवति नित्यमिति ( ५।१।८८ ) नित्यमेव लुक् । द्वे वर्षे प्रमाणमस्या इति प्रमाणे लो द्विगोर्नित्यमिति ( ५।२।३७, वा ) नित्यमेव लुक् । द्विशता । त्रिशतेति । द्वाभ्यां शताभ्यां क्रीतेति पणपादमाषशताद् यदिति ( ५।१।३४ ) यति प्राप्ते शाणाद्वेत्यत्रोपसंख्यानं ( ५।१।३५ ) शताच्चेति वक्तव्यमिति । तेन शतशब्दात् पक्षे संख्याया अतिशदन्तायाः कन्निति ( ५।१।२२ ) कन् । तस्य पूर्ववल्लुक् । द्विविस्तेति । द्वौ विस्तौ पचति । सम्भवत्यवहरति पचतीत्यनेनार्हीयष्ठक् ( ५।१।५२ ) । तस्य पूर्ववल्लुक् । द्वावाचितौ पचति द्व्याचिता । आढकाचितपात्रात् खोऽन्यतरस्यामिति ( ५।१।५३ ) वर्त्तमाने द्विगोः ष्ठंश्चेति ( ५।१।५४ ) ष्ठन् । तस्य पूर्ववल्लुक् । द्वाभ्यां कम्बल्याभ्यां क्रीता द्विकम्बल्या । तेन क्रीतमिति ( ५।१।३७ ) ठक् । तद्वदेव लुक् । द्व्याढकीति । द्वावाढकौ पचति । आढकाचितपात्रात् खोऽन्यतरस्यामिति ( ५।१।५३ ) वर्त्तमाने द्विगोष्ठंश्चेति ( ५।१।५४ ) पक्षे ष्ठन् । तस्य लुक् । पञ्चाश्वीति । पूर्ववत् समाहारे द्विगुः । इहेमौ द्वौ प्रतिषेधावुच्येते । तत्किं शक्यमकर्त्तुम् । कथम् ? एवं सूत्रन्यासः करिष्यते । परिमाणान्तात् तद्धितलुकीति । पूर्वेणैव सिद्धे नियमार्थमेतत् । परिमाणान्तादेव तद्धितलुकि ङीब् भवति । नान्यस्मात् । तेन द्व्याढकीत्यादावेव भवति । न पञ्चाश्वेत्यादौ । ततो बिस्ताचितकम्बल्येभ्यो न तद्धितलुकीत्यनुवर्त्तते । विस्तादिभ्यः परिमाणेभ्योऽपि तद्धितलुकि ङीम् न भवतीति । नैवं शक्यम् । विपरीतोऽपि नियमः सम्भाव्येत । परिमाणान्तात् तद्धितलुक्येव भवति नान्यत्रेति । ततश्च द्वयोः कुडवयोः समाहारो द्विकुडवीत्यत्र न स्यात् । तस्माद् यथान्यासमेवास्तु ।

## २३ । काण्डान्तात् क्षेत्रे ।

नियमार्थमिति । क्षेत्र एव यथा स्यात् । अन्यत्र मा भूदिति । अथान्तग्रहणं किमर्थम् ? यावता सामर्थ्यादेव तदन्तविधिर्लभ्यत एव यथा पूर्वस्मिन् सूत्रे । नहि केवलस्य काण्डशब्दस्य केनचिद् द्विगुसंज्ञा विहिता । सत्यमेतत् । किन्त्वसत्यन्तग्रहणे काण्डमेव क्षेत्रेण विशिष्येत काण्डशब्द एव केवलो यः

त्रैते वर्त्तत इति । ततश्चेह प्रतिषेधः स्यात् । द्वाभ्यां काण्डसंज्ञकाभ्यां त्रेत्राभ्यां क्रीता द्विकाण्डी वड़वेति । इह तु न स्यात् । द्वे काण्डे प्रमाणमस्याः त्रैत्रभक्तेर्द्विकाण्डा त्रेत्रभक्तिरिति । अन्तग्रहणे तु सति काण्डशब्दस्य विशेषणं त्रेत्रं न भवति । तस्य द्विगौ गुणभूतत्वात् ।

## २४ । पुरुषात् प्रमाणेऽन्यतरस्याम् ।

प्रमाणे यः पुरुषशब्दो वर्त्तत इति । जातिवचनोऽपि पुरुषशब्दो यदा प्रमाणशब्देनाभिसम्बध्यते तदा पुरुषगते प्रमाणे वर्त्तते । भवति पदान्तरसम्बन्धेन शब्दस्यार्थान्तरे वृत्तिर्यथा सिंहो माणवक इति । सिंहशब्दो जातिवचनोऽपि माणवकसान्निध्याच् शौर्य्यलक्षणं गुणमाचष्टे । द्विपुरुषीति । प्रमाणे द्वयसजिति (५।२।३७) विहितस्य द्वयसचः प्रमाणे लो द्विगोर्नित्यमिति (५।२।३७, वा) लुक् । अपरिमाणान्तत्वात् प्रतिषेधे प्राप्त इति । अपरिमाणविस्तेत्यादिना (४।१।२२) । द्वाभ्यां पुरुषाभ्यां क्रीता द्विपुरुषेति । पूर्ववदार्हीयस्य ठको लुक् । तद्धितलुकीत्येव । पञ्चपुरुषीति । प्रमाणार्थवृत्तानामिव समाहारान् नास्ति द्व्यङ्गविकलता ।

## २५ । बहुव्रीहेरूधसो ङीष् ।

ऊधसोऽनङिति (५।४।१३१) समासान्ते कृत इति । अकृत एव समासे बहुव्रीह्यर्थ उत्तरपदे पूर्वं समासान्तेन भवितव्यमिति । प्राक् ततः समासान्त एव भवति । ततो बहुव्रीहि स्ततः स्त्रीप्रत्यय इत्येषैवानुपूर्वी । अनो बहुव्रीहेरित्यादि । इतिशब्द आद्यर्थे । अनो बहुव्रीहेरित्यादिना (४।१।१२) शास्त्रान्तरेण इत्यर्थः । तत्रानो बहुव्रीहेरित्यनेन (४।१।१२) सूत्रेण प्रतिषेधे प्राप्ते डाबुभाभ्यामन्यतरस्यामित्यनेन (४।१।१३) डाप् । कुण्डोध्नीति । कुण्डमिवोधोऽस्या इति बहुव्रीहिः । अल्लोपोऽन इत्यकारलोपः (६।४।१३४) । प्राप्तोधा इति । प्राप्तापन्ने च द्वितीययेति (२।२।४) तत्पुरुषः । अत्वसन्तस्य चाधातोरिति (६।४।१४) दीर्घः । अन उपधालोपिन इत्यादि । अन उपधालोपिनोऽन्यतरस्यामित्येतेनापि (४।१।२८) विधीयमानस्य ङीपोऽयं ङीष् बाधक इष्यते । कथं पुनरविहोच्यमानस्तस्य बाधको भवति ? उत्तरत्रानुवृत्तेः ।

असत्यामुत्तरत्रानुवृत्तौ मध्येऽपवादाः पूर्वान् विधीन् बाधन्त इत्ये (प, ६१) वमयं ङीष् डाप्प्रतिषेधावेव बाधते। नोपधालोपिनो ङीपम्। ततश्चोपधालोपिनः परत्वात् स एव पक्षे भवेत्। तस्मादन उपधालोपिन (४।१।२८) इत्यत्रास्यानुवृत्तिः कर्त्तव्या। तेनोपधालोपिनोऽप्यूधसन्तान् ङीषेव भवति। समासान्तश्च स्त्रियामेवेति। समासान्तविधेरनित्यत्वात्। अनित्यत्वं तु पुनरूध.शब्देन सकारान्तेनासमासान्तेन विशेषणाद् विज्ञायते। यदि हि नित्यः स्याद् बहुव्रीहे रूध्न इति निर्देशः स्यात्।

## २६। संख्याव्ययादे ङीप्।

द्व्यूध्नीत्यादि। द्वे ऊधसी अस्याः। त्रीण्यूधांस्यस्याः। अभिगत मूधोऽस्याः। निर्गतमूधोऽस्या इति विग्रहः। आदिग्रहणं किमिति? एवं मन्यते। संख्याव्ययाभ्यामित्येव वक्तव्यम्। बहुव्रीहे रूधस इति हि वर्त्तते। तत्रैवमभिसम्बन्धः करिष्यते। संख्याव्ययाभ्यामुत्तरो य ऊधःशब्दस्तदन्ताद् बहुव्रीहे ङीब् भवतीति। तथाच निष्फलमादिग्रहणम्। विनापि तेन सिद्धत्वादिति। द्विविधोध्नीत्यादि। यद्यादिग्रहणं न क्रियेत तदा संख्याव्ययाभ्यामिति पञ्चमीनिर्देशात् संख्याया अनन्तरो य ऊधःशब्दस्तदन्तादेव स्यात्। यत्र तु व्यवधानं तत्र तु न स्यात्। आदिग्रहणात् तु तत्रापि भवति। द्विविधमूधो यस्या इति विग्रहः। अत्रादिग्रहणे सति विधशब्देन व्यवधानेऽपि भवति।

## २७। दामहायनान्ताच्च।

ऊधस इति निवृत्तम्। प्रकृत्यन्तरोपादानात्। संख्याग्रहणमनुवर्त्तते। नाव्ययग्रहणमिति। संख्याग्रहणस्यैव स्वरितत्वात्। डाप्प्रतिषेधविकल्पेषु प्राप्तेष्विति। डाबुभाभ्यामन्यतरस्यामित्यादिना (४।१।१३) डापि प्राप्ते ऽनो बहुव्रीहेरिति (४।१।१२) प्रतिषेधे ऽन उपधालोपिनोऽन्यतरस्यामिति (४।१।२८) विकल्पे च। द्वे दामनी अस्याइति द्विदाम्नी। द्वौ हायनावस्या इति द्विहायनी। हायनो वयसि स्मृत इति। प्रकृतिरिति शेषः। कस्य प्रकृतिः? ङीपः प्रकृतत्वात् तस्यैव। बहुव्रीह्यधिकारादत्र हायनान्तो

बहुव्रीहिरिति गम्यते । एतदुक्तं भवति । हायनान्तो बहुव्रीहिर्वयसि गम्यमाने ङीपः प्रकृतिराचार्य्यैः स्मृत इति । तेन यदि वयो गम्यते ततो ङीब् भवति । नान्यथा । एतच्चोत्तरसूत्रेऽन्यतरस्यांग्रहणस्योभयोर्योगयोः शेषभूतत्वाद् व्यवस्थितविभाषाविज्ञानाच्च लभ्यते । अथ त्रिचतुर्भ्यां हायनस्याप्युपसंख्यानाद् यथा हि त्रिहायणी चतुर्हायणीत्यत्र णत्वं भवति तथा त्रिहायना शाला चतुर्हायना शालेत्यत्रापि कस्मान्न भवतीत्याह णत्वमपीत्यादि । तदपि हि णत्वमौपसंख्यानिक माचार्य्यैर्वयस्येव स्मर्य्यते । न च शालाया वयः सम्भवति । तस्य प्राणिधर्मत्वादिति नेह णत्वं प्रवर्त्तते । अन्तग्रहणं विस्पष्टार्थम् । बहुव्रीह्यधिकारादेव हि सामर्थ्यात् तदन्तविधिर्लभ्यते । नहि केवलयोर्दामहायनशब्दयोर्बहुव्रीहिसंज्ञा केनचिद्विहिता ।

## २८ । अन उपधालोपिनोऽन्यतरस्याम् ।

उपधालोपीति । उपधालोपो यस्य ङीपि परतः सम्भवति स उपधालोपी । नन्वित्यादि । अनो बहुव्रीहेरिति (४।१।१२) प्रतिषेधः सिद्धः । डाबुभाभ्यामन्यतरस्यामिति (४।१।१४) डाप् । अन्यतरस्यांग्रहणाच्च पक्षे ङीप् । यदि तर्हि डाबुभाभ्यामन्यतरस्यामित्यनेन (४।१।१३) ङीबपि विधीयते तदा दामा पामेत्यत्रापि स्यात् । अन्यतरस्यांग्रहणस्य व्यवस्थितविभाषात्वान् न भविष्यति । अनुपधालोपिन इत्यादि । यदीदं नोच्येतानुपधालोपिनोऽपि ङीप् स्यात् । तस्मादुपधालोपिन एव ङीब् यथा स्यादनुपधालोपिनो मा भूदित्येवमर्थमिदमुच्यते । बहुराजेति ङीप्प्रतिषेधः । सर्वनामस्थाने चेति (६।४।८) नोपधाया दीर्घः । बहुराज्ञीति ङीप् । अल्लोपोऽनः (६।४।१३४) । बहुराजे इति डाप् । औङ आप इति (७।१।१८) शीभावः । आद्गुणः (६।१।८७) । द्विवचननिर्देशो डापोऽभिव्यक्तये । एकवचने हि डाप्प्रतिषेधयोर्न कश्चिद् विशेषः । उभयत्रापि तुल्यरूपत्वात् । क्वचिद् बहुराजा इति बहुवचनेन निर्देशः । तस्यापि तदेव प्रयोजनम् । बहुमत्स्या इति । सूर्यतिष्यागस्त्यमत्स्यानां य उपधाया (६।४।१४९) इति लोपविधानादुपधालोपीत्येष

बहुव्रीहिः । सुपर्वेति । अयमुपधालोपी न भवति । न संयोगाद् वमन्तादि- (३।४।१३७) तुरपधालोपप्रतिषेधात् ।

## २९ । नित्यं संज्ञाछन्दसोः ।

नित्यग्रहणं विस्पष्टार्थम् । पूर्वेणैव हि विकल्पेन ङीप् सिद्धः । तदारम्भ-सामर्थ्यादेव ङीन नित्यं भविष्यति । अन्यथा हीदं वचनमनर्थकं स्यात् ।

## ३० । केवलमामकभागधेयपापापरसमानार्य्यकृतसुमङ्गल-भेषजाच्च ।

अथ मामकग्रहणं किमर्थम् ? यावतास्मदस्तस्येदमित्यणि (४।३।१२०) कृते तवकममकावेकवचन (४।३।३) इति ममकादेशेन मामक इति भवति । ततश्च टिड्ढाणञित्येव ( ४।१।१ ) ङीप्सिद्धेः । सत्यमेतत् । नियमार्थं तु मामकशब्दस्य ग्रहणम् । संज्ञाच्छन्दसोर्यथा स्यात् । अन्यत्र मा भूदिति ।

## ३१ । रात्रेश्चाजसौ ।

अजसाविति । विषयसप्तमीयम् । न परसप्तमी । कुतः ? स्त्रीप्रत्यय-स्यान्तरङ्गत्वाज्जसः परत्वाविरोधाद् विषयसप्तमीत्वे न दोष इत्याह जस्विषया-दित्यादि । अजसादिष्विति । वक्तव्यमिति । जसादिविषयादन्यत्र रात्रि-शब्दाद् ङीब् भवतीत्येतदर्थरूपं व्याख्येयमित्यर्थः । तत्रेदं व्याख्यानम् । इह लाघवार्थमजसि इति वक्तव्येऽजसावितुक्तम् मात्राधिक्यादर्थाधिक्य सूचनार्थम् । तेनाजसादिषु ङीब् भवतीति । आदिशब्देनामादीनां ग्रहणम् । कथमित्यादि । रात्र्य इति । रात्रिशब्दस्य जसन्तस्य प्रयोगः । एवं हि दीर्घाज्जसि चेति (६।१।१०५) सवर्णदीर्घत्वे प्रतिषिद्धे यणादेश उपपद्यते । नान्यथा । यदि तु रात्रिशब्दस्यायं प्रयोगः स्यात् ततो जसि चेति ( ७।३।१०९ ) गुणे कृतेऽयादेशे च रात्रय इति रूपं स्यात् । ईकारान्तश्च रात्रिशब्दो न सम्भवति । अजसाविति ङीप्प्रतिषेधात् । ततश्च रात्र्य इति प्रयोगो नोपपद्यत इत्यभिप्रायः । ङीषयमित्यादि ।

ननु च न रात्रिशब्दो बह्वादिषु पठ्यते। तत् कथं बह्वादिलक्षणस्ततो ङीष् (४।१।४५) भविष्यतीत्यत आह तत्र ङीत्यादि। कृदिकारादक्तिन इति। कृत इकारः कृदिकारः। तदन्तात् ङीष् भवति। वृदृभ्यां विन् (उण्, ४।४८३) वर्वी। दर्वी। यस्तु क्तिन्सम्बन्धी तदन्तान्न भवति। स्त्रियां क्तिन् (३।३।९४)। कृतिः। हृतिः। सर्वतोऽक्तिन्नर्थादित्येक इति। एक आचार्य्या सर्वतोऽक्तिन्नर्थात् कृदिकारादकृदिकाराच्च ङीष् भवतीत्याहुः। राजिः। राजी। राजिशब्दोऽव्युत्पत्तिपक्षे कृदिकारान्तो न भवति। अक्तिन्नर्थादिति। न विद्यते क्तिन्नर्थो यस्य सोऽक्तिन्नर्थः। तस्मात् सर्वतो ङीष् भवति। यस्तु क्तिन्नर्थ स्तदन्तान्न भवति। कृतिः। हृतिः। आक्रोशे नञ्यनिः (३।३।१२) अकरणिः। अहरणिः। रात्रिशब्दश्चायं व्युत्पत्तिपक्षे कृदिकारान्तो भवति। राआदाने। राशदिभ्यां त्रिप् (उण्, ४।५०७)। रात्रिः। तस्मात् पक्षे ङीष्। रात्री। अव्युत्पत्तिपक्षे तु कृदिकारान्तो न भवति। ततः सर्वतोऽक्तिन्नर्थादिति (ग, सू, ५१) ङीष्।

## ३२। अन्तर्वत्पतिवतोर्नुक्।

स तु नकारान्तत्वादेव सिद्ध इति। ऋन्नेभ्यो ङीबित्यनेन (४।१।५)। निपातनसामर्थ्यादित्यादि। यथैव हि निपातनसामर्थ्यादन्यत् किञ्चिदलाक्षणिकं कार्य्यं भवति तथार्थविशेषेऽपि वृत्तिः। कस्मिन् पुनरर्थविशेषे वृत्तिर्भवतीत्यत आह अन्तर्वत्पतिवदित्यादिना। यथाक्रममन्तर्वदित्यस्य गर्भसंयोगे वृत्तिः पतिवदित्यस्य भर्त्तृसंयोगे। गर्भेण संयोगो गर्भसंयोगः। स कस्या भवति? यस्याः कुक्षौ गर्भो व्यज्यते। भर्त्रा संयोगो भर्त्तृसंयोगः। स च कस्या भवति? यस्याः पतिर्जीवति। भर्त्ता चेह योऽग्निसाक्षिपूर्वकेण पाणिग्रहणेन सम्बन्धी स एवाभिमतः। नतु यः पृथिवीस्वामी। इह तु न भवतीति। अन्तरस्यां शालायां विद्यते। शालायां कुक्षिगतेन गर्भेण सम्बन्धाभावात्। पतिमतीति। पतिरस्या अस्तीति मतुप्। उगितश्चेति (४।१।६) ङीप्। अत्र पतिशब्द ईश्वरे स्वामिनि वर्त्तते। तेन संयोगे च न पतिवदिति निपात्यते। येन तु संयोगे निपात्यते स चाख्यात एव। मतुम् निपात्यत इति। अन्तः-

शब्दस्याधिकरणप्रधानत्वात् प्रथमासमर्थता नास्ति। प्रथमासमर्थाच्चास्ति-समानाधिकरणेन मतुब् विधीयते। नचास्तिनान्तःशब्दस्य सामानाधिकरण्यम्। तस्मान् मतुम् न प्राप्नोतीति निपात्यते। वत्वं तु सिद्धमिति। मादुपधायाश्चेत्यादिनैवाकारोपधत्वात् (८।२।९)। निपात्यत इति। केनचिद्-प्राप्तत्वात्। मतुप् सिद्ध इति। पतिरस्यास्तीति प्रथमासमर्थस्य पतिशब्दस्यास्तिना सामानाधिकरण्यात्। गर्भिणीत्यनेन गर्भसंयोगं दर्शयति। जीवपतिरित्यनेनापि भर्तृसंयोगम्। अन्तर्वत्यतिवतोरित्यादि। अन्त-र्वत्पतिवदितेतयोः शब्दयोर्निपातनात् मतुब्वत्वे भवतः। यथाक्रमं गर्भिण्यां जीवपत्यां च स्त्रियामभिधेयायाम्। गर्भोऽस्या अस्तीति गर्भिणी। जीवतीति जीवः। पचाद्यच्। जीवः पतिर्यस्याः सा जीवपतिः। ननु च पतिः समास एवेति (१।४।८) घिसंज्ञोऽयं पति (J) शब्दः। ततश्च घेर्ङित्याच्चौ-त्वयोः (७।३।११९) कृतयोः जीवपताविति भवितव्यम्। तद्युक्तो जीव-पत्यामिति निर्देशः। नैतदस्ति। शेषो घ्यसखीति (१।४।७) सिद्धायामेव घिसंज्ञायाम् पतिः समास एवेत्यनेन (१।४।८) शेषस्यैव पतिशब्दस्य घिसंज्ञा नियमार्थं विधीयते। नचायं शेषः। ङिति ह्रस्वश्चेति (१।४।६) नदी-संज्ञासम्भवात्। नदीसंज्ञायाञ्च सत्यामिदुद्भ्यामिति (७।३।११७) ङेराम् नद्याम्नीभ्य (७।३।११६) इत्याम्। यणादेशे जीवपत्यामिति भवति। वाच्छन्दसि तु नुग्विधिरिति। छन्दसि विकल्पे तु नुग्विधिर्भवति। स च वक्ष्यमाणस्य विभाषाग्रहणस्य सिंहावलोकितन्यायेनानुवृत्तेर्व्यवस्थितविभाषा-विज्ञानाच्च लभ्यते। नुकपक्ष ऋन्नेभ्यो ङीबिति (४।१।५) ङीप्। अन्त-र्वत्नीति। अनुकपक्ष उगितश्चेति (४।१।६) ङीप्। अन्तर्वतीति भवति।

## ३३। पत्युर्नो यज्ञसंयोगे।

यज्ञसंयोग इति। यज्ञसम्बन्धे। कस्य पुनर्यज्ञेन संयोगः? पतिशब्द-वाच्यस्यार्थस्य। अथ पतिशब्दस्यैव कस्मान्न भवति? असम्भवात्। तयो र्हि वाच्यवाचकभावलक्षणः सम्बन्धः स्यात्। न केवलः पतिशब्दो यज्ञस्य वाचकः। कथं पुनर्यज्ञेन संयोग इत्याह तत्साधनत्वादिति। तस्य यज्ञस्य

(J) In the printed काशिका the reading is गर्भिण्यां जीवत्पत्यां च।

साधनं तत्साधनम् । तदभावे यज्ञसाधनत्वम् । तस्माद् यज्ञेन संयोगो भवति । यजमानस्य या भार्य्या तस्या यागं प्रति साधनभावोऽस्तीति विना तया तदनिष्पत्तेः । नहि भार्य्याविरहितस्त्रैवर्णिकः केवलो यज्ञेऽधिक्रियते । तस्मात् स तया करणभूतया यज्ञं निष्पादयतीत्यस्ति तस्या यज्ञेन सह क्रियाकारकलक्षणः सम्बन्धः । तत्फलगृहीतत्वाद्वेति । यज्ञसंयोगे द्वितीयो हेतुः । अनेन तु स्वस्वामिभावलक्षणः सम्बन्धः प्रतिपाद्यते । यज्ञस्य यत्-प्रधानं फलं स्वर्गाख्यं तद् यजमानस्य पत्नी परिगृह्णाति । अतो यद्यपि यज्ञं प्रति तस्याः साधनत्वं न विवक्ष्यते तथापि तत्फलस्य ग्रहणाद् यथा यज-मानस्य यज्ञेन सह स्वस्वामिभावसम्बन्धस्तथा तत्पत्न्या अपि । अथ फलगृहीतत्वादिति कथमत्र षष्ठीसमासः ? कथञ्च न स्यात् ? कर्त्तरि चेति (२।२।१६) तृचा सह षष्ठीसमासप्रतिषेधात् । नैवायं तृजन्तेन षष्ठी-समासः । किं तर्हि ? द्वितीयेति योगविभागात् (२।१।२४) तृजन्तेन द्वितीयासमासः । अथवा याजकादिषु गृहीतृशब्दो द्रष्टव्यः । तेन षष्ठीसमासे भविष्यति । अथापि तत्र न पठ्यत एवमपि याजकादिभिश्चेति (२।२।९) चकारस्यानुक्तसमुच्चयार्थत्वाद् भविष्यति । ऋन्नेभ्यो ङीबिति (४।१।५) गृहीतृ-शब्दादिह ङीम् न भवति । स्त्रीत्वस्याविवक्षितत्वात् । क्वचित् फलगृहीतत्वा-दिति पाठः । तत्र फलगृहीतशब्दयोर्बहुव्रीहिः । फलशब्दस्य जातिवाचित्वान् निष्ठायाः पूर्वनिपाते प्राप्ते जातिकालसुखादिभ्यः परवचनमिति (२।२।३६, वा) गृहीतशब्दस्य परनिपातः । कथमित्यादि । एवं मन्यते । शूद्रस्यैव तावद् यज्ञेऽनधिकृतत्वाद् यज्ञेन संयोगो नास्ति । किं पुनस्तद्भार्य्यायाः ? अतो वृषलस्य पत्नीत्येष प्रयोगो नोपपद्यत इति । उपमानाद् भविष्यतीति । पत्नीवद्धि पत्नी । यथैव हि यजमानस्य पत्न्यग्निसाक्षिपूर्वकेण पाणिग्रहणेन तत्पत्युः सम्बन्धिनी तत्कार्य्येषु चाधिकृता तथा वृषलस्य भार्य्यापि । तस्मात् पत्नीसाधर्म्यात् सापि पत्नीत्युच्यते ।

## ३४ । विभाषा सपूर्वस्य ।

पतिशब्दान्तस्येत्यादि । एतेन पतिशब्दस्य ग्रहणं सपूर्वग्रहणमनुप-

सर्जनग्रहणञ्च त्वयमप्येतत् प्रातिपदिकस्य विशेषणमिति दर्शयति। सह-शब्दोऽयमस्त्येव तुल्ययोगे यथा सशिष्यो गुरुरागत इति। गुरोः शिष्यस्य चागमनेन तुल्ययोगः प्रतीयते। अस्ति च सत्तावचनो यथा सहैव दशभिः पुत्रै भारं वहति गर्दभीति। विद्यमानैरेवेत्यर्थः। तदिह सत्ता-वचनो गृह्यते। सपूर्वस्य विद्यमानपूर्वस्येत्यर्थः। यदि हि तुल्ययोगे वर्त्त-मानो गृह्यते ततोऽयमर्थः स्यात् सहपूर्वेण पतिशब्दान्तस्य नकारो भव-तीति। ततश्च पतिशब्दात् पूर्वस्यापि वृद्धादिशब्दस्य नकारः स्यात्। एवं हि तुल्ययोगो भवति यदि नकार उभयोरपि भवति। पूर्वशब्दोऽयमस्त्येव व्यवस्थाशब्दो यथा पूर्वं मथुरायाः पाटलिपुत्त्रमिति। अस्त्यवयववचनो यथा पूर्वं कायस्येति। तदिहावयववचनो गृह्यते। सह विद्यमानः पूर्वो-ऽवयवो यस्य तत् सपूर्वमित्युच्यते। यदि व्यवस्थाशब्दो गृह्येत तत्रायमर्थः स्यात्। विद्यमानः पूर्वो यस्मात् तस्य पतिशब्दान्तस्य नकारो भवतीति। ततश्च दृढपत्नीत्यत्र न स्यात्। नहि पतिशब्दान्तादिह कश्चित् पूर्वोऽस्तीति। अथ पतिशब्दस्यैव सपूर्वत्वमनुपसर्जनत्वञ्च विशेषणं कस्मान्न विज्ञायते? अशक्यत्वात्। स ह्यवयववचनं वा पूर्वशब्दं गृहीत्वा विशिष्येत व्यवस्थाशब्दं वा। तत्र पूर्वस्तावदयुक्तः कल्पः। अव्यभिचारात्। असम्भवाच्च। कथम्? यदि पकारं पूर्वमभिप्रेत्य विद्यमानः पूर्वोऽवयवो यस्येति विशिष्येत ततोऽव्यभिचारादयुक्तं विशेषणम्। नहि पकारेण यस्य पूर्वत्वं तत्पतिशब्दो व्यभि-चरति। अथ शब्दान्तरम्। तदसम्भवादयुक्तं विशेषणम्। नहि शब्दान्तरं पतिशब्दस्यावयव उपपद्यते। व्यवस्थाशब्दपक्षे तु विद्यमानः पूर्वो यस्मात् तदिति विशिष्यते। युज्यते च विशेष्यविशेषणभावः। किन्तु वाक्येऽपि नकारः प्राप्नोति ग्रामस्य पतिरियं ब्राह्मणीति। अस्ति ह्यत्र पतिशब्दात् पूर्वो ग्रामशब्दः। अनुपसर्जनग्रहणेनापि पतिशब्दे विशिष्यमाणे बहुव्रीहौ विकल्पो न प्राप्नोति दृढः पतिरस्या दृढपति दृढपत्नीति। न ह्यत्रानुप-सर्जनं पतिशब्दः। सर्वोपसर्जनत्वाद् बहुव्रीहेरिति। बहुव्रीह्यवयवानामप्युप-सर्जनत्वात्। तस्मात् प्रातिपदिकस्यैव विशेषणं युक्तम्। पतिरियं ब्राह्मणी ग्रामस्येति। ननु च व्यपदेशिवद्भावादिदमपि सपूर्वमिति शक्यते व्यप-

देष्टुम्। नच व्यपदेशिवद्भावोऽप्रातिपदिकेनेति ( प, ३३ ) व्यपदेशिवद्भावाभावः प्रातिपदिकत्वात्। यद्येवं पतिशब्दान्ततापि नास्तीति। अतो ह्यङ्गविकलता। नैतदस्ति। सपूर्वग्रहणे हि क्रियमाणे पतिशब्दान्तस्येत्येषोऽर्थो लभ्यते। अक्रियमाणे तु तस्मिन् पतिशब्दस्यैव शुद्धस्य नकारो विज्ञायते।

## ३५। नित्यं सपत्न्यादिषु।

सपत्न्यादिष्विति। के पुनः सपत्न्यादयः? ये पठ्यन्ते। तेषु प्रातिपदिकेषु येषां समानादीनि पूर्वपदानि ते सपत्न्यादयः। कुत एतत्? समानादीनां गणे पाठात्। सपत्न्यादीनाञ्चापाठात्। लाघवार्थं समानार्थं समानादिष्वित्येव वक्तव्ये कृते नकारादेशस्य सप्रत्ययस्य च सपत्न्यादिष्विति समुदायस्योच्चारणं नियोगत एष समुदाय ईकारान्त एव यथा स्यादित्येवमर्थम्। तेन सपत्नी भार्य्या यस्य स सपत्नीभार्य्य इति स्त्रियां पुंवदिति (६।३।३४) पुंवद्भावो न भवति। सपत्न्यादिषु नित्यमित्यादि। समानादिषु पूर्वेष्ववयवेषु सत्सु नित्यं पतिशब्दस्य नकारादेशो भवतीत्यर्थः। यदि पूर्वेण विकल्पे प्राप्त इदं वचनमेवं तर्हि नित्यग्रहणमनर्थकम्। आरम्भसामर्थ्यादेव हि नित्यं विधिर्भविष्यतीत्यत आह नित्यग्रहणं विस्पष्टार्थमिति। दासाच्छन्दसीति। दासशब्दात् परो यः पतिशब्दस्तदन्तस्य प्रातिपदिकस्य च्छन्दसि विषये नित्यं नकारादेशो भवति। दासःपतिर्यस्याः सा दासपत्नी। भाषायान्तु पूर्वेण विकल्पो दासपति दासपत्नीति।

## ३६। पूतक्रतोरै च।

ऐकारश्चास्यादेशो भवतीति। कुतः पुनरेतदवसितमादेशोऽयमिति? न पुनः प्रत्ययः? उत्तरसूत्रेऽप्यादेशत्वात्। उत्तरसूत्रे ह्ययमेवैकारोऽनुवर्त्तते। तत्र चास्यादेशत्वम्। अत इहाप्यादेशत्वमवसीयते। उत्तरसूत्रे कुतोऽस्यादेशत्वं निश्चितमिति चेत्? उदात्तवचनात्। यदि हि प्रत्ययस्तस्याद्युदात्तत्वादुदात्तवचनमनर्थकं स्यात्। प्रत्ययस्वरेणैवोदात्तस्य सिद्धत्वात्। त्रय एते योगा इति। अयञ्चैको वक्ष्यमाणौ चानन्तरौ द्वावेते त्रयो

योगा: पुंयोगप्रकरणे पुंयोगादाख्यायामित्येवमादौ (४।१।४८) द्रष्टव्याः। तस्मिन्नेषां स्वरितत्वेनानुवृत्तेः। पूतः क्रतुर्येन पुरुषेण स पूतक्रतुः। तस्य स्त्री पूतक्रतायी।

## ३७। वृषाकप्यग्निकुसितकुसीदानामुदात्तः।

वृषाकपिशब्दो मध्योदात्त इति। लघावन्ते द्वयोश्च बह्वषो गुरुरिति वचनात् (फिट्, २।४२)। अस्यायमर्थः। लघावन्ते परतो द्वयोश्च लघ्वोः परतो बह्वच् शब्दस्य यो गुरुः स उदात्तो भवतीति। बह्वषिति बह्वजित्यर्थः। पाणिनेर्यश्चकारेण प्रत्याहारः सोऽन्येषामाचार्य्याणां मतेन षकारेण। वृषाकपिशब्दे कपिशब्दसम्बन्धिनोर्लघ्वोः परतः पूर्व आकारो गुरुतर उदात्तो भवति। शेषमनुदात्तम्। तत्र यद्युदात्तग्रहणं न क्रियेतानुदात्तस्य स्थाने य आदेशः स्थानिवद्भावेन सोऽनुदात्त एव स्यात्। तस्माद् वृषाकपिशब्द उदात्तस्य स्थाने य आदेशः स्थानिवद्भावेन सोऽनुदात्त एव स्यात्। तस्माद् वृषाकपिशब्द उदात्तत्वं प्रयोजयति। अग्न्यादिषु पुनरन्तोदात्तेष्विति। फिषित्यादिनाग्न्यादीना (फिट्, १।१) मन्तोदात्तत्वम्। आदिशब्देन कुसितकुसीदयोर्ग्रहणम्। फिषिति प्रातिपदिकस्यैव पुनरन्याचार्य्यकृता संज्ञा।

## ३८। मनोरौ वा।

वाग्रहणेन द्वावपि विकल्प्येते इति। प्रत्येकं वाग्रहणेनाभिसम्बन्धात्। यदा चैकारौकारौ न भवतस्तदा ङीबपि न भवति। तस्य सन्नियोगशिष्टत्वात्। मनुशब्द आद्युदात्त इति। एतेनोदात्तग्रहणमनुवर्त्तयितव्यम्। अन्यथा शेषस्यानुदात्तत्वे स्थानिवद्भावेनादेशस्याप्यनुदात्तत्वं स्यादिति भावः। मन ज्ञाने। भृमृशीतॄचरित्सरितनिधनिमिमस्जिभ्य उरित्यनुवर्त्तमाने (उण्, १।५) धान्ये निदिति (उण्, १।९) च शॄस्वृस्निहित्रप्यसिवसिहनिक्लिदिबन्धिमनिभ्यश्चेत्युप्रत्ययः (उण्, १।१०)। नित्त्वाद् ञ्नित्यादिर्नित्यमित्याद्युदात्तत्वं (६।१।१९७) भवति मनुशब्दस्य।

## ३६ । वर्णादनुदात्तात् तोपधात् तो नः ।

वर्णानां तणतिनितान्तानामित्यस्यायमर्थः । वर्णवाचिनां शब्दानां तशब्दान्तानां णकारान्तानां तिशब्दान्तानां निशब्दान्तानां तकारान्तानां चादिरुदात्तो भवतीति । आदिग्रहणमुदात्तग्रहणञ्च प्रकृतं तत्रानुवर्त्तते । प्रकृतेति । प्रकर्षेण कृतेति । कुगतिप्रादय इति (२।२।१८) समासः । प्रशब्दोऽयं निपातो निपाता आद्युदात्ता उपसर्गाश्चाभिर्जमित्युदात्तः ( फिट्, ४।८०।८१) । समासेऽपि कृते गतिरनन्तर इति ( ६।२।४६ ) पूर्वपदप्रकृतिस्वरेणाद्युदात्त एव भवतीति । शेषमनुदात्तम् । घृतादित्वादन्तोदात्त इति । घृतादीनाञ्चेत्यन्तोदात्तत्वविधानात् ( फिट्, १।२१ ) । एतच्च फिट्सूत्रे पठ्यते । शितिरिति । वर्णानामित्यादिना ( फिट् २।३३ ) शितिशब्द आद्युदात्तः । पिशङ्गादित्यादि । पिशङ्गशब्दो लघावन्त इत्यादिना ( फिट्, २।४३) मध्योदात्तः । ततोऽन्यतो ङीषिति (४।१।४०) ङीषि प्राप्ते ङीप उपसंख्यानं कर्त्तव्यम् । तत्रेदं प्रतिपादनम् । पूतक्रतोरै (४।१।३६) चेत्यतश्चकारोऽनुक्तसमुच्चयार्थोऽनुवर्त्तते । तेन पिशङ्गादपि ङीब् भवतीति । वक्तव्यमिति । व्याख्येयमित्यर्थः । तत्रेदं व्याख्यानम् । मनोरौ वेत्यतो ( ४।१।३८ ) वेत्यनुवर्त्तते । सा च व्यवस्थितविभाषा । तेनासितपलितशब्दाभ्यां ङीष् न भविष्यत्येवेति । वर्णानां तणतिनितान्तानामित्याद्युदात्ता-(फिट्,२।३३) वसितपलितशब्दौ । तयो श्छन्दसीत्यादि । असितपलितशब्दयोस्तकारस्य क्नमेक आचार्या इच्छन्ति । स तु व्यत्ययो बहुलमित्येव ( ३।१।८५ ) सिद्धः । भाषायामपीष्यत इति । एतेन च्छन्दोग्रहणं प्रत्याचष्टे । असिक्निकानामिति । अज्ञातार्थे प्रागिवात् क इति ( ५।३।७० ) कः । केऽण इति (७।४।१३) ह्रस्वः ।

## ४० । अन्यतो ङीष् ।

सारङ्गी कल्माषीति । लघावन्त इत्यादिना ( फिट्, २।४२ ) मध्योदात्तौ सारङ्गकल्माषशब्दौ । शवलीति । शप आक्रोशे । कलस्तृपश्चेति (उण्,१।१०४) शपेर्वश्चेति (उण्, १।१०५) कलप्रत्ययः । पकारस्य वकारः । प्रत्ययाद्युदात्त-

त्वेन मध्योदात्तः शवलशब्दः। खङ्गेति। खट काङ्क्षायाम्। अशूप्रुषिलटिकणिखटिविशिभ्यः क्वन्निति क्वन् (उण् १।१४६)। नित्स्वरेणाद्युदात्तः खङ्गाशब्दः। कृष्णेति। कृष विलेखने। इण्सिञ्जिदीङुष्यविभ्यो नक् (उण्, ३।२८२)। कृषेर्वर्णे इति नक् (उण्, ३।२८४)। प्रत्ययस्वरेणान्तोदात्तः कृष्णशब्दः। कपिलेति। कमु कान्तौ। सलिकल्यनिमहिभडिभण्डिशण्डिपिण्डितुण्डिकुकिभूभ्य इलच् (उण्, १।५४)। कमेः पश्चेति (उण, १।५५) मकारस्य पकारः। चित्स्वरेणान्तोदात्तः कपिलाशब्दः।

## ४१। षिद्गौरादिभ्यश्च।

षिद्भ्यः प्रातिपदिकेभ्य इति। षकार इद् येषां तानि। कथं पुनः प्रातिपदिकानि षिन्ति भवन्ति यावता ष्वुनादेः प्रत्ययस्य षकार इत्संज्ञको न तु तेषाम्? नैष दोषः। अवयवगतं हि षित्त्वं समुदायस्य विशेषणं भविष्यति यथाक्षिगतं काणत्वम् पुरुषस्य काणः पुरुष इति। यद्येवं धातुगतमपि षित्त्वं समुदायस्य विशेषणं प्राप्नोति। त्रपूष् लज्जायाम्। अङ्। अपत्रपेति। नैतदस्ति। यो ह्यनुबन्धोऽवयवे निष्प्रयोजनः स समुदायार्थो विज्ञायते। धातोऽस्तु विद्यत एव षित्करणस्य प्रयोजनं षिद्भिदादिभ्योऽङ्‌िति अङ् (३।३।१०४) यथा स्यात्। ष्वुनादीनां तु षित्करणस्य नान्यत् प्रयोजनमस्ति। अतः समुदायार्थमेव तद्विज्ञायते। रजकीति। अत रञ्जेश्चेति (६।४।२६) चकारस्यानुक्तसमुच्चयार्थत्वादनुनासिकलोपः। गौरादिषु गौरशब्दस्य सतोऽपि वर्णवाचित्वे प्रातिपदिकस्वरेणान्तोदात्तत्वात् पूर्वेण न प्राप्नोतीतीह पाठः। मत्स्यादीनां यकारोपधानामयोपधादिति (४।१।६३) जातिलक्षणस्य ङीषः प्रतिषेधे प्राप्ते। शृङ्गशब्दस्य प्राक् श्वश्रूशब्दात् पुटादीनाञ्चानन्दवर्जितानां स्त्रीविषयत्वाच्च शृङ्गशब्दस्य प्राप्ते पुटादीनाञ्चास्त्रीविषयादिति (४।१।६३) प्रतिषेधे प्राप्ते। आनन्दशब्दस्याजातिवाचित्वान् ङीष्यप्राप्ते। श्वंस्तक्षन्निति तयोर् ऋन्नेभ्यो ङीबिति (४।१।५) ङीपि प्राप्ते। अनुडुह्नड्वाहीतरनयोरनकारान्तत्वाद् ङीष्यप्राप्ते। इकारान्तयोः सप्रतरययोर्गणे पाठः पुंवद्भावप्रतिषेधार्थोऽनडुहीभार्योऽनड्वाहीभार्य इति। एतदेव वचनं

ज्ञापकमनडुहः स्त्रियां विकल्पेनाम् भवतीति । तेन यदुक्तमनडुहः स्त्रियाञ्चेति वक्तव्यमिति (७।१।९८,वा) तन्न वक्तव्यमिति भवति । एषणं करण इति । एषणशब्दः करणे कारके ङीष मुत्पादयतीति । इष्यतेऽनयेत्येषणी । करण इति किम् ? इष्यतेऽस्यामित्यधिकरणे टित्त्वान् ङीबेव भवति । एषणी । स्वरे विशेषः । देहस्य टापि प्राप्ते । देहनादीनां ल्युडन्तत्वात् टिल्लक्षणे ङीपि । मेधइतरस्याजातित्वान् ङीष्यप्राप्ते । गौतमस्य शार्ङ्गरवादित्वान् ङीनि प्राप्ते । पक्षे च वचनात् सोऽपि भवत्येव । आयस्थूणादीनामालिपिशब्दपर्य्यन्ताणामणिञोरनार्षयोरिति (४।१।७८) ष्यङि प्राप्ते । आयस्थूणशब्दः शिवाद्यण्णन्तः । भौरिक्याद्योऽत इञितीञन्ताः (४।१।९५) । आपिच्छिकस्य ङीषि प्राप्ते । आपिच्छिकानां राजानः । तेषामपत्यं स्त्री । जनपदशब्दात् क्षत्रियादञितरञ् (४।१।१६८) । तस्यातश्चेति (४।१।१७८) लुकि कृते प्रत्ययलक्षणेन ङीब् प्राप्नोति । आरटादीनां प्राक् शातनशब्दात् स्त्रीविषयत्वान् ङीष्यप्राप्ते । शातनादीनां लुडन्तत्वान् ङीपि प्राप्ते । अधिकरणाद् ङीपि । अग्रे हायनमस्या इत्याग्रहायणी । स्वार्थिकोऽण् । णत्वं निपातनात् । (K) अणन्तत्वान् ङीपि प्राप्ते । ईकारान्तस्य पाठः पुंवद्भावप्रतिषेधार्थं आग्रहायणीभार्य्य इति । प्रत्यवरोहणसेवनयो ल्युडन्तयोष्टित्त्वान् ङीपि । केचित्तु पुंवद्भावप्रतिषेधार्थं प्रत्यवरोहिणीति पठन्ति प्रत्यवरोहिणीभार्य्य इति । सुमङ्गलात् संज्ञायां नित्यं संज्ञाच्छन्दसोरिति ( ४।१।२९ ) वर्त्तमाने केवलमामकेत्यादिना (४।१।३०) ङीपि प्राप्ते । पक्षे वचनात् सोऽपि भवति । संज्ञायामिति किम् ? सुमङ्गला । सुन्दरादीनां प्राक् तरुणशब्दात् स्त्रीविषयत्वान् ङीष्यप्राप्ते । तरुणतलुनशब्दयोर्वयोलक्षणे ङीपि प्राप्ते । नञ्स्नञीकक्तरुणतलुनानामुपसंख्यानमितरत्र (४।१।१५,वा) तु वयोग्रहणम् । बृहन्महच्छब्दयो रुगित्त्वान् ङीपि प्राप्ते । पक्षे सोऽपि भवत्येव । सुधर्मणोऽपत्यमृष्यण् सौधर्मः । अणिञोरनार्षयोरिति (४।१।७८) ष्यङि प्राप्ते । रोहिणी नक्षत्र इति । नक्षत्र इति किमर्थम् ? रोहिता । रेवती नक्षत्र इति किम् ? येषां रेवतशब्दोऽन्याकारान्त इति दर्शनं तेषां प्रत्युदाहरणं टाब् रेवतेति । येषां त्विदं वचनं

(K) पूर्वपदात् संज्ञायामग (८।४।३) इत्यनेनैनात्र णत्वं सिध्यन्ति ।

रा विद्यतेऽस्या इति रैशब्दात् मतुम् निपातनात् वत्वमिति तेषां प्रत्युदाहरण उगितश्चेति (४।१।६) ङीब् रेवतीति । स्वरे विशेषः । विकलादीनां टापि प्राप्ते । कटशब्दाच्छ्रोण्यभिधाने ङीष् । कटी श्रोणिरित्यर्थः । श्रोणिरिति किम् ? कटा । पिप्पल्यादयश्चेति । एतावद् गणे पठ्यते । तांस्तु पिप्पल्यादीन् दर्शयितुं पिप्पलीहरीतकीत्यादिकं वृत्तिकारवचनम् । पृथिवीति । ईकारान्तनिपातनम् पुंवद्भावनिवृत्त्यर्थम् पृथिवीभार्य्य इति । क्रोष्टुशब्दस्य स्त्रियाञ्चेति (७।१।८६) तृज्वद्भावः । मातरि षिच्चेति । पितृव्यमातुलमातामहपितामहा (४।२।३६) इत्यत्र पितृमातृभ्यां पितरि वाच्ये डामहज् निपातयिष्यते । मातरि वाच्यायां डामहजेव । तस्यापि षित्त्वम् । दंष्ट्रेति । दंश दशने । दाम्नीशसेत्यादिना (३।१।१८२) ष्ट्रन् । षिल्लक्षणस्यानित्यत्वात् ङीषष्टाब् भवति ।

४२ । जानपदकुण्डगोणस्थलभाजनागकालनीलकुशकामुककवराद् वृत्त्यमत्रावपनाकृत्रिमाश्राणास्थौल्यवर्णानाच्छादनायोविकारमैथुनेच्छाकेशवेशेषु ।

वर्त्तते यया सा वृत्तिरिति जीवनोपायो वृत्तिशब्देनेहोच्यते । जनपदे भवा वृत्तिर्जानपदी । उत्सादिभ्योऽञित्यञ् (४।१।८६) । जानपद्यन्येति । टिड्ढाणञिति (४।१।१५) ङीबेव भवति । स्वरे विशेष इति । ङीषि सति प्रत्ययस्वरेणान्तोदात्तत्वं भवति । ङीपि तु सत्याद्युदात्तत्वम् । जानपदस्य ञित्स्वरेणाद्युदात्तत्वात् । अमत्रमिति । भाजनं पात्रम् । कुण्डा ऽन्येति । क्रियाशब्दोऽयमित्याहुः । कुडि दाहे । गुरोश्च हल (३।३।१०३) इत्यकारप्रत्ययः । अजाद्यतष्टाप् (४।१।४) । यस्तु द्व्यचनः कुण्डशब्दः स नित्यं नपुंसक एव वर्त्तत इति प्रत्युदाहृतं न युक्त इति । आवपनमिति । भाजनविशेष उच्यते यत्र धान्यादि प्रक्षिप्य नीयते । गोणा ऽन्येति । सा पुनर्यस्या इदं याहच्छिकं नाम । अकृत्रिमेति । पुरुषव्यापारादिभिर्न निर्वृत्तेत्यर्थः । स्थला ऽन्येति । या पौरुषेयी । भाजीति । भज विश्राणने । चुरादिणिच् । ण्यासश्रन्थो युजिति (३।३।१०७) युच् प्राप्नोति । अत एव निपातनाद्ङ् । अङन्तात् ङीष् । श्राणेति । श्रा पाके इत्यस्मात् क्तः । संयोगादेर्धातोर्यण्वत इति

(८।२।४७) नत्वम् । अट्कुप्वाङ्नुम्व्यवाये (८।४।२) ऽपीति णत्वम् । नागशब्द इत्यादि । नागशब्दो द्विविधः । जातिवचनो गुणवचनश्च । तत्र स्थौल्यग्रहणादिह न जातिवचनो ङीषमुत्पादयति । नहि जातिवचनस्य स्थौल्यमभिधेयं सम्भवति । नापि गुणान्तरवचनः । नहि गुणान्तरशब्दान्नागवचनान् ङीषन्ताद् गुणान्तरं प्रतीयते । अपि तु स्थौल्यमेव । तस्माद् यदासौ स्थौल्यं गुणमभिधाय द्रव्ये वर्त्तते तदा ङीषमुत्पादयति । नान्यदा । अन्यत्रेत्यादि । स्थौल्यादन्यत्र गुण एव दैर्घ्यादौ वर्त्तमानो नागशब्दो यदा द्रव्यं विशिनष्टि तदा टापमुत्पादयति । जातिवचनात्त्वित्यादि । हस्तित्वादिजातिवचनाज्जातेरस्त्रीविषयादितरादिना (४।१।६३) ङीष् भवति । वर्णाच्चेदिति । द्रव्ये वर्त्तमानो यदि वर्णस्तस्य प्रवृत्ति-निमित्तं भवतीत्यर्थः । काला ऽन्येति । यस्या याट्टच्छिकसंज्ञा । नीला ऽन्येति । आच्छादनं शाटिकादि । अनाच्छादने न सर्व्वत्र । किं तर्हि ? नीलादौषधौ प्राणिनि चेति । शब्दशक्तिस्वाभाव्यात् । तत्रैव नीलशब्दस्य वृत्तेः । अथवा मनोरौ वेत्यतो (४।१।३८) वाग्रहणमिहानुवर्त्तते । सा च व्यवस्थितविभाषा । तेनानयोरेवार्थयोस्ततो भविष्यति । नान्यत्रेति । संज्ञायामेवेति । अना-च्छादन एवायं विकल्पः । एषोऽपि तत एव वाग्रहणानुवृत्तेर्लभ्यते । अयो-विकार इति । विशिष्ट एव फाल इति यस्य नामधेयम् । कुशा ऽन्येति । तदाकृतिरेव काष्ठादिमयी । कामुका ऽन्येति । सा पुनर्यस्या मैथुनादन्यद् वस्तु कामयितुं शीलम् । मैथुनेच्छावती भण्यत इति । मत्वर्थीयाकारान्तस्य मैथुनेच्छाशब्दस्योपादानात् । केशवेश इति । एतदाख्ये विशिष्ट एव । कवरा ऽन्येति । कवरो वर्णोऽस्या अस्तीति मतुप् । तस्य लोपादभेदोपचाराद्वा द्रव्ये यो वर्त्तते स वेदितव्यः ।

## ४३ । शोणात् प्राचाम् ।

शोणशब्दोऽयं वर्णवचनः । वर्णानां तणतिनितान्तानामिति ( फिट् २।३३ ) वचनादाद्युदात्तः । तत्रान्यतो ङीषिति (४।१।४०) सिद्धे वचनं नियमार्थम् प्राचामेव यथा स्यात् । अन्येषां मा भूदिति ।

४४ । **वोतो गुणवचनात् ।**

गुणमुक्तवान् गुणवचन इति। भूते काले ल्युटो विधानात्। स पुनर्यः प्राग् गुणमभिधाय पश्चाद् मतुब्लोपादभेदोपचाराद्वा तद्वद् द्रव्यमभिधत्ते स वेदितव्यः। पट्वी मृद्वीति। अत्र पटुत्वं मृदुत्वञ्च यथाक्रमं गुणमभिधाय पटुमृदुशब्दौ तद्वति द्रव्ये वर्त्तेते इति गुणवचनौ भवतः। शुचिरिति। शुचिशब्दः शुचित्वे गुणे वर्त्तित्वा द्रव्ये वर्त्तत इति गुणवचनः। नतूकारान्तः। आखुरिति। जातिवचनोऽयम्। न गुणवचनः। गुणवचनान् ङीबाद्युदात्तार्थमिति। गुणवचनाद् ङीब् विधेयः। न ङीष्। स्वरे विशेषः। किमर्थम्? आद्युदात्तार्थम्। अन्तोदात्तेषूदात्तयणो हल्पूर्वादित्यु—(६।१।१७४) दात्तत्वमीकारस्य विधीयत इति नास्ति विशेषो ङीम्ङीषोः। आद्युदात्तेषु तु ङीबनुदात्त एवावतिष्ठते। तस्मात् तदर्थं ङीब् विधेयः। ननु च ङीष् प्रकृतः। तत् कथं ङीप् शक्यते विधातुम्। नैष दोषः। ङीबेव ह्यत्र मण्डूकप्लुतिन्यायेनानुवर्त्तते। न ङीष्। अस्वरितत्वात्। वस्वीति। वस निवासे। भृमृशीतॄचरित्सरितनिधनिमिमस्जिभ्य उ इति (उण्,१।५) वर्त्तमाने धान्ये निदिति (उण्, १।८) च शॄस्वृस्निहित्रप्यसिवसिहनिक्लिदिबन्धिमनिभ्यश्चेत्युप्रत्ययः (उण्,१।१०)। निच्च। नित्त्वादाद्युदात्तत्वं भवति। गुणवचनश्चायं वसुशब्दः। वसुत्वे गुणे वर्त्तित्वा तद्वति द्रव्ये वर्त्तत इति कृत्वा। पटुशब्दोऽप्याद्युदात्तत्वान् ङीपं प्रयोजयति। अट पट गतौ। हेतुमण्णिच्। फलिपाटिनमिमनिजनां गुक् पटिनाकिधतश्चेतुप्रत्ययः (उण्, १।१८)। पाटेश्च पटिरादेशः। धान्ये निदि (उण्,१।८) त्यनुवृत्तेर्नित्त्वादाद्युदात्तत्वम्। मृदुशब्दस्य प्रत्ययस्वरेणान्तोदात्त इति। तत्र ङीपो ङीषो वा विशेषो नास्ति। म्रद मर्द्दने। कुर्भ्रश्चेतरतः (उण्, १।२२) कुरित्यनुवर्त्तमाने प्रथिम्रदिभ्रस्जां सम्प्रसारणं चेति (उण्, १।२८) कुप्रत्ययः। सम्प्रसारणञ्च भवति। खरुसंयोगोपधप्रतिषेध इति। खरुशब्दात् संयोगोपधाच्च प्रतिषेधः। स तु वेत्यस्य व्यवस्थितविभाषाविज्ञानादेव लभ्यत इति। वक्तव्यमिति। उत इति तपरकरणं दीर्घनिवृत्त्यर्थम्। तेन पटूरित्यत्र न भवति। पटुमिच्छतीति सुप आत्मनः क्यच् (३।१।८)। अकृत्सार्वधातुकयोरिति (७।४।२५) दीर्घः। पटूय इति

श्यिते क्विप् । अतो लोप इत्यकारलोपः (६।४।४८) । लोपो व्योर्वलीति (६।१।६६) यकारस्य लोपः । इहोत इति विशेषणोपादानादेव शास्त्रीय गुणस्यापरिग्रहः सिद्धः । न ह्यदेङां मध्ये कश्चिदुकारान्तोऽस्ति । लोके तु क्वचिदुपसर्जनं गुण इतत्रभिधीयते यथा गुणभूता वयमिति । अप्रधानभूता इति गम्यते । यस्य गुणस्य हि भावात् तद्वति द्रव्यशब्दे निवेशस्तदभिधाने त्वतलाविव्यत्र विशेषणमात्रं गुणशब्देनोच्यते । तथाहि जातावपि भावप्रत्ययो भवति गोत्वमिति । इह तु यादृशो गुण इष्यते तादृशं परिभाषितुमाह—सत्त्वे निविशतेऽपैतीत्यादि । व्यवच्छेदफलकत्वात् सर्ववाक्यानां सत्त्व एवेत्यवधारणं द्रष्टव्यम् । सत्त्वं द्रव्यम् । तत्रैव निविशते । तदेवाश्रयतीत्यर्थः । अपैति । ततः सत्त्वादपगच्छति । यथाऽम्रफले श्यामता पूर्वमुपैति । रक्ततायामुपजातायां ततोऽपैति । पृथग्जातिषु दृश्यते । पृथग् नाना जातयो येषां ते पृथग्जातयः । अतस्तेषु पृथग्जातिषु दृश्यते । नहि गोत्वमश्वादिषु व्यक्तिषु दृश्यते । गोव्यक्तौ दृष्टः शङ्खादावपि शुक्लादिर्गुणो दृश्यते । एतेन सर्वेण जाति र्गुणो न भवतीत्युक्तम् भवति । नहि जातिर्द्रव्यमेवाश्रयति । यथा हि सत्ता द्रव्यगुणकर्मसु त्रिष्वपि वर्त्तते । द्रव्यत्वं द्रव्य एव । कर्मत्वं कर्मण्येव । गुणत्वं गुणएव । नापि द्रव्यवर्त्तिनी जातिः सत्त्वादपैति । जन्मनः प्रभृत्या विनाशात् तस्याधारद्रव्यापरित्यागात् । न जातिः पृथग्जातिषु दृश्यते । नहि गोत्वमश्वादिव्यक्तिषु दृश्यते । नाप्यश्वत्वं गवादिष्विति नास्ति जाते र्गुणत्वप्रसङ्गः । कर्मणस्तु स्यात् । तदपि हि सत्त्व एव निविशते यदा सक्रियं द्रव्यं भवति । अपैति च ततो यदा तु निष्क्रियं भवति । पृथग्जातिषु दृश्यत इति । घटपटादिषु दृश्यते । अतः कर्मणो गुणत्व मपाकर्त्तुमाह आधेयश्चेत्यादि । आधेयो निर्वर्त्त्य उत्पाद्य इत्यर्थो यथा पाक्यद्रव्येषु रक्तता गुणः । स ह्यग्निसंयोगेन निष्पाद्यते । अक्रियाजश्चेति । क्रिया व्यापारः । ततो जातः क्रियाजः । न क्रियाजोऽक्रियाजो नित्यो यथाऽऽकाशादिषु महत्त्वादिर्गुणः । तदेवं गुणस्योत्पाद्यत्वानुत्पाद्यत्वप्रकारद्वयदर्शनेन कर्मणो गुणत्वनिवृत्तिः कृता भवति । तद्धुत्पाद्यमेव । नानुत्पाद्यम् । एवमपि द्रव्यस्य गुणत्वं प्राप्नोति तस्यापि ह्येते धर्मा विद्यन्ते ।

तथाहि तदपि यदि निविशते द्रव्य एवारम्भके ऽवयवभूते निविशते। अपैति च ततः। यथा शरीर मवयवीति। तद्धि हस्तपादादिष्ववयवेषु समवैति। तद्विनाशे च विनाशात् ततोऽपैति। पृथग्जातिषु दृश्यते। हस्त्यादिषु दृश्यते। द्रव्यस्यापि पूर्वोक्तं प्रकारद्वयमस्त्येव। अवयविद्रव्यस्योत्पाद्यत्वादाकाशादेस्तद्वदनुत्पाद्यत्वादित्यत आह सोऽसत्त्वप्रकृतिर्गुण इति प्रकृतिः स्वभावः। सत्त्वं द्रव्यं प्रकृतिर्यस्य स सत्त्वप्रकृतिः। न सत्त्वप्रकृतिरसत्त्वप्रकृतिः। यथोक्तैर्धर्मैर्युक्तो यो द्रव्यस्वभावो न भवति स गुणः। द्रव्यं द्रव्यस्वभावम्। अतो गुणो न भवति।

## ४५। बह्वादिभ्यश्च।

बह्वादिषु शक्तिः शस्त्र इति पठ्यते। तस्यायमर्थः। शस्त्रेऽभिधेये शक्तिशब्दाद्वा ङीष् भवति शक्तिः शक्ती। शस्त्र इति किम्? शक्तिः सामर्थ्यम्। अन्ये तु शक्तिशस्त्री इति शब्दद्वयं पठन्ति शक्तिः शक्ती शस्त्रिः शस्त्री। इतः प्राण्यङ्गादिति। इकारान्तात् प्राण्यङ्गवाचिनो वा ङीष् भवति। धमनिः। धमनी। इत इति किम्? समर्था ग्रीवा। प्राण्यङ्गादिति किम्? श्रेणिः। कृदिकारादक्तिनः। सर्वतोऽक्तिन्नर्थादित्येके। अस्यार्थो रात्रेश्चाजसाविव्यत्रैव (४।१।३१) व्याख्यातः। यदि सर्वतोऽक्तिन्नर्थात् ङीष् भवति शकटयादीनां गणे किमर्थं इकारान्तानां पाठः? तस्यैव प्रपञ्चार्थः। पद्धति शब्दस्याक्तिन्नर्थादिति प्रतिषेधे प्राप्ते पाठः। पदस्य हतिः पद्धतिः। हिमकाषिहतिषु चेति (६।३।५४) पद्भावः। चन्द्रभागान्नद्यामिति। चन्द्रभागशब्दान्नद्यामभिधेयायां वा ङीष् भवति चन्द्रभागा चन्द्रभागी नदी। नद्यामिति किम्? चन्द्रभागा नाम देवता। अहन्नित्ययं शब्दः केवलः स्त्रियां न वर्त्तते। तस्मात् समासे तदन्त उदाहार्य्यः। दीर्घाण्यहानि यस्यां शरदि सा दीर्घाह्नी। ङीप्प्रतिषेधावप्यस्माद् भवतः। अनो (४।१।१२) बहुव्रीहेर्डाबुभाभ्यामन्यतरस्यामित्यपि (४।१।१३) डाब् भवति। अनउपधालोपिनोऽन्यतरस्यामिति (४।१।२८) वा ङीप् च। तेन चातूरूप्यं भवति (L)। यदि

(L) वस्तुतस्तु चातुःशब्द्यम्। न रूप्यात्। चातुरूप्यं तु केवलं ङाबेव। दीर्घाह्नी दीर्घाह्नी दीर्घाह्ना दीर्घाहाः शरदिति। अत्राद्यौ शब्दौ ङीप्ङीषन्तौ। तृतीयो डाबन्तः। चतुर्थस्तु तेषां प्रतिषेधेन पाक्षिको

बहुशब्दो गुणवचनस्तत् किमर्थमस्येह ग्रहणम्? यावता पूर्वेणैव सिद्धो ङीषित्यत आह तस्येतरादि ।

## ४६ । नित्यं छन्दसि ।

अथ नित्यग्रहणं किमर्थम्? यावता पूर्वेणैव सिद्धे विकल्पे सत्यारम्भसामर्थ्यादेव नित्यं भविष्यतीत्यत आह नित्यग्रहणमुत्तरार्थमिति ।

## ४७ । भुवश्च ।

प्रभ्वीत्यादि । भुवः संज्ञान्तरयोरित्यतो (३।२।१७९) भुव इत्यनुवर्त्तमाने विप्रसंभ्यो ड्वसंज्ञायामिति (३।२।१८०) डुप्रत्ययः । तदन्तात् ङीष् । स्वयम्भूरिति । भवतेः क्विबन्तस्य रूपम् । ननु च भुव इति भूशब्दाद्दीर्घादियं पञ्चमी । ततश्च दीर्घादेव प्रत्ययेन भवितव्यम् । न ह्रस्वादित्यत आह ह्रस्वादेवेयं पञ्चमीति । तर्हि भुव इति निर्देशो नोपपद्यते । घेर्ङितीति (७।३।१११) गुणे कृते भोरिति निर्देशेन भवितव्यमित्यत आह सौत्रो निर्देश इति । छन्दसि वर्णव्यत्यय उक्तः । तेन तस्य गुणेऽकृत उवङादेशः कृत इति दर्शयति ।

## ४८ पुंयोगादाख्यायाम् ।

पुंयोगादिति । विभाषा गुणेऽस्त्रियामिति (२।३।२५) हेतौ पञ्चमी । योगः सम्बन्धः । आख्यायामिति । पञ्चम्यर्थे एषा । व्यत्ययो बहुलमिति (३।१।८५) सप्तमी । आख्यायते ऽनया प्रातिपदिकार्थ इति श्रुत्याख्या । पुंस आख्याभूतमिति । पुंसो वाचकभूत मितरर्थः । तद्धि पुंयोगाद्धेतोः सम्प्रति स्त्रियां वर्त्तते । न पुंसि । अतीत एव काले पुंसो वाचकमासीत् । अतो भूतग्रहणम् । एतदुक्तम्भवति । यत् प्रातिपदिकं प्राक् पुंसो वाचकमभूत् पश्चात् तु पुंयोगाद्धेतोः स्त्रियां वर्त्तते तस्मात् ङीष् भवतीति । कथं पुनर्योगे गुणभावमापन्नस्य पुंस आख्याग्रहणं विशेषणं युज्यते? स्त्रियामित्यनुवृत्तेः । स्त्रिया

---

मकारान्तः । ङीम्ङीबन्तयोः स्वरे भेदः । ङीबन्तस्य बहुव्रीहिस्वरेण पूर्वपदप्रकृतिस्वरत्वम् । ङीषन्तस्य त्वन्तोदात्तत्वमित्येतौ द्वौ भिन्नौ । दीर्घाङ्कीत्यत णत्वाभावश्च । वृत्तिकारमते क्षुभ्नादित्वात् (८।४।११, वा) । भट्टोजिमते तु क्षुभ्नादित्वात् (८।४।३९) ।

एव । नैतदस्ति । यो हि पुंयोगात् स्त्रियां वर्त्तते सोऽवश्यं स्त्रियमाचष्ट इति विशेषणमिदमनर्थकमेव स्यात् । पुंयोगस्य तर्हीदं विशेषणम् । न । असम्भवात् । न सम्भवत्येव हि तत् प्रातिपदिकं यत् पुंयोगाद्धेतोः पूर्वं स्त्रियां वर्त्तते पुंयोगस्य चाख्याभूतम् भवति । गणकादयो हि ये शब्दाः पुंयोगात् स्त्रियां वर्त्तन्ते ते सर्वे पुंस एव वाचकाः प्रागभूवन् । न पुंयोगस्य । ये तु पुंयोगादयः शब्दाः पुंयोगस्य वाचका स्ते पुंयोगात् स्त्रियां न वर्त्तन्त एव । न चेह कश्चित् तथाविधोऽन्यः प्रकृतः । नापि श्रूयते यस्याख्याग्रहणेन सम्बन्धः स्यात् । तस्माद् गुणभूतस्यापि पुंस एवानेन सम्बन्धो विज्ञायते । गणकीत्यादि । गणयतीति गणकः । ण्वुल् । प्रतिष्ठत इति प्रष्ठः । आतश्चोपसर्गे इति (३।१।१३६) कः । प्रष्ठोऽग्रगामिनीति (M) निपातनात् मूर्धन्यः (८।३।९२) । सर्वे एते पुंसो वाचकाः । पुंयोगात्तु यदोत्तरकालं स्त्रियां वर्त्तन्ते तदैतेभ्यो ङीष् । पुंसि शब्दप्रवृत्तिनिमित्तस्य सम्भवादिति । गणनादिक्रियास्वभावं यद् गणकादिशब्दानां प्रवृत्तिनिमित्तं तस्य पुंसि सम्भवः । न स्त्रियां नापि नपुंसके । तस्मात् पुंसि शब्दा एते । पुंसो वाचका एते शब्दा इत्यर्थः । कथं तर्हि स्त्रियां वर्त्तन्त इत्याह तद्योगादित्यादि । तद्योगस्तस्यायमितिसम्बन्धः स्वस्वामिभावलक्षणः । तस्मादेते पुंशब्दा अपि स्वभावतः स्त्रियां वर्त्तन्ते । यथैव ह्यसौ तद्योगात् स्त्रियां स्नानोद्वर्त्तनपरिषेकादील्ँ लभते तथा तच्छब्दामपि । देवदत्तेति । अत्र देवदत्तशब्दसंज्ञकेन पुरुषेण

(M) There is some controversy regarding णत्व in the word अग्रगामिनि। काशिका gives व्रषगामिणी as an illustration of कुमति च (8. 4. 13). My MSS—(the Bengali one is of 1715 Saka)—also spells अग्रगामिणि here, with the cerebral ण। In the MSS. of the प्रक्रियाकौमुदी about 500 years old, the cerebral ण is found in the word. On the other hand मैत्रेयरक्षित asserts that प्रष्ठोऽग्रगामिनि ( 8. 3. 92 ) had been given with the dental न by the सूत्रकार। In annotating the वार्त्तिक युवादीनां प्रतिषेधः, says he in his तन्त्रप्रदीप, on the Rule प्रातिपदिकान्तनुम्विभक्तिषु च ( 8. 4. 11 ), that "युवादीनां प्रतिषेधो वक्तव्यमित्येवं णत्वप्रतिषेधे प्रष्ठोऽग्रगामिनीत्येवमादयो निर्देशाः प्रमाणम्।" So there is at least one classical पाणिनीय Grammarian who vouches for the dental न in the word अग्रगामिनि। But others maintain णत्वमनित्यमिति and therefore allows the Rule कुमति च (8. 4. 13.) to prevail.

योगाद् देवदत्तशब्दः स्त्रियां न वर्त्तते । किं तर्हि ? स्वतएव । तस्या ह्मीयं संज्ञा कृता । परिसृष्टा प्रजातेति । प्रसूतेत्यर्थः । निर्लुठितगर्भेति यावत् । परिसृष्टप्रजातशब्दौ स्त्रियां वर्त्तमानौ प्रसवनिमित्तमुपादाय प्रवर्त्तते । परिसर्गः प्रजनः प्रसव इत्येकार्था एते शब्दाः । तस्य च प्रसवस्य पुंयोगो निमित्तम् । तेन विना तदभावात् । तस्मात् पुंयोगाद्धेतोः स्त्रियां वर्त्तते इति । ननु पुंशब्दाख्य इति ईकारो न भवतीति । एते शब्दा इति । बहुवचनं येऽन्येऽप्येवंजातीयाः शब्दास्तानपेक्ष्य वेदितव्यम् । अन्यथा हि परिसृष्टप्रजातशब्दयोर्द्वित्वादेतौ शब्दाविति वक्तव्यं स्यात् । गोपालिकादीनां प्रतिषेधो वक्तव्य इति । सिद्धय इति वाक्यशेषः । गोपालिकादीनां शब्दानां सिद्धये ङीष्प्रतिषेधः । स तु वोतो गुणवचनादित्यतो (४।१।४४) वेत्यनुवृत्तेस्तस्य व्यवस्थितविभाषात्वमाश्रित्य प्रतिपाद्यः । सूर्य्याद्देवतायां चाब् वक्तव्य इति । ननु च ङीष एव प्रतिषेधो वक्तव्यः । ङीषि प्रतिषिद्धे टाब् भविष्यति । टापि च सूर्य्येति सिध्यत्येव । नैतदेवम् । यद्यपि हि रूपं सिध्यति स्वरस्तु न सिध्यति । यस्मात् सूर्य्यशब्दोऽयमाद्युदात्तः । तथाहि राजसूयसूर्य्येतयत्र ( ३।१।११४ ) क्यबन्तो निपातितः । ततः क्यपः पित्वादनुदात्तत्वम् । धातोस्तु सुवतेः सर्त्तेर्वा धातुस्वरेणान्तोदात्तत्वम् । तत्र टापि सत्यनुदात्तत्वं स्यात् । चापि तु सत्यन्तोदात्तता भवति । पित्करणं तु ङ्याप्प्रातिपदिकादित्यत्र (४।१।१) सामान्यग्रहणार्थम् । सूरीति । सूर्य्यस्य स्त्री मानुषी सूरी । ङीषेव भवति । सूर्य्यतिष्यागस्त्यमत्स्यानामिति (६।४।१४९) यलोपः ।

## ४९ । इन्द्रवरुणभवशर्वरुद्रमृडहिमारण्ययवयवनमातुलाचार्य्याणामानुक् ।

येषामिति । इन्द्रादीनाम् । अन्येषान्त्विति । हिमादीनाम् । अथ किमर्थमानुक् क्रियते ? अनुगेव नोच्येत । तेन सवर्णदीर्घत्वेन सिध्यति । न सिध्यति । अतो गुणे (६।१।९७) पररूपत्वं हि प्राप्नोति । अकारोच्चारणसामर्थ्यान्न भविष्यति । पररूपे हि नुगेव वक्तव्यः स्यात् । एवं तर्ह्याकारो-

चारणसामर्थ्याद् भविष्यति। स्वरसन्धिरेव न भवतीत्येवमपि विज्ञायते। तस्मान् नैवं विज्ञायीत्यानुगेव वक्तव्य:। अथवेन्द्रमाचष्ट इति तत्करोति तदाचष्ट इति णिचि णाविष्ठवत् प्रातिपदिकस्येति टिलोप: (ग,सू, १८६)। इन्द्रयते: क्विप्। णिलोप:। इन्द्र: (N) स्त्रीन्द्राणीत्यत्र दीर्घस्याकारस्य श्रवणं यथा स्यादित्येवमर्थमानुको विधानम्। अनुक्ति हि सति दीर्घो न श्रूयेत। ननु च नैवात्र ङीषा भवितव्यम्। अत इत्यधिकारात्। दीर्घोच्चारणसामर्थ्याद् भविष्यति। हिमारण्ययोर्महत्त्व इति। महत्त्वेन युक्ता हिमादय: स्त्रीलिङ्गेनाभिसम्बध्यन्ते यदा तदा स्त्रीत्वविवक्षाया-मनयो: प्रत्ययागमयोर्विधानमित्येतदनेनाख्यायते। न तु स्त्रीप्रत्ययस्याय-मपवाद उच्यते। स्त्रीत्व एव हि प्रत्ययो भवति। यवाद् दोष इति। यवाद् दोषे गम्यमाने स्त्रियां ङीष् भवति। दुष्टो यवो यवानी। यवनाल्लि-प्यामिति। यवनानां लिपिरिति। तस्येदमित्यण्प्रसङ्गे (४।३।१२०) ङीष् विधीयते। स तु तदर्थस्य ङीषैव द्योतितत्वान्न भवति। आचार्य्यादणत्वञ्चेति। नेदमपूर्वं वक्तव्यम्। क्षुभ्नादिष्वस्य पाठात्। स्वार्थ एवायं विधिरिति। एवकारेण पुंयोगो व्यवच्छिद्यते। यदि हि पुंयोगे विधिरयं स्याच् शूद्राऽपि क्षत्रियस्य भार्य्या क्षत्रियाणीति स्यात्। तस्मात् स्वार्थे एवायं विधि: क्षत्रियैव क्षत्रियाणीति। पुंयोगे तु ङीषैव भवितव्यमिति। पूर्वसूत्रेण। लिच्चेति। कस्य तल्लित्त्वम्? आनुक:। तथाहि मुद्गलानीशब्दस्य (O) द्वितीय उदात्त आम्नाये पठ्यते। ङीषस्तु लित्त्वे तृतीय उदात्त: स्यात्।

## ५०। क्रीतात् करणपूर्वात्।

करणं पूर्वं यस्मिन्नित्यादिना करणपूर्वग्रहणं क्रीतग्रहणञ्चोभयमप्येतत्

---

(N) इन्द्र: स्त्रीत्यत्रेन्द्र इति षष्ठ्यन्तं पदम्। इन्द्रिति रेफान्तात् प्रातिपदिकात्। प्रथमैकवचनेऽपीन्द्रिति रेफान्तमेव पदम। संयोगान्तस्य लोपे यण: प्रतिषेध इति (८।२।२३,वा) रेफलोपाभावात्।

(O) My Brahmin readers will no doubt realise here a taunt by भट्टोजि on the न्यासकार—"यत्तु न्यासकृतोक्तं मुद्गलानीशब्दे द्वितीय उदात्त इति तद्वेदवाह्यत्वप्रयुक्तमेव। लितीति (६।१।१९३) प्रत्ययात् पूर्वस्य विधीयमानं सन्निहितमानुकं विहाय द्वितीये प्रवर्त्तत इत्यत्र बीजाभावात्। सकलवैदिकपाठविरोधाच्चेति (प्रौढमनोरमा 4.1.49)। न्यासकार was वेदवाह्य because he was a बौद्ध।

प्रातिपदिकस्य विशेषणमिति दर्शयति । पूर्वशब्दोऽयमवयववचनः । करण-मवयवो यस्मिन्नित्यर्थः । अथ क्रीतशब्दस्यैव करणपूर्वग्रहणं विशेषणं कस्मान्न विज्ञायते ? अशक्यत्वात् । क्रीतशब्दो ह्यवयववाचिनं वा पूर्वशब्दं गृहीत्वा विशिष्येत करणं पूर्वमस्मिन्निति ? व्यवस्थाशब्दं वा करणं पूर्वमस्मादिति ? तत्र प्रथमः पक्षो न सम्भवति । नह्यत्र क्रीतशब्दस्य करणवाचिशब्दान्तर मवयव उपपद्यते । द्वितीयस्तु सम्भवति । किन्तु वाक्येऽपि स्यात् । अश्वेन क्रीतेति । अस्ति ह्यत्र क्रीतशब्दात् करणं पूर्वम् । प्रातिपदिके तु विशेष्यमाणे न भवत्येष दोषः । नह्यश्वेन क्रीतेत्येतत् करणावयवं क्रीतशब्दान्तं प्राति-पदिकम् । किं तर्हि ? वाक्यम् । तस्मात् प्रकृतं प्रातिपदिकं सामान्य-मेवावयववाचिना पूर्वशब्देन विशिष्यते । क्रीतशब्देनापि तदेव करणपूर्वं प्रातिपदिकम् । तेन तस्मिन् विशेष्यमाणे सामर्थ्यात् तदन्तविधिः प्रसज्यते-त्याह क्रीतशब्दान्तात् प्रातिपदिकादिति । वस्त्रक्रीती वसनक्रीतीति । अत्र गतिकारकोपपदानां कृद्भिः सह समासवचनं प्राक् सुबुत्पत्तेरिति वस्त्र-वसनयोः करणयोः क्रीतशब्देन कर्तृकरणे कृता बहुलमिति (२।१।३२) प्रागेव सुबुत्पत्तेः समासः । सुक्रीता दुष्क्रीतेति । गत्युपपदत्वात् प्रागेव सुबुत्पत्तेः कुगतिप्रादय इति (२।२।१८) समासः । दुष्क्रीतेत्यत्रेदुदुपधस्य चाप्रत्ययस्येति (८।३।४१) षत्वम् । टाबन्तेन समास इति । सुबन्तयोरेवेति वेदितव्यम् । टापि विहिते कृदन्तताया विहतत्वात् । अत्र किं टाप् क्रियतामुत विभक्ति-रिति ? अन्तरङ्गत्वाट्टाप् । पश्चाद् वहिरङ्गा विभक्तिरिति विभक्त्यन्तयोः समासः । अन्तरङ्गत्वं वहिरङ्गत्वं तु टाब्विभक्त्योर्ङ्याप्प्रातिपदिकादित्यत्र (४।१।१) प्रतिपादितम् । कृते तर्हि टापि ङीष् कस्मान्न भवतीत्याह अत इति चेत्यादि । कथं पुनः टाबन्तेन समासः सिध्यति यावता गतिकारकोपपदानां कृद्भिः सह समासवचनं प्राक् सुबुत्पत्तेरिति प्रागेव कृदन्ततायां समासेन भवितव्यमित्यत आह गतिकारकोपपदानामित्यादि । कथं पुनर्बहुलं तदुच्यत इत्याह कर्तृकरण इत्यादि । कर्तृकरणे कृता बहुलमित्यनेन ( २।१।३२ ) हि गतिकारकोपपदानां कृद्भिः समासो विधीयते । स च बहुलग्रहणात् क्वचित् कृदन्तावस्थायां प्रागेव सुबुत्पत्तेः

क्वचिदन्यथा। तेन गतिकारकोपपदानां कृद्भिः सह समासवचनं प्राक् सुबुत्पत्तेरिति बहुलं तदाचार्य्यैरुच्यते। ततश्च टाबन्तेनापि क्वचित् समासो लभ्यत इत्यभिप्रायः।

## ५१। क्तादल्पाख्यायाम्।

अभ्रविलिप्तीति। लिप उपदेहे। अस्मात् क्तः। अल्पैरभ्रैर्विलिप्तेत्यस्या मर्थविवक्षायां पूर्ववत् प्राक् सुबुत्पत्तेः समासः। अल्पशब्दस्तु गतार्थत्वान्न प्रयुज्यते। चन्दनानुलिप्तेति। बहुचन्दनानुलिप्तेत्यर्थः।

## ५२। बहुव्रीहेश्चान्तोदात्तात्।

शङ्खभिन्नीति। रदाभ्यामिति (८।२।४२) नत्वम्। निष्ठान्तस्य निष्ठेति (२।२।३४) पूर्वनिपाते प्राप्ते जातिकालसुखादिभ्यः परवचनमिति (२।२।३६,वा) स न भवति। शङ्खादिशब्दा हि जातिवचनाः। अत एव हि जातिकाल-सुखादिभ्योऽनाच्छादनात् क्तोऽकृतमितप्रतिपन्ना (६।२।१७०) इत्यन्तोदात्तत्वं भवति। गलकोत्कृत्तीति। कृती छेदने इत्यस्मात् क्तः। केशलूनीति। केशाल्लूनातीति। ल्वादिभ्य इति (८।२।४४) नत्वं चोदयति। पाद-पतितेति। कर्तृकरणे कृता बहुलमिति (२।१।३२) तत्पुरुषसमासे-ऽन्तोदात्तत्वम्। अन्तोदात्ताज्जातप्रतिषेध इति। अन्तोदात्ताद्बहुव्रीहे-र्ङीषो विधाने जातशब्दान्तात् प्रतिषेधः। स चान्तग्रहणादेव लभ्यत इति न वक्तव्यम्। इहान्तग्रहणं न कर्त्तव्यमेव। विनापि तेन यथा वर्णादनु-दात्तादित्यत्रानुदात्तान्तादिति (४।१।३९) विज्ञायते तथेहाप्यन्तोदात्तान्तादिति विज्ञास्यते। तदेवमर्थं क्रियते। अन्तोदात्त एव यो नित्यं बहुव्रीहिस्ततो यथा स्यात्। विकल्पेन योऽन्तोदात्तस्ततो मा भूदिति। इह च दन्तजाता स्तनजातेत्यत्र वा जात (६।२।१७१) इति विकल्पेनान्तोदात्तत्वम्। अतोऽयं विधिर्न भविष्यति। अथवोत्तरसूत्रे वाग्रहणमुभयोरपि योगयोः शेषः। व्यवस्थितविभाषा च। तेन जातशब्दान्तान्न भविष्यति। अस्मिंस्तु व्याख्याने-ऽन्तग्रहणं विस्पष्टार्थमेवेति वेदितव्यम्। पाणिगृहीतीत्यादिना विशेष इति। सिद्धय इति शेषः। पाणिगृहीतीत्यादीनां सिद्ध्यर्थं विशेष एव

ङीब् भवति । न सर्व्वत्र । एतदपि व्यवस्थितविभाषया लभ्यते । विशेषस्तु पाणिग्रहणस्य वेदितव्यः । अग्निसाक्षिपूर्वकं भार्य्यार्थं यस्याः पाणिग्रहणं क्रियते सा पाणिगृहीतीति भवति । यथा कथञ्चिदिति । यथोक्तात् प्रकारादन्येन केनापि प्रकारेणेत्यर्थः । अबहुनञिति । बह्वादिपूर्वान् ङीष् न भवतीत्येतदर्थरूपं व्याख्येयमित्यर्थः । व्याख्यानन्तु तस्यैव वाग्रहणस्य व्यवस्थितविभाषात्वमाश्रित्य कर्त्तव्यम् । जातिकालसुखादीत्यादि । बहुकृतेत्यत्र बहोर्नञ्वदुत्तरपदभूम्नीत्यन्तोदात्तत्वम् ( ६।२।१७५ ) । अकृता सुकृतेत्यत्र नञ्सुभ्यामिति ( ६।२।१७२ ) । मासजातेत्यादिषु जातिकालसुखादिभ्योऽनाच्छादनात् क्त इति ( ६।२।१७३ ) ।

## ५३ । अस्वाङ्गपूर्वपदाद्वा ।

अस्वाङ्गपूर्वपदादिति । न स्वाङ्गमस्वाङ्गम् । तत् पूर्वं पदं यस्य बहुव्रीहिः स तथोक्तः । सारङ्गजग्धीति । अद भक्षणे । अदो जग्धिरित्यादिना ( २।४।३६ ) जग्धादेशः । झषस्तथोर्द्धोऽध इति ( ८।२।४० ) तकारस्य धत्वम् । झरो झरीति ( ८।४।६५ ) धलोपः । पलाण्डुभक्षितीति । भक्ष अदने । चुरादिणिच् । सुरापीतीति । घुमास्थादिसूत्रेणेत्त्वम् (६।४।६६) । सर्वत्र जातिकालसुखादित्यादिनोत्तरपदान्तोदात्तत्वम् ( ६।२।१७० ) । वस्त्रच्छन्ना वसनच्छन्नेति । छद अपवारणे इत्यस्य चुरादिण्यन्तस्य क्तप्रत्यये वा दान्तशान्तपूर्णेत्यादिना ( ७।२।२७ ) छन्नशब्दो निपातितः । अनाच्छादनादित्युत्तरपदान्तोदात्तत्वप्रतिषेधे बहुव्रीहौ प्रकृत्या पूर्वपदमिति ( ६।२।१ ) प्रकृतिस्वरे कृतेऽनुदात्तं पदमेकवर्जमिति (६।१।१५८) शेषस्यानुदात्तत्वादिहान्तोदात्तत्वं नास्ति । पूर्वपदे एवात्राद्युदात्ते । एकं नित्स्वरेणापरं लित्स्वरेण । वस आच्छादने । ष्ट्रन्प्रत्ययः । वस्त्रम् । अस्मादेव धातोर्वसनम् । ल्युट् । बहुलमित्यादिना संज्ञायाञ्छन्दसि बहुलं ङीष् भवतीत्येतदर्थरूपं व्याख्येयमित्यर्थः । (P) तत्र वाग्रहणस्य व्यवस्थितविभाषात्वादेव बहुलं संज्ञाच्छन्दसो

---

(P) In the Bengali Book ( MS. 12 ) the reading is different viz : तदेदं व्याख्यानम् । पूर्वसूत्रादनुवृत्तस्य चकारस्यानुक्तसमुच्चयार्थत्वाद यत्र संज्ञाच्छन्दसोरिष्यते तत्र भविष्यतीति ।

भविष्यति । नन्वत्र सूत्रेणैवानेनास्य बहुव्रीहित्वाद् भविष्यति ङीष् । किमर्थं तर्हीदमित्याह प्रवृद्धा चेत्यादि । विग्रहविशेषेण तत्पुरुषं दर्शयति ।

## ५४ । स्वाङ्गाच्चोपसर्जनादसंयोगोपधात् ।

चन्द्रमुखीति । चन्द्र इव मुखमस्या इति बहुव्रीहिः । अत्र च प्रथमानिर्दिष्टमित्यादिना ( १।२।४३ ) मुखशब्दस्योपसर्जनसंज्ञा । अतिकेशीति । कुगतिप्रादय इति ( २।२।१८ ) समासः । एकविभक्ति चेति ( १।२।४४ ) केशशब्दस्योपसर्जनत्वम् । अङ्गेति । अङ्गादिभ्य उपसर्जनेभ्यो ङीष् भवतेरतदर्थरूपं व्याख्येयमित्यर्थः । किमर्थम् ? संयोगोपधत्वाद् ङीष् न प्राप्नोति । तदर्थमेतदर्थरूपं व्याख्येयम् । तदिदं व्याख्यानम् । उत्तरसूत्रे चकारोऽनुक्तसमुच्चयार्थः । तेनाङ्गादिभ्यः संयोगोपधेभ्यो ङीष् भवतीति । अद्रवमिति । मुखनासिकाभ्यां योऽभिनिष्क्रामति वायुः स प्राणः । प्राणोऽस्यास्तीति प्राणी । तत्र यत् तिष्ठति तत्प्राणिस्थम् । मुखादि स्वाङ्गमित्युच्यते । यद्येवं कफोऽपि स्वाङ्गं स्यात् । ततश्च बहुकफेत्यत्र ङीष् प्रसज्येतेत्यत आह अद्रवमिति । विशेषणोपादानान्न भवत्ययं प्रसङ्गः । कफस्य द्रवात्मकत्वात् । एवमपि ज्ञानं स्वाङ्गं भवेत् । प्राणिस्थत्वादद्रवत्वाच्च । ततश्च बहुज्ञानेत्यत्रापि ङीष् स्यादित्यत आह मूर्त्तिमदिति । असर्वगतानि यानि द्रव्याणि तेषां परिमाणं ह्रस्वादिमद् यत् तन् मूर्त्तिः । सा यस्यास्ति तन्मूर्त्तिमत् । न च तज् ज्ञानेऽस्तीति । निर्गुणत्वात् । गुणानाञ्च ज्ञानस्यात्मगुणत्वान् नास्य स्वाङ्गत्वप्रसङ्गः । येषामपि काठिन्यादिस्पर्शविशेषो मूर्त्तिस्तन्मतेनापि नैव ज्ञानं मूर्त्तिमद्भवति । नहि ज्ञानस्य स्पर्शोऽस्ति । एवमपि शोफस्य श्वयथुसंज्ञकस्य स्वाङ्गत्वं प्राप्नोत्येव । यथोक्तविशेषणविशिष्टत्वात् । ततश्च बहुशोफेत्यत्र ङीष् प्रसज्येतेत्यत आह अविकारजमिति । विकारो धातुवैषम्यम् । भूतप्रक्षोभ इत्यर्थः । ततो जातं विकारजम् । न विकारजमविकारजम् । तदेवं विशेषणोपादान-

प्रवृद्धविलूनेत्यत्र समासस्येत्यन्तोदात्तत्वम् (६।१।२२३)। किं पुनः कारणं न सिध्यति ? येन संज्ञाछन्दसोर्बहुलं ङीष् भवतीत्येतदर्थरूपं व्याख्येयमित्याह प्रवृद्धा चेत्यादि । विग्रहविशेषेण तत्पुरुषं दर्शयति ।

सामर्थ्याच्च शोफस्यापि स्वाङ्गत्वं न प्राप्नोति । यदि प्राणिस्थं स्वाङ्गं भवत्येवं तर्हि रथ्यादिपतितानां केशानां स्वाङ्गत्वं न स्यात् । ततश्च दीर्घकेशी रथ्येति न सिध्यतीत्यत आह अतत्स्थमित्यादि । तस्मिन् प्राणिनि तिष्ठतीति तत्स्थम् । न तत्स्थमतत्स्थम् । अप्राणिस्थम् । एवमपि केशादि स्वाङ्गं भवति यदि तत्प्राणिनि पूर्वं दृष्टं भवति । प्रतिमावयवानां तर्हि मुखादीनां स्वाङ्गता न स्यात् । अप्राणिस्थत्वात् । ततश्च दीर्घमुखी प्रतिमेति ङीष् न स्यादित्यत आह तस्य चेत् तत् तथा युतमिति । तस्य प्राणिनस्तत् स्वाङ्गं यथा युतं येन प्रकारेण संस्थानविशेषेण सम्बद्धं तथा तेन प्रकारेणाप्राणिनोऽपि यदि सम्बद्धं भवत्येवमपि तस्य स्वाङ्गत्वं भवति । अथवा तस्य चेदं प्राणिन स्तत् स्वाङ्गं तथा यदि युतं सम्भवति यथा प्राणिन एवमपि स्वाङ्गं भवति । अन्येषां पाठस्तेन चेत् तत् तथा युतमिति । तेन प्राणिना येन प्रकारेण संस्थानविशेषादिना सम्बद्धं तथा यद्यप्राणिनापि सम्बद्धं भवत्येवमपि स्वाङ्गं भवति । अथवा तेनाप्राणिना तन्मुखादि यदि तथा युतं सम्बद्धं भवति यथा प्राणिनैवमपि स्वाङ्गं भवति । अथवा तेन चेद् मुखादीनां स्वाङ्गेन तदप्राणिस्थं द्रव्यं तथा यदि युतं भवति यथा प्राणिद्रव्यमेवमपि स्वाङ्गं भवतीति । सर्वथायमर्थः । यादृशं प्राणिनो मुखादि स्वाङ्गं तादृशमेव यद्यप्राणिनोऽपि भवति स्वाङ्गमेवमेव भवतीति ।

## ५५ । नासिकोदरौष्ठजङ्घादन्तकर्णशृङ्गाच्च ।

बह्वज्लक्षण इत्यादि । नासिकोदरयोः । न क्रोडादिबह्वच इति (४।१।५६) बह्वज्लक्षणे प्रतिषेधे प्राप्ते वचनम् । शेषाणामसंयोगोपधादिति (४।१।५४) संयोगोपधलक्षणे । सहनञ्विद्यमानपूर्वलक्षणस्तु प्रतिषेधो भवत्येवेति । नासिकोदरयोस्तावदयं योगः पुरस्तादपवादा अनन्तरान् विधीन् बाधन्ते (प,६३) नोत्तरानित्यनन्तरमेव बह्वज्लक्षणं प्रतिषेधं बाधते । न सह्वादिलक्षणम् । ओष्ठादिष्वपि मध्येऽपवादाः पूर्वान् विधीन् बाधन्त इति (प,६१) पूर्वमेव संयोगोपधलक्षणम् । तेनासौ भवत्येव । सहनासिकाऽनासिका विद्यमाननासिकेति । बिम्बोष्ठीति । बिम्बमिवौष्ठौ यस्याः सा

विम्बोष्ठी । ओत्वोष्ठयोः समासे वा पररूपं वक्तव्यमितीौपसंख्यानिकं (६।१।९४, वा) पररूपत्वम् । ये तु विम्बौष्ठीतीौकारं पठन्ति ते वृद्धिरेचीति (६।१।८८) वृद्धिं कुर्वन्ति । पुच्छाच्चेति वक्तव्यमिति । पुच्छान्ताच्च प्रतिपदिकान् ङीष् भवतीत्येतदर्थरूपं व्याख्येयमित्यर्थः । किमर्थम् ? संयोगोपधादपि पुच्छान्ताद् यथा स्यात् । व्याख्यानन्तु चकारस्यानुक्तसमुच्चयार्थत्वमाश्रित्य कर्त्तव्यम् । कल्याणपुच्छीति । कल्याणं पुच्छमस्याः । कवरेत्यादि । कवरादिभ्यो यः पुच्छशब्दस्तदन्तान् ङीष् भवतीति । एषोऽपि ततएव चकाराद्वाग्रहणस्य वा व्यवस्थितविभाषात्वाल्लभ्यते । कवरं पुच्छे यस्याः सा कवरपुच्छी । एवं मणिपुच्छी विषपुच्छी शरपुच्छीति । सप्तमीविशेषणे बहुव्रीहाविति (२।२।३५) पुच्छस्य पूर्वनिपातो न भवति । सप्तम्याः पूर्वनिपाते गड्वादिभ्यः परवचनमिति (२।२।३५, वा) वचनात् । उपमानात् पक्षात् पुच्छाच्चेति । नित्यमिति सम्बध्यते । एतदपि पूर्वोक्तात् कारणद्वयाल्लभ्यते । पुच्छाच्चेति वक्तव्यमित्यनेनैव सिद्धे पुनरिह पुच्छग्रहणं प्रपञ्चार्थम् । नियमार्थं वा । उलूकस्येव पक्षौ यस्या उलूकपक्षी सा । उलूकस्येव पुच्छं यस्याः सोलूकपुच्छी ।

## ५६ । न क्रोड़ादिबह्वचः ।

कल्याणक्रोड़ेति । क्रोड़ाशब्दः स्त्रीलिङ्गः । क्रोड़ाघाटाजिह्वाशिरोधरासङ्कुलास्रुहामायेति लिङ्गकारिकायां पाठात् । कल्याणी क्रोड़ाऽस्या इति विग्रहः । स्त्रियाः पुंवद् इति (६।३।३४) पुंवद्भावः । उत्तरपदस्य गोस्त्रियोरित्यादिना (१।२।४८) ह्रस्वः । ततः स्वाङ्गाच्चोपसर्जनादित्यादिना (४।१।५४) प्राप्तस्य ङीषोऽनेन प्रतिषेधः । ततष्टाप् । महाललाटेति । आन्महदित्यादिनात्वम् (६।३।४६) ।

## ५७ । सहनञ्विद्यमानपूर्वाच्च ।

सकेशेति । सह केशैर्वर्त्तत इति । तेन सहेति तुल्ययोग इति (२।२।२८) समासः । वोपसर्जनस्येति (६।३।८२) सहस्य सभावः । अकेशेति । अविद्यमानाः केशा अस्येति । नञोऽस्त्यर्थानां बहुव्रीहिर्वोत्तरपद लोपश्चेति (२।२।२४)

विद्यमानशब्दलोपः । अथ पूर्वग्रहणं किम् ? सहनञ्विद्यमानादितेरवोच्येत । एवंहि पञ्चम्या स्वाङ्गे विशेष्यमाणे सहादिपूर्वता लभ्यत एव । नैतदेवम् । पञ्चमी हि परत्वेन स्वाङ्गं विशेषयेत् सहादिभ्यः परं यत् स्वाङ्गमिति । ततश्च सहादिभ्यः परेण स्वाङ्गेनान्यस्यापि समासे प्रतिषेधो विज्ञायते कल्याण-विद्यमानमुखेति । विद्यमानञ्च तन्मुखञ्च विद्यमानमुखम् । कल्याणं विद्यमानमुखमस्या इति विग्रहः । अथवा विद्यमानं मुखं यस्य स विद्य-मानमुखः । कल्याणो विद्यमानमुखो यस्या इति विग्रहः । पूर्वग्रहणे सति पूर्वशब्दस्यावयववाचित्वात् सहादिपूर्वत्वेन प्रातिपदिकं विशेष्यत इति सहाद्यवयवं यत् स्वाङ्गान्तं प्रातिपदिकं तस्मादिति विज्ञायमाने नात्र प्रति-षेधो भवति । नह्येतत् सहाद्यवयवमेव । किं तर्हि ? कल्याणशब्दावयवमिति-न भवत्यनिष्टप्रसङ्गः ।

## ५८ । नखमुखात् संज्ञायाम् ।

शूर्पणखेति । पूर्वपदात् संज्ञायामग इति (८।४।६) णत्वम् । अथ कथं शूर्पनखी राक्षसीति ? असंज्ञात्वात् । संज्ञायामित्युच्यते । न चेयं संज्ञा । तथाहि पूर्वपदादित्यादिना (८।४।३) णत्वं न भवति । यौगिकस्त्वेष तस्या व्यपदेशः । शूर्पाकारनखयोगात् । शूर्पमिव नखो यस्याः शूर्पनखीति ।

## ५९ । दीर्घजिह्वी च च्छन्दसि ।

अथ किमर्थमीकारान्तनिपातनं क्रियते ? न दीर्घजिह्वा च्छन्दसीत्येवो-च्येत । एवमुच्यमाने प्रतिषेधप्रकरणात् प्रतिषेधो विज्ञायेतेति चेत् ? न । संयोगोपधत्वेन प्राप्त्यभावात् । प्राप्तिपूर्वकत्वाच्च प्रतिषेधानाम् । तस्मात् सामर्थ्याद् विधिरेव विज्ञास्यत इत्याह निपातनं नित्यार्थमिति । कल्पितत्वात् प्रकृतस्य ङीष इहापि विकल्पित एवासौ विज्ञायेत । निपा-तनात्तु नित्यो भवति ।

## ६० । दिक्पूर्वपदान् ङीप् ।

विधिप्रतिषेधेत्यादि । विधिविषयः स्वाङ्गमुपसर्जनमसंयोगोपधत्वम् । नासिकादि च प्रातिपदिकम् । प्रतिषेधविषयः संयोगोपधञ्च प्रातिपदिकम् ।

क्रोड़ादिबह्वचः। सहनञ्विद्यमानपूर्वाच्चेति। एतेनैतत् सूचयति स्वाङ्गाच्चोपसर्जनादसंयोगोपधादित्यादि विधिशास्त्र (४।१।५४) मिहानुवर्त्तते। न क्रोड़ादिबह्वच (४।१।५६) इत्यादि प्रतिषेधशास्त्रम्। तेन यत्र विषये ङीष् विहित स्तत्रैव ङीन् विधेयः। यत्र तु विषये ङीष् प्रतिषिद्ध स्तत्र ङीनपि प्रतिषिध्यत इति। यत्र ङीष् विहित इत्यादिना विधिविषयापेक्षायाः फलं दर्शयति। कः पुन ङीपो ङीषो वा विशेषः? यावतोभयत्र तदेव रूपमित्याह स्वरे विशेष इति। ङीपो हि पित्त्वादनुदात्तत्वं भवतीति। ङीषस्तु प्रत्ययस्वरेणाद्युदात्तत्वम्। प्राङ्मुखीति। ऋत्विगादिसूत्रेणाञ्चतेः (३।२।५९) क्विन्। अनिदितामित्यनुनासिकलोपः (६।४।२४)। उगितश्चेति (४।१।६) ङीप्। प्राची। प्राच्यां दिशि मुखमिति (1) दिक्शब्देभ्यः सप्तमीपञ्चमीत्यादिनास्तातिः (५।३।२७)। अञ्चे र्लुगिति (५।३।३०) तस्य लुक्। लुक् तद्धितलुकीति (१।२।४९) स्त्रीप्रत्ययस्यापि लुक्। तद्धितश्चासर्वविभक्तिरित्यव्ययत्वम् (१।१।३८)। अव्ययादाप्सुप इति (२।४।८२) सुपो लुक्। प्राग् मुखं यस्याः सा प्राङ्मुखी। यरोऽनुनासिकेऽनुनासिको वेति (८।४।४५) ङकारः। प्राङ्मुखेति। टाप्। ननु च ङीपा मुक्ते स्वाङ्गाच्चोपसर्जनादिति (४।१।७४) ङीषा भवितव्यम्? नैतदस्ति। आचार्य्यप्रवृत्तिर्ज्ञापयति। यत्रोत्सर्गापवादयोर्विभाषा तत्रापवादेन मुक्ते उत्सर्गो न प्रवर्त्तत इति। यदयं पीलाया वेति (४।१।११८) वाग्रहणं करोति। यद्यत्राणा विकल्पितेन मुक्ते स्त्रीभ्यो ढगिति (४।१।१२०) ढकारेण भवितव्यं किं वाग्रहणेन? तस्मादस्माद्वाग्रहणादिदं ज्ञाप्यते यत्रोत्सर्गोऽपि विभाषा तत्रापवादेन मुक्त उत्सर्गो न प्रवर्त्तत इति। कथं पुनरुत्सर्गो विभाषा? महाविभाषया। प्राग्दीव्यतोऽणि (४।१।८३) त्यस्मुत्सर्गः। स्त्रीभ्यो ढगिति ढगपवादः (४।१।१२०)। तेन मुक्ते यद्यपि स्यादण् किं वाग्रहणेन? नेत्येवं ब्रूयात्। तत्रौत्सर्गिकाणो निवृत्त्यर्थम्। इह न भवतीत्यादिना प्रतिषेधापेक्षायाः फलं दर्शयति। प्राक्क्रोड़ा प्रागजघनेति। अत्र हि न क्रोड़ादिबह्वच (४।१।५६) इत्यस्याप्यनुवृत्ते ङीष् न भवति। प्रागगुल्फेति। अत्राप्यसंयोगोपधादित्यस्य (४।१।५४)। अथ पदग्रहणं किमर्थम्? न दिक्पूर्वादित्येवोच्येत।

(1) मुखमित्यत्र वसतीति वङ्गीयपुस्तके पाठः।

अशक्यमेवं वक्तुम् । एवमुच्यमाने दिक्शब्द एव स्वरूपेण पूर्वपदं विज्ञायेत । पदग्रहणे तु सति सर्वे दिगभिधायिनः शब्दाः पूर्वपदत्वेन विज्ञायन्ते ।

## ६१ । वाहः ।

सामर्थ्यात् तदन्तविधेर्विज्ञानमिति । कर्मण्युपपदे ण्वेर्विधानात् । केवलस्य वाहः सम्भवो नास्तीति सामर्थ्यात् तदन्तविधि र्विज्ञायते । दित्यौहीति । दित्यं वहतीति भजो ण्विः (३।२।६२) । छन्दसि सहः (३।२।६३) । वहश्चेति (३।२।६४) ण्विः । ण्वेः सर्वापहारी लोपः । प्रत्ययलक्षणेनात उपधाया इति (७।२।११६) वृद्धिः । ङीष् । वाह ऊङिति (६।४।१३२) संप्रसारणसंज्ञको वकारस्योड् भवति । तत्र वसोः संप्रसारणमित्यतः (६।४।१३२) संप्रसारणानुवृत्तेः । ठकार एत्येधत्यूट्स्विति (६।१।८६) विशेषणार्थः । संप्रसारणाच्चेति (६।१।१०८) पररूपत्वम् । एत्येधत्यूट्स्विति (६।१।८६) पूर्वपदाकारेण सहैकादेशो वृद्धिः ।

## ६२ । सख्यशिश्वीति भाषायाम् ।

सखीति । सखिशब्दान् ङीप् । नास्याः शिशुरस्तीति वाक्यविशेषेण बहुव्रीहिं दर्शयन्नशिशुशब्दो यो बहुव्रीहिः स्तस्याशिश्वीति निपात्यते । नतु तत्पुरुषो यस्तस्येति दर्शयति । तत्पुरुषे हि न शिशुरशिशुरित्येवं भवति । सखेति । अनङ् सावित्यनङादेशः (७।१।९३) । नोपधायाः सर्वनामस्थाने चेति (६।४।७) दीर्घः । सख्यशिशुभ्यामित्येवं वक्तव्ये यन्निपातनं क्रियते तस्यैतत् प्रयोजनं तुल्यश्रुतेः शब्दान्तरस्यापि यथा स्यात् सह खेन या वर्त्तते सा सखीति ।

## ६३ । जातेरस्त्रीविषयादयोपधात् ।

जातेः प्रातिपदिकादिति सामानाधिकरण्यानुपपत्ते र्जातिवाचि यत् प्रातिपदिकं तदिहाभिधानेऽभिधेयोपचारं कृत्वा जातिशब्देनोक्तम् । अतएव वृत्तावाह जातिवाचि यत् प्रातिपदिकमिति । अस्त्रीविषयादिति । अनन्यत्रभावेऽपि विषयशब्दो वर्त्तते । अतएव वृत्तावाह न चेत् स्त्रियामेव नियतमिति । न स्त्रियामेव यस्य भावः किन्तु स्त्रियाञ्चान्यत्र च तदस्त्री-

विषयम्। जातिरित्युच्यते। केयं जातिर्नामेति प्रश्नस्योत्तर आह आकृति ग्रहणेत्यादि। आक्रियते व्यज्यतेऽनयेत्याकृतिः संस्थानमुच्यते। तथाहि दुराकृति र्दुःसंस्थानमुच्यते। स्वाकृतिश्च सुसंस्थानम्। गृह्यतेऽनेनेति ग्रहणम्। करणे ल्युट्। आकृतिर्ग्रहणं यस्याः साऽकृतिग्रहणा संस्थानव्यङ्ग्येति यावत्। ननु चाकृतिशब्दसामानाधिकरण्याद् ग्रहणशब्दस्य स्त्रियां वृत्तिरिति टिड्ढाणञिति ( ४।१।१५ ) ङीपा भवितव्यम्। तदन्तेन समासे कृते नद्यृतश्चेति ( ५।४।१५३ ) कप्। ततश्चाकृतिग्रहणीकेति प्राप्नोति। नैष दोषः। ग्रहणशब्दो हि पूर्वं करणसामान्ये व्युत्पादितः। पश्चाद् विशेषेणाभि-सम्बध्यते। तत्र पदान्तरसन्निधानेन य स्तस्य लिङ्गविशेषसम्बन्धः स च वहिरङ्ग इति सामान्यलिङ्गेनैवान्तरङ्गेण वाक्यं कृत्वा समासः क्रियते यथा मुखनासिकावचनोऽनुनासिक ( १।१।८ ) इत्यत्र। तदनेन लक्षणेन सामान्यरूपा गोत्वादिलक्षणा जातिरित्युक्तं भवति। गोत्वादयो हि विषाणादिमत् संस्थानव्यङ्ग्यत्वादाकृतिग्रहणाः। एतेन लक्षणेन ब्राह्मणत्वादयो जातिविशेषा न संगृहीताः। नहि ते संस्थानव्यङ्ग्याः। तदाश्रयस्य संस्थानस्याभिन्नत्वात्। यादृशं हि संस्थानं ब्राह्मणस्य क्षत्रियादेःसंस्थानमपि तादृशमेवेत्यतो द्वितीयं लक्षणमाह लिङ्गानाञ्चेत्यादि। यापि सर्व्वाणि लिङ्गानि न भजति साप्यसंस्थानव्यङ्ग्यापि जातिर्यथा ब्राह्मणत्वादिः। सा हि स्त्रीलिङ्गं पुंलिङ्गञ्च भजति ब्राह्मणो ब्राह्मणीति। नतु नपुंसक लिङ्गमित्यसर्वलिङ्गभाग् भवति। ब्राह्मणत्वादिष्वप्युपदेशाभिव्यङ्ग्यताश्रय-णीया। अन्यथा देवदत्तो देवदत्तेति लिङ्गद्वयं भजति। अत्रापि जातित्वं स्यात्। नचायं जातिशब्द इष्यते। किं तर्हि संज्ञाशब्दः। विध्यर्थञ्चेदम्। अतः सर्वलिङ्गभाजोऽपि पूर्वेण लक्षणेन जातित्वमस्ति यथा तट स्तटी तटमिति। सर्वलिङ्गं भजत इति सर्वलिङ्गभाक्। कर्मण्युपपदे भजो (३।२।६२) ण्विरिति ण्विः। ननुच लिङ्गापेक्षया सर्वशब्द उपपदे भजो ण्विप्रत्ययो न प्राप्नोति। उपपदाश्रयत्वादुपपदसमासश्च। असमर्थत्वात्। नैष दोषः। यथैव हि देवदत्तस्य गुरुकुलमित्यत्रासामर्थ्येऽपि समासो भवति गमकत्वात् तथैव मुभयमपि भविष्यतीति। सा च जातिः सकृदाख्यातनिर्ग्राह्येति। सकृदेकवार

माख्यातोपदिष्टा निर्ग्राह्या निश्चयेन ग्राह्या । एतेन जातिधर्मानेकत्वनित्यत्व-प्रत्येकपरिसमाप्तिलक्षणान् दर्शयति । सकृदेकवारं यस्मात् कृष्णे धवले वा गोपिण्ड आख्याता तद्विलक्षणेऽपि गोपिण्डे निर्ग्राह्या तस्मादेव नित्या प्रत्येकं परिसमाप्ता च । यदि ह्येका न स्यात् सकृदाख्याता गौरिति पिण्डान्तरे न गृह्येत । यदि च नित्या न भवेत् पिण्डविनाशे तस्या अपि विनाशात् पिण्डान्तरेण न गृह्येत । यदि च प्रत्येकं सर्वात्मना परिसमाप्ता न स्यात् तस्मिन्नपि तावत् पिण्डे सर्वात्मना न गृह्येत यत्राख्याता । किं पुनः पिण्डान्तरे । अंशेन हि परिसमाप्तौ सत्यामंश एव परिगृह्यते । न जातिः । न जात्यंशो जातिर्भवति । अनेकत्वप्रसङ्गात् । तृतीयं जातिलक्षणमाह गोत्रञ्चेत्यादि । अपत्यं पौत्रप्रभृति गोत्रमिति(४।१।१६२)गोत्रं पारिभाषिकम् । इह तु लौकिकमपि गोत्रमपत्यमात्रं गृह्यते । चरणमध्ययनभेदेनानेकधा । गोत्रञ्च चरणैः सह जातिर्भवति । गोत्रं नाडायनादि । यद्यपि नाडायनतादि सामान्यं गोत्ववदेव कल्प्यते तथापि तत् संस्थानव्यङ्ग्यं न भवति । सर्वलिङ्ग-भाक्त्वाच्च । नाडायनः पुमान् । नाडायनी स्त्री । नाडायनं नपुंसकमिति । अतो गोत्रस्य जातित्वप्रतिपादनसिद्धये गोत्रञ्चेतुग्रक्तम् । चरणशब्दस्त्वध्ययन-क्रियासम्बन्धेन प्रवृत्तत्वात् क्रियाशब्दएव जातिशब्द इत्यतस्तदर्थस्य जातित्व-प्रतिपादनाय चरणैः सहेतुग्रक्तम् । कुक्कुटी शूकरी मयूरीति । आकृतिग्रहणाया जाते रुदाहरणम् । ब्राह्मणी वृषलीति । असर्वलिङ्गभाजः । नाडायनी चाराय-णीति । गोत्रलक्षणायाः । नड्चरशब्दयोर्नडादिभ्यः फगिति (४।१।९९) फ-गपत्येऽर्थे । कठी बह्वृचीति । चरणलक्षणायाः । मुण्डेति । मुण्डगुणयोगात् । मुण्डो भवत्येष इत्यस्त्रीविषयः । मुण्डो देवदत्त इति पुरुषेऽपि मुण्डशब्दस्य वृत्तेः । न तु जातिशब्दः । किं तर्हि ? गुणशब्दः । मक्षिकेति । सर्वदा स्त्रियामेव नियतत्वात् स्त्रीविषयो मक्षिकाशब्दः । क्षत्रियेति । गोत्रमिह जातिः । क्षत्राद् घ इति (४।१।१३८) गोत्रापत्ये घविधानादसर्वलिङ्गभाक्त्वाच्च जातित्वम् । क्षत्रिय इति च पुंस्यपि वृत्तेरस्त्रीविषयः क्षत्रियशब्दः । योपधस्तु । योपध-प्रतिषेधे हयगवयमुकयमत्स्यमनुष्याणामप्रतिषेध इति । कथं पुनरेष लभ्यते ? उत्तरसूत्रे चकारस्यानुक्तसमुच्चयार्थत्वात् । तेन हि हयगवयादिभ्यो ङीष्-

विधानादयं प्रतिषेधो न प्रवर्त्तते । मत्सीति । सूर्य्यतिष्यागस्त्यमत्स्यानामिति (६।४।१४९) यलोपः । मनुषीति । मनोर्जातावञ्यतौ षुक् चेति (४।१।१६१) यत्प्रत्ययः । षुगागमश्च । जातित्वं च पुनरेषां हयगवयादीनामाकृतिग्रहणाद् वेदितव्यम् ।

## ६४ । पाककर्णपर्णपुष्पफलमूलवालोत्तरपदाच्च ।

ओदनपाकीति । ओदनस्य पाक इति षष्ठीसमासः । व्युत्पत्तिमात्रार्थं त्वसौ क्रियते । न त्वत्रावयवार्थो विद्यते । समुदाय एव ह्ययं कस्याञ्चिज् जातौ वर्त्तते । एवं शङ्कुकर्णीत्यादिष्वपि वेदितव्यम् ।

## ६५ । इतो मनुष्यजातेः ।

अवन्ती कुन्तीति । अवन्तिकुन्तिशब्दाभ्यामपत्येऽर्थे वृद्धेत्कोशलाजादाञ् ञ्यङ् (४।१।१७१) । स्त्रियामवन्तिकुन्तिकुरुभ्यश्चेति (४।१।१७६) तस्य लुक् । ततो ङीष् । दाक्षी प्लाक्षीति । अत इञ् (४।१।९५) । सर्व्वत्र गोत्रं हि जातिः । विट् । दरदिति । विशो ऽपत्येऽर्थे जनपदशब्दात् क्षत्रियादञ् (४।१।१५८) । दरदो द्व्यञ्मगधादिसूत्रेणाण् (४।१।१७०) । अतश्चेति (४।१।१७८) तयोः स्त्रियां लुक् । इहापि गोत्रं जातिः । तित्तिरिरिति । अत्राकृतिग्रहणा जातिः । उदमेयीति । अत इञ् (४।१।९५) । गोत्रमिह जातिः । इञ उपसंख्यानमिति । इञन्तान् ङीष उपसंख्यानं कर्त्तव्यमित्यर्थः । किमर्थम् ? अजात्यर्थम् । अजातिवाचिनोऽपीञन्ताद् यथा स्यात् । तत्रेदं प्रातिपादनम् । इत इति योगविभागोऽत्र क्रियते । तेनेञन्तादजातिवाचिनोऽपि भविष्यतीति । ततो मनुष्यजातेरित्ययं द्वितीयो योगः पूर्वयोगस्यानित्यत्वज्ञापनार्थः । तेन मनुष्यजातौ नित्यम् । अन्यत्र तु यथादर्शनम् । क्वचिदेव न सर्वत्र । सौतङ्गमीत्याद्युदाहरणम् । स्यादेतत् । अत इञिति (४।१।९५) गोत्रापत्य एवात्रेञ् विहितः । गोत्रञ्च जातिरेव । तत् किमुच्यत इञ उपसंख्यान-मजात्यर्थमिति ? अत आह सुतङ्गमादिभ्य इत्यादि । सुतङ्गमेन निर्वृत्ता नगरीति वुञ्छणित्यादिना (४।२।८०) सुतङ्गमादित्वादिञ् । इत इति तपरकरणं दीर्घनिवृत्त्यर्थम् । तेन अवन्तीशब्दादयत्र भवति । अवन्ति-

मिच्छति । सुप आत्मनः क्यच् (३।१।८) । अकृत्सार्वधातुकयोरिति (७।४।२५) दीर्घः । अवन्तीय इति स्थिते क्विप् । अतो लोप (६।४।४८) इत्यकारलोपः । पूर्वं लोपग्रहणादपृक्तलोपात् प्राग् लोपो व्योर्वलीति (६।१।६६ ) यलोपः । पश्चाद् वेरपृक्तस्येति (६।१।६७) वकारस्य । ततो ऽवन्ती इति स्थिते यदि तपरग्रहणं न क्रियेत ततोऽस्मादपि स्यात् । ततो हल्ङ्याब्भ्य इति (६।१।६८) सुलोपः प्रसज्येत । ततोऽवन्तीरिति न सिध्येत् ।

## ६६ । ऊङुतः ।

कुरूरिति । कुरोरपत्यं स्त्री । कुरुनादिभ्यो ण्यः (४।१।१७२) । स्त्रियाम-वन्तीत्यादिना (४।१।१७६) तस्य लुक् । गोत्रमिह जातिः । ब्रह्मबन्धूरिति । ब्रह्म बन्धुरस्या वीरो बन्धुरस्या इति बहुव्रीहिः । ब्रह्मबन्धूवीरबन्धूशब्दौ कस्या-श्चिदेव जातौ वर्त्तेते । जातित्वं पुनरसर्वलिङ्गभाक्त्वात् । तौ हि स्त्रीलिङ्ग-पुंलिङ्गाविव । न नपुंसकलिङ्गौ । उत इति तपरकरणं मुखसुखार्थम् । न तु दीर्घनिवृत्त्यर्थम् । ऊकारान्तस्य मनुष्यजातिवाचिनोऽभावात् । ङकार इत्यादि । ऊङो यदि ङकारो न क्रियेत तदा नोङ्धात्वोरित्यस्मिन्नपि ( ६।१।१७५ ) न कर्त्तव्यः स्यान् ङकारानुबन्धः । ङकारानुबन्धवतो ऽन्यस्य कस्यचिदूकार-स्याभावात् । ततश्च नोधात्वोरित्युच्यमाने यवाग्वा यवाग्वै इत्यत्राप्युदात्तयणो हल्पूर्वादिति ( ६।१।१७४ ) तृतीयादिविभक्तेरुदात्तत्वस्य प्राप्तस्य प्रतिषेधः स्यात् । ननु चार्थवत ऊकारस्य ग्रहणादर्थवद्ग्रहणेनानर्थकस्ये—(प, ७३) त्यनर्थकस्य न भविष्यति । यवागूशब्दो हि स्यृयुवचिभ्यो न्युजागूजक्नुच इत्यागूच् प्रत्ययान्तो (उण्, ३।३६१) व्युत्पादितः । तत्रागूच्शब्द एव प्रत्ययार्थेनार्थवान् । ऊकारस्त्वनर्थक एव । नैतदस्ति । यस्मान्न वर्णग्रहणेष्वियं परिभाषा व्यवस्थिता । वर्णग्रहणञ्चेदम् । अतो नोपतिष्ठते । अथोपतिष्ठेतैवमपि कृषिचमितनिधनिसर्जिखर्जिभ्य ऊरि—(उण्, १।८१) तूप्रत्ययस्य ग्रहणं स्यात् । ततश्च खर्ज्वा खर्ज्वै इत्यत्र प्रतिषेधः प्रसज्येत । तस्माद् विशेषणार्थो ङकारः कर्त्तव्यः । अथ दीर्घोच्चारणं किमर्थम् ? ननु उङेवोच्येत । अकः सवर्णे दीर्घ इति (६।१।१०१) दीर्घत्वेन हि दीर्घस्य ग्रहणं भवतीत्यत आह दीर्घो-च्चारणमित्यादि । यदि दीर्घो नोच्चार्य्येत तदा शेषाद् विभाषेति (५।४।१५४)

परत्वात् पक्षे कप् स्यात् । अतस्तद्बाधनार्थं दीर्घोच्चारणम् । कथं पुनर्दीर्घोच्चारणेन कपो निवृत्तिः ? ब्रह्मा बन्धुरस्येति समासादनन्तरमूङ् क्रियतामुत कबिति ? तत्र परत्वात् कप् स्यात् । दीर्घोच्चारणेनोकारप्रश्लेषात् । पुनर्विधानं तुल्यकालप्रामिकं स्वार्थिकतया समानजातीयं कब्विधिमेव निवर्त्तयति न स्वादिविधिम् । स्वादयस्तूङन्ताद् भवन्त्येव । तूङोरपि ग्रहणाज् ज्ञापकाद्वा। श्वशुरः श्वश्र्वेति (१।२।७२) निर्देशात् । तेन ब्रह्मबन्धूरिति नित्यमूकारान्त एव भवति । न तु कदाचित् कबन्तः । अध्वर्यूरिति । अध्वरमिच्छतीति क्यच् । क्याच्छन्दसीत्युप्रत्ययः(३।२।१७०) । कव्यध्वरपृतनस्यर्चि लोप (७।४।३९) इत्यकारलोपः । अप्राणिजातेश्चेत्यादि । अप्राणिजातिवाचिनश्च प्रातिपदिकादूङ्प्रत्ययो भवतीत्येतदर्थरूपं व्याख्येयमित्यर्थः । तत्रेदं व्याख्यानम् । पङ्गोश्चेत्यत्र (४।१।६८) चकारोऽनुक्तसमुच्चयार्थः । तेनाप्राणिजातेश्च रज्ज्वादिवर्जिताद् भविष्यति । अलाबूः कर्कन्धूरिति । कः पुनरस्योङि सत्यसति वा विशेषः ? यावतोभयत्र तदेव रूपं स एव स्वरः । तथाह्यलाबूशब्द उणादिषूकारप्रत्ययान्त एव व्युत्पाद्यते । कृषिचमितनिधनिसर्जिखर्जिभ्य ऊरिति (उण्,१।८१) वर्त्तमाने णिदिति (उण्, १।८५) च नञि लम्बेर्नलोपश्चेति (उण्, १।८७) नञ्पूर्वात् लवि अवस्रंसन इत्यस्मादूप्रत्ययः । इदितो नुमित्यनेन (७।१।५८) कृतनुमागमरूपस्य नकारस्य नलोपश्च विहितः । कर्कन्धूशब्दोऽपि कृतिमृध्योः कूरिति ( उण्, १।१९३ ) वर्त्तमाने ऽन्दूदृन्भूजम्बूकफेलूकर्कन्धूदिधिषूरि- (उण्, १।९३) तूकारान्त एव व्युत्पादितः । तत् किमर्थमूङ् विधीयते ? अलाब्वा । अलाब्वै इत्यत्र नोङ्धात्वोरिति ( ६।१।१७५ ) विभक्त्याद्युदात्तत्वप्रतिषेधो यथा स्यात् । असति हि तस्मिन् यथा खलप्वो खलप्व इत्यत्र स न भवति तथेहापि न स्यात् ।

## ६७ । वाह्वन्तात् संज्ञायाम् ।

## ६८ । पङ्गोश्च ।

श्वशुरस्योकाराकारयोर्लोपश्चेति । अयं तु श्वशुरः श्वश्र्वेति ( १।२।७१ ) निपातनादेव सिद्ध इति न वक्तव्यः ।

## ६९। ऊरूत्तरपदादौपम्ये।

वृत्तोरूरिति। वृत्तौ परिमण्डला ऊरू यस्याः सा वृत्तोरूः। लाघवार्थमूर्वन्तादिति वक्तव्य ऊरूत्तरपदादित्युक्तं यत्र केवल ऊरुशब्द उत्तरपदं तत्र यथा स्यादित्येवमर्थम्। अन्यथा हि यद्यूर्वन्तादित्युच्येत तदा स्वामिन ऊरू स्वाम्यूरू। हस्तिन इव स्वाम्यूरू यस्याः सा हस्तिस्वाम्यूरुरित्यत्रापि स्यात्। भवति ह्येतदूर्वन्तं प्रातिपदिकम्। उत्तरपदग्रहणे तु न दोषः। न ह्येतदूरूत्तरपदं प्रातिपदिकम्। किं तर्हि स्वाम्यूरूत्तरपदम्।

## ७०। संहितशफलक्षणवामादेश्च।

संहितोरूरिति। संहितशब्दः संश्लिष्टवचनः संश्लिष्टोरूरित्यर्थः (R)। सहितसहाभ्याञ्चेति वक्तव्यम्। सहित सह इत्येताभ्यां परो य ऊरुशब्दस्तदन्ताच्च प्रातिपदिकादूङ् भवतीत्येतदर्थरूपं व्याख्येयमित्यर्थः। तत्रेदं व्याख्यानम्। चकारोऽत्र क्रियते। स चानुक्तसमुच्चयार्थः। तेन सहितसहाभ्यामपि भविष्यति। सूत्र आदिग्रहणमूरूत्तरपदमित्यस्यानुवृत्ते लिङ्गम्। अन्यथा संहितादिप्रातिपदिकेभ्य एव प्रत्ययो भवतीत्ययमर्थो विज्ञायेत। सत्यां हि स्वरितत्वादेवानुवृत्तावेभ्यो यत्परमूरूत्तरपदं सत्यप्यस्मिन् मध्यपदे तत्रैव प्रत्ययः प्रसज्येत संहितस्वाम्यूरुशब्दात्। न संहितोरुशब्दात्। गुणभावादूरुशब्दस्य न स्यादेवेह विशेषणम्।

## ७१। कद्रुकमण्डल्वोश्छन्दसि।

कद्रुशब्दो वर्णविशेषवचनः। ततो वोतो गुणवचनादिति (४।१।४४) ङीषः प्राप्तस्य स्वरुसंयोगोपधयोरिति (४।१।४४, वा) प्रतिषेधे कृते प्रातिपदिकेनानभिधाने प्राप्ते वचनम्। कमण्डलुशब्दस्याप्यप्राणिवाचित्वादप्राणिजातेश्चारज्ज्वादीनामितूङि (४।१।६६, वा) प्राप्ते छन्दसि नियमार्थम्। अथवायं रज्ज्वादिः। ततः प्रतिषेधे सति प्राप्त्यर्थं वचनम्।

---

(R) संहितशब्दः संसृष्टवचनः। संसृष्टोरूरित्यर्थ इति वङ्गीयपुस्तके पाठः।

७२ । सञ्ज्ञायाम् ।

७३ । शार्ङ्गरवाद्यञो ङीन् ।

वैदी । और्व्वीति । विदौर्व्वशब्दाभ्यामनृष्यानन्तर्य्यंत्यादिना (४।१।१०४) ऽञ् । तदन्ताद् गोत्रत्वाज्जातित्वे जातिलक्षणे ङीषि प्राप्ते ङीन् विधीयते । स्वरे विशेषः । अणन्ता एत इति । गोतमशब्दादपत्येऽर्थे ऋष्यन्धकवृष्णी-त्यादिना ( ४।१।११४ ) ऽण् । शेषेभ्यस्तु तस्यापत्यमिति ( ४ १ ९२ ) । गौतमशब्दाद् गौरादिपाठाद् ङीषपि भवति । ढगन्ता एत इति । शुभ्रादित्वात् । कामण्डलेय इति । ढे (६।४।१४८) लोपोऽकद्र्वा (६।४।१४७) इत्युत्रकारलोपः । एषां टिड्ढाणञिति ( ४।१।१५ ) ङीपि प्राप्ते वचनम् । वात्स्यायन इति । वत्सशब्दाद् गर्गादियञन्ताद् यञिञोश्चेति (४।१।१०१) फक् । मौञ्जायन इति । मुञ्जशब्दान्नड़ादिभ्यः फगिति (४।१।९९) फक् । जातिरिति । गोत्रलक्षणा । लौकिकमपि हि तत्र गोत्रं गृह्यते । युवापि च लोके गोत्र-मुच्यते । तथाहि वक्तारो वदन्ति गार्ग्यायणो गोत्रेणेति । ढगन्त इति । कैकसशब्दस्य (S) शुभ्रादित्वात् । अढगन्ताञ् ञाङन्तादपि ताविति । कपि-शिविशब्दाभ्यामपत्येऽर्थे वृद्धेत्कोशलाजादाञ् ञ्यङिति (४।१।१७१) ञ्यङ् । यङश्चाविति ( ४।१।७४ ) चापि प्राप्ते वचनम् । एहिपर्य्येहीति । ईह चेष्टायामित्यस्मादाङ्पूर्वात् पर्य्याङ्पूर्वाच्च सर्वधातुभ्य इतीन्प्रत्ययः (उण्, ५।५०७) । बह्वादिषु कृदिकारादक्तिन इति पाठाद् ङीषि प्राप्ते (४।१।४५) वचनम् । यञन्त इति । गर्गादित्वात् । यञश्च (४।१।१६) प्राचां ष्फ स्तद्धित इति (४।३।१७) ङीपि ष्फे च प्राप्ते वचनम् । उदपान इति । उदपानादागत इति शुण्डिकादिभ्योऽणित्यण् (४।१।७६) । उत्सादिष्वयं पठ्यत इति । तत्राञि कृते नास्ति विशेषो ङीपो वा ङीनो वा । उभयत्रापि हि ञ्नित्यादि र्नित्य-मित्याद्युदात्तेन (६।१।१९७) भवितव्यमित्येतन् मनसि कृत्वाह शुण्डिकाद्य सन्तः प्रयोजयतीति । जातिरिति । अरालचण्डालयोरसर्वलिङ्गत्वादिति जातित्वम् । वतण्डस्य गौरादिलक्षणे (T) ङीषि प्राप्ते वचनम् । प्रत्यय-

(S) कौकसाशब्दस्येति पाठान्तरम् ।

(T) गोत्रत्वाज्जातिलक्षणे ङीषीति वङ्गीयपुस्तके पाठः ।

लक्षणेन यञश्च (४।१।१६) प्राचां ष्फ स्तद्धित इति (४।१।१७) ङीप् ष्फयोर्बाधनम् । वतण्डस्यापत्यं स्त्री वतण्डाच्चेति (४।१।१०८) यञ् । तस्य लुक् स्त्रियामिति (४।१।१०९) लुक् । भोगवद्गौरिमतोः संज्ञायामिति । संज्ञायां गम्यमानायाम् भोगवद्गौरिमच्छब्दाभ्यां ङीन् भवति । मत्वन्तत्वादुगितश्चेति (४।१।६) ङीपि प्राप्ते वचनम् । ननुच भोगशब्दो घञन्तः । गौरिशब्दोऽत इञितीञन्तः (४।१।९५) । तेन द्वावप्येतौ ञित्स्वरेणाद्युदात्तौ । ताभ्यां मतुप् पित्त्वादनुदात्तः । तथाच भोगवद्गौरिमद्भ्यां ङीपि ङीनि वा विहिते न कश्चिद् विशेषः । तत् किमर्थं ताभ्यां ङीन् विधीयत इत्यत आह घादिषु नित्यं ह्रस्वार्थमिति । घरूपकल्पेत्यादिषु (६।३।४३) नित्यं ह्रस्वो यथा स्यादिति ताभ्यां ङीनो विधानम् भोगवतितरा गौरिमतितरेति । यदि पुनरुगिल्लक्षणो ङीप् क्रियेत ततो नद्याः शेषस्यान्यतर (६।३।४४) स्यामित्यनुवर्त्तमान उगितश्चेति (६।३।४५) विकल्पेन ह्रस्वत्वं स्यात् । अथानेनापि ङीनि सति कस्मादेवोगितश्चेत्यन्यतरस्यां (६।१।४५) ह्रस्वत्वं न भवति ? यावता भोगवद्गौरिमद्भ्यामुगिद्भ्यामेवायं ङीन् विधीयते ! नैष दोषः । उगितश्चेति (६।३।४५) सूत्रमेवं व्याख्यायते । उगित्संशब्दनेन या नदी विहिता तस्या विकल्पेन ह्रस्वत्वं भवतीति । नचानेन सूत्रेण या विहिता सा नद्युगित्संशब्दनेन विहिता भवति । उगित्त्वानाश्रयणात् । संज्ञायामिति किम् ? भोगवती गौरिमतीति । उगितश्चेति ङीप् (४।१।६) । अत्र च घादिषु विकल्पेनैव ह्रस्वो भवति भोगवतितरा भोगवतीतरा गौरिमतितरा गौरीमतीतरेति । नृनरयोर्वृद्धिश्चेति । नृशब्दस्य ऋन्नेभ्यो ङीबिति (४।१।५) ङीपि प्राप्ते वचनम् । नरशब्दस्याजाद्यत इति (४।१।४) टापि प्राप्ते जातित्वात् ङीषि वा । जातित्वञ्चाकृतिग्रहणाद् । वृद्धिश्च तयोर्भवति । सा च नृशब्दस्यालोऽन्त्यपरिभाषया (१।१।५२) ऋकारस्य स्थाने भवति । नरशब्दस्य यस्येति (६।४।१४८) लोपे कृते सत्यकारस्य । ननु चानन्त्यविकारेऽन्त्यसदेशस्येति (प, १०४) रेफस्यैव भवितव्यम् । नैष दोषः । वृद्धेर्याऽन्तरतमा प्रकृति स्तत्र षष्ठी । यत्र षष्ठी तत्रादेश इत्यकारःस्थानी ज्ञायते । पुत्रशब्दमत्र केचित् पठन्ति । न स केवलः स्त्रियां वर्त्तत इत्ययं समासान्तो

गृह्यते । समासान्ते च वर्त्तमानौ दुहितृशब्देन समानार्थौ भवन् स्त्रीलिङ्गो भवति प्रद्योतपुत्रो शैलपुत्रीति । यथायोगमिति । यथासम्भवम् ।

७४ । यङश्चाप् ।

पकारोऽत्र ङ्याप्प्रातिपदिकादित्यत्र (४।१।१) सामान्यग्रहणार्थः । चकारस्तदविघातार्थः । एवमुभयोरन्यत्र चरितार्थयोरनुदात्तौ सुप्पिताविति (३।१।४) त्येतद् बाधित्वा परत्वाच् चित (६।१।१६३) इत्यन्तोदात्तत्वं चापो भवति । आङः ष्यङश्च सामान्यग्रहणमेतदिति । विशेषकराननुबन्धानुत्सृज्य यत्सामान्यं यङ्मात्रं तस्येदं ग्रहणम् । कथं पुनः सामान्यग्रहणं युज्यते ? यावता आङ एव तत्र ग्रहणं युक्तम् । तथाहि सोऽपत्ये विधीयमानः स्त्रीत्वं वक्तुमसमर्थ इति स्त्रीप्रत्ययमपेक्षते । ननु ष्यङ् । तस्य स्त्रियामेव विधानात् । नैतदस्ति । यदि हि सामान्यग्रहणं न स्यात् ष्यङो ङित्करणमनर्थकं स्यात् । तस्य ह्यत्र सूत्रे सामान्यग्रहणमेव प्रयोजनम् । नान्यत् किञ्चित् । तस्मात् ङित्करणसामर्थ्यात् ष्यङोऽपि ग्रहणं भवति । आम्बष्ठ्येत्यादि । आम्बष्ठसौवीरकौशलशब्देभ्योऽपत्येऽर्थे वृद्धेत्कोशलाजादाञ् ञ्यङिति (४।१।१७१) आङ् । तदन्ताच्चाप् । कारीषगन्ध्येति । एतत् स्वादिसूत्रे (४।१।२) वृत्त्यादितम् । वाराह्येति । वराहशब्दादत इञ् (४।१।९५) । बालाक्येति । बलाकाशब्दाद् बाह्वादिलक्षण इञ् । उभयत्राणिञोरनार्षयोरित्यादिना(४।१।७८) ष्यङादेशः । तदन्ताच्चाप् । शार्कराक्ष्येत्यादि । शर्कराक्षपूतिमाषगोकक्षशब्देभ्यो गर्गादियञन्तेभ्यश्चाप् ।

७५ । आवट्याच्च ।

ङीपि प्राप्त इति । यञश्चेत्यनेन (४।१।१६) ।

७६ । तद्धिताः ।

युवतिरिति । तद्धितसंज्ञायां सत्यां कृत्तद्धितेत्यादिना (१।२।४६) प्रातिपदिकसंज्ञा भवति । अथ तद्धिता इति न सम्भवति बहुवचननिर्देशः । यथैव हि प्रत्यय (३।१।१) इत्येकवचननिर्देशेऽपि वक्ष्यमाणानां बहूनामपि सनादीनां सर्व्वेषां सा संज्ञा भविष्यति तथात्राप्येकवचनेनैव निर्देशः कर्त्तव्य इत्यत आह

बहुवचनमित्यादि । एकवचन एव कर्त्तव्ये यद् बहुवचनं क्रियते तस्यैतत्-प्रयोजनम् । अनुक्ता ये तद्धिता लक्षणवाक्यैरनभिहितास्तेषामपि परिग्रहो यथा स्यात् । ततः पृथिव्या ञाञावित्यादि (४।१।८५, वा) न कर्त्तव्यं भवति । बहुवचनेनैवानुक्ततद्धितपरिग्रहार्थेन तेषां सिद्धत्वे महत्याः संज्ञायाः करण एतत् प्रयोजनमन्वर्थसंज्ञा यथा विज्ञायेत तेभ्यो हितास्तद्धिताः । तदित्यनेन लौकिका वैदिकाश्च शब्दाः प्रत्यवमृश्यन्ते । तेषां व्युत्पाद्यत्वेन प्रकृतत्वात् । तेन तत्रैव भवन्त्यणादयो यत्र च भवन्त स्तेषामुपकारिणो भवन्ति । नान्यत्रेति । तेनाभिधानलक्षणत्वं तद्धितानामुपपन्नं भवति । अथ तद्धिताधिकारः स्त्रीप्रत्ययानामादित एव कस्मान्न क्रियते ? किमेवं सति भवति ? ङ्याबन्तमपि तद्धितान्तत्वात् प्रातिपदिकमिति ङ्याप्प्रातिपदि-कादित्यत्र(४।१।१)ङ्याब्ग्रहणं न कर्त्तव्यं भवति । प्राचां ष्फ स्तद्धित(४।१।१७) इत्यत्र च तद्धितग्रहणम् । यस्येति (६।४ १४८) चेतीकारग्रहणञ्च । तद्धित इत्येवं सिद्धत्वात् । अशक्यमेवं कर्त्तुम् । एवं हि क्रियमाणे तत्र ङ्याब् ग्रहणस्य यत् पूर्वं प्रयोजनमुक्तं तन्न स्यात् । ङीब्ङीष्ङीनाञ्च ङकारस्येत्संज्ञा ऽतद्धित इति (३।१।८) प्रतिषेधात् । इह च पट्वीत्योर्गुण इति (६।४।१४६) गुणः स्यात् । तस्माद् यथान्यासमेवास्तु ।

## ७७ । यूनस्तिः ।

ङीपोऽपवाद इति । नकारान्तत्वाद्दन्नेभ्यो ङीबिति (४।१।५) प्राप्तस्य । अथ दन्तादितो मनुष्यजातेरिति (४।१।६५) ङीष् कस्मान्न भवति ? अमनुष्यजाति-त्वात् । नहि युवतिशब्दो मनुष्यजातिवचनः । किं तर्हि ? वयोवचनः । तथाहि यौवनावस्थायामेव स वर्त्तते । न बाल्यवृद्धत्वावस्थायाम् । न चैवंविधा जातिशब्दाः । ते हि सर्वावस्थासु व्यक्तिषु जातिनिबन्धना वर्त्तन्ते गो-शब्दादिवत् ।

## ७८ । अणिञोरनार्षयोर्गुरूपोत्तमयोः ष्यङ् गोत्रे ।

इहाणिञोरिति प्रत्ययमात्रं वा गृह्यते ? तदन्तो वा समुदायः ? तत्र यद्याद्यः पक्ष आश्रीयेत गुरूपोत्तमयोरिति विशेषणं नोपपद्येत । नह्यणि-

ञोर्गुरूपोत्तमत्वं सम्भवति। कस्य तर्हि ? तदन्तस्य समुदायस्य। तस्माद् द्वितीयः पक्ष आश्रयितुं युक्त इति मत्वाह गोत्रे यावणिञौ विहितावनार्षौ तदन्तयोः प्रातिपदिकयोरिति। यदि तर्हि समुदायस्याणन्तस्येञन्तस्य चेदं ग्रहण मनार्षयोरिति विशेषणं न प्रकल्पयते। समुदायस्य ऋषावेव विधानात्। अणिञोस्तु प्रकल्पयत एतद्विशेषणम्। तयोर्ऋषावन्यत्र च विधानात्। गोत्र इत्यपि विशेषणमणिञोरेव युक्तम्। न समुदायस्य। तथा ह्यपत्यं पौत्रप्रभृति गोत्रमिति (४।१।१६२) पारिभाषिकं गोत्रमिह गृह्यते। तत्र चाणिञावेव विहितौ। न समुदायः। नैष दोषः। समुदायस्यैते विशेषणे न सम्भवत इति सामर्थ्यादेकदेशयोरणिञोर्विज्ञायेते। अतएव ह्युक्तावाह गोत्रे यावणिञौ विहितावनार्षाविति। इहायं ष्यङादेशो वा स्यात् ? प्रत्ययो वा ? ननु च षष्ठीनिर्देशादादेशेनैवानेन भवितव्य मिति। असन्दिग्धमेतत्। तदयुक्ता द्वितीयपक्षाशङ्का। नैतदस्ति। प्रत्ययविधावपि षष्ठीनिर्देशो दृश्यते यथा गापोष्टक् (३।२।८) व्रीहिशाल्योर्ढगिति (५।२।२)। तस्मात् प्रत्ययपक्षशङ्कापि युक्तैव। तत्र यदि प्रत्ययः स्यादौदमेघ्येय इति न सिध्येत्। उदमेघस्यापत्यं स्त्री। अतइञ् (४।१।९५)। तदन्तादनेन ष्यङ्। इकारस्य यस्येति लोपः (६।४।१४८)। यङश्चाप्। (४।१।७४) औदमेघ्या। तस्या अपत्यमिति स्त्रीभ्यो ढक् (४।१।१२०)। एयादेशः। तस्मिन्नापत्यस्य च तद्धितेऽनातीति यलोप (६।४।१५१) इष्यते। स न प्राप्नोति। अनापत्ययकारत्वात्। ननु च हलस्तद्धितस्येति (६।४।१५०) चेत् ? न। ईतीत्यत्रानुवर्त्तते। आदेशपक्षे त्वणिञोरपत्यत्वात् तदादेशस्यापि ष्यङः स्थानिवद्भावेनापत्यत्वमिति सिध्यति यलोपः। तस्मादादेशपक्ष एव साधुरित्यभिप्रायेणाह ष्यङादेशो भवतीति। ननु चादेशपक्षेऽप्यौडुलोम्येति न सिध्यति। लोमशब्दो बाह्वादिषु पठ्यते। तस्य केवलस्यापत्येन संयोगो नास्तीति तदन्तः समुदायो गृह्यते। तत उडुलोम्नो ऽपत्यं स्त्री। बाह्वादित्वादिञि कृते तस्य च ष्यङादेशः। तत्र न स्तद्धित इति (६।४।१४४) टिलोप इष्यते। स च न प्राप्नोति। ये चाभावकर्मणोरिति (६।४।१६८) प्रकृतिभावात्। प्रत्ययपक्षे त्विञो व्यवहितत्वात् ष्यङः प्रकृतिभावो नास्तीति भवति टिलोपः। ननु यस्येति चेति (६।४।१४८)

लोपे कृते नास्ति व्यवधानम् । अचः परस्मिन् पूर्वविधाविति (१।१।५७) लोपस्य स्थानिवद्भावादस्त्येव । आदेशपक्षेऽप्यदोषः । आनुपूर्व्या सिद्धत्वात् । नह्यकृते लोपे गुरूपोत्तमत्वं सम्भवति । तत्र प्रागेव ष्यङ इञि तस्येव टिलोपः । ततो गुरूपोत्तमता । ततः ष्यङित्यानुपूर्व्या सिद्धत्वम् । अयं तर्ह्यादेशपक्षे दोषः । अनेकाल्त्वात् सर्वादेशः प्राप्नोति । ङिच्चेत्यन्तस्य (१।१।५३) प्राप्नोतीति चेत् ? नैतदस्ति । अपवादप्रतिषेधाद्धि सर्वादेशः प्राप्नोतीति । (१।१।५३) ङिच्चेत्यन्तादेशः क्रियताम् ? आहोस्विदनेकाल्त्वात् सर्वादेशः ? तत्र परत्वात् सर्वादेशः प्राप्नोति यथा तृज्वोस्तानङ्डागिष्यन्यतरस्यामित्यत (७।१।३५) आह निर्दिश्यमानस्येत्यादि । यथा पाच्छब्दस्य पदित्ययमादेशो विज्ञायते न पाच्छब्दान्तस्य समुदायस्य तथायमपि निर्दिश्यमानयोरणिञोरेव विज्ञायते । तत् क्व तर्हि सर्वादेशेन भवितव्यम् ? यत्र समुदायात् षष्ठ्युच्चारिता यथा तृज्वोरिति । ङकारः सामान्यग्रहणार्थ इति । असति हि तत्र यङश्चाबित्यत्र (४।१।७४) वृद्धेत्कोशलाजादाञ्ञ् (४।१।१७१) आङित्यस्येव ग्रहणं स्यात् । न ष्यङः । षकारस्तदविघातार्थ इति । तत्र ह्यसत्येकानुबन्धकग्रहणे न द्व्यनुबन्धकस्येत्यस्येव ग्रहणं स्यात् । न ञ्यङः । उत्तमशब्दोऽयमस्त्येव व्युत्पन्नं तमबन्तं प्रातिपदिकम् । अस्त्यव्युत्पन्नम् । तत्र यदि व्युत्पन्नस्येदं ग्रहणं स्याद् वाराह्येति न सिध्येत् । यस्माद् व्युत्पत्तिमानुत्तमशब्दश्चतुष्प्रभृतिष्व-वतिष्ठते । तथा ह्युच्छब्दादुद्गताभिधायिनस्तमप् प्रत्ययोऽतिशायने विधीयते । अनुद्गतश्चापेक्ष्योद्गतो भवति । त्रिषु च द्वावुद्गतावेको ऽनुद्गतः । नच द्वयोरयं चोद्गत इत्ययमनयोरतिशयेनोद्गत इत्यर्थविवक्षायां तमबुत्पद्यते । तरपा विशेषविहितेन बाधितत्वात् । चतुर्षु तु त्रय उद्गताः । एकोऽनुद्गतः । तत्र त्रीनुद्गतानपेक्ष्यायञ्चोद्गतः । अयञ्चैषामतिशयेनोद्गत इत्यर्थविवक्षायां तमबुत्पद्यते । तस्माच्चतुर्ष्वेव प्राप्नोति । तत्र चोत्तमशब्दस्य स्वरूप-सिद्धेः । ततश्च वाराह्येति न सिध्येत् । नह्यत्र चत्वारः सन्तीत्येतदालोच्या-व्युत्पन्नोऽयमिहोत्तमशब्दो गृह्यत इति दर्शयन्नाह उत्तमशब्दः स्वभावादित्यादि । अव्युत्पन्न एव ह्युत्तमशब्दः स्वभावात् त्रिप्रभृतीनामन्त्यमाह । न व्युत्पन्नः । स हि चतुष्प्रभृतीनामन्त्यमाह । तस्मादुत्तमशब्दः स्वभावादित्यादिना ग्रन्थेना-

व्युत्पन्नस्यौत्तमशब्दस्येह ग्रहणमिति दर्शितम् भवति । तदेवमव्युत्पन्नस्य ग्रहणे वाराहीति गतदपि सिद्धं भवति । टिड्ढाणञिति (४।१।१५) ङीबेव भवतीति । प्रमादपाठोऽयम् । यथैव हि वैदीति जातित्वादनन्त्याच्छार्ङ्गरवाद्यञो ङीनिति (४।१।७३) ङीन् भवति तथेहापि ङीनेव भवितव्यम् । जाति ' तु गोत्रत्वात् । तस्मात् शार्ङ्गरवाद्यञो ङीनिति ४।१।७३। ङीनेव भवतीत्ययमेवात्र पाठो द्रष्टव्यः । वाशिष्ठो वेश्वामित्रीति । ऋष्यन्धकेत्यादिना (४।१।११४) ऽण् । औपगवी कापटवीति । उपगुकपटुशब्दाभ्यामौत्सर्गिकोऽण् (६।४।१४६) । ओर्गुणः । आहिच्छत्री । कान्यकुब्जीति । तत्र जात इत्यण् (४।३।२५) ।

७८ । गोत्रावयवात् ।

गोत्रञ्च तदवयवश्चेति गोत्रावयवः । इह त्वभिधानेऽभिधेयोपचारं कृत्वा तदभिधायिप्रातिपदिकं गोत्रावयवशब्देनोक्तम् । ननु चैवं विग्रहे विशेषणत्वादवयवशब्दस्य नीलोत्पल इव नीलशब्दस्य पूर्वनिपातः स्यात् । राजदन्तादेराकृतिगणत्वाद् विशेषणस्य परनिपातो भविष्यति । गोत्रं पुनरिह लौकिकं गृह्यते । न पारिभाषिकम् । लोके च प्रधानभूत आदिपुरुषः स्वप्रभवस्यापत्यसन्तानस्य संज्ञाकारी गोत्रमित्युच्यते । तथाहि भरतो नाम कश्चिदाद्यः प्रधानः पुरुषोऽभूत् । तेन सर्व एव तत्पूर्वकाः पुत्रपौत्रादयो भरता इति व्यपदिश्यन्ते । अवयवशब्दोऽयमस्त्येवैकदेशे । तत्सम्बन्धादवयवीति समुदाय उच्यते । अस्ति च पृथग्भावे । अवयुतिरवयवः । पृथग्भूत इत्यर्थः । यद्यपि यौतिर्मिश्रणे पठ्यते तथाप्यनेकार्थत्वाद् धातूनामवपूर्वः पृथग्भावमाचष्टे । अस्त्यप्रधाने यथा कुलावयवोऽयं संघावयवोऽयमिति । कुलस्य संघस्य चाप्रधानभूतोऽयमिति गम्यते । तत्र यद्येकदेशवाची गृह्यते तदुपादानमनर्थकं स्यात् । गोत्रादित्येव वक्तव्यम् । गोत्रावयवोऽपि हि गोत्रं भवति यथा क्षीरावयवः क्षीरमिति । अथापि पृथग्भावे गोत्रादन्यत्र वर्त्तमानो गृह्येत एवमपि पुणिकादिभ्यो विहितयोरणिञोः ष्यङादेशो न स्यात् । पुणिकादीनां गोत्रवचनत्वात् । क्व तर्हि स्यात् ? यत्र गोत्रवाचिनः प्रातिपदिकादणिञौ विहितौ । अनिष्टञ्चैतत् । तस्यैकदेशवाचिनि पृथग्भाव-

वाचिनि वावयवशब्दे दोष इत्यत्राप्रधानवाच्येव गृह्यते । गोत्रावयवा इति । पुणिकादिश्रुतीनामेतद्विशेषणम् । अप्रधानगोत्राभिधायिन्य इत्यर्थः । गोत्राभिमता इति । गोत्रमित्येवमभिमता गोत्राभिधायिन्य इत्येवं लोके प्रसिद्धाः । न पुन र्गोत्राध्याये पठिता इत्यर्थः । अतएव तासामप्राधान्यम् । गोत्राध्यायेऽपठितत्वात् । कुलाख्या इति । कुलं गोत्रम् । आख्यायत आभिरित्याख्याः । आतश्चोपसर्ग (३।३।१०६। इत्यङ् । कुलस्याख्याः । इह पुणिकादिश्रुतिभिर्हि कुलमाख्यायते पुणिकोऽयं गोत्रेणेत्यवमादि । तत इति । यथोक्तविशेषणविशिष्टाभ्यः पुणिकादिश्रुतिभ्यः । यदि तर्हि ततो गोत्रविहितयोरणिञोः ष्यङ् भवत्येवं सत्यपार्थकोऽयं योगः । पूर्वेणैव सिद्धत्वादित्यत आह अगुरूपोत्तमार्थ आरम्भ इति । पौणिक्येत्यादि । पुणिकभुणिकमुखरशब्देभ्योऽत इञितीञन्तस्य (४।१।९५) ष्यङ्चाप् ।

## ८० । क्रौड्यादिभ्यश्च ।

क्रौड़ीति । क्रौड़ीत्येवमादिभ्यश्च स्त्रियां ष्यङ्प्रत्ययो भवतीति । ननु चादेशपक्षः पूर्वमाश्रितः । तत् किमर्थमिह प्रत्ययपक्ष आश्रीयते ? तदाश्रयणेऽप्यत्र दोषा नास्तीति प्रदर्शनार्थः । अगुरूपोत्तमार्थ आरम्भ इत्यादि । येऽत्राणन्ता इञन्ताश्च पठ्यन्ते तान् प्रत्ययमगुरूपोत्तमार्थ आरम्भः । ये त्वन्ये तान् प्रत्ययमणिञर्थः । तत्राद्याः क्रौड्यादयः प्राक् चौपयतशब्दादिञन्ताः । चौपयतप्रभृतय स्त्वणन्ताः प्राक् सौधातकिशब्दाद् । सौधातकिशब्दस्तु सुधातोरकङ् चेतीञन्तः (४।१।९७) । सूत युवत्यामिति । सूतशब्दाद् युवत्यां प्राप्तयौवनायां ष्यङ् भवति सूत्या । अन्यत्र टाबेव सूता । भोज क्षत्रिय इति । भोजशब्दात् क्षत्रियजातौ वाच्यायां ष्यङ् भवति । जातिलक्षणस्य ङीषोऽपवादः । भोज्या । अन्यत्र टाबेव भवति भोजा । ततः परे प्राग् गोकक्ष्यशब्दादिञन्ताः । स पुनर्गर्गादियञन्तः ।

## ८१ । दैवयज्ञिशौचिवृक्षिसात्यमुग्रिकाण्ठेविद्धिभ्योऽन्यतरस्याम् ।

गोत्रे पूर्वेण नित्य इत्यादि । यदा पौत्रप्रभृतावपत्य इञ् विधीयते तदा

पूर्वेषामिञोरित्यादिना (४।१।७८) नित्ये प्राप्ते विकल्प्यते। यदा त्वनन्तरापत्ये तदा ऽप्राप्त एव पक्षे विधीयते।

## ८२। समर्थानां प्रथमाद्वा।

स्वार्थिकप्रत्ययावधिश्चायमधिकार इति। स्वार्थे प्रकृत्यर्थे भवाः स्वार्थिकाः। अध्यात्मादित्वाट् ठञ् (४।३।६०, वा)। स्वार्थिकाः प्रत्यया अवधिर्मर्य्यादा यस्य स तथोक्तः। प्राग्दिशो विभक्तिरिति (५।३।१) यावदिति। अनेन यतः परेण स्वार्थिकाः प्रत्यया अवधिभूताः प्रवर्त्तन्ते तत् सूत्रं दर्शयन् प्राग्दिशो विभक्तिरित्येतत् सूत्रात् (५।३।१) प्रागयमधिकार इत्याचष्टे। किं पुनः कारणं स्वार्थिकेष्वप्ययमधिकारो न प्रवर्त्तेत इत्याह स्वार्थिकेष्वित्यादि। समर्थानामिति। सम्बद्धार्थानामित्येषोऽर्थः। सम्बद्धार्थता च द्विष्ठत्वात् प्रतियोगिनि सति भवति। स्वार्थिकानाञ्च प्रकृत्यर्थादर्थान्तरं न सम्भवति यत्प्रत्यायनाय शब्दान्तरं प्रयुज्येत यदपेक्षया च समर्थता स्यात्। तस्मात् समर्थताया अभावात् स्वार्थिकेषु समर्थानामित्येतत् तावन्नोपयुज्यते। अतएव प्रतियोगिनोऽभावात् प्रथमादित्येतदपि नोपयुज्यत एव। यदि हि प्रतियोगिशब्दान्तरं स्यात् तत आशङ्का स्यात् किं प्रथमात् प्रत्यय उत द्वितीयादिति? ततश्च तन्निवृत्तये प्रथमादिति वचनमनुवर्त्तमानमर्थवत् स्यात्। असति तु द्वितीये प्रतियोगिनि तदनुवृत्तिर्नोपयुज्यते। विकल्पोऽपि तत्रानवस्थित इति। अनियत इत्यर्थः। यतः केचित् स्वार्थिका नित्यमेव भवन्ति। तथाचापङ्क्चाशितङ्गुलंकमालमित्यादौ सूत्रे (५।४।७) भाष्यकारः परिगणनं करिष्यति। के पुनर्नित्याः प्रत्ययाः? तमबादयः प्राक् कात्। ञ्यादयः प्राग्वुनः। आमादयः प्राङ्मयटः। वृहत्या जात्यन्तात् समासान्ताश्चेति। तत्रातिशायने (५।३।५५) तमबिष्ठनाविति तमप्प्रभृतयो ये प्रत्ययाः प्रागिवात् क (५।३।७०) इत्येतस्मात् प्राक् ते नित्याः। तथा पूगाञ्ञ्योऽग्रामणीपूर्वादित्यतो (५।३।११२) ञ्यप्रत्ययात् प्रभृति पादशतस्य संख्यादेर्वीप्सायां वुन् लोपश्चेत्यतो (५।४।१) वुनः प्राग् ये ते नित्याः। तथा किमेत्तिङव्ययघादाम्बद्रव्यप्रकर्षे (५।४।११) इत्यत आम्प्रभृति प्राक् तत्प्रकृतवचने मयटो

(५।४।२१) ये प्रत्ययास्ते नित्याः । तथा बृहत्या आच्छादन (५।४।६) इति यो विहितः कप्रत्ययो जात्यन्ताच्छो बन्धुनीति (५।४।६) च यश्छप्रत्ययो ये समासान्ता डजादयस्ते सर्वे नित्याः । तस्माद् विकल्पः स्वार्थिकेष्वनवस्थितः । ततश्च वाग्रहणमपि तत्रानवस्थितमेव । क्वचिदनुवर्त्तते । क्वचिन्नेत्युक्तं भवति । इह प्रथमादिति विशेषणं प्रयोगवाक्यस्य लक्षणवाक्यस्य वा ? यदि प्रथमस्ततो लौकिके वाक्ये पदानां प्रयोगे नियमो नास्तीति । पात्रमाहर आहर पात्रमिति प्रयोगात् । ततश्च यदापत्यमुपगोरिति प्रयुज्यते तदापत्यशब्दात् प्रथमासमर्थात् प्रत्ययः स्यात् । ननु च तस्येत्यनेन सूत्रोपात्तेनानुकरणपदेन षष्ठ्यन्तेन प्रथमेनालौकिकवाक्यसमवायि पश्चान्निर्दिष्टमपि पदमनुकृतम् । तत् प्रथमत्वात् प्रथमव्यपदेशमासादयति । तेन यदाप्यपत्यमुपगोरिति लौकिकं वाक्यं प्रयुज्यते तदोपगुशब्दादेव यथोक्तेनैव प्रकारेण लब्धप्रथमव्यपदेशात् प्रत्ययो भविष्यति । नापत्यशब्दात् । तदाद्येऽपि पक्षे समाश्रीयमाणे न दोष इति चेद् ? वार्त्तमेतत् (U) । नहि मुख्ये प्रथमे सम्भवति सति गौणस्य ग्रहणं युक्तम् । अतः सत्यप्युपगुशब्दस्य गौणेन प्रथमत्वे मुख्यात् प्रथमादपत्यशब्दादेव प्रत्ययः स्यात् । नोपगुशब्दात् । प्रतिपत्तिगौरवञ्च । द्वितीये तु पक्ष एष दोषो नावतरति । लक्षणवाक्येषु पदानां प्रयोगस्य नियतत्वात् । अतस्तमाश्रित्याह लक्षणवाक्यानीत्यादि । समर्थानां मध्ये प्रथमः प्रत्ययप्रकृतित्वेन निर्द्धार्य्यत इति यथा कृष्णा गवां सम्पन्नक्षीरतमेति गवां मध्ये कृष्णा गौः सम्पन्नक्षीरतमात्वेन । यदि तर्हि समर्थानां प्रथमात् प्रत्ययो भवत्येवं सति तस्यापत्यमित्यत्र (४।१।६२) तस्येत्येतत्सर्वनाम सामान्यवाचि प्रथमं निर्दिष्टमिति सामान्यवाचिन एव प्रत्ययः स्यात् । न विशेषवाचिनः प्रातिपदिकादुपग्वित्यादेः । नहि तल्लक्षणवाक्ये प्रथमं निर्दिष्टमित्यत आह तस्येत्यादि । विशेषलक्षणार्थमिति । विशेषोपलक्षणार्थमित्यर्थः । यदि हि तस्येत्येतद् विशेषोपलक्षणार्थं न स्यात् तदा समर्थता तस्य न स्यात् । नहि तस्येत्येतत् प्रकरणाद्यनपेक्षं विशेषेष्ववतिष्ठते । न च विशेषेष्वनवस्थितेनानेनापत्यस्य कश्चिदुपकारः

---

(U) वार्त्तं कुत्सितमित्यर्थः ।

क्रियते। सम्बन्धिसामान्यं हि सामान्यवाचिनोऽपत्यस्य प्रतिपादनेनावगतमिति। तस्येत्यनेनास्यापूर्वः कश्चिदुपकारः कृतो भवति। सम्बन्धिसामान्यस्य सम्बन्धिशब्दत्वात्। अपत्यशब्देनैव गमितत्वात्। ततश्चोपकाराभावात् समर्थता न स्यात्। उच्यते चेदं तस्येति। तस्मात् सामर्थ्याद् विशेषोपलक्षणार्थत्वं तस्येत्यस्य तेन ये विशेषा उपलक्षिताः प्रतिपादिता स्ते सम्बन्ध्यन्तरव्यवच्छेदेन विशिष्टं सम्बन्धिनं प्रतिपादयन्त उपकारिणो भवन्तीत्युपपद्यते तैः सह सामर्थ्यम्। तस्मात् तस्येत्येतत् सामान्यं विशेषोपलक्षणार्थं द्रष्टव्यम्। तेन तस्य यत् प्राथम्यं तद्विशेषाणामुपगुशब्दादीनां विज्ञायते। ततश्च तत एव प्रत्ययो भवति। न च सामान्यवाचिनः। कम्बल उपगोरपत्यं देवदत्तस्येति। अत्रोपगुशब्दः कम्बलेन सह सम्बद्धः। नापत्येन। अपत्यशब्दस्यापि देवदत्तशब्देन। नोपगुशब्देन। तस्मादपत्यशब्देन सहोपगुशब्दस्य सम्बन्धो नास्तीति न ततः प्रत्ययो भवति। वाक्यमपि हि यथा स्यादिति। असति हि वाग्रहणे वाक्येनापत्यस्याभिधाने प्राप्ते तस्मिन्नर्थे विधीयमानः प्रत्ययस्तन्निवर्त्तयेत्। ननु च समानेऽर्थे शास्त्रान्वितो ऽशास्त्रान्वितस्य निवर्त्तको भवति यथा गमेर्डोरित्यनेन (उण्, २।२२५) शास्त्रान्वितो गोशब्दो ऽशास्त्रान्वितस्य गावीशब्दस्य। समानार्थस्यैव। नतु भिन्नार्थस्य डित्थादेः। न च वृत्तिवाक्ययोः समानोऽर्थः। वृत्तौ ह्येकार्थीभावः सामर्थ्यम्। वाक्ये तु व्यपेक्षा (४)। नैतदेवम्। सत्यपि ह्येतस्मिन्नर्थभेदे प्रधानार्थौ न भिद्येते। तथाह्युपगोरपत्यमानयेत्युक्ते य एवार्थोऽपत्यापत्यवत्सम्बन्धविशिष्टः स आनीयते। औपगवमानयेत्युक्ते स एव। प्रधानापेक्षयैव च समानार्थः शास्त्रान्वितो ऽशास्त्रान्वितं निवर्त्तयति। अन्यथा हि गोशब्दोऽपि गावीशब्दं न निवर्त्तयेत्। अस्ति हि तयोरप्यर्थभेदः। तथाहि गोशब्दो गोत्वमाचष्टे। गावीशब्दस्तु तथा। अशास्त्रीयत्वञ्च। तस्मादसति वाग्रहणे यथा गोशब्दः सत्यप्यप्रधानार्थभेदे प्रधानार्थस्य समानार्थाद् गावीशब्दं निवर्त्तयति तथा तद्धितोऽपि शास्त्रान्वितो ऽशास्त्रान्वितं वाक्यं निवर्त्तयेत्। तस्माद्वाक्यमपि यथा स्यादिति वाग्रहणं क्रियते। यद्येव-

(४) अपेक्षाऽन्योन्यापेक्षित्वमर्थः। अपेक्षा चाकाङ्क्षा।

मित्यादि । यदि वाग्रहणेन तद्धितस्य भावाभावौ कुर्व्वता वाक्यस्य भावः क्रियत एवं सति यदा वाक्यं नास्ति तदा तद्धितेनैव भवितव्यम् । समासवृत्ति-रुपगवपत्यमितीयषा तद्धितवृत्त्या बाध्येत । नैष दोष इत्यादि । गतार्थम् ।

## ८३ । प्राग्दीव्यतोऽण् ।

प्राग्दीव्यदित्ययुक्तोऽयं निर्देशः । यावता दीव्यतीति(४।४।२) वक्ष्यति । ननु दीव्यदिति । तत्र दीव्यतिशब्दस्यावधित्वेनोपादाने दीव्यतेरिति निर्देशेन भवितव्य मित्यत आह तदेकदेश इत्यादि । समस्तस्य दीव्यतिशब्दस्या-वधित्वेनोपादाने सति न युज्येतायं निर्देशः । ननु समस्तस्योपादानम् । अपि तु तदेकदेशस्य दीव्यच्छब्दस्येत्यदोषः । अथ किमर्थं दीव्यद्ग्रहणं प्राग्ग्रहणञ्च ? नाणित्येवाधिकारः क्रियताम् ? नैवं शक्यम् । एवं हि क्रियमाणे स्त्रीभ्यो ढगित्येवमादिनाऽधिकारान्तरेण (४।१।१२०) विच्छिन्नस्याणस्तेन रक्तं रागादित्येवमादिषु (४।२।१) पुनरण्ग्रहणं कर्त्तव्यं जायेत । अवधिनाधिकार-परिमाण आख्याते तदवधिकेष्वर्थेषु सर्वेष्वयमभ्यनुज्ञायत इति पुनरण्ग्रहणं कर्त्तव्यं न भवति । तस्मादधिकारपरिमाणज्ञापनार्थं दीव्यद्ग्रहणं तावत् कर्त्तव्यम् । प्राग्ग्रहणमपि कर्त्तव्यमेव । तस्यैवावधित्वद्योतनार्थम् । असति हि तस्मिन् दीव्यतोऽणित्युच्यमाने प्रकृतिरणो दीव्यच्छब्दो विज्ञायेत । त्रिष्वपि दर्शनेष्वित्यादि । कथं पुनरियमपवादविषयपरिहारेणाणः प्रवृत्तिर्लभ्यते ? यावताधिकारे तस्मिन् सति प्रतियोगमुपस्थानादपवादविषयेऽप्यण् प्राप्नोति । अत इञ् । अण् चेति । अन्यथा हि तस्य तत्रोपादानमनर्थकं स्यात् । परिभाषापक्षेऽपि प्राग्दीव्यतोऽर्थेष्वणित्यविशेषेण परिभाषिते सामान्येन परिभाषा प्रवर्त्तमाना केनापवादविषयं परिहरेत् ? विधावपि प्राग् दीव्यतो याः प्रकृतय स्ताः सर्वा इहैकध्यमुपनीयाण् विधीयमानः सर्वतः प्रवर्त्तेत । अन्यथा सर्वतो विधानमनर्थकं स्यात् । एवं मन्यते । ज्ञापकादपवाद-विषये न भविष्यतीति । यदयं क्वचिद्वाग्रहणमन्यतरस्यांग्रहणञ्च करोति पीलाया वा (४।१।११८) । उदश्वितोऽन्यतरस्यामिति (४।२।१९) तज्ज्ञापयति नापवाद-विषयेऽण् भवतीति । विधौ तु भूयान् परीहारः । नहि प्राग्दीव्यतो याः

प्रकृतय स्ताभ्योऽण् विधीयते। किं तर्हि? प्राग्दीव्यतो येऽर्थास्तेषु। तत्र समानार्थे प्रकृतिविशेषादुत्पद्यमान इञण् बाधिश्यत इति। अथ किमर्थमियानवधिरुपादीयते? न प्राक् ठक इत्येवोच्येत। प्राग् वहतेष्ठगित्येतस्मात् (४।४।१) ठकः प्रागित्यर्थः। नैवं शक्यम्। दण्डष्ठगित्येवमादि (४।२।१८) रपि ठगवधित्वेन विज्ञायेत। प्राक् कंसीयादित्येवं तर्हि वक्तव्यम्। कंसीयपरशव्ययोर्यञञौ लुक् चेति (४।३।१६८)। तत्र यः कंसीयशब्दस्ततः प्रागित्यर्थः। एवमप्यशक्यं वक्तुम्। द्विगोर्लुगनपत्ये (४।१।८८) इत्यत्रापि कंसीयादुत्पद्येत। ततश्च द्वयोः कंसीययोर्विकारो द्विकंस इत्यत्र लुङ् न स्यात्। तस्माद् यथान्यासमेवास्तु।

## ८४। अश्वपत्यादिभ्यश्च।

## ८५। दित्यदित्यादित्यपत्युत्तरपदाण्ण्यः।

पत्युत्तरपदाच्चेति। एतेनोत्तरपदशब्दः पतिशब्देनैव सम्बध्यते। नान्यैर्दित्यादिभिरिति दर्शयति। एतच्च प्रत्यासत्त्याख्यानाद्वा लभ्यते। यमाच्चेति वक्तव्यमिति। यमशब्दाच्च ण्यप्रत्ययो भवतीत्येतदर्थरूपं व्याख्येयम्। तत्रेयं व्याख्या। इह लाघवार्थं पत्यन्तादिति वक्तव्ये पत्युत्तरपदादिति वचनमधिकविधानार्थम्। ग्रन्थाधिक्यादर्थाधिक्यं भवतीति। तेन यमशब्दादपि ण्यो भविष्यतीति। अथवा पूर्वसूत्राच्चकारोऽनुवर्त्तते। तस्मादनुक्तसमुच्चयार्थत्वाद् भविष्यतीति। वाग्मतिपितृमतामित्यादि। उपसंख्यानशब्दस्य प्रतिपादनमर्थः। प्रतिपादनन्तु तदेव ग्रन्थाधिक्यादर्थाधिक्यमाश्रित्य चकारस्यानुक्तसमुच्चयार्थस्यानुवृत्तेर्वा कर्त्तव्यम्। याम्यमित्यादिषु (W) यथायोगं प्राग्दीव्यतीयेऽपत्यादावर्थे ण्यप्रत्ययः। पृथिव्या ञाञाविति। एते ञादयस्तद्धिता इति (४।१।७६) बहुवचनेनानुक्ततद्धितपरिग्रहार्थेन सिद्धान्तीति न वक्तव्याः। तत्र पृथिवीशब्दाद् यदा ञस्तदा टाप् पार्थिवा। यदा ञञ् तदा टिड्ढाणञिति (४।१।१५) ङीप् पार्थिवी। बहिषष्टिलोपश्चेत्यादि। ननु चाव्ययानां भमात्रे टिलोपः सायंप्राति-

(W) तथाहि याम्येन चाभवन् क्रोशा माहवी विश्रुतिजर्मेति देवीमाहात्म्ये।

कार्यार्थं इत्यनेनैव टिलोपे (६।४।१४४, वा) सिद्धिः। तत् किमर्थम्पुनरुच्यत इत्यत आह टिलोपवचनमित्यादि। आरातीय इति। अनित्यत्वज्ञापनस्य प्रयोजनम्। आराद् भवतीति वृद्धाच्छः (४।२।११४)। स्थाम्नोऽकारः। स्थामञ्शब्दस्य केवलस्यापत्यार्थे प्रयोगो नास्तीति तदन्तस्याकार प्रत्ययो विज्ञेयः। अश्वस्येव स्थामास्येत्यश्वत्थामा। पृषोदरादित्वात् सकारस्य तकारः। अश्वत्थाम्नो ऽपत्यमश्वत्थामः। न स्त्विहित इति (६।४।१४४) टिलोपः। लोम्नोऽपत्य इति। लोमशब्दो बाह्वादिषु पठ्यते। तस्य केवलस्यापत्येन सम्बन्धो नास्तीति तदन्तविधि र्विज्ञायते। अत्रापत्यविवक्षायां बहुष्विञि प्राप्ते तदपवाद एवाकारो विधीयते। उडुलोम्नोऽपत्यानि बहून्युडुलोमाः। सर्वत्रेति। अपत्ये चान्यत्र च। अथवा प्राग्दीव्यतीये चान्यत्र चार्थेऽजादिप्रत्ययप्रसङ्ग इति। अजादेः प्रत्ययस्य प्रसङ्गः प्राप्तिः। तत्र गोशब्दात् सर्वत्र यद् भवति। यद्येवमुगवादिभ्यो (५।१।२) यदित्यत्र गोग्रहणं किमर्थम्? अस्यैव प्रपञ्चार्थम्। गव्यमिति। गोरपत्यम्। गवा चरतीति वा। अणष्ठको वाऽजादेर्यत्रार्थे प्रसङ्गस्तत्र यद्भवति। नान्यत्र। गोरूप्यं गोमयमिति। हेतुमनुष्येभ्योऽन्यतरस्यां रूप्यः (४।३।८१)। मयट् च (४।३।८२)। ण्यादय इत्यादि। लक्षणशब्दो निमित्तवचनः। चिह्नवचनो वा। अर्थविशेषो लक्षणं यस्य सोऽर्थविशेषलक्षणो ऽणपवादः। तस्मात् पूर्वविप्रतिषेधेन ण्यादयो भवन्ति। नचेदं वक्तव्यम्। परशब्दस्येष्टवाचित्वात् तेनैव सिद्धत्वात्। आदिशब्देनोत्सादिभ्यो ऽञितेयवमादयः (४।१।८६) प्रत्यया गृह्यन्ते। तत्र ण्यस्यावकाशो दिति र्देवतास्य स्थालीपाकस्येत्याद्यर्थविवक्षायां नाचाणोऽपवादः कश्चिदन्योऽस्तीति निष्प्रतिद्वन्द्वी ण्य एवाणपवादो भवति दैत्यो वानस्पत्यमिति। ण्यश्चायं सर्वेष्वपत्यादिष्वर्थेषु विधीयत इति सामान्यप्रत्ययो भवतीति। अतो नार्थविशेषलक्षणः। अर्थविशेषलक्षणस्याणपवादस्यावकाशो दुलेरपत्यमितीतश्चानिञ इति (४।१।१२२) ढग् दौलेयः। ढगयमपत्य एवार्थविशेषे विधीयत इत्यर्थविशेषलक्षणो भवति। इहोभयं प्राप्नोति। दितेरपत्यं दैत्यः। वनस्पतीनां समूहो वानस्पत्यमिति वा। ण्यप्रत्ययो भवति पूर्वविप्रतिषेधेन। अर्थविशेषलक्षणादिति किम्? योऽणप-

वादोऽर्थसामान्येनार्थविशेषे विहितः स परत्वाण् ण्यादीन् बाधित्वा भवत्येव । उष्ट्रपतिर्नाम पत्रम् । तस्योष्ट्रपतेरिदमिति तस्येदंविवक्षायां पत्राध्वर्युपरिषदश्चेत्यञ् (४।३।१२२) औष्ट्रपतम् । तस्येदंलक्षणो ह्ययमञणोऽपवादः । न योऽर्थविशेषलक्षणस्तस्य । अर्थविशेषा ह्यपत्यादयो ऽर्थाः । तस्येदमर्थस्तु सामान्यं नार्थविशेषः । कथं दैतेय इति । यदि ण्यादयोऽर्थविशेषलक्षणादणपवादात् पूर्वविप्रतिषेधेन भवन्ति दैतेय इति न सिध्यति । अत्रापि हि ण्यप्रत्ययेनैव भवितव्यमिति भावः । दितिशब्दादित्यादि । दितिशब्दोऽयं दो अवखण्डन इत्यस्मात् क्तिच्क्तौ चेति (३।३।१७४) क्तिच् । द्यतिस्यतीत्यादिनेत्त्व(७।४।४०)मित्येवं यदा व्युत्पाद्यते तदा कृदिकारादक्तिन (४।१।४०, वा) इति ङीष् । अथाव्युत्पन्नं प्रातिपदिकं तदा सर्वतोऽक्तिन्नर्थादित्येक इति (४।१।४५, वा) । ननु प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणं भवतीति (प, ७२) दितिशब्दो गृह्यमाणो दितीशब्दमपि ग्राहयति । ततश्च यथा दितिशब्दाण् ण्यप्रत्ययः पूर्वविप्रतिषेधेन भवति तथा दितीशब्दादपि तेन भवितव्यमित्यत आह लिङ्गविशिष्टपरिभाषाऽनित्येति । अनित्यत्वं पुनरस्या अच्प्रकरणे शक्तिलाङ्गलाङ्कुशयष्टितोमरघटघटीधनुःषु ग्रहेरुपसंख्यानमिति (३।२।९, वा) घटशब्दमुच्चार्य घटीशब्दोच्चारणाद् वेदितव्यः ।

## ८६ । उत्सादिभ्योऽञ् ।

तदपवादानाञ्चेति । इञादीनाम् । वष्कयाऽस इति गणे पठ्यते । तस्यायमर्थः । वष्कयशब्दादञ् भवति । असे असमासे इत्यर्थः । पूर्वाचार्यैः समासस्य स इत्येषा संज्ञा कृता । वष्कयस्यापत्यं वाष्कयः । अस इति किम् ? गौवष्कयिः । अत इञितीञेव (४।१।९५) भवति । उदस्थानाद्देश इति । उदस्थानशब्दाद्देशे वाच्ये ऽञ् भवति । उदस्थाने भवो देश औदस्थानः । देश इति किम् ? उदस्थानो नाम कश्चित् पुरुषः तस्यापत्यमौदस्थानिः । पृषदंश इति । पृषच्छब्दादंशे ऽभिधेये ऽञ् भवति । पृषदो ऽंशः पार्षदः । अंश इति किम् ? पार्षदो (X) ऽन्यः । अणेव भवति ।

---

(X) स्वरे विशेषः । अञन्तस्य ञित्त्वादाद्युदात्तत्वम् । अणन्तस्य तु प्रत्ययस्वरेणान्तोदात्तत्वम् ।

कुरुशब्दोऽत्र पठ्यते । तस्यापत्यविवक्षायां कौरव इति न सिध्यति । यस्मात् कुर्वादिभ्यो ण्यः (४।१।१५१) । कुरुनादिभ्यो ण्य (४।१।१७२) इति च ण्यप्रत्ययः प्राप्नोति । अञ्प्रत्ययो हि सामान्यविहितः । ण्यप्रत्ययस्तु विशेषविहितः । सामान्यविहितश्च विशेषविहितेन बाध्यते । नैष दोषः । अयं योगस्तयोर्योगयोरनुवर्त्तिष्यते । तत्राप्यपत्येऽर्थे कुरुशब्दो ऽनवकाश इत्यञपि ततो भविष्यति । अपत्यार्थस्य तस्येदमित्यर्थविवक्षायां वा कौरव इति भविष्यति । ग्रीष्मादच्छन्दसीति वक्तव्यम् । ग्रीष्मशब्दादच्छन्दस्यभिधेये ऽञ् भवतीतिरतदर्थरूपं व्याख्येयमित्यर्थः । किमर्थमित्याह इह मा भूदित्यादि । छन्दसि त्रिष्टुबादौ वाच्ये सन्धिवेलादिसूत्रेण ( ४।३।१६ ) ऋत्वणेव यथा स्यात् । अञ् मा भूदित्येवमर्थम् । तेन ग्रैष्मी त्रिष्टुबित्यञ् न भवति । तत्रेदं व्याख्यानम् । वेति वर्त्तते । सा च व्यवस्थितविभाषा । तेन ग्रीष्मशब्दाच्छन्दसि वाच्ये ऽञ् न भवतीति । वृत्तं गृह्यत इति । यस्य त्रिष्टुब्जगतीत्यादयो विशेषास्तदिह वृत्तम् । अतश्छन्दो गृह्यते । न वेदः ।

## ८७। स्त्रीपुंसाभ्यां नञ्स्नञौ भवनात् ।

अत्र तावत् स्त्रीशब्दस्य स्वरूपग्रहणं न टाबादिस्त्रीप्रत्ययान्तस्य शब्दस्य । ततो हि स्त्रीभ्यो ढगिति (४।१।१२०) ढकं वक्ष्यति । तत्साहचर्य्यात् पुंशब्दोऽपि तद्रूपेणैव विज्ञायते । तस्यापि स्वरूपग्रहणमेव । पौंस्नमिति । संयोगान्तस्य लोप (८।२।२३) इति लोपः । यदि प्राग् भवनसंशब्दनात् स्त्रीपुंसाभ्यां नञ्स्नञौ भवतो वत्यर्थेऽपि तौ स्याताम् । ततश्च स्त्रीवत् पुंवदिति न सिध्येदित्याह स्त्रियाः पुंवदित्यादि । यदयं स्त्रियाः पुंवदिति (६।३।३४) निर्देशं करोति ततो ज्ञायते वत्यर्थे नञ्स्नञौ न भवतः । ननु चैतस्मान्निर्देशात् स्नञ्प्रतययो वतर्थे न भवतीति शक्यं विज्ञातुम् । नतु नञ्प्रतययो न भवतीति । ततश्च स्त्रीवदिति न सिध्यतीतरत आह योगापेक्षञ्चेतरादि । पुंवदिति निर्देशादयं योगो वतर्थे न प्रवर्त्ततइत्येवमर्थमिदं योगापेक्षं ज्ञापकम् । नतु स्नञ्प्रतययापेक्षम् । तेन स्त्रीवदित्येतदपि सिध्यति ।

## ८८। द्विगोर्लुगनपत्ये।

प्रागदीव्यत इति। तस्य स्वरितत्वात्। न भवनादिति। विपर्ययात्। द्विगोरिति पञ्चमी चेयं स्यात्? षष्ठी वा? तत्र यदि पञ्चमी तदायमर्थः स्यात्। द्विगोः परस्यानपत्यप्रत्ययस्य प्रागदीव्यतीयस्य लुग् भवतीति। ततश्च यथा द्विगुसंज्ञानिमित्तस्य लुग् भवति पञ्चकपालेषु संस्कृतः पुरोडाशः पञ्चकपाल इति तथा यो द्विगो र्निमित्तं न भवति तस्यापि स्यात्। पञ्चकपालस्य पुरोडाशस्येदं खण्डम्। तस्येदमित्यण् (४।३।१२०) पाञ्चकपालमिति। तदिमं पञ्चमीपक्षे दोषं दृष्ट्वा षष्ठीपक्षमाश्रित्याह द्विगोरिति षष्ठीति। द्विगो र्यः सम्बन्धीति। यस्य तद्धितस्यार्थे तद्धितार्थोत्तरपदसमाहारे चेति (२।१।५१) समाहारद्विगुर्विधीयते स द्विगोः सम्बन्धीति। अर्थद्वारेण तदर्थस्य द्विगुसम्बन्धित्वात्। सोऽपि तद्द्वारेण द्विगुसम्बन्धी। निमित्तत्वेनेति। अनेन निमित्तनैमित्तिकभावेन यः सम्बन्धी तस्य लुग् भवति। नतु पौर्वापर्य्यभावेन यस्तस्येति दर्शयति। एतच्च निमित्तनैमित्तिकभावस्यान्तरङ्गत्वाल्लभ्यते। स हि द्विगोराद्यस्तद्धितेन सम्बद्धः। तस्मात् स गृह्यते। पौर्वापर्य्यभावस्तूत्तरकालमपि भवतीति वहिरङ्गो भवति। अतो न तस्य ग्रहणम्। पञ्चकपाल इति। पञ्चसु कपालेषु संस्कृत इति तद्धितार्थ इति (२।१।५१) समासः। संख्यापूर्वो द्विगुरिति (२।१।५२) द्विगुसंज्ञा। संस्कृतमित्यण् (४।४।३)। तस्य लुक्। द्विवेद इति। द्वौ वेदावधीत इति पूर्ववत् समासः। तदधीते तद्वेदेत्यण् (४।४।५१)। द्वैदेवदत्तिरिति। द्वयो र्देवदत्तयोरपत्यमित्यत इञ् (४।१।९५)। पञ्चकपालस्येदमिति पाञ्चकपालमिति। अत्र संस्कृतार्थे यः प्रथमः प्रत्यय उत्पन्नः स एव द्विगोर्निमित्तम्। नतु य उत्तरकालं तस्येदमित्यर्थविवक्षायाम्। नहि तस्यार्थे विषयभूते द्विगुर्विहितः। किं तर्हि? संस्कृतार्थे यो विहितस्तस्य। तेनाद्विगुनिमित्तत्वात् तस्येदमिति (४।३।१२०) यो विहितस्तस्येह लुग् न भवति। अथवेत्यादि। पूर्वं हि द्विगोर्यस्तद्धितो निमित्तं तस्य लुग् विहितः। इदानीं द्विगोरेव विधीयत इत्यस्ति विशेषः। कथं पुनर्द्विगोरेव लुग् भवतीत्यत आह द्विगोरिति स्थानषष्ठीति। ननु

चेत्यादिनानन्तरोक्तव्याख्यानं विघटयति। प्रत्ययस्य लुक्श्लुलुप इति (१।१।६१) लुगादिकाः प्रत्ययादर्शनस्यैताः संज्ञा विहिताः। ततो लुगुच्यमानो ऽनेन न शक्तो द्विगोरेव लुकं विधातुमित्यभिप्रायः। सत्यमेतदिति। यदनन्तर-मुक्तम्। यद्येवं कथं लुकसंज्ञाया द्विगोर्लुग् लभ्यत इत्यत आह उपचारेण त्वित्यादि। अतथाभूते वस्तुनि यो ऽध्यारोपिततथाभावो ज्ञानविशेषः स उपचारः। लक्ष्यते ऽनयेति लक्षणा। सा पुनरिहोपचार एव। एतेन ह्यद्विगु-रूप स्तद्धितो द्विगुरूपतया लक्ष्यते यथा मञ्चाः क्रोशन्तीत्यत्रामञ्चरूपा अपि पुरुषा मञ्चरूपतया लक्ष्यन्ते तथेहाप्यद्विगुरूपस्तद्धितो द्विगुरूप-तया। उपचारस्य तु निबन्धनं द्विगुनिमित्तभूतत्वं यदाह द्विगु-निमित्तभूतः प्रत्यय एव द्विगुरिति। भवति हि कारणे कार्य्योपचारो यथायुर्घृतमिति। द्विगुनिमित्तकोऽपि तद्धितेत्यादि। द्विगुर्निमित्तं यस्य स तथोक्तः। यो धर्म उपचारस्य निबन्धनं स इह गुणशब्देन विवक्षितः। गुणनिमित्ता कल्पना गुणनिमित्तकल्पना। सा पुनरुपचारात्मिकैव वेदितव्या। यदुपचारेण द्विगोर्निमित्तं प्रत्ययोऽपि द्विगुरुच्यते द्विगुर्यस्य निमित्तं सोऽपि गौण्या कल्पनया कस्माद् द्विगुरिति नोच्यते? कार्य्येऽपि हि कारणशब्द उपचारात् प्रयुज्यमानो विद्यत एव यथा पुरातनं सर्वमिदं शुभाशुभं कर्म्म भुज्यत इति। पाञ्चकपालमिति। पञ्चकपालस्य पुरोडाश-स्येदं खण्डमित्यण्। स च द्विगोरुत्पन्नत्वाद् द्विगुनिमित्तक इत्यभिप्रायः। न तस्य द्विगुत्वं निमित्तमिति निष्पन्नत्वाद् द्विगो स्तद्धितस्योत्पद्यमानस्य न द्विगुत्वं निमित्तम्। किं तर्हि प्रातिपदिकम्। तथाहि नासौ द्विगु-रित्येवं विधीयते। किं तर्हि? प्रातिपदिकादित्येवम्। तस्मात् सन्नि-हितापि द्विगुता न प्रत्ययस्य निमित्तमिति न च प्रत्ययो द्विगुरित्युप-चारेण व्यपदेष्टुं शक्यत इति। इतरस्त्विति। तद्धितप्रत्ययो यस्य मूलो-दाहरणे लुग् दर्शितः। द्विगुत्वस्यैव निमित्तमिति। एवकारेण प्राति-पदिकस्य व्यवच्छेदः क्रियते। द्विगुत्वस्यैव निमित्तं न तु प्रातिपदिकत्वस्य। यतस्तदर्थे द्विगुसमासो विधीयते। न तु प्रातिपदिकत्वमित्यस्ति विशेषः। ततश्च द्विगोर्यो निमित्तं तत्रैव द्विगुत्वव्यपदेश उपचाराद्भवति। नतु

निष्पन्नाद् द्विगोर्यं उत्पद्यते तत्रापि । यद्येवमित्यादि । यदि द्विगोर्यो निमित्तं तद्धितः सोऽत्र निमित्तत्वादुपचारेण द्विगुरुच्यते तस्य लोपो भवति । एवं सतीह कथं लोपः पञ्चकपाल्यां संस्कृतः पञ्चकपाल इति ? अत्र हि पञ्चानां कपालानां समाहार इति समाहारे द्विगौ निष्पन्ने ततस्तूत्तरकालं तद्धितो विधीयमानो न द्विगोर्निमित्तं भवति । नैवाञ्चेत्यादि परिहारः । कस्मान्नोत्पद्यत इत्याह त्रैशब्द्यं हीत्यादि । त्रय एव शब्दा त्रैशब्द्यम् । चातुर्वर्ण्यादित्वात् स्वार्थे ष्यञ् । इहास्माभि स्त्रैशब्द्यं साध्यम् । पञ्चकपालीशब्दस्तद्धितोत्पत्तिमन्तरेणापि सिध्यतीति न तस्मात् तद्धित उत्पद्यते । पञ्चसु कपालेषु संस्कृत इत्यादिना त्रैशब्द्यं दर्शयति । द्वयोः शब्दयोरित्यादि । यश्च समाहारे पञ्चकपालीशब्दो यश्च तद्धितार्थ विषये समासे पञ्चकपालशब्दस्तौ द्वावपि समानार्थौ । तयोरेकेन पूर्वेण विग्रह एवेति । तस्मान्न तद्धितोत्पत्तिर्विज्ञेया । अपरस्मादुत्पत्तिरिति । पञ्चकपाल शब्दात् । अव्यविकन्यायेन । यथा ऽवेर्मांसमाविकमित्यविशब्देन विग्रहः । अविकशब्दस्तु प्रत्ययमुत्पादयति तद्वदिहापि । अथेह कस्मान्न भवतीत्यादि । रूप्यमयटावपि हि द्विगोर्निमित्तभूतावतस्तयोरपि लुका भवितव्यमिति भावः । वेत्यनुवर्त्तत इति । समर्थानां प्रथमाद्वेत्यतः (४।१।८२) । नन्वेवमपि सर्वत्र विकल्पेन लुक् प्राप्नोतीत्यत आह सा चेत्यादि । चशब्दो हेतौ । यस्मात् सा व्यवस्थितविभाषा विज्ञायते तेन पञ्चकपाल इत्यादौ नित्यं लुग् भवति । पञ्चगर्गरूप्यमित्यादौ न भवत्येव ।

## ८९ । गोत्रेऽलुगचि ।

अचीति । यद्येषा परसप्तमी स्याच्छविधावितरेतराश्रयता प्रसज्येत । कथम् ? गर्गस्यापत्यानि बहूनि गर्गादिभ्यो यञ् (४।१।१०५) । तस्य यदि लुक् स्याच् छो न स्यात् । लुप्तेऽपि तस्मिन् प्रत्ययलोपे प्रत्ययलक्षणमिति (१।१।६२) चेत् ? न लुमताङ्गस्येति (१।१।६३) प्रत्ययलोपप्रतिषेधाद्वृद्धभावेन वृद्धसंज्ञा न स्यात् । ततश्च वृद्धलक्षणश्छो न स्यात् । तस्माद्वृद्धत्वं प्रातिपदिकस्य वाञ्छतो ऽलुक् पूर्वं स्यात् । स चालुक् छे परतो यदि भवति

ततश्चालुग्निमित्तश्छः । तन्निमित्तश्चालुगिति व्यक्तमितरेतराश्रयत्वम् । तदिमं परस्परमस्यां दोषं दृष्ट्वा विषयसप्तमीयमिति दर्शयन्नाह अजादौ प्राग्दीव्यतीये विषयभूत इति । विषयभूते ऽनुत्पन्न एव । बुद्धिस्थ इत्यर्थः । गार्गीया इति । गर्गस्यापत्यानि बहूनि । गर्गादित्वाद् यञ् । तस्य गर्गाणाञ्छात्रा इत्यर्थविवक्षायामजादावनुत्पन्ने बुद्ध्यभिमुखीकृते विषयभूते यञिञोश्चेति (४।१।१०१) यो लुक् प्राप्नोति तस्यानेन प्रतिषेधः क्रियते । ततश्चादिवृद्धौ कृतायां तन्निबन्धनायां च वृद्धसंज्ञायां वृद्धाच्छ (४।२।११४) इतिच्छः । ईयादेशः । यस्येत्यकारलोपः (६।४।१४८) । आपत्यस्य च तद्धितेऽनातीति (६।४।१५१) यकारस्य । वात्सीया इति । पूर्वेण तुल्यम् । आत्रेयीया इति । अत्रेरपत्यानि बहूनि । इतश्चानिञ इति (४।१।१२२) ढक् । तस्यात्रिभृगुकुत्सेत्यादिना (२।४।६५) लुकि प्राप्ते ऽत्रीणां छात्रा इति च्छे विषयभूते तस्य प्रतिषेधः । खारपायणीया इति । खरपस्यापत्यानि बहूनि । नडादिभ्यः फक् (४।१।९९) । यस्कादिभ्यो गोत्र इति (२।४।६३) तस्य प्राप्तस्य लुकः खरपाणां छात्रा इति च्छे विषयभूते प्रतिषेधः । कौवलम् । बादरमिति । कुवलीबदरीशब्दौ गौरादिङीषन्तौ प्रत्ययस्वरेणान्तोदात्तौ । तयोः शेषमनुदात्तम् । तेन कुवल्या विकारः फलं बदर्या विकारः फलमित्यर्थविवक्षाया मनुदात्तादेरञ् (४।२।४४) । तस्य फले लुगिति (४।२।१६३) तयोर्लुग् यः प्राप्नोति तस्य कुवलस्येदं बदरस्येदमित्यर्थविवक्षायामजादौ छे विषयभूते प्रतिषेधो न भवति । गोत्रग्रहणात् । गोत्रे यः प्रत्ययो वाचकत्वेन वर्त्तते तस्य लुकः प्रतिषेधेन भवितव्यम् । न चायमञ् गोत्रे वाचकत्वेन वर्त्तते । अपि तु विकारे । तेन तस्य लुग् भवत्येव । तस्मिन् सति लुक् तद्धितलुकीति (१।२।४९) स्त्रीप्रत्ययस्यापि लुक् । अञि लुप्ते वृद्ध्यभावाद् वृद्धत्वं नास्तीत्यणेव भवति । न तु च्छः । गर्गरूप्यम् । गर्गमयमिति । पूर्ववद्रूप्यमयटौ । यद्यत्रालुक् स्याद् गार्ग्यरूप्यं गार्ग्यमयमिति स्यात् । गार्गीयमिति । तस्मै हितमिति (५।१।५) प्राक् क्रीताच्छ (५।१।१) इतिच्छः । स च प्राग्दीव्यतीयो न भवति । दीव्यतः परेण विधानात् । गोत्रस्येति । गोत्रप्रत्ययस्य बहुषु लोपिन इति । बहुष्वर्थेषूत्पन्नस्य यस्य लोपो विधीयते स बहुषु

लोपी। बहुवचनान्तस्य प्रवृत्ताविति। प्रवृत्तिरर्थान्तरसंक्रान्तिः। एत-दुक्तम्भवति बहुवचनान्तस्यार्थान्तरसंक्रान्ताविति। सा चार्थान्तरसंक्रान्ति-स्तदन्ताद् यदा यूनि प्रत्यय उत्पद्यते तदा भवतीति वेदितव्यम्। तदा गोत्रान्तस्य यूनि प्रवृत्तेः। द्वेरकयोरिति। यदा गोत्रप्रत्ययान्तादेकस्मिन्नर्थे यूनि द्वयोर्वा यूनोः प्रत्यय उत्पद्यते तदाऽर्थान्तरसंक्रान्तौ सत्यामलुग् भवति। विदस्यापत्यानि बहूनि। अनृष्यानन्तर्ये विदादिभ्योऽञित्यञ् (४।१।१०४)। स च यञञोश्चेति (२।४।६४) बहुषु लुग्विधानाद् बहुषु लोपी भवति। तदन्ताद् युवविवक्षायामेकस्मिन् यूनि द्वयोर्वात इञ् (४।१।९५)। तस्य ण्यक्षत्रियादिसूत्रेण (२।४।५८) लुकि कृते गोत्रप्रत्ययान्तस्य तस्यार्थान्तर-संक्रान्तौ सत्यां गोत्रप्रत्ययस्याञ इहापि बहुषूत्पन्नस्य लुग् न भवति। कथं पुनर्न भवति ? यावताऽलुको विषयाभावात् प्राग्दीव्यतीयोऽजादि-रिञ् प्रत्यय उपनीतः। प्रत्ययलक्षणेन भविष्यतीति चेत् ? नैतदस्ति। अचीति वचनाद्। वर्णाश्रयोऽसौ। वर्णाश्रये नास्ति प्रत्ययलक्षणमिति च परिभाषा (प,२२)। यथा गवे हितं गोहितमिति चतुर्थीसमासे सुब्लुकि कृते प्रत्ययलक्षणेन चतुर्थीविभक्तिमाश्रित्य गोशब्दस्य एचोऽयवायाव (६।१।७८) इत्यवादेशो न भवति। वर्णाश्रयत्वात्। वर्णाश्रयत्वं तु तस्याचि विधानात्। यथा च वर्णाश्रये नास्ति प्रत्ययलक्षणमिति (प,२२) परिभाषा तथा वैदो वैदावितात्राप्यलुका वर्णाश्रयतया न भवितव्यम्। नैतदस्ति। न ह्यलुगत्र वर्णाश्रयः। किं तर्हि ? तद्धिताश्रयः। अचीत्येतत् त्विह सूत्रे विशेषणत्वेनो-पात्तम्। अतएव वृत्तावुक्तम्। अजादौ प्राग्दीव्यतीये प्रत्यय इति। तस्मात् तस्याः परिभाषाया इहोपस्थानेऽसति गोत्रेऽलुगचीति भवतीति। अनेनैवा-त्रालुग् सिद्धः। स च बहुषु युवसु मा भूदिति द्वेरकयोरेवेत्युपसंख्यानम्। तत्र विदा इत्येव भवति। एकवचनद्विवचनान्तस्येत्यादि। एकवचनान्तस्य गोत्र-प्रत्ययस्य द्विवचनान्तस्य च बहुष्वर्थेषु युवसंज्ञकेषु प्रवृत्तौ संक्रान्तौ सत्यां लुग् वक्तव्यः। तत्र वैदस्येत्येकवचनान्तं गोत्रम्। वैदयोरिति द्विवचनान्तम्। अत्र च पूर्ववदञ्। तयोर्युवापत्यबहुत्वविवक्षायामत इञ् ( ४।१।९५ )। तस्य ण्यक्षत्रियादिसूत्रेण (२।४।५८) लुकि कृते ऽञोऽपि गोत्रप्रत्ययस्य लुगिष्यते।

स च न प्राप्नोति । तस्मादुपसंख्यायते । किं पुनः कारणं न प्राप्नोतीत्याह न ह्यत्रेतराादि । यञञोश्चेति । अनेन हि बहुषूत्पन्नयोर्लुग् विधीयते । न चाञ् बहुषूत्पन्नः । किं तर्हि ? एकस्मिन् द्वयोश्च । तस्मान्न प्राप्नोतीति । तदेवं सर्व्वथा बहुषु विदा इत्येवं भवितव्यमिति स्थितम् ।

## ९० । यूनि लुक् ।

यूनीति । व्यत्ययो बहुलमिति (३।१।८५) षष्ठ्यर्थे सप्तमी । अतएव वृत्तावाह युवप्रत्ययस्येति । अजादौ प्रत्यये विवक्षिते बुद्धिस्थ इत्यादिना ऽचीति विषयसप्तमीत्वं दर्शयति । यद्येषा परसप्तमी स्याद् यत्रापि च्छप्रत्ययो नेष्यते तत्रापि स्यात् । युवप्रत्ययान्तस्य वृद्धत्वादित्यभिप्रायः । फाण्टाहृतरूप्यं फाण्टाहृतमयमिति । यद्यत्र लुक् स्यात् फाण्टाहृतरूप्यं फाण्टाहृतमयमिति न स्यात् । भागवित्तिकीयमिति । प्राक्क्रीतीयच्छः पूर्ववत् ।

## ९१ । फक्फिञोरन्यतरस्याम् ।

गार्गीयाः । वात्सीया इति । पूर्ववदकारयकारलोपः । वेति वर्त्तमाने-ऽन्यतरस्यांग्रहणं पूर्वसूत्रे नित्यो विधिरिति ज्ञापनार्थम् ।

## ९२ । तस्यापत्यम् ।

पूर्वैरुत्तरैश्च प्रत्ययैरभिसम्बध्यत इति । तत्र पूर्वैस्तावदणादिभिः सम्बध्यते । असंयुक्तविधानात् । अस्य यदि पूर्वैरभिसम्बन्धो न भवेत् तस्यापत्यमत (४।१।९५) इञित्येकयोगमेव कुर्य्यात् । यतस्त्वत इञित्यनेन (४।१।९५) तस्यापत्यमित्येतदसंयुक्तं करोति ततोऽसंयुक्तविधानात् पूर्वार्थमेतद् विज्ञायत इत्येवं तावत् पूर्वैरभिसम्बध्यते । उत्तरैरप्यभिसम्बध्यते । तेष्वस्य स्वरितत्वात् । तस्येति । पुंलिङ्गेन निर्देशः क्रियत एकवचनेन च । तेन पुंलिङ्गादेवोत्पत्तिः स्यादेकवचनान्ताच्च । स्त्रीलिङ्गान्नपुंसकाच्च न स्यात् । देवदत्ताया अपत्यं कुलस्यापत्यमेवमादौ न स्यात् । द्विवचनबहुवचनान्ताच्च । द्वयोर्मात्रोरपत्यं तिसृणां मातृणा मपत्यमेवमादौ न स्यात् । अथ नपुंसकलिङ्गेनायं निर्देशः स्त्रीलिङ्गात् पुंलिङ्गाच्च न स्यात् । अपत्यमित्येकवचनेऽत्र निर्देशः क्रियते ।

तेनैकस्मिन्नेवापतेत्र स्यात्। न द्वयोर्नापि बहुषु। उपगोरपत्ये औपगवौ। उपगोरपत्यान्यौपगवा इति। एतस्मिन् पूर्वपक्ष इदमाह प्रकृत्यर्थविशिष्ट इत्यादि। गृह्यत इति वक्ष्यमाणेन सम्बन्धः। प्रकृत्यर्थ उपग्वादिशब्दानामर्थ स्तेन विशिष्टः षष्ठ्यर्थो ऽपत्यापत्यवत्सम्बन्धः। ननु च तस्येति तच्छब्दस्य सामान्यवाचिनो ग्रहणम्। तस्य कुत उपग्वादिरर्थविशेषो येन षष्ठ्यर्थो विशिष्यते? तस्येत्यस्य विशेषो पलक्षणत्वाददोषः। विशेषोपलक्षणत्वञ्चास्य प्रागेव प्रतिपादितम्। तस्माद् विशेष एवोपग्वादिः प्रकृत्यर्थः। अपत्यमात्रञ्चेति। मात्रशब्दोऽधिकस्य लिङ्गादेर्व्यवच्छेदाय। लिङ्गवचनादिकमिति। आदिशब्देन कालस्य ग्रहणम्। वर्त्तमानेन हि कालेनायं निर्देशः क्रियते। यथोक्तं यत्रापि साक्षादन्यक्रियापदं न श्रूयते तत्राप्यस्तिर्भवन्तीपरः प्रथमपुरुषोऽप्रयुज्यमानोऽप्यस्तीति गम्यत इति। तत्र वर्त्तमानकालविवक्षायां कालान्तरे न स्यात्। किं पुनः कारणं लिङ्गवचनादि न विवक्ष्यते? तस्याप्राधान्यात्। अवश्यं हि येन केनचिल् लिङ्गादिना निर्देशः कर्त्तव्य इति। नान्तरीयकत्वात्। तस्येहोपादानं यथा धान्यार्थिनः पलालादेरप्रधानस्यापि। तस्येदमित्यादि। तस्येदमित्येतत् (४।३।१२०) सूत्रमपत्यार्थेऽपि वर्त्तते। यो ह्यपगोरपत्यमुपगोरसावयमिति शक्यते व्यपदेष्टुम्। तस्येदमित्यस्य (४।३।१२०) विशेषा ह्येते ऽपत्यं समूहो निवासो विकार इति। ततश्च तस्येद (४।३।१२०) मित्यनेनैवापत्यार्थेऽप्यण् सिद्धः। तत् किमर्थं तस्यापत्यमित्येतत् सूत्रं कृतम्? बाधनार्थं कृतं भवेदिति। तस्येदमित्यनेन (४।३।१२) विधीयमानस्याणो यो बाधको वृद्धाच्छ इति (४।२।११४) छः प्राप्नोति तद्बाधनार्थमिदं कृतम्। एतत्सूत्रविहितेनाणा छप्रत्ययस्य बाधनं यथा स्यात्। कथं पुनश्शैषिकः शैषिकं बाधते? अपत्यादिभ्यश्चतुर्थीपर्य्यन्तेभ्यो ऽन्यो ऽर्थः शैषिकाणां विषयः। अयञ्चापत्याण् छविषये नास्त्येव। तदसत्ययं कथञ्छप्रत्ययं बाधिष्यत इत्यत आह उत्सर्गः शेष एवासाविति। असत्यस्मिन् योग इत्यभिप्रायः। असावित्यनेन प्रकृतत्वात् तस्यापत्यमित्येषोऽर्थः प्रत्यवमृश्यते। उत्सर्गे उत्पन्नेनाप्यणा स एवार्थ उत्सर्गसाहचर्य्यादुच्यते। उत्सर्गसाहचर्य्यन्तु तस्य तत्रोत्सर्गस्याणादेर्विधानात्। इहापि क्रियमाणे तस्यापत्यमित्येतस्मिन्

योगे तस्येद (४।३।१२०) मित्येतस्मिन्ननुप्रवेशाद् यथान्यस्तद्विशेषः शेषो भवति तथापत्यार्थोऽपि । अस्ति तस्याप्युपयुक्तापेक्षमन्यत्वम् । चतुरर्थीपर्य्यन्तेष्वनन्तर्भावात् । ततश्च शेषत्वादपत्यार्थे च्छप्रत्ययः प्राप्नोति । अस्मिंस्तु योगे सत्यपत्यार्थं स्तस्येदमित्यत्र शेषे नानुप्रविशति । उपयुक्तत्वात् । ततश्चाशेषत्वादपत्ये छप्रत्ययस्य प्राप्तिर्नास्त्येव । सैवाप्राप्तिर्बाधनशब्देनोक्ता । अथ बाधनार्थस्यास्य किं प्रयोजन मित्याह वृद्धान्यस्य प्रयोजनमिति । वृद्धानि प्रातिपदिकान्यस्य योगस्य प्रयोजनम् । भानोरपत्यं भानवः श्यामगोरपत्यं श्यामगवद्धत्यत्राण् सिद्धो भवति । असति त्वस्मिन् योगे ऽपत्यार्थः पूर्वोक्तरीत्या शेषः स्यात् । ततश्च तत्र वृद्धेभ्यो वृद्धाच्छः (४।२।११४) प्रसज्येत ।

## ९३ । एको गोत्रे ।

कृत्रिमाकृत्रिमयोः कृत्रिमे कार्य्यसंप्रत्यय इति (प,९) पारिभाषिकस्यैव गोत्रस्य ग्रहणम् । अपत्याधिकारे गोत्रग्रहणाच्च । अपत्यमात्रं हि लौकिकं गोत्रम् । तस्य यदीह ग्रहणमभिमतं स्यादेक इत्येवं ब्रूयात् । लौकिकस्य गोत्रस्यापत्याधिकारादेव लब्धत्वात् । तस्माद् गोत्रग्रहणाच्च पारिभाषिकस्य ग्रहणमित्याह अपत्यं पौत्रप्रभृति गोत्रमिति(४।१।१६२) । भेदेनेत्यादि । भेदेन विभागेन । अपत्यमपत्यं प्रति प्रत्यपत्यम् । यावन्त्यपत्यानि सम्भवन्ति तेभ्योऽपि सर्वेभ्यः प्रत्ययानामुत्पत्तेः प्रसङ्गे प्राप्तौ सत्यामित्यर्थः । सर्वेषामपत्येन योगेन गर्गगार्गिगार्ग्यगार्ग्यायणानामन्यतमस्य यदपत्यं तत्सर्वेषामपत्यं भवतीति परमप्रकृतेरनन्तरगोत्रयुवलक्षणाः प्रत्ययाः प्राप्नुवन्ति । गर्गस्य यदपत्यं तत्सर्वेषां गार्गिगार्ग्यगार्ग्यायणानामपि सम्बन्धि भवति । तथाहि गार्गिगार्ग्यगार्ग्यायणानामन्यतमस्य यदपत्यं तत्सर्वेषां गर्गप्रभृतीनां सम्बन्धि भवति । तथाह्यत्र यद्यपि गर्गस्यापत्यमिति गर्गशब्देन विग्रहः क्रियते तथापि नायं नियमो लभ्यते गर्गशब्दादेवोत्पत्तिरिति । अपि तु कामचारः । ततश्च यदा गर्गशब्दादुत्पत्तिर्भवति तदा गर्गादित्वाद् यञ् । यदा गार्गिशब्दात् तदा यञिञोश्चेति (४।१।१०१) फक् । यदापि गार्ग्यशब्दात् तदापि स एव फक् । यदा गार्ग्यायणशब्दात् तदात इञ् (४।१।९५) । एवं प्रत्यपत्यं विभागेन प्रत्यया-

नामुत्पत्तौ प्रसक्तायामनेन नियमः क्रियत एक एव प्रत्ययो भवतीति । एतेन प्रत्ययनियम इति दर्शयति । प्रत्ययनियम स्त्वेकशब्दस्य प्रत्ययशब्दसामानाधिकरण्याल्लभ्यते । एकशब्दश्चास्मिन्नियमे संख्यावचनो वेदितव्यो यथा एक द्वौ बहव इति । एवकारेण द्व्यादिव्यवच्छेदः क्रियते । एक एव प्रत्ययो भवति । न द्वौ नापि बहव इति । स चैकः प्रत्ययो भवन्नेकग्रहणात् परमप्रकृतेरेव भवतीति सामर्थ्यादुक्तं भवतीति । यदि हि गार्गिशब्दादुत्पद्येत द्वौ स्याताम् । इञ्फकौ । नैकः । अथ गार्ग्यशब्दादेवमपि द्वावेव यञ्फकौ । अथ गार्गायणशब्दात् त्रयः स्यु र्यञ्फगिञः । तस्मान् मूलप्रकृतेरेवोत्पत्तावेकः प्रत्ययः सिध्यतीत्येकग्रहणं कुर्वता सामर्थ्यान् मूलप्रकृतेरेव गोत्रप्रत्ययस्योत्पत्तिरुक्ता भवति । ननु चोत्पादयितैवापत्येन सम्बध्यते । एवं हि लोके दृश्यते पितामहस्योत्सङ्गे दारकमासीनं दृष्ट्वा कश्चित् पृच्छति कस्यायमिति ? स आह देवदत्तस्येति । तेनोत्पादयितारं व्यपदिशति । नात्मानम् । ततः सर्वेषामपत्येन योगाभावात् प्रत्यपत्यं भेदेन प्रत्ययोत्पत्तिप्रसङ्गो नास्त्येवेति निवर्त्याभावादिदं नियमार्थं नारब्धव्यमित्यत आह सर्वेऽपत्येन युज्यन्त इति ? अत्रैवोपपत्तिमाह अपतनादपत्यमिति । यन्निमित्तं हि यस्य पापेष्वपतनं तदपतनात् तस्यापत्यं भवति । तस्माद् यो व्यवहितेन जनितः सोऽपि परमप्रकृतिवाच्यस्यार्थस्यापत्यं भवति । तस्यापि तेनापतनात् । परमप्रकृतिग्रहणञ्चोपलक्षणं वेदितव्यम् । इतरप्रकृतिवाच्यस्यापि ह्यर्थस्य व्यवहितजनितोऽपत्यं भवत्येव । यत्पुनरुक्तं कस्यायमित्युक्ते उत्पादयितारं व्यपदिशति नात्मानमिति न तेनोत्पादयितुरेवापत्येन योगः शक्यते प्रतिपादयितुम् । यस्मान्न तत्र यस्य तेनापतनं स जिज्ञासितः स्यात् । किं तर्हि ? य उत्पादयिता स एव । अत उत्पादयितारं व्यपदिशति । नात्मानम् । यदि यस्य तु तेनापतनं स जिज्ञासितः स्यात् तदाऽऽत्मानमपि व्यपदिशेदेव । यदि च सर्वेऽपत्येन न युज्येरन्नपत्यं पौत्रप्रभृति गोत्रमिति ( ४।१।१६२ ) योऽयमपत्यपौत्रप्रभृतिशब्दयोः सामानाधिकरण्येन निर्देशः स नोपपद्यते । यदपेक्षया पौत्रादिव्यपदेशमासादयन्ति पुमांसस्तं प्रति तेषामनपत्यत्वात् । तस्मादतोऽपि निर्देशात् सर्वेऽपत्येन युज्यन्त

इति विज्ञायते । तत्पुत्रोऽपि गार्ग्य इति । अपिशब्दात् तत्पौत्रादिरपि । किं पुनः कारणं तत्पुत्रोऽपि गार्ग्य इतत्राह सर्व्वस्मिन्नितत्रादि । यदपि गार्ग्यायण इतत्रैकेन व्यवहितेन जनितं गोत्रापतंत्र यस्मात् तत्रापि गर्ग-शब्दाद् यञेव भवति तस्मात् तत्पुत्रोऽपि गार्ग्यो भवति । गर्ग-शब्दादित्यनेन परमप्रकृतेर्भवतीति दर्शयति । एतच्चैकग्रहणाल्लभ्यत इत्युत्रतम् । अथवेत्यादिना प्रकृतिनियमं दर्शयति । प्रकृतिनियमस्त्वेकशब्दस्य प्रकृति-सामानाधिकरण्याल्लभ्यते । एकशब्दोऽत्र प्राथम्यनियमे वर्त्तत इति वेदितव्यं यथा वर्गाणां प्रथमद्वितीयाः संवृतकण्ठाःश्वासानुप्रदाना अघोषा एके ऽल्पप्राणा इतरे सर्वे महाप्राणा इति । अत्र हि प्रथमेऽल्पप्राणा इति गम्यते । एकशब्द-स्येदं विवरणं प्रथमा प्रकृतिरिति । का च प्रथमा ? या परमप्रकृतिरप्रतत्र-यान्ता गर्गनड इतेत्रवमादिका । प्रकृतिर्नियम्यत इति । प्रथमैव प्रकृतिः प्रतत्रयमुत्पादयति । नाप्रथमा गार्गिगार्गत्रगागत्रयिणप्रभृतिशब्दाः प्रतत्रयान्ताः । गर्गस्यापतंत्र गार्ग्यः । तत्पुत्रोऽपि गार्ग्यः । नड़स्यापतंत्र नाड़ायनः । तत्-पुत्रोऽपि नाड़ायनः । सर्वत्र व्यवहितजनितेऽपि गोत्रापतंत्र प्रथमा प्रकृतिः प्रतत्रयमुत्पादयति ।

## ९४ । गोत्राद् यून्यस्त्रियाम् ।

अयमपि नियम इति । न केवलं पूर्व इत्यपिशब्देन दर्शयति । सर्वेषां ह्यपत्येन योगे परमप्रकृत्यनन्तरयुवभ्योऽपि युवापत्यविवक्षायां प्रत्ययः प्राप्नोति । अतस्तन्निवृत्त्यर्थं नियमः क्रियते । गोत्रादेवेति । गोत्रप्रत्ययान्तादेवेत्यर्थः । अनेन नियमस्वरूपं दर्शयति । न परमेत्यादिना नियमस्य व्यवच्छेद्यम् । गार्ग्यायणो दाक्षायण इति । गोत्रे यौ यञिञौ विहितौ तदन्ताद् यञिञो-श्चेति (४।१।१०१) फक् । औपगविः । नाड़ायनिरिति । गोत्रे यावण्फकौ विहितौ तदन्तादत इञ् (४।१।९८) । दाक्षीति । दक्षस्यापत्यं चतुर्थं स्त्री । अत इञ् ( ४।१।९५ ) । इतो मनुष्यजातेरिति (४।१।६५) ङीष् । किं पुनरत्र प्रतिषिध्यत इति । सर्व्वस्मिन् प्रतिषिध्यमाने दोषं मन्यते । तमेव दोषमाविष्कर्त्तुमाह यदीत्यादि । स्त्रियामनियमः प्राप्नोति । परम-

प्रकृत्यनन्तरयुवभ्योऽपि स्त्रियां युवप्रत्ययः प्राप्नोतीत्यर्थः। गोत्रसंज्ञाया युवसंज्ञया बाधितत्वादिति। जीवति तु वंश्ये युवेत्यत्र ( ४।१।१६३ ) तुशब्दोऽवधारणार्थः कृतः। तेन युवसंज्ञैव भवति। न गोत्रसंज्ञा। ततश्च गोत्रसंज्ञाया अभावात् स्त्रियां गोत्रप्रत्ययो न सम्भवत्येव। तेन तस्या अभिधानं न प्राप्नोति। तस्मादित्यादि। यत एव च नियम-युवप्रत्यययोरुभयोरपि प्रतिषेधे दोषस्तस्मात् तन्निरासाय योगविभागः कर्त्तव्यः। तत्र गोत्राद् यूनीत्येको योगः। अनेन च नियमः क्रियते यदाह गोत्राद् यूनि प्रत्ययो भवतीति। ततोऽस्त्रियामिति द्वितीयो योगः। तेन च यूनीत्यत्र यदुक्तं कार्य्यं तस्य प्रतिषेधः क्रियते यदाह यूनि यदुक्तं स्त्रियां तन्न भवतीति। युवसंज्ञैव प्रतिषिध्यत इति। कथमस्त्रियामित्यत्र हि योगे यूनीत्येतदनुवर्त्तते। तेनैवं विज्ञायते यूनि यदुक्तं कार्य्यं स्त्रियां तन्न भवतीति। युवसंज्ञा च यून्येव कार्य्यमुक्तेत्यतः सैव प्रतिषिध्यते। युव-संज्ञैवेति। एवकारेण नियमयुवप्रत्यययोर्व्यवच्छेदः क्रियते। तेन स्त्री गोत्र-प्रत्ययेनाभिधास्यत इति। तस्यां युवसंज्ञायां प्रतिषिद्धायां गोत्रसंज्ञाया अविचलत्वात्।

## ९५। अत इञ्।

अत इत्यनेन प्रकृतं प्रातिपदिकं विशिष्यते। विशेषणेन च तदन्तविधि-र्भवतीत्यत आह अकारान्तात् प्रातिपदिकादिति। अथात इति अत सातत्यगमन इत्यस्य क्विबन्तस्य ग्रहणं कस्मान्न विज्ञायते? शिवादिभ्योऽणिति (४।१।११२) वचनात्। तदीञो बाधनार्थं क्रियते। यदि चेह स्वरूपग्रहणं स्यात् शिवादिभ्यः प्रसङ्ग एव नास्तीति तेभ्यस्तद्बाधनार्थमण्विधानमनर्थकं स्यात्। क्रौड्यादीनाञ्चेञन्तानां पाठात्। तस्मादकारान्तस्यैवेदं ग्रहणम्। यद्येव मस्यापत्यमिरित्यत्र न प्राप्नोति। अनकारान्तत्वात्। एतदपि व्यपदेशि-वद्भावेनाकारान्तं भवतीत्यदोषः। शुभंयाः कीलालपा इति। यातेः पिबते-श्चातो मनिन्क्वनिब्वनिपश्चेत्यत्र हि (३।२।१२) विजुपेच्छन्दसीत्यत (३।२।७३) श्चकारेण विजप्यनुकृष्यते। कथमित्यादि। दशरथशब्दादप्यकारान्तत्वादिञा

भवितव्यम् । ततो दाशरथाय इत्यसुन्तस्य प्रयोगो नोपपद्यत इति भावः । शेषविवक्षायामित्यादि । एतेन दशरथस्यायमित्यर्थविवक्षायामताण् विहितः । ननु तस्यापत्यमितत्र्यर्थविवक्षायामिति दर्शयति । यदा तु दशरथस्यापत्य-मिति विवक्ष्यते तदेञ् भवत्येव दाशरथिरिति ।

## ९६ । बाह्वादिभ्यश्च ।

बाहविरिति । ओर्गुणः (६।४।१४६) । क्वचिदिति । अजीगर्त्तादिष्वका-रान्तेषु । बाहुप्रभृतीनां वटाकुपर्यन्तानामनकारान्तत्वात् प्राप्त्यर्थः पाठः । चूडाशब्दस्य च द्व्यच इति (४।१।१२१) ढकि प्राप्ते । ब्रकलादीनां प्राक पुष्करसच्छब्दादहुवाभ्यो नदीमानुषीभ्य (४।१।११३) इत्यणि प्राप्ते । पुष्कर-सदित्येवमादीनां लोमशब्दपर्यन्तानां प्राप्त्यर्थोऽनकारान्तत्वात् । अमितौजसः सलोपश्चेति । अमितौजस्शब्दादिञ् भवति सलोपश्च । आमितौजिः । उदञ्चिति पठ्यते । तत्राञ्चते र्धातोश्चकारो वेदितव्यः । नायं पुनरकारान्तः । किं तर्हि ? क्विन्नन्तः । प्रत्ययवेलायां निपातनादनुनासिकलोपो न भवति । उदीचोऽपत्यमौदञ्चिः । शिरःशब्दस्तदन्तविधिं प्रयोजयति । केवलस्य नपुंसकस्यापत्येन सम्बन्धाभावात् । हस्तिशिरसोऽपत्यं हास्तिशीर्षिः । ये च तद्धित इत्यत्र (६।१।६१) चकारस्यानुक्तसमुच्चयार्थत्वाच् शीर्षभावः । लोम-शब्दोऽपि पूर्ववत् तदन्तविधिं प्रयोजयति । उडुलोम्नोऽपत्य मौडुलोमिः । ऊर्द्धलोम्नोऽपत्यमौर्द्धलोमिः । अजीगर्त्तादीनां प्रागुदक्शब्दादृष्यन्धकवृष्णी-त्यादिनाणि (४।१।११४) बाधके प्राप्ते । उदङ्कः संज्ञायामिति । उदङ्को नाम कश्चित् । तस्यापत्यमौदङ्किः । सम्भूयोऽम्भसोः सलोपश्च । सम्भूयसम्भ-सित्येतयोरिञ् भवति । सकारलोपश्च । साम्भूयिः । आम्भिः । बाह्वादि-प्रभृतिष्विति । प्रभृतिशब्देनेत ऊर्द्धं ये वक्ष्यन्ते ते परिगृह्यन्ते । येषां दर्शनं गोत्रभावे लौकिक इति । दर्शनं प्रसिद्धिः । लौकिके गोत्रे भावः संज्ञा-कारित्वम् । येषां लौकिकगोत्रभावे प्रसिद्धि स्तेषां बाह्वादिषु परिग्रहो द्रष्टव्यः । ततोऽन्यत्र तेषां प्रतिषेध इति । येषां लौकिके गोत्रभावे न दर्शनमपितु ततोऽन्यत्र दर्शनं तेषां प्रतिषेधो वेदितव्यः । तेन बाहु-

र्नाम कश्चिदादिपुरुषो यः संज्ञाकारित्वेन प्रसिद्धो यदपत्यसंतानान्तःपातिनः पुमांसो बाहुव्यपदेशमासादयन्ति तत एवेञ् भवति। यस्त्विदानीन्तनो बाहुर्नाम कश्चित् ततोऽणेव भवति बाहव इति। एतच्च वेत्यनुवृत्ते र्व्यवस्थितविभाषाविज्ञानाच्च लभ्यते। सम्बन्धिशब्दानाञ्च श्वशुरादीनाञ्च यत् कार्य्यमुच्यते तस्य तस्मादृश्यात् प्रतिषेधो भवति। अत्रापि पूर्वोक्त एव हेतुर्वेदितव्यः। तेन राजश्वशुराद् यदिति ( ४।१।१३७ ) श्वशुरशब्दाद् यत्प्रत्ययः सम्बन्धिशब्दादेव भवति। न संज्ञाशब्दात्। तेन श्वशुरो नाम कश्चित्। तस्यापत्यं श्वाशुरिरितीञेव भवति। संज्ञाश्वशुरस्येति। संज्ञया यः श्वशुरो न सम्बन्धेन स संज्ञाश्वशुरः।

## ९७। सुधातुरकङ् च।

व्यासवरुडेत्यादि। व्यासादीनामिञ् तत्सन्नियोगेन चाकङादेशो भवतीत्येतदर्थरूपं व्याख्येयमित्यर्थः। तत्रेदं व्याख्यानम्। पूर्वसूत्रादिह चकारोऽनुवर्त्तते। स चानुक्तसमुच्चयार्थः। तेन व्यासादीनामपि भविष्यति वैयासकिरिति। न य्वाभ्यामित्यादिनैज् (७।३।३) वृद्धिप्रतिषेधो। अथ बाह्वादिष्वेव सुधातृशब्दमधीत्य तत्र चाकङादेशः कस्मान्न कृतः यथाऽमितौजसः सलोपश्चेति ? गणे पठ्यते सूत्रे वा। न तत्र कश्चिल् लाघवाभावाद् विशेषो लभ्यत इति यत्किञ्चिदेतत्।

## ९८। गोत्रे कुञ्जादिभ्यश्च्फञ्।

इञोऽपवाद इति। अकारान्तत्वात् कुञ्जादीनाम्। चकारो विशेषणार्थ इति। यद्यत्र चकारो न क्रियेत ततो व्रातच्फञोरस्त्रियामित्यत्रापि (५।३।११३) नैव क्रियते च्फञ्प्रत्ययस्याभावात्। ततश्च व्रातफञोरस्त्रियामित्युच्यमाने ऽश्वादिभ्यः फञित्यस्यापि (४।१।११०) ग्रहणं स्यात्। कौञ्जायन्यः। कौञ्जायन्याविति। पूगाञ्ञ्योऽग्रामणीपूर्वादित्यतो ञ्य (५।३।११२) इत्यनुवर्त्तमाने व्रातच्फञोरस्त्रियामिति (५।३।११३) स्वार्थे ञ्यः। कौञ्जायना इति। ञ्यादयस्तद्राजा इति ( ५।३।११९ ) तद्राजसंज्ञकत्वात् तद्राजस्य बहुष्वित्यादिना ( २।४।६२ ) लुक्। किं पुनरत्र ञित्स्वरेण भवितव्यम् ?

उत चित्स्वरेणेत्यत आह एकवचनद्विवचनयोरित्यादि । एकवचनद्विवचनयोस्तावत् सति तस्मिन् चित्स्वरे पश्चान् ञ्ये विहिते समुपजायमानो ञित्स्वरः सतिशिष्टो भवतीति तेनैव भवितव्यम् । बहुवचने तु ञ्ये निवृत्ते चकारञकारयोर्विशेषणे वृद्धौ च यथायोगं चरितार्थयोः परत्वाद् ञ्नित्यादिर्नित्यमिति (६।१।१६७) ञित्स्वरे प्राप्ते तं तयक्त्वा चित्स्वर एवेष्यते । कथं पुनरिष्यमाणोऽपि स लभ्यते । चित्करणसामर्थ्यादिति चेत् ? न । ञित् करणसामर्थ्यान् ञित्स्वरोऽपि लभ्यते । एवं तर्हि स्वरविधौ योगविभागः करिष्यते । इदमस्ति । चित इति (६।१।१६३) । ततस्तद्धितस्येति (६।१।१६४) तत्र चित इतीयवानुवर्त्तते । किमर्थमिदम् ? परत्वान् ञ्नित्यादिर्नित्यमित्याद्युदात्तत्वं ( ६।१।१६७ ) प्राप्नोति । तद्बाधनार्थम् । ततः कित इति (६।१।१६५) । कितश्च तद्धितस्यान्त उदात्तो भवति ।

## ९९ । नड़ादिभ्यः फक् ।

नड़ादिषु शलङ्कु शलङ्कञ्चेति पठ्यते । तस्यायमर्थः । शलङ्कुशब्दः प्रत्ययमुत्पादयति शलङ्कभावञ्चापद्यते । तेन शालङ्कायन इति भवति । पैलादिष्विति पैलादिषु शालङ्किशब्द इञन्तः पठ्यते । तत उत्पन्नस्य युवप्रत्ययस्य लुग् यथा स्यात् । शालङ्किः पिता शालङ्किः पुत्त्र इति । तत्र हि ण्यक्षत्रियार्षञित इत्यादेः सूत्राद् (२।४।५८) यूनि लुगिति (४।१।९०) चानुवर्त्तते । तस्य शालङ्किशब्दस्य तत्र पाठो न युज्यते । नड़ादिषु पाठात् फका भवितव्यमिति कृत्वा । तत् कथमिञन्तस्तत्र पठ्यत इति चोद्यम् । तस्य परिहारमाह गोत्रविशेष इत्यादि । कौशिकं यद् गोत्रं तत्रैव शलङ्कुशब्दादाचार्य्याः फकं स्मरन्ति । ततोऽन्यत्र त्विञेव भवतीत्यदोषः । स त्विञ् बाह्वादेराकृतिगणत्वाल्लभ्यते । अभ्युपेत्यापि गोत्रमात्रे फको विधानम् । परिहारान्तरमाह अथवेत्यादि । इञो भाव उपलक्षणम् । शलङ्कभावस्यापि हि पैलादिपाठ एव ज्ञापकम् । पूर्वत्रापि परिहारे तस्य स एव ज्ञापकं वेदितव्यम् । अग्निशर्मन् वृषगण इति । अग्निशर्मञ्शब्दाद् वृषगणे गोत्रे फक् भवति आग्निशर्मायणः । अन्यत्राणेव ।

ग्निशर्म्मः । अमुष्येति पठ्यते । तत्र निपातनाद् विभक्तेरलुक् । आमुष्यायण इति । कृशारणौ ब्राह्मणवाशिष्ठयोरिति । कृशारणशब्दौ यथाक्रमं ब्राह्मणे वाशिष्ठे चाभिधेये फकमुत्पादयतः । कार्षायनो ब्राह्मणः । राणायनो वाशिष्ठः । वशिष्ठगोत्र इत्यर्थः । अन्यत्रेञेव भवति कार्षिः । राणिरिति । क्रोष्टु क्रोष्टञ्चेति पठ्यते । क्रोष्टुशब्दः फकमुत्पादयति । क्रोष्टञ्चापद्यते । क्रौष्टायनः ।

## १०० । हरितादिभ्योऽञः ।

नचेत्यादि चोद्यम् । सत्यमित्यादि परिहार उच्यते । गोत्रे योऽञ् विहितस्तदन्तेभ्यो हरितादिभ्यः फक् । न च गोत्रप्रत्ययादपरो गोत्रप्रत्ययः सम्भवति । तत्र सामर्थ्याद् गोत्राधिकारेऽपि यूनि प्रत्ययो विज्ञायते । यद्येवं गोत्राधिकारः किमर्थ इत्याह गोत्राधिकार उत्तरार्थ इति ।

## १०१ । यञिञोश्च ।

अथ द्वीपादनुसमुद्रं यञिति ( ४।३।१० ) यो यञ् विहितो यश्च बुञ्छणित्यादिना ( ४।२।८० ) सूत्रेण सुतङ्गमादिभ्य इञिति तदन्तात् कस्मान्न भवति ? न ह्यत्र कश्चिद् विशेष उपात्त इत्यत आह द्वीपादनु समुद्रं यञित्यादि । गोत्रग्रहणेन ह्यत्र यञिञौ विशेष्येते गोत्रे यौ यञिञाविति । न च द्वीपादित्यादिना (४।३।१०) गोत्रे यञ् विहितः । किं तर्हि ? जातादावर्थविशेषे । नापि सुतङ्गमादिभ्यो गोत्रे इञ् विहितः । किं तर्हि ? तदस्मिन्नस्तीति देश इत्येवमादिषु चतुर्ष्वर्थेषु (४।१।६७-७०) । तेन तदन्तान्न भवति । यदि तर्हि गोत्रग्रहणेनेह यञिञौ विशेष्येते न प्रत्ययार्थ एवं सति क्वायं प्रत्ययो भवतीति न विज्ञायत इत्यत आह तदन्तादित्यादि । कस्मात् तदित्याह गोत्राद् यूनीति वचनादिति ।

## १०२ । शरद्वच्छुनकदर्भाद् भृगुवत्साग्रायणेषु ।

गोत्र इत्येतदिति । यदि तर्हि गोत्र इति वर्त्तते भृगुवत्साभ्यां मूलप्रकृतिभ्यां प्रत्ययार्थस्य विशेषणं नोपपद्यते । गोत्रप्रत्ययान्ताभ्यामेव हि

ताभ्यां गोत्रापत्यं प्रत्ययार्थः शक्यो विशेषयितुम् । अतएव युक्तं स्यादत्तं भार्गववात्स्यायनाग्रायणेष्विति । नैष दोषः । गोत्राधिकारसामर्थ्याद्धि गोत्रापत्य एव वर्त्तमानाविह गृह्येते कार्य्ये कारणोपचारं कृत्वा । तामेव गोत्रापत्ये तयोर्वृत्तिं दर्शयितुं वृत्तावितुक्तं शारद्वतायनो भवति भार्गवश्चेद् । शौनकायनो भवति वात्स्यश्चेदिति ।

## १०३ । द्रोणपर्वतजीवन्तादन्यतरस्याम् ।

कथमित्यादि । यदि गोत्रापत्ये द्रोणादिभ्यः फग् भवति तत् कथं द्रौणायनो द्रोणतः प्रतीत्येवमादिषु प्रयोगेष्वनन्तरोऽश्वत्थामा द्रौणायन इत्युच्यते ? नैवात्रेति । नात्रेदानीन्तनो द्रोणस्तदनन्तरापत्ये फका द्रौणायन इति । किं तर्हि ? अनादिरिति । श्रुतिसम्भवदर्शनार्थमिदमुक्तम् । येन हेतुनाश्वत्थामा द्रौणायन इत्युच्यते तमिदानीन्तनेनेत्यादिना दर्शयति । इदानीन्तनाद् त्वित्यादि । अनादिद्रोणव्यवच्छेदपरमेतद् वेदितव्यम् । नहि तावद् भारतद्रोण इदानीन्तनो भवति । चिरातीतत्वात् । चिरातीतोऽप्यर्थो बुद्धौ परिभाव्यमानो वर्त्तमानतां प्रतिपद्यते यथाऽद्य कंसो हन्यताम् । इदानीन्तनाद् द्रोणादप्यश्वत्थाम्नि द्रौणायन इत्येवं गोत्रप्रत्ययेन यदभिधानं तदध्यारोपेण भवति । अविद्यमानस्यैव तत्रासञ्जनमध्यारोपः । कस्याध्यारोपः ? गोत्रस्य । श्रुतिसामान्यादिति । अध्यारोपे हेतुः । अनादेर्द्रोणस्याश्वत्थाम्नः पितुश्च द्रोण इति समाना श्रुतिः । अतः श्रुतिसामान्यादनादिद्रोणापत्यस्य यो धर्मो गोत्रत्वं तद्भावं भारतद्रोणापत्येऽश्वत्थाम्न्यपि श्रुतिसामान्याच्चलितबुद्धयः प्रतिपत्तार अध्यारोपयन्ति । तेनाध्यारोपेण द्रौणायन इति तत्राभिधानं प्रवर्त्तते ।

## १०४ । अनृष्यानन्तर्य्ये बिदादिभ्योऽञ् ।

ये पुनरत्रानृषिशब्दा इत्यादि । ननु च सूत्र आनन्तर्य्यशब्दो भावप्रत्ययान्त उपात्तः । तत्रैवं विवरितव्यम् । ये पुनरत्रानृषिशब्दाः पुत्रादयस्तेभ्योऽपत्यानन्तर्य्ये एव भवति । नैतदस्ति । नह्ययं भावे ष्यञ् विहितः । किं तर्हि ? स्वार्थे एव । चातुर्वर्ण्यवत् । अन्यथापत्यस्य धर्मे आनन्तर्य्ये

प्रत्यय: स्यात् । नापत्ये । तत्रेष्यते च । कथं पुनर्गोत्राधिकारे सत्यृषिभ्यो ऽनन्तरापत्य एव प्रत्ययो लभ्यते ? अत्र गोत्रग्रहणं निवर्त्तते । ऋषिशब्देभ्यो-ऽनन्तरापत्य एव स्यादित्यत आह अनृष्यानन्तर्य्ये इत्यस्यायमित्यादि । यद्ययमर्थ इत्यादि । अस्मिन् ह्यर्थे सत्यनृष्यानन्तर्य्ये इत्येतद् विध्यर्थम् भवति । अनृषेरनन्तरापत्ये प्रत्ययविधानात् । ततश्च ऋष्यपत्य आनन्तर्य्यप्रतिषेधो न कृत: स्यादित्याह ऋषिशब्दोऽत्र ऋषिजातावृषित्वे वर्त्तते । अपत्येषु नैरन्तर्य्यमिति । सप्तमीति (२।१।४०) योगविभागात् समास: । पश्चादृषेरपत्य-नैरन्तर्य्यमिति षष्ठीसमास: । तदायमर्थो भवति ऋषित्वस्यापत्येषु नैरन्तर्य्य-विषयेऽञ: प्रतिषेधो न कृत: स्यात् । अथवा ऋषयश्च ते ऽपत्यानि च ऋष्य-पत्यानि । तेषां नैरन्तर्य्यं तद्विषये प्रतिषेधोऽञ: प्रत्ययस्य न कृत:स्यादि-त्यर्थ: । तत्र को दोष इत्याह तत्रेदमित्यादि । सप्त काश्यपा ऋषयो ऽपत्यापत्यवत्सम्बन्धेन परस्परं सम्बद्धा येषाम् मित्रह्नर्नाम (Y) काश्यप: सप्तम: । तेषा मृषित्वस्यापत्येषु नैरन्तर्य्यम् । तत्र ऋष्यपत्यानां वा नैरन्तर्य्ये विषये ऽञ: प्रतिषेध इष्यते काश्यपानामित्येतद्रूपं यथा स्यात् । अञि सति तस्य बहुषु लोपात् कश्यपानामिति प्राप्नोति । स च प्रतिषेधोऽस्मिन्नर्थे सति न प्राप्नोति । ततश्च काश्यपानामिति न सिध्यति । तस्मादनृष्यानन्तर्य्ये इत्यस्य ऋष्यपत्यनैरन्तर्य्येण न भवतीत्येषोऽर्थो विज्ञायत इत्यभिप्राय: । अनन्तरापत्य-रूपेणैवेति । नचात्र गोत्रापत्यं विवक्षितम् । किं तर्हि ? अनन्तरापत्यम् । अतोऽनन्तरापत्यरूपेणैव ऋष्यणा ऋष्यन्धकादि ( ४।१।११४ ) सूत्रविहितेन काश्यपानामित्यभिधानं भविष्यति । एतदेव द्रढयितुमाह अवश्यञ्चेत्यादि । ऋष्यपत्यं नैरन्तर्य्यं विषयो यस्य प्रतिषेधस्य स तथोक्त: । ऋषित्वस्यापत्येषु ऋष्यपत्यानां वा यन्नैरन्तर्य्यं तद्विषये प्रतिषेधे विज्ञायमान इत्यर्थ: । कौशिको विश्वामित्र इति दुष्यतीति । किं कारणम् ? विश्वामित्रस्तपस्तेपे नानृषि: स्यामिति । तत्रभवानृषि:सम्पन्न: । स पुनस्तपस्तेपे नानृषे: पुत्र:स्या-मिति । तत्रभवान् गाधिरपि ऋषि: सम्पन्न: । स पुनस्तपस्तेपे नानृषे:

(Y) In the printed काशिका, the reading is इन्द्रभूर्नाम काश्यप: सप्तमस्तेषाम् &c. So it is also in the Bengal MS. पदमञ्जरी has इन्द्रहू: ।

पौत्रःस्यामिति । तत्रभवान् कुशिकोऽपि ऋषिः सम्पन्नः । तदेतद्भवति ऋषित्वस्यापत्येषु नैरन्तर्य्यम् । ऋष्यपत्यानां वानन्तर्य्यम् । ततश्च ऋष्यपत्य-नैरन्तर्य्ये न भवतीत्येवं विज्ञायमाने कौशिको विश्वामित्र इति न सिध्यति । परस्त्री परशुश्चेति । परस्त्रीशब्दः प्रत्ययमुत्पादयति परशुभावञ्चापद्यते । परस्त्रिया अपत्यं पारशवः ।

## १०५ । गर्गादिभ्यो यञ् ।

कथं मानवी प्रजेति । गर्गादिषु पाठाद् यञा भवितव्यम् । ततश्च मानवीति न सिध्यतीति । लोहितादिलक्षणे हि यञन्तात् तु ष्फे विहिते मानव्यायनीति भवितव्यमित्यभिप्रायः । गोत्रमित्युच्यते । गोत्रे हि यञ् प्रत्यय उच्यते । नापत्यसामान्ये । तेन तत्रौत्सर्गिकोऽण् मानवीति भविष्यति । कथ-मित्यादि । यदि गोत्रमित्युच्यते ततो यथा गर्गशब्दादनन्तरापत्ये यञ् न भवति तथाच जमदग्निपराशरशब्दाभ्यामपि न भवितव्यम् । तत्-कथमनन्तरो रामो जामदग्न्यो व्यासः पाराशर्य्य इत्यत्र यञ् भवति ? गोत्ररूपाध्यारोपेण भविष्यतीति । यदानन्तरापत्ययोरपि गोत्ररूपयो रामव्यासयो र्विवक्षितत्वाद् गोत्ररूपाध्यारोपः क्रियते तदा यञ् भवतीत्य-दोषः । असतो न युक्ता विवक्षेत्येतच्च न सम्भावनीयम् । दृश्यते ह्यसतोऽपि विवक्षा यथा विन्ध्यो वर्द्धितकः (Z) समुद्रः कुण्डिकेति । यदा तर्ह्यनन्त-रापत्यविवक्षा भवति तदा केन भवितव्यमित्याह अनन्तरापत्यविवक्षायां त्वित्यादि । वाजाऽसे इति । वाजशब्दो यञ मुत्पादयति । असे ऽसमास इत्यर्थः । वाज्यः । असमास इति किम् ? सौवाजिः ।

## १०६ । मधुबभ्र्वोर्ब्राह्मणकौशिकयोः ।

यदि तर्हि बभ्रुशब्दस्य गर्गादिपाठादेव सिद्धे कौशिके नियमार्थमिह ग्रहणमेवं सति नार्थो गर्गादिषु पाठेन । कौशिके विध्यर्थमेव ग्रहणमस्तु । नास्येत्यत आह गर्गादिषु पाठोऽपीत्यादि । गर्गादिषु पाठोऽपि कर्त्तव्यः । सर्वत्र लोहितत्यादिनान्तर्गणकार्य्यं (४।१।१८) ष्फो यथा स्यात् । अथ गण एव

---

(Z) विन्ध्यो वल्मीक इति नङ्गीयपुस्तके पाठः । भाष्ये पदमञ्जर्य्याञ्च वर्द्धितक इत्येव ।

कौशिकग्रहणं कस्मान्न कृतम्? कः पुनरेवं सति गुणो भवति। सूत्रे पुनर्बभ्रु-ग्रहणं न कर्त्तव्यं भवति। सत्यमेतत्। अपाणिनीयत्वाद् गणस्य। नैवं चाकारणे पाणिनिरुपालम्भमर्हति। गणकारेणापि हि न कृतं वैचित्र्यार्थम्। विचित्रा हि गणस्य कृतिर्गणकारेण।

१०७। कपिबोधादाङ्गिरसे।

कापेय इति। इतश्चानिञ इति ( ४।१।१२२ ) ढक्। यदि कपिशब्दो गर्गादिषु पठ्यते नियमार्थं त्विह तस्य ग्रहणम्। एवं सत्याङ्गिरसे विध्यर्थ मेवास्य ग्रहण मेवास्तु। नार्थो गर्गादिषु पाठेनेत्यत आह लोहितादिकार्य्यार्थ-श्चेतत्रादि।

१०८। वतण्डाच्च।

किमर्थमिदम्? अनर्थकमिदमित्यर्थः। किं कारण मित्याह यावते-त्यादि। शिवादिष्वपीत्यादिना प्रयोजनं दर्शयति। यदीदं नोच्येत ततो गर्गादिपाठादाङ्गिरसे यथा यञ् भवति तथा शिवादिषु पाठादणपि स्यात्। तस्मादाङ्गिरसे यञा शिवाद्यणो बाधनं यथा स्यादित्येवमर्थं पुनर्वचनम्। अथ गर्गादिपाठादेव सिद्ध आङ्गिरसे नियमार्थमेतदिति कस्मान्नोक्तम्? अशक्यमेवं वक्तुम्। प्रयोजनाभावे हि नियमार्थं भवति। इह चास्ति प्रयो-जनम्। तच्च दर्शितमेव।

१०९। लुक् स्त्रियाम्।

वातण्ड्यायनीति। लोहितादिलक्षणः ष्फः।

११०। अश्वादिभ्यः फञ्।

ये त्वित्यादि। एको गोत्र इति (४।१।९३) वचनाद् गोत्रप्रत्ययान्तादपरो गोत्रप्रत्ययो नोपपद्यते। तत्र सामर्थ्याद् गोत्राधिकारेऽपि ये गोत्र-प्रत्ययान्ताः पठ्यन्ते तेभ्यो गोत्राद् यून्यस्त्रियामिति. ( ४।१।९४ ) यूनि

प्रत्ययो विज्ञायते । शप आत्रेय (A A) इति । शपशब्दाद् फञात्रेयश्चेद् भवति शापायन आत्रेयः । अन्यत्र शापिः । वैल्वशब्दो गोत्रप्रत्ययान्तः । तस्माद् यूनि भवति । विल्विर्नाम राजर्षिः । तस्यापत्यं गोत्रं वृद्धेत्कोसलाजादाञ्ञ्यङ् ( ४।१।१७१ ) वैल्वः । तस्यापत्यं वैल्वायनो युवा । आनडुह्य-शब्दोऽपि गोत्रप्रत्ययान्तो गर्गादिषु । यञन्तत्वात् । तस्मादपि यून्येव फञ् । आनडुह्यायनो युवा । पुंसि जात इति । जातात् पुंसि वर्त्तमानात् फञ् भवति । जातस्यापत्यं जातायनः । पुंसीति किम् ? स्त्रियां ढगेव भवति । जाताया अपत्यं जातेयः । आत्रेय भारद्वाज इति । आत्रेयशब्दात् फञ् भारद्वाजश्चेदपत्यार्थो भवति । आत्रेयायणो भारद्वाजः । अन्यत्र आत्रेयिः । भारद्वाज आत्रेय इति । भारद्वाजशब्दात् फञ् आत्रेयेऽपत्यविशेषे । भारद्वाजायन आत्रेयः । अन्यत्र ऋष्यण् ।

### १११ । भर्गात् त्रैगर्त्ते ।

### ११२ । शिवादिभ्योऽण् ।

यथायथमिति । यथास्वम् । यस्य य इञादिरात्मीयप्रत्ययस्तदपवादोऽण् विधीयते । अथाण्ग्रहणं किमर्थम् ? न शिवादिभ्य इत्येवोच्येत । शिवादिभ्य इत्येतावत्युच्यमाने यथाविहितमिञादिरेव प्रत्ययो मा भूद् । अणेव यथा-स्यादित्येवमर्थमिति चेत् ? नैतदस्ति । यथाविहितमिञादीन् प्रत्ययान् प्रत्येतद्वचनमनर्थकम् । विनाप्यनेन तत्सिद्धेः । तस्मादनन्तरेणाप्यण्ग्रहणमणेव भविष्यति । ननु चासत्यण्ग्रहणे फञः प्रकृतत्वात् तस्यैव विधिर्विज्ञायते । नैतदस्ति । यदि हि शिवादिभ्यः फञ् विधातुमिष्टः स्यात् ततोऽश्वादिष्वेव तेषां पाठं कुर्य्यात् । इदं तर्हि प्रयोजनम् । अयमृष्टिषेणशब्दः शिवादिषु पठ्यते । तस्य सेनान्तलक्षणकारिभ्यश्चेति ( ४।१।१५२ ) ण्यप्रत्ययः प्राप्नोति ।

---

( A A ) The printed काशिका does not give such a गणसूत्र. There is a reading शप आत्रेय here in the गण । The पदमञ्जरी puts the गणसूत्र as शप आत्रेय इति and has शपशब्दात् फञ् भवति । आत्रेयश्चेत् । शापायनः । आत्रेयादन्यत्र शापिः । अत्रपिल्वादिञ् भवति । बाह्वादि वा ।

तत्रासत्यण्ग्रहणे पुनर्विधानमिदं तद्बाधने कृतार्थमिति। ततो यथा-विहितमित्रेव स्यात्। नाण्। ततोऽणेव यथा स्यादित्यण्ग्रहणम्। उदीचामित्रं बाधितुमिति। उदीचामित्यनेनेञ् (४।१।१५३) प्राप्नोति। ततस्तं बाधितुं तक्षञ्शब्दोऽत्र पठ्यते। यथा तर्हि तक्षञ्शब्दस्यात्र पाठादुदीचामिञ् बाध्यते तथा सेनान्तलक्षणकारिभ्यश्चेति ( ४।१।१५२ ) यो ण्यस्तस्यापि बाधा प्राप्नोति। ततश्च ताक्षण्य इति न सिध्यतीत्याह ण्यप्रत्ययस्य तु बाधा नेष्यते। कथमनिष्यमाणापि न भवति? सुपिष्टशब्दादिभिः साहचर्यात्। इह यस्तक्षञ्शब्दः सुपिष्टमयूरखरदूरतक्षन्नित्येवं सुपिष्टा-दिभिः सह पठ्यते यथा तेषाञ्ञपवादार्थोऽत्र पाठस्तैःसाहचर्याद-स्यापीञपवादार्थ एव पाठो विज्ञास्यते। तत्र शिवादीनां प्राग् भूरिशब्दादिञपवादार्थं वचनम्। भूरिसन्धिमुनि इत्येतेषामितश्चानिञ इति (४।१।१२२) ढकि प्राप्ते। कुठार अनभिम्लान इत्येतयोः ककुत्स्थ इत्येवमादीनां प्राग् जरत्कारुशब्दादिञो बाधनार्थम्। जरत्कारुप्रभृतीनां प्राक् सुपिष्टशब्दात् स्त्रीभ्यो ढगिति (४।१।१२०) ढकि प्राप्ते। सुपिष्टादीनां प्राक् तक्षञ्-शब्दादिञः। तक्षन्नित्यस्य कारिलक्षणोदीचामिञः। ऋष्टिषेणस्य सेनान्तल-क्षणस्य ण्यस्य च बाधनार्थम्। गङ्गाविपाट्शब्दयो र्यस्मिन्नप्राप्त इह पाठः स वृत्तिकारेणैव व्याख्यातः। यस्कादिभ्यः प्राग् भूमिशब्दादिञि प्राप्ते। भूमिशब्दस्येतश्चानिञ इति (४।१।१२२) ढकि। इलाशब्दस्यापि द्व्यचश्चेति (४।१।१२१) ढकि। एवमेव सपत्नीशब्दस्यापि स्त्रीभ्यो ढगिति (४।१।१२०) ढक्येव। द्व्यचो नद्या इति। नदी वाचका ये द्व्यच स्तेभ्योऽण् भवति। सम्ध्या साम्ध्यम्। कुल्या कौल्यम्। ननु चात्र तन्नामिकोऽणस्त्येव। सत्यमस्ति। स तु द्व्यच इति (४।१।१२१) ढका बाध्यते। तस्मात् तद्बाधनार्थं वचनम्। त्रिवेणी त्रिवणश्चेति। त्रिवेणीशब्दः प्रत्ययमुत्पादयति त्रिवणञ्चापद्यते। त्रिवेण्या अपत्यं त्रैवणः।

## ११३। अवृद्धाभ्यो नदीमानुषीभ्यस्तन्नामिकाभ्यः।

शास्त्रान्तरे परिभाषितमपि वृद्धमस्ति। अपत्यमन्तर्हितं वृद्धमिति। इह

शास्त्रेऽपि परिभाषितं वृद्धमस्ति वृद्धिर्यस्याचामादिस्तद् वृद्धमिति (१।१।७३)। अतो वृद्धप्रतिषेधे कस्यचित् सन्देहः स्यात् कस्य वृद्धस्यायं प्रतिषेधः ? किं स्वित् यदिह परिभाषितं तस्यायं प्रतिषेध उत यच्छास्त्रान्तरेण परिभाषितं तस्येत्यतस्तन्निरासाय वृद्धिर्यस्येत्यादिनेहैव (१।१।७३) शास्त्रे यत् परिभाषितं तस्यायं प्रतिषेध इति दर्शयति। कुतः पुनरेतदवसितमिह वृद्धं यत् परिभाषितं तस्यायं प्रतिषेध इति ? नदीमानुषीनामधेयस्य गोत्रप्रत्ययान्तस्यासम्भवात्। नदीग्रहणे त्विह लौकिक्येव नदी गृह्यते। न तु पारिभाषिकी। कुत एतत् ? लौकिकार्थवृत्तिना मानुषीशब्देन साहचर्यात्। अथ स्वरूपग्रहणमेव नदीमानुषीशब्दयोः कस्मान्न भवति ? वृद्धप्रतिषेधात्। स्वरूपग्रहणे हि वृद्धप्रतिषेधोऽनर्थकः स्यात्। प्रसङ्गाभावात्। बहुवचननिर्देशाच्च न स्वरूपग्रहणम्। स्वरूपग्रहणे हि नदीमानुषीशब्दयोर्द्वित्वाद् द्विवचनेनैव निर्देशं कुर्यात्। अवृद्धाभ्य इति शब्दधर्म इति। वृद्धसंज्ञकप्रतिषेधे सति नञिवयुक्तन्यायेन (प,७५) च वृद्धसदृशस्यावृद्धस्यैव ग्रहणात्। नदीमानुषीत्यर्थधर्म इति। पारिभाषिक्या नद्याः स्वरूपस्य चाग्रहणार्थस्यैव ग्रहणं युक्तम्। तयोर्हि ग्रहणे शब्दधर्मः स्यात्। यदि तर्ह्यर्थधर्मोऽयं कथं नदीमानुषीभ्य इत्यनेन प्रकृतयो निर्दिश्यन्ते ? अर्थधर्म्म एव ह्येवं निर्दिष्टो भवति। न प्रकृतय इतयत आह तेनेतयादि। तेनार्थेनाभेदोपचारात्। नदीमानुष्यभिधायिन्यः प्रकृतयो निर्दिश्यन्ते। प्रतययप्रकृतिरिति। प्रतययस्य प्रकृतिरिति षष्ठीसमासः। ढकोऽपवाद इति। अवृद्धादीनां नदीनां मानुषीणां नामधेयानां स्त्रीप्रतययान्तत्वात्। वैतस्तो नार्मद इति। वितस्तानर्मदाशब्दाभ्यामण्। शैक्षित इति। शिक्षिताशब्दात्। सौपर्णेयो वैनतेय इति। सुपर्णाविनताशब्दौ पक्षिणीनामभिधेये। न नदीमानुष्यौ। शोभनेय इति। शोभनाशब्दो वर्त्तते नदीमानुष्यर्थः। न तु संज्ञात्वेन। किं तर्हि ? विशेषणत्वेन।

## ११४। ऋष्यन्धकवृष्णिकुरुभ्यश्च।

इञोऽपवाद इति। ननु चानकारान्तेभ्योऽत्रयादिभ्यो ये ढगादयः प्राप्नुवन्ति तदपवाद एव युक्त इतयत आह अत्रयादिभ्यस्त्वितयादि। एकेनादिशब्देन

ऋषयो जातसेनादयो ऽन्धकादिषु च वर्त्तमाना उग्रसेनादयः परिगृह्यन्ते । द्वितीयेन ण्यादयः प्रत्ययाः । तत्र ऋष्यणोऽवकाशोवासिष्ठः । इतश्चानिञ इति (४।१।१२२) ढकोऽवकाशो दौलेयः । अत्रिशब्दादुभयप्राप्तौ परत्वाद् ढग् भवति । आत्रेयः । ऋष्यणोऽवकाशः सएव । सेनान्तलक्षणस्य ण्यस्यावकाशः कारिषेण्यो हारिषेण्यः । जातसेनो नाम ऋषिः । तस्मादुभयप्राप्तौ परत्वाण् ण्यो भवति जातसेन्यः । अन्धकाणोऽवकाशः श्वाफल्कः । ण्यस्य स एव । उग्रसेनो नामान्धकः । तस्मादुभयप्राप्तौ परत्वाण् ण्यो भवति । औग्रसेन्यः । वृष्ण्यणोऽवकाशो वासुदेवः । ण्यस्य स एव । शूरसेनो विष्वक्सेनो नाम वृष्णिः । तस्मादुभयप्राप्तौ परत्वाण् ण्यो भवति शौरसेन्यः । वैष्वक्सेन्यः । कुर्वणोऽवकाशो नाकुलः । ण्यस्य स एव । भीमसेनो नाम कुरुः । तस्मादुभयप्राप्तौ परत्वाण् ण्यो भवति भैमसेन्यः । कथं पुनरित्यादि चोद्यम् । केचिदाहुरित्यादि चोद्यपरिहारः । काकतालीयमिति । अबुद्धिपूर्वकमित्यर्थः । सङ्कलिता इति । समुच्चिताः । नित्या एवेति । अन्धकादीनां वंशानामनादित्वात् ।

## ११५ । मातुरुत्संख्यासंभद्रपूर्वायाः ।

द्वैमातुर इति । प्राक् तद्धितार्थे विषये द्विगुः पश्चात् तद्धितः । साम्मातुर इति । पूर्वं प्रादिसमासः । पश्चात् तद्धितः । भाद्रमातुर इति । पूर्वं विशेषणसमासः । ततस्तद्धितः । अथ प्रत्ययार्थं वचनं कस्मान्न भवतीत्याह प्रत्ययः पुनरित्यादि । उत्सर्गलक्षणेनैव तस्यापत्यमित्यनेन (४।१।९२) । ननु च संख्यादिपूर्वत्वं मातृशब्दस्य विशेषणम् । तत्र मातृशब्दापेक्षया निर्देशः क्रियमाणः पुंलिङ्ग एव युज्यते । तत् कथं संख्यासंभद्रपूर्वाया इति स्त्रीलिङ्गेन निर्देश इत्यत आह स्त्रीलिङ्गनिर्देशोऽर्थापेक्ष इति । मातुःशब्दस्य योऽर्थस्तदपेक्षोऽयं निर्देशः । स चार्थः स्त्रीलिङ्गः । तेन स्त्रीलिङ्गेन निर्देशः कृतः । तेनेत्यादिनार्थापेक्षस्य फलं दर्शयति । अर्थापेक्षे हि स्त्रीलिङ्गनिर्देशे स्त्रीलिङ्गो यस्यार्थो मातृशब्दस्य तस्यैव ग्रहणेन भवितव्यम् । तेन धान्यमातुर्ग्रहणं न भवति । नहि तस्य स्त्रीलिङ्गोऽर्थः । किं तर्हि ? पुंलिङ्गः ।

धान्यं मिमीते यो भृतकः स धान्यमातेतुरच्यते । सौमात इति । प्राक् प्रादिसमासः । तत औत्सर्गिकोऽण् ।

११६ । कन्यायाः कनीन च ।

११७ । विकर्णशुङ्गच्छगलाद् वत्सभरद्वाजात्रिषु ।

अत्र वत्सभरद्वाजात्रिशब्दा वात्स्यभारद्वाजात्रेयेषु गोत्रविशेषेषु लब्ध-वृत्तय उपात्ता इति । अतएवाह वैकर्णो भवति वात्स्यश्चेत् । शौङ्गो भवति भारद्वाजश्चेत् । छागलो भवत्यात्रेयश्चेदिति । सा पुनस्तेषां गोत्रापत्ये वृत्तिः कार्य्ये कारणोपचाराद् वेदितव्या । इयमपि चैतत् प्रमाणमिति । कथं पुनः परस्परविरुद्धमपि प्रमाणं भवतीत्याशङ्क्याह उभयथा सूत्रप्रणयना-दिति । उभयथा ह्येतत् सूत्रमाचार्य्येण प्रणीतम् । तस्मात् को विरोधः ?

११८ । पीलाया वा ।

११९ । ढक् च मण्डूकात् ।

१२० । स्त्रीभ्यो ढक् ।

इह स्त्रीग्रहणेन टाबादिस्त्रीप्रत्ययान्ताः शब्दा गृह्यन्त इति । अथ स्वरूपग्रहणं कस्मान्न भवति ? बहुवचननिर्देशात् । स्वरूपग्रहणे हि तस्यैकत्वादेकवचनेनैव निर्देशं कुर्य्यात् । स्त्र्यर्थमात्रस्य ग्रहणं कस्मान्न भवति ? विमातृशब्दस्य स्त्र्यर्थस्य शुभ्रादिषु पाठात् । यद्यत्र स्त्र्यर्थमात्रस्य स्त्रीशब्दस्य ग्रहणं स्यात् तस्य शुभ्रादिषु पाठोऽनर्थकः स्यात् । अनेनैव ढकः सिद्धत्वात् । ऐड़विड़ो दारद इति । इड़विड़ोऽपत्यं दरदोऽपत्यमित्यणेव भवति । ढगिति वर्त्तमाने ढकः पुनर्ग्रहणं नित्यार्थम् । वड़वाया वृषे वाच्य इति । यस्तस्या गर्भे वीजं प्रक्षिपति स वृषो वाड़वेय इत्युच्यते । अण् क्रुञ्चाकोकिलात् स्मृत इति । वृष इति नापेक्ष्यते । अपत्ये विधिरेवायम् । ढकोऽपवादः ।

१२१ । द्व्यचः ।

तन्नामिकाणोऽपवाद इति । ये द्व्यचः स्त्रीप्रत्ययान्ता नदीमानुषीनाम-धेयभूता स्तेभ्यो विशेषविहितत्वात् तन्नामिकाण् भवति । ततस्तद्बाधनार्थं ढग् विधीयते ।

## १२२। इतश्चानिञः।

## १२३। शुभ्रादिभ्यश्च।

यथायोगमित्यादि। ये तावदकारान्तास्तेभ्य इञोऽपवादः। शलाका कुरेका अम्बिका अशोका खट्वा पिङ्गला खण्डोन्मत्ता इत्येतेभ्यस्तन्नामिकाणः। विधवाशब्दात् क्षुद्रालक्षणस्य ढ्रकः। किंकसा रोहिणी अजवस्ति शकन्धि ककलास सुदत्त परिधि एतेभ्य चतुष्पाल्लक्षणस्य ढञः। गोधाशब्दाद् गोधाया ढ्रकः। वचनसामर्थ्यात् सोऽपि भवत्येव। शेषेभ्य औत्सर्गिकोऽण इतश्च यथा-योगार्थः। लक्षणश्यामयोर्वासिष्ठ इति। लक्षण श्याम इतेतयोर्वासिष्ठेऽपत्य-विशेषे ढग् भवति। लाक्षणेयो वासिष्ठः। लाक्षणिरन्यः। श्यामेयो वासिष्ठः। श्यामायनोऽन्यः। अश्वादित्वात् फञ्।

## १२४। विकर्णकुषीतकात् काश्यपे।

## १२५। भ्रुवो वुक् च।

## १२६। कल्याण्यादीनामिनङ्।

## १२७। कुलटाया वा।

कुलान्यटतीति कुलटा। नन्वकः सवर्णे दीर्घत्वे कृते कुलाटेति भवितव्य-मित्यत आह पररूपमित्यादि। पूर्वणैवेति। स्त्रीभ्यो (४।१।१२०) ढगित्यनेनैव। व्यवहितेऽपि पूर्वव्यपदेशः प्रवर्त्तते यथा मथुरायाः पाटलिपुत्त्रं पूर्वमिति। कौलटेर इति। एयादेशे कृते वलि यलोपः।

## १२८। चटकाया ऐरक्।

चटकाया अपत्यं स्त्री चटकेति। लुक् तद्धितलुकीति (१।२।४९) लुकि कृते पुनष्टाप् कर्त्तव्यः। पुंलिङ्गादपि स्त्रियामिष्यत एव लुक्। एवं चटकादै-रगित्येतत् सूत्रमासीत्। इदानीं प्रमादाच्च चटकाया इति पाठः।

## १२९। गोधाया ढ्रक्।

गौधेर इति। पूर्ववद् यलोपः।

## १३० । आरगुदीचाम् ।

आचार्य्यग्रहणं पूजार्थमिति । ननु चासत्याचार्य्यग्रहणे नित्य एवायं विधिः स्यात् । तथाचारकः पूर्वेण ढ्रका समावेशो न स्यात् । तद्विकल्पार्थमेवाचार्य्यग्रहणं कस्मान्न भवतीत्याह वचनसामर्थ्यादिति । ढ्रगपि ह्युच्यते । आरगपि । तत्र वचनसामर्थ्यात् समावेशो भविष्यति । तस्मात् पूजार्थमेवाचार्य्यग्रहणम् । ज्ञापकं त्वित्यादि । एका सिद्धे यदारग्वचनं तज् ज्ञापनार्थम् । तेनैवं ज्ञायते ऽन्येभ्योऽप्ययं भवति । अन्यथा ह्यारग् वचनमनर्थकं स्यात् । रकि सिद्धेः । तेन जडस्यापत्यं जाडारः । पाण्डार इति सिद्धं भवति । नह्येतद्ढ्रका सिध्यति ।

## १३१ । क्षुद्राभ्यो वा ।

अर्थधर्मेति । अर्थस्य क्षुद्रत्वात् तदभिधायिन्योऽपि प्रकृतय उपचारेण क्षुद्रा इति निर्दिश्यन्ते ।

## १३२ । पितृष्वसुश्छण् ।

## १३३ । ढकि लोपः ।

कथं पुनरित्यादि । ढग्विधौ टाबादिस्त्रीप्रत्ययान्तग्रहणात् पितृष्वसृशब्दस्य चास्त्रीप्रत्ययान्तत्वात् । ततो ढको भावमसम्भावयतः प्रश्नः । एतदेवेत्यादि । यदेतत् पितृष्वसृशब्दं प्रति ढको निमित्तत्वेनाश्रयणमेतदेव पितृष्वसृशब्दात् तस्य भावं ज्ञापयति । नह्यसतो निमित्तभाव उपपद्यते ।

## १३४ । मातृष्वसुश्च ।

पितृष्वसुरितीयतदपेक्षत इति । इहाप्यनन्तरस्य पितृष्वसुर्विधिर्वा भवति प्रतिषेधो वेति (प,६२) लोप एवानन्तरः प्राप्नोति । न च्छण् । व्यवहितत्वात् । उभयमपि चैतदिष्यते । तत्र यतो हेतोरेतद्द्वयमपि लभ्यते तमनेन दर्शयति । पितृष्वसुरिति । एतदिहापेक्ष्यमाणं ह्यर्थात् षष्ठ्यन्तं ज्ञायते यथा लोपविधौ । पितृष्वसुरिति च षष्ठी । तेनायमर्थः सम्पद्यते । पितृष्वसुर्यदुक्तं तन्मातृष्वसुरपि । तेन च्छण् ढकि लोपश्च लभ्यते । उभयमपि ह्येतत् पितृष्वसुरुक्तम् ।

## १३५। चतुष्पाद्भ्यो ढञ्।

चतुष्पाद्भ्य इति। चत्वारः पादा आसामिति तास्तथोक्ताः। पादस्य लोपोऽहस्त्यादिभ्य इति (५।४।१३८) लोपः। इहाप्यर्थधर्मेण तदभिधायिन्यः प्रकृतयो निर्दिश्यन्ते। अतएवाह चतुष्पादभिधायिनीभ्यः प्रकृतिभ्य इति। बहुवचननिर्देशः स्वरूपविधिनिरासाय। अणादीनामिति। आदिशब्देन ढगादीनां ग्रहणम्। कामण्डलेय इत्यादि। कमण्डलूशुन्तिबाहुजम्बुशब्दा श्चतुष्पाज्जातिवाचिनः। तेषां ढे लोपोऽकद्रा इत्युवर्णलोपः (६।४।१४७)।

## १३६। गृष्ट्यादिभ्यश्च।

अणादीनामपवादः। आदिशब्देन ढकः। बहुवचननिर्देशस्तु प्रकृतिभेदेन तयोर्भेदस्य विवक्षितत्वात्। तत्राजवस्तिमित्रयुशब्दयोरणोऽपवादः। शेषाणामितश्चानिञ इति (४।१।१२२) ढकः।

## १३७। राजश्वशुराद् यत्।

क्षत्रियजातिश्चेदिति। प्रत्ययान्तेन यदि क्षत्रियजातिर्गम्यते। एवं यद् भवति यो ह्यपत्यमेव राज्ञो न क्षत्रियजातिस्तत्राणेवौत्सर्गिको भवति। एतच्च वेत्यस्येहानुवृत्तस्य व्यवस्थितविभाषात्वविज्ञानाल्लभ्यते। राजन्य इति। ये चाभावकर्मणोरिति (६।४।१६८) प्रकृतिभावः। राजन इति। अन्नाप्यन्निति (६।४।१६४) प्रकृतिभावः।

## १३८। क्षत्राद् घः।

घप्रत्ययो भवतीति। घशब्दएव। नतु तरप्तमपा इति वेदितव्यम्। कथं पुनरेतल्लभ्यते ? यावता घ इति तरप्तमपोरियं संज्ञा। संज्ञा चोच्चारिता संज्ञिनं सम्प्रत्याययतीति तयोरेव ग्रहणं युक्तम्। नैष दोषः। प्रत्ययविधौ यत्र घ इति श्रूयते तत्र स्वरूपस्य ग्रहणं भवति। ज्ञापकाद्। यदयं प्रत्ययादेर्घकारस्येयादेशं शास्ति तज्ज्ञापयति यत्र प्रत्ययविधौ घः श्रूयते तत्र स्वरूपमेव गृह्यत इति। नहि संज्ञिनोर्ग्रहणेन प्रत्ययादेर्घः संभवति।

## १३९ । कुलात् खः ।

उत्तरसूत्र इत्यादि । उत्तरसूत्रे हि पूर्वपदप्रतिषेधाद् यस्यां परिभाषायां प्रातिपदिकश्रुतिरस्ति सात्र नोपतिष्ठत इत्ययमर्थो ज्ञायते । यदि ह्युपतिष्ठेत तदा ग्रहणवता प्रातिपदिकेन तदन्तविधिप्रतिषेधादेव स पूर्वपदान्न भविष्यतीत्यपूर्वपदादिति प्रतिषेधोऽनर्थकः स्यात् । सामान्यापेक्षञ्च ज्ञापकम् । तेन व्यपदेशिवद्भावोऽप्रातिपदिकेन (प, ३३) ग्रहणवता प्रातिपदिकेन तदन्तविधिर्नेष्यत ( प, ३२ ) इत्येतयोर्द्वयोरपीह परिभाषयोरुपस्थानं न भवति । ततश्च कुलशब्दान्तं प्रातिपदिकं केवलश्च कुलशब्दो गृह्यते ।

## १४० । अपूर्वपदादन्यतरस्यां यड्ढकञौ ।

ननु पूर्वशब्दोऽवयववचनः ; न च कुलशब्दस्य पदान्तरमवयव उपपद्यते । पृथग्भूतत्वात् । अनारम्भकत्वाच्च । ततो व्यवच्छेद्याभावादपूर्वपदादित्ययुक्तमेतत् कुलशब्दस्य विशेषणमित्याह समाससम्बन्धेत्यादि । समासे सत्येतद् भवति पूर्वपदमुत्तरपदमिति । तस्मात् समाससम्बन्धिनः पूर्वपदस्याभावेन कुलशब्दो विशेष्यते । अविद्यमानं समाससम्बन्धि पूर्वपदं यस्येति । कस्य चाविद्यमानम् ? यः समासस्यान्तर्भूतो न भवति केवलः कुलशब्दः । तेन केवलात् कुलशब्दादयं विधिरित्युक्तं भवति । अथ व्यवस्थावाच्येव पूर्वशब्दः कस्मान्नाश्रीयते ? अशक्यत्वात् । तत्र ह्याश्रीयमाणेऽविद्यमानं पूर्वपदं यस्मात् कुलशब्दात् सोऽपूर्वपदशब्देनोच्यते । ततश्च देवदत्तः कुल्यो देवदत्तः कौलेयक इति वाक्ये यड्ढकञौ न स्याताम् । देवदत्तशब्दस्येह पूर्वपदस्य विद्यमानत्वात् । पदग्रहणं किमिति ? अपूर्वादित्येवं कस्मान्नोक्तम् ? एवमपि ह्यीष्टं सिध्यति । लघु च सूत्रं भवतीति मन्यते । बहुच्पूर्वपदादपि यथा स्यादिति । अपूर्वादित्युच्यमाने बहुच् पूर्वं यत् प्रातिपदिकं बहुजस्य पूर्व इति ततः प्रत्ययो न स्यात् । पदग्रहणे तु सति ततोऽपि भवति । तस्यापूर्वपदत्वात् । बहुकुल्य इति । ईषदसमाप्तं कुलमिति विभाषा सुपो बहुच् पुरस्तात्त्विति ( ५।३।६८ ) बहुच् । बहुकुलस्यापत्यं बहुकुल्यः ।

१४१। **महाकुलादञ्खञौ।**

१४२। **दुष्कुलाड् ढक्।**

१४३। **स्वसुश्छः।**

१४४। **भ्रातुर्व्यच्च।**

तकारः स्वरार्थ इति। तित् स्वरितमिति (६।१।१८५) स्वरितत्वं यथा स्यात्।

१४५। **व्यन् सपत्ने।**

ननु नित्यं सपत्न्यादिष्विति (४।१।३५) सपत्नीशब्द एव स्त्रीलिङ्गो व्युत्पादितः। तत् कथं सपत्न इति प्रयोगः पुंलिङ्गस्य युज्यत इत्याह सपत्नशब्दः शत्रुपर्य्याय इत्यादि। इवार्थ इति। इवार्थः सादृश्यम्। यथैव हि सपत्नी दुःखहेतुस्तथा शत्रुरपीति। यः सपत्नीव सपत्नः स उच्यते।

१४६। **रेवत्यादिभ्यष्ठक्।**

यथायोगमित्यादि। तत्राद्यानां चतुर्णां स्त्रीप्रत्ययान्तत्वाड् ढकोऽपवादः। वृकवञ्चिन्नित्यस्याणः। शेषाणामकारान्तत्वादिञः।

१४७। **गोत्रस्त्रियाः कुत्सने ण च।**

अपत्यं पौत्रप्रभृति गोत्रं गृह्यत इति। न लौकिकमपत्यमात्रम्। तद्ग्रहणे हि गोत्रग्रहणमनर्थकं स्यात्। अपत्याधिकारादेव तद्ग्रहणस्य लब्धत्वादिति भावः। पितुरसंविज्ञान इति। अप्रसिद्धौ। तस्य पितुरसंविज्ञानप्रदर्शनार्थं मात्रा यो व्यपदेशो ऽस्ति तेन कुत्सा स्यात्। गार्गी जाल्मो गार्गिक इति। गर्गशब्दाद् गोत्रे गर्गादियञन्ताद् यञश्चेति (४।१।१६) ङीपि हलस्तद्धितस्येति (६।४।१५०) लोपे (B B) सति यकारस्य गार्गी इति स्थिते णठकौ। ग्लौचुकायन इत्यादि। ग्लुचुकस्यापत्यं गोत्रं स्त्री प्राचामवृद्धात् फिन् बहुलमिति फिन् (४।१।१६०)। तत इतो मनुष्यजातेरिति

(B B) वस्तुतस्त्वापत्यस्य च तद्धितेऽ (६।४।१५१) नातीत्यनेनात्र यलोपः। यस्येति चेत्यकारलोपः (६।४।१४८)।

(४।१।६५) ङीष् । ततो णठको । कारिकेय इति । कारकशब्दाण् णवुलन्तात् टाप् । कारिकाशब्दोऽयं गोत्रे न वर्त्तते । ततो ढगेव भवति । औपगवि-रिति । उपगोरपत्यं गोत्रं पुमान् । अण् । तदन्तादिञेव भवति । अत्र केनचित् प्रतिषिद्धाचरणादिना कुत्सा वेदितव्या । गार्गेयो माणवक इति । अत्र पितरि विज्ञाते मातुः परिज्ञानार्थं तन्मात्रा व्यपदेशः क्रियत इति नास्ति कुत्सा । तेन ढगेव भवति ।

## १४८ । वृद्धाट् ठक् सौवीरेषु बहुलम् ।

सौवीरेष्विति प्रकृतिविशेषणमिति । सौवीरेषु यद् वृद्धं सौवीरगोत्राभि-धायि यद् वृद्धमित्यर्थः । भागवित्तेरित्यादि । भगवित्तस्यापत्यं गोत्रम् । अत इञ् (४।१।९५) । तदन्तात् ठक् । भागवित्तिकः । भागवित्तायन इति । यञिञोश्चेति ( ४।१।१०१ ) फक् । तृणविन्दोरपत्यमौत्सर्गिकोऽण् तार्णविन्दवः । ततष्ठक् तार्णविन्दविकः । पूर्वसूत्रे ठक् चानुकृष्ट इतीह नानु-वर्त्तेत इति पुनष्ठग्ग्रहणं णस्य निवृत्त्यर्थम् । वापूर्वकं हि ठग्ग्रहणं णप्रत्ययेन सम्बद्धम् । अतस्तदनुवृत्तौ तस्याप्यनुवृत्तिः स्यात् । भागपूर्वपदो वृत्ति-रित्यादि । येभ्योऽनेन सूत्रेण ठगिष्यते त एतेन श्लोकेन परिगण्यन्ते । भाग इत्येतत् पूर्वपदं यस्य वृत्तिशब्दस्य स तथोक्तः । अयं तावदेको भागवित्तिः । द्वितीयस्तार्णविन्दवः । तृतीयस्त्वाकशापेयः । य एते त्रयः शब्दा गोत्रे ठग् बहुलं तत इति । सौवीरगोत्रवचनान्तात् प्रातिपदिकाद् बहुलं य ठगुच्यते स ततस्तेभ्य एव भागवित्तिप्रभृतिभ्यस्त्रिभ्यो भवति । नान्येभ्य इत्यर्थः । अथ वृद्धग्रहणं किमर्थम् ? यावता पूर्वसूत्राद् गोत्रग्रहणमनुवर्त्तते । सौवीर-ग्रहणेनैव विशेषयिष्यामः । यच्च सौवीरगोत्रे वर्त्तते प्रातिपदिकं भाग-वित्त्यादिकं तद् वृद्धमेव । ततो निवर्त्त्याभावादपार्थकं वृद्धग्रहणमित्यत आह वृद्धग्रहणमित्यादि । तद्धि गोत्रग्रहणं स्त्रिया विशेषणम् । अतस्तस्मिन्ननुवर्त्त-माने विशिष्यायाः स्त्रिया अनुवृत्तिः स्यात् । तस्मात् तन्निवृत्त्यर्थं वृद्धग्रहणम् । गोत्रग्रहणमेवानुवर्त्तिष्यते । तस्यैव स्वरितत्वात् । न स्त्रीति । एतद्व्याख्येयं भवति । व्याख्यानाच्च लघु वृद्धग्रहणमेव । औपगविरिति । अणन्तादिञ् ।

ननु च परिगणनं कृतम्। तत् कथमौपगवशब्दात् ठक्प्रसङ्गः? सौवीरग्रहणे सति तत्परिगणनम्। तथाहि भागवित्तिप्रभृतयः सौवीरगोत्राभिधायिन एव परिगणिताः। तत्रासति सौवीरग्रहणे औपगवशब्दादपि प्रसज्यते। भागवित्तायन इति। पूर्ववत् फक्। अथ बहुलग्रहणं किमर्थम्? न वाग्रहणमेव क्रियेत। तेनापि हि भागवित्तिको भागवित्तिकायन इत्यादि सिध्यत्येवेत्यत आह बहुलग्रहणमित्यादि। वाग्रहणाद् विकल्पमात्रं लभ्यते। न तूपाधिवैचित्र्यम्। बहुलग्रहणे तु तदपि। तस्मादुपाधीनां विशेषणानां वैचित्र्यं नानाप्रकारता यथा स्यादित्येवमर्थं बहुलग्रहणम्। तदेवोपाधिवैचित्र्यं दर्शयितुमाह गोत्रस्त्रिया इत्यारभ्येत्यादि। सुखावबोधम्।

## १४९। फेश्छ च।

यमुन्दस्येत्यादि। येभ्योऽनेन सूत्रेण छठकाविष्येते तेषामनेन श्लोकेन परिगणनं क्रियते। तत् तु बहुलग्रहणानुवृत्तेरेव लभ्यत इत्येवं तद्वेदितव्यम्। यमुन्दमुद्दिश्य वृत्तिकारेणैवोदाहरणं दर्शितम्। इतरयोस्तु दर्शयामः। सुयाम्नोऽपत्यं (CC) फिञ् सौयामायनिः। तस्यापत्यं सौयामायनीयः सौयामायनिकः। वृषस्यापत्यं फिञ्। तस्य दगुकोशलकर्मारच्छागवृषाणां युड् वादिष्टस्येति (४।१।१५५ वा) वचनादायन्नादेशे कृते युडागमः। वार्ष्यायणिः। तस्यापत्यं वार्ष्यायणीयः। वार्ष्यायणिकः। एते यमुन्दादयः शब्दाः फिञः स्मृताः फिञन्ता विज्ञाताः। गोत्रस्त्रियाः कुत्सने ण (४।१।१४७) चेत्यादयश्चत्वारो योगाः। तत्राद्यः कुत्सन एव। अन्त्यः सौवीरेष्वेव। मध्यमौ तु द्वौ सौवीरेषु कुत्सायाञ्च शब्दवित् स्मरेज् जानीयात्।

## १५०। फाण्टाहृतिमिमताभ्यां णफिञौ।

अल्पाच्तरस्येत्यादि। मिमतशब्दोऽयमल्पाच्तरः। तस्याल्पाच्तरमिति (२।२।३४) पूर्वनिपाते प्राप्ते यः परनिपातः स लक्षणव्यभिचारचिह्नं सूचयति।

---

(CC) सुयामा is the reading in the Bengal MS.

यथेदं पूर्वनिपातलक्षणं व्यभिचरति स्वविषये न प्रवर्त्तते तथा यथासंख्य-लक्षणमपीति यथासंख्यं न भवति । अतएवैकैकस्मात् प्रत्ययद्वयं सिद्धं भवति ।

## १५१ । कुर्वादिभ्यो ण्यः ।

कौरव्य इति । ओर्गुणः (६।४।१४६) । वान्तो यि प्रत्यय इत्यवा-देशः (६।१।७९) । कुरुनादिभ्यो ण्य इत्यादि । किमर्थम् पुनः कुरुशब्दाद-परोऽपि ण्यप्रत्ययो भविष्यति ? यावतानेनैव सिद्धम् । तदेव हि रूपम् । स एव च स्वर इत्यत आह स तु क्षत्रियादिति । अनेनार्थभेदं दर्शयति । स हि जनपदशब्दात् क्षत्रियादञित्यधिकारात् (४।१।१६८) क्षत्रियाद् भवति । अयं तु ततोऽन्यतः । ततश्चैकः क्षत्रियापत्ये भवति । अपरस्त्व-क्षत्रियापत्य इति स्पष्ट एवार्थभेदः । रूपविशेषोऽपि बहुषु विद्यत इति दर्शयन्नाह तद्राजसंज्ञक इत्यादि । तस्य हि तद्राजसंज्ञकत्वात् तद्राजस्य बहुष्वित्यादिना (२।४।६२) बहुषु लुका भवितव्यं कुरव इति । अयन्तु श्रूयत एव कौरव्या इति । रथकारशब्दोऽत्र पठ्यते । तत्र रथकारशब्दश्चास्त्येव जातिवचनः । अस्ति च कारिवचनः । तदिह तयोः कतरः पठ्यत इत्याह रथकारशब्दोऽत्र पठ्यत इत्यादि । अथ कारिवचनोऽपि कस्मान्न पठ्यत इत्याह कारिणस्त्वित्यादि । यो हि कारिवचनो रथकारशब्द-स्तत उत्तरसूत्रेणैव ण्यः सिद्धः । ननु किमत्र तस्य पाठेन ? पुंवद्भावो न भवतीति । भस्याढे तद्धित इति (६।३।३५, वा) यः पुंवद्भावः प्राप्नोति स कैशिनीशब्दस्य न भवति । यदि स्यान् न स्तद्धित इति (६।४।१४४) टिलोपे कृते कैश्य इत्यनिष्टं रूपं स्यात् । कस्मान्न भवतीत्याह स्त्रीप्रत्ययस्य निर्देशसामर्थ्यादिति । यदि हि पुंवद्भावः स्यात् स्त्रीप्रत्ययेनास्य निर्देशो-ऽनर्थकः स्यात् । पुंलिङ्गमेवैनं पठेद् । पुंलिङ्गस्यापि पाठे लिङ्गविशिष्ट-परिभाषया कैशिनीशब्दादपि प्रत्ययः सिध्यति । ननु च पुंलिङ्गनिवृत्त्यर्थः स्त्रीप्रत्ययान्तस्य पाठः स्यात् । नैतदस्ति । अनभिधानादेव हि पुंलिङ्गान्न भविष्यति । तस्य कण्वादिवदिति । अपत्याधिकारे ऽयमतिदेशो भवन् कण्वादिभिरपत्यप्रत्ययान्तैर्विज्ञायते । कण्वादयश्च गर्गाद्यन्तःपातिनः । तेन

यञन्तानां कण्वादीनां यत् कार्य्यं तद् वामरथ्यस्य स्वरवर्जं भवतीत्युक्तं भवति। लुगादिकमिति। आदिशब्देन ङीबादिकं गृह्यते। कण्वादीनामपत्यप्रत्ययस्य यञञोश्चेति (२।४।६४) बहुषु लुग् भवति। स्त्रियां यञश्चेति (४।१।१६) ङीप्। प्राचां ष्फ तद्धित इति (४।१।१७) ष्फप्रत्ययः स्त्रियामेव। यञिञोश्चेति (४।१।१०१) फक्। शैषिकेष्वर्थेषु कण्वादिभ्यो गोत्र (४।२।१११) इत्यण् तस्येद(४।३।१२)मित्यर्थविवक्षायाम्। संघाङ्कलक्षणेष्वञयञिञामणितरण् (४।३।१२३)। एतानि कार्य्याणि यथा कण्वादीनां भवन्ति तथा वामरथ्यस्यापि। एषां वामरथा इत्यादीनि यथाक्रममुदाहरणानि। नातिदेशिकमाद्युदात्तत्वमिति। यथा कण्वादीनां यञन्तानां ञित्स्वरेणाद्युदात्तत्वं न तथा वामरथ्यस्य। किं तर्हि ? प्रत्ययस्वरेणान्तोदात्तत्वमेव भवति। सम्राजः क्षत्रिय इति। सम्राजः क्षत्रिये ण्यो भवति। सम्राजोऽपत्यं साम्राज्यः। अन्यत्राणेव साम्राजः।

## १५२। सेनान्तलक्षणकारिभ्यश्च।

अत्र ग्रहणवता प्रातिपदिकेन तदन्तविधिप्रतिषेधाल्लक्षणशब्दस्य स्वरूपग्रहणम्। अतएवाह लक्षणशब्दादिति। कारीत्यर्थग्रहणम्। तत्रार्थे कार्य्यस्याभावात् तद्वाचिनः प्रत्ययो विज्ञायत इत्याह कारिवचनेभ्यश्चेति। यथा लक्षणशब्दस्य स्वरूपग्रहणं तथा कारिशब्दस्य कस्मान्न भवति। शिवादिषु तक्षन्निति पाठात्। अस्य हि कारिलक्षणमिञं बाधितुं तत्र पाठः। यदि च कारिशब्दस्येह स्वरूपग्रहणं स्यात् तक्षञ्शब्दादिञः प्राप्तेरसम्भवादुत्सर्गेणैवाण भवितव्यमिति तस्य शिवादिषु पाठोऽनर्थकः स्यात्। अर्थग्रहणे त्वनेन प्राप्तस्येञो बाधनार्थस्तत्र पाठो युज्यते।

## १५३। उदीचामिञ्।

वचनसामर्थ्यादित्यादि। ण्योऽप्युच्यते। इञपि। वचनसामर्थ्यादेवान्तरेणाचार्य्यग्रहणं तयोः समावेशे सिद्धे यदाचार्य्यग्रहणं क्रियते तद्वैचित्र्यार्थम्। आचार्य्यग्रहणस्यातिरिच्यमानत्वादयमर्थो लभ्यते ग्रन्थाधिक्यादर्थाधिक्यं भवतीति कृत्वा। ननु च पूजार्थमाचार्य्यग्रहणं स्यात्। नैतदस्ति। एवं हि प्राचामपि

ग्रहणं कर्त्तव्यं स्यात् । तेऽपि हि सेनान्तलक्षणकारिभ्य इञं न स्मरन्ति । तक्षन्शब्द इत्यादिना वैचित्र्यं दर्शयति । ताक्ष्ण इति । शिवाद्यणि कृते षपूर्वहन्धृतराज्ञामणीत्यल्लोपः (६।४।१३५) । ताक्षण्य इति । ये चाभाव-कर्मणोरिति (६।४।१६८) प्रकृतिभावः ।

## १५४ । तिकादिभ्यः फिञ् ।

कौरव्यशब्दः पठ्यत इत्यादि । कौरव्यशब्दोऽयमस्त्येव क्षत्रियगोत्रवचनो यः कुर्वादिभ्यो ण्य इति (४।१।१७२) ण्यप्रत्ययान्तः । अस्ति ब्राह्मणादिगोत्र-वचनो यः कुर्वादिभ्य इति (४।१।१५१) ण्यप्रत्ययान्तः । तयोरिह पूर्वो गृह्यते । कुत एतत् ? औरसशब्देन साहचर्य्यात् । औरसशब्दोऽयं जनपदशब्दात् क्षत्रियादञितत्यञ्प्रत्ययान्तः (४।१।१३८) । तेनासौ क्षत्रियवचनः । तत्साह-चर्य्याच्च कौरव्यशब्दो यः क्षत्रियप्रत्ययान्तत्वात् क्षत्रियवचनः स एव गृह्यते । यस्त्वित्यादि । यस्तु कुर्वादिभ्यो ण्य इति (४।१।१५१) ण्यप्रत्ययान्तो ब्राह्मणादि-गोत्रवचनस्तस्मादत इञितीञेव (४।१।८५) भवितव्यम् । तत्रैतत् स्यात् । स्वमनीषिकेयं भवत इत्याह तथा चेत्यादि । यत एवं ब्राह्मणादिगोत्र-वचनादिञेव भवितव्यम् । तथाहि ण्यक्षत्रियादिसूत्रे (२।४।५८) पूर्वैरपि वृत्तिकारैः कौरव्यः पिता कौरव्यः पुत्र इत्युदाहृतम् । यदि चातः फिञ् स्यात् तदुदाहरणं न युज्येत । नहि ण्यप्रत्ययान्ताद् विहितस्य फिञो यूनि लुगुच्यते । अपि त्विञः ।

## १५५ । कौशल्यकार्मार्य्याभ्याञ्च ।

परमप्रकृतेरेवायं प्रत्यय इष्यत इति । कौशलशब्दात् कर्मारशब्दाच्च । एवकारो वृद्धेत्कोशलाजादाञ्ञ्यङिति (४।१।१७१) ञ्यङन्तो यः कौशल्य-शब्दो यश्च सेनान्तलक्षणकारिभ्यश्चेति (४।१।१५२) कारिलक्षणण्यप्रत्ययान्तः कार्मार्य्यशब्दस्तयोर्व्यवच्छेदाय । यदि मूलप्रकृतेरेवेष्यते कथमिदं विकृतं प्रकृतिरूपं श्रूयत इत्याह प्रत्ययसन्नियोगेनेत्यादि । न चेयं स्वमनीषिका । अपित्वाचार्य्याणामेव भाष्यकारप्रभृतीनामिदं मतमिति दर्शयन्नाह तथा चेत्यादि । कः पुनः परमप्रकृतेः प्रत्ययान्ताद्वोत्पत्तौ विशेषः ? परमप्रकृते-

त्वप्रत्ययप्रत्ययमात्रे प्रत्ययो लभ्यते। प्रत्ययान्तात् तूत्पत्तौ गोत्राद् यूनीति (४।१।८४) वचनाद् यून्यपत्य इत्येव विशेषः। युङ् वादिष्टस्येति। आदिष्ट-ग्रहणमायन्नादेशे कृते यथा स्यादित्येवमर्थम्। अन्यथा ह्यनादित्वादायन्नादेशो न स्यात्। दागव्यायनिरिति। ओर्गुणे (६।४।१४६) कृते वान्तो यि प्रत्यय इत्यवादेशः (६।१।७८)।

१५६। अणो द्व्यचः।

कार्त्त्रायणिरिति। कर्त्तुरपत्यमित्यण् कार्त्त्रः। ततः फिञ्। दाक्षायण इति। दाक्षिशब्दादिञन्ताद् यूनि यञिञोश्चेति फक् (४।१।१०१)। प्रतिपाद-नादि सुगमम्।

१५७। उदीचां वृद्धादगोत्रात्।

वृद्धादिति। इहैव यत्पारिभाषिकं वृद्धं तद् गृह्यते। न शास्त्रान्तर-प्रसिद्धम्। अगोत्रादिति प्रतिषेधात्। कारिशब्दादित्यादि। कारिलक्षणस्ये-ञोऽवकाशस्तान्तुवायिरिति। फिञोऽवकाश आम्रगुप्तायनिरिति। इहोभयं प्राप्नोति नापितायनिरिति। परत्वात् फिञेव भवति।

१५८। वाकिनादीनां कुक् च।

यदिह वृद्धमगोत्रमिति। वाकिनशब्दादिकाकपर्य्यन्तम्। इञाद्यपवादो योग इति। आदिशब्देनाणो ग्रहणम्। तत्र चर्मिवर्मिशब्दयोरणोऽपवादः। शेषाणा-मिञः। चर्मिवर्मिणोर्नलोपश्चेति। चर्मिन् वर्मिन् इत्येतयोः कुक्फिञौ भवतो नलोपश्चेति। कुकि कृते प्रातिपदिकस्यानकारान्तत्वान् नलोपोऽत्र न प्राप्नो-तीति विधीयते। चार्मिकायणिः। वार्मिकायणिः।

१५९। पुत्रान्तादन्यतरस्याम्।

तेनेत्यादि। वचनात् पूर्वसूत्रेणैवोदीचां मतेन यः पक्षे फिञ् विहित स्तस्मिन्ननेनान्यतरस्यां कुगागमोऽपि विधीयते। तेन त्रीणि रूपाणि भवन्ति।

१६०। प्राचामवृद्धात् फिन् बहुलम्।

विकल्पार्थ इति। विकल्पप्रयोजनाय। एकेनैव सिध्यतीति। विकल्पार्थ-त्वादिति। प्रकृतत्वाद्विकल्प इति गम्यते। अत्रच किमर्थं सर्व्वेषां ग्रहण

मित्यध्याहार्यम् । तत्रैतत्स्यादुत्तरम् । यच्चोदीचांग्रहणं यच्च प्राचांग्रहणं तदुभयं पूजार्थम् । बहुलग्रहणं वैचित्र्यार्थम् । पारिशेष्यादन्यतरस्यांग्रहणं विकल्पार्थमित्युक्तं भवति । क्वचिदित्यादिना बहुलग्रहणस्य वैचित्र्यार्थतां दर्शयति ।

## १६१ । मनो र्जातावञ्यतौ षुक् च ।

तथाचेत्यादि । यस्मादपत्यार्थोऽत्र नास्त्येवञ्च कृत्वा मानुषा इति बहुषु लुङ् न भवति । अपत्यार्थे तु सति यञञोश्चेति (२।४।६४) बहुषु लुक् प्रसज्येत । अपत्ये कुत्सित इत्यादि । मूर्धन्योपसंख्यानपरोऽयं श्लोकः । अणप्रत्ययोऽपत्यविवक्षायां तस्यापत्यमित्यनेनैव (४।१।९२) सिध्यति । ननु च मूर्धन्योऽपि च बहुलग्रहणानुवृत्त्या सिध्यत्येव । एवं तर्हि बहुलग्रहणानुवृत्तेर्लभ्य एवार्थः श्लोकेन कथ्यते । स चापि मूर्धन्यो विशिष्ट एव विषये मूढादावपत्ये भवति । न सर्वत्र । अनधीतवेदत्वादज्ञो मूढः । मूढत्वादेव प्रतिषिद्धाचरणाद्वा कुत्सितो यःस ब्राह्मणजातीयो माणव उच्यते ।

## १६२ । अपत्यं पौत्रप्रभृति गोत्रम् ।

प्रभृतिशब्द आदिशब्दस्यार्थे । पौत्रः प्रभृतिर्यस्येति बहुव्रीहिः । यदि पौत्रप्रभृति यदपत्यं तद् गोत्रसंज्ञं भवति गर्गस्यापि गोत्रसंज्ञा प्राप्नोति । सोऽपि कञ्चित् प्रति पौत्रो भवत्येव । सत्याञ्च गोत्रसंज्ञायां गोत्रशब्दादनन्तरापत्ये प्रत्ययो न प्राप्नोतीति चोद्यमाशङ्क्याह सम्बन्धिशब्दत्वादित्यादि । गोत्रसंज्ञा ह्यपत्यस्य पौत्रप्रभृतेर्विधीयते । तेन च यस्यापत्यमिति सम्बन्धिशब्दोऽसौ नियोगतोऽपत्यवन्तमपेक्षते । तेन तस्य यदपत्यं तदपेक्षया गोत्रसंज्ञा विधीयते । न च यस्य गर्गः पौत्र स्तस्यासौ गर्गोऽपत्यमिति शक्यते व्यपदेष्टुम् । अपत्यत्वस्य तत्राप्रतिभासनात् । अप्रतिभासनं पुनस्तस्य तद्वतोऽविवक्षितत्वात् । यदपि हि तत्रापत्यत्वं तदप्यविवक्षितस्वरूपेण नाख्यातम् । ततोऽपत्यस्य पौत्रप्रभृते र्विधीयते । अतः स्वरूपेण प्रतिभासमानो न भवति गर्गस्य गोत्रसंज्ञायाः प्रसङ्गः । गर्गस्य पौत्रप्रभृतीति । गर्गसम्बन्धि पौत्राद्यपत्यं गार्ग्य इति गोत्रसंज्ञायां सत्यां गोत्रे कुञ्जादिभ्यश्चफञि-(४।१।९८) त्यतो गोत्र इत्यनुवर्त्तमाने गर्गादिभ्यो यञिति (४।१।१०५) गोत्रे ऽपत्ये यञ्

भवति। अपत्यमिति व्यपदेशोऽयमिति। संज्ञिन इति शेषः। तच्चोत्तर-सूत्र इत्यभिप्रायः। इह तु पौत्रस्यापत्यत्वाव्यभिचारात् तदपत्यमेव प्रत्ययार्थैः संज्ञित्वेन विज्ञायत इति नार्थः संज्ञिव्यपदेशार्थेनापत्यग्रहणेन। उत्तरसूत्रे तु पौत्रप्रभृत्येतत् षष्ठ्यन्तं विपरिणम्य पौत्रप्रभृतेः सम्बन्धिनोऽपत्यस्य युवसंज्ञेष्यते। सा चापत्यग्रहणमन्तरेण न लभ्यते। अन्यदपि ह्यपत्यात् पौत्रप्रभृतेः सम्बन्ध्यस्ति। तत्र न ज्ञायते कस्येयं संज्ञेति? अतस्तत्र संज्ञिनो व्यपदेशाय युक्तमपत्यग्रहणमित्येके। इह तु संज्ञिव्यपदेशार्थं युक्तमपत्यग्रहणं पश्यामः। असति ह्यपत्यग्रहणे सम्बन्धिशब्दत्वादपत्यशब्दस्येत्यादि यदुक्तं चोद्यनिरासाय तदघटमानं स्यात्। ततश्च गर्गस्यापि गोत्रसंज्ञा स्यादेव। तस्मादिहापि संज्ञिव्यपदेशायापत्यग्रहणं कर्त्तव्यमेवापत्यरूपेण प्रतिभासमानस्य संज्ञा यथा स्यात्। अन्यस्य मा भूदिति। ननु च यदेव तत्प्रकृतमपत्यग्रहणं तदेव संज्ञिव्यपदेशाय भविष्यति। तत् किमपरेणापत्यग्रहणेन? नैतदस्ति। तद्धि प्रत्ययार्थतया प्रकृतं कथं संज्ञिनो व्यपदेशाय स्यात्? स्यादेतत्। यद्यपि तत्प्रत्ययार्थे कृतं तथापि तस्येहानुवृत्तस्य तत्प्रयोजनं नास्तीत्यतः संज्ञिव्यपदेशाय विज्ञास्यत इति। एतच्च नास्ति। उत्तरार्थं ह्यधिकाराणामनुवृत्तिरिष्यते। व्याख्यानञ्चैवं कर्त्तव्यं स्यात्। व्याख्यानाच्च वचनमेव लघुतरमित्यपत्यग्रहणं कर्त्तव्यम्। कौञ्जिः। गार्गिरिति। अनन्तरस्य गोत्रसंज्ञाया अभावाद् गोत्रे कुञ्जादिभ्यश्च्फञ् (४।१।९८) गर्गादिभ्यो यञिति (४।१।१०५) यश्च गोत्रे विधीयमानो न स भवति।

## १६३। जीवति तु वंश्ये युवा।

अभिजनप्रबन्ध इति। अभिजनाः पितामहादयः। प्रबन्धः सन्तानः। तत्र भवो वंश्य इति दिगादित्वाद् यत्। पौत्रप्रभृत्यपत्यमिति षष्ठीसमासः। पौत्रप्रभृतीति चेत्यादि। यदि पौत्रप्रभृतीत्येतत् सामानाधिकरण्येनापत्यं विशेषयेत् पौत्रप्रभृति यदपत्यमिति तदारभ्य युवसंज्ञा स्यात्। तच्चानिष्टम्। तस्मान्नैतत् सामानाधिकरण्येनापत्यस्य विशेषणम्। किं तर्हि? अर्थाद् विभक्तिविपरिणामे कृते षष्ठ्यन्ततामापन्नं वैयधिकरण्येन पौत्रप्रभृतेर्यदपत्य-

मिति । तथा सति यदिष्टं सम्पद्यते तद् दर्शयितुमाह तेनेत्यादि । यत एवं विभक्तिविपरिणामे कृते पौत्रप्रभृतीत्यनेन षष्ठ्यन्तेनापत्यं विशेष्यते तेन चतुर्थादारभ्य युवसंज्ञा विधीयते । तस्य च विभक्तिपरिणामस्यापत्यं हेतुः । अपत्यशब्दो हि सम्बन्धिशब्दत्वाद्गोत्वाद्यपेक्षते । तत्र षष्ठ्या हेतुर्भवति । सन्निहितत्वाच्च । पौत्रप्रभृति तस्येत्येतदेवापेक्षते । ततस्तत्रैव षष्ठीं प्रकल्पयति यदि तर्ह्यपत्यग्रहणसामर्थ्यात् पौत्रप्रभृतेः षष्ठीविपरिणामो भवति । पूर्वसूत्रेऽपि कस्मान्न भवति ? तत्र प्रथमाया अनवकाशत्वात् । पूर्वसूत्रे कृतार्था प्रथमा । ततो न शक्यते तस्याः षष्ठीं विपरिणमयितुम् । इह तु कृतार्था शक्यते षष्ठीभावेन विपरिणमयितुम् । गार्ग्यायण इति । इह युवसंज्ञायां सत्यां गोत्राद् यून्यस्त्रियामिति (४।१।९४) गोत्रप्रत्ययान्ताद् यूनि प्रत्ययो भवति । तुशब्दोऽवधारणार्थ इति । कः पुनः संज्ञासमावेशे दोषः कथ्यते ? शालङ्केरपत्यं युवा यञिञोश्चेति (४।१।१०१) फक् । पैलस्यापत्यं युवा इणो इञश्च (४।१।१५६) इति फिञ् । तयोः पैलादिभ्यश्चेति (२।४।५९) लुगुच्यते । शालङ्कियुवा पैलो युवेति । यदि च गोत्रयुवसंज्ञयोः समावेशः स्यात् तदा शालङ्कीयं नष्कात्रा इत्यर्थविवक्षायां प्रागदीव्यतीयेऽजादौ प्रत्यये विषयभूते गोत्राश्रयो गोत्रेऽलुगचीत्यलुक् (४।१।८९) स्यात् । ततस्तस्माद् यूनो गोत्रसंज्ञा मा भूदित्यवधारणार्थस्तुशब्दः क्रियते ।

## १६४ । भ्रातरि च ज्यायसि ।

भ्रातृशब्दस्य सम्बन्धिशब्दत्वाद् यदपेक्षं भ्रातृत्वं तमेव भ्रातरं संनिधिसंनिधानोपक्षिपति । ज्यायानिति । प्रशस्यतरो वृद्धतरश्चाभिधीयते । तस्य च ज्यायस्त्वं गुणैर्वयसा वा । युवानं प्रतियोगिनमपेक्ष्य भवतीति स एव ज्यायसीत्यनेन प्रतियोगी प्रत्युपस्थाप्यते । तेन भ्रातुरेव कनीयसः संज्ञा विज्ञास्यत इति मत्वाह कनीयान् भ्राता युवसंज्ञो भवतीति । पूर्वजा इत्यादिना ऽवंश्यार्थतामारभ्य समर्थ्यते । अकारणत्वादित्यनेनापि भ्रातुरवंश्यत्वम् । यो हि साक्षात् पारम्पर्येण वा कारणं स वंश्यः । न च भ्राता कारणम् । तस्मादसौ वंश्यो न भवतीति । गार्ग्ये जीवति भ्रातरि जीवती-

त्यर्थः। एवं वात्स्ये जीवति वात्स्यायनोऽस्य कनीयान् भ्राता। दाक्षौ जीवति दाक्षायणोऽस्य कनीयान् भ्राता वेदितव्यः।

## १६५। वान्यस्मिन् सपिण्डे स्थविरतरे जीवति।

सप्तमपुरुषावधय इति। सप्तमः पुरुषोऽवधिर्येषां सपिण्डानां ते तथोक्ताः समानपिण्डाः। निपातनात् सभावः। समानस्येति (६।३।८४) योगविभागाद्वा। तस्य च योगविभागस्यैतन्निपातनं लिङ्गम्। तेन सपिण्डाः शास्त्रेष्वा सप्तमात् पुरुषात्। परेण ये ते सपिण्डा नोच्यन्ते। येषामित्यस्याधिकार इति परेण सम्बन्धः। उभयत्रेति। जन्मनि मरणे च। इतेरवमादिकायामिति। आदिशब्देन निवृत्त्यादिकाः क्रियाश्च गृह्यन्ते। तथाचोक्तम्—

उभयत्र दशाहानि कुलस्यान्नं न भुज्यते।
दानं प्रतिग्रहो यज्ञः स्वाध्यायश्च निवर्त्तते ॥ १ ॥ इति

जीवतीति। सप्तम्येकवचनमेतत्। प्रथमायाश्च स्थाने सुब्व्यत्ययेन सप्तमी विहिता। अतएवाह जीवद्वेति। तरम्निर्देश इत्यादि। असति हि तरम्निर्देशे स्थविरशब्दाद् वयःप्रकर्षमात्रं गम्यते। तरपा तु स्थानप्रकर्षोऽपि गम्यते। तस्मादुभयोरुत्कर्षार्थं स्तरम्निर्देशः कृतः। पितृव्ये पितामहे भ्रातरि चेति। द्वावप्येतौ स्थानत उत्कृष्टौ। स्थानशब्देन चेह सम्बन्धविशेष उच्यते। अनेकार्था वाङ्घातूनाम्। गार्ग्य एव भवतीति। न गार्ग्यायणः। युवसंज्ञायामसत्यां युवप्रत्ययस्य फको ऽनुत्पत्तेः। मृत इति। स्थविरतरे सपिण्डे। मृतो वेति। पौत्रप्रभृतिरप्यत्र मृतोऽर्थः।

## १६६। वृद्धस्य च पूजायाम्।

अपत्यमन्तर्हितमित्यादिना शास्त्रान्तरेण परिभाषितं यद् वृद्धं तत् परिगृह्यते। नतु यदिह शास्त्रे परिभाषितं तदिति दर्शयति। कुतः पुनरेतदवगतं शास्त्रान्तरपरिभाषितमिह वृद्धं गृह्यत इति? अपत्याधिकारात्। शब्दात्मकस्य वृद्धस्यापत्यत्वासम्भवाद् विज्ञायते। पूजायां गम्यमानायामिति। का पुनरिह पूजा विवक्षिता? युवत्वमेव। तद्धि लोके सर्वप्राणिनामभिमतम्। ननु च नेह युवशब्दो वयःपदार्थको गृह्यते। किं तर्हि? संज्ञापदार्थकः।

तत् कथं ह्यनेन पूजा ? नैष दोषः । पूजाग्रहणसामर्थ्याद्धि वयःपदार्थक एवायं युवशब्दो गोत्रे वर्त्तिष्यते । संज्ञासामर्थ्यादित्यादिना संज्ञाप्रणयनस्य प्रयोजनं दर्शयति । गोत्रप्रत्ययेनाभिहितमपि गोत्रम् । संज्ञासामर्थ्यात् पुनर्युवप्रत्ययो विधीयते । गार्ग्यायण इति । अथ किमर्थं वृद्धस्येति षष्ठ्या निर्देशः क्रियते ? न वृद्धमिति प्रथमान्तं निर्दिश्यते ? एवं हि लघु सूत्रं भवतीत्याह वृद्धस्येत्यादि । इतिकरणो हेतौ । यस्माद् विचित्रा सूत्रस्य कृतिस्तस्माद् वृद्धस्येति षष्ठ्या निर्देशः । एवं हि सूत्रे कृते वैचित्र्यं सम्भवतीत्यभिप्रायः । तत्रभवान् गार्ग्यायण इति । तत्रभवच्छब्दस्य पूजावचनस्य प्रयोगेण पूजां गमयतीति ।

## १६७ । यूनश्च कुत्सायाम् ।

ननु च युवसंज्ञा पूर्वमेवाभिनिर्वृत्ता यदाह यूनश्चेति । न ह्यसत्यां तस्यामयं निर्देश उपपद्यते । तदभिनिर्वृत्ताया स्तस्याः पुनर्विकल्पेन विधानमनुपपन्नमित्यत आह निवृत्तिप्रधानो विकल्प इति । नायं विधिप्रधानो विकल्पः । किं तर्हि ? प्रतिषेधप्रधानः । प्रतिषेधप्रतिपादनपर इत्यर्थः । सिद्धायां संज्ञायां विधानं नोपपद्यत इति सामर्थ्यादनेन पक्षे निवृत्तिः क्रियत इति विज्ञायते । यद्येवं पक्षे युवसंज्ञायां प्रतिषिद्धायां गोत्रसंज्ञा वक्तव्या । अन्यथा यूनो गोत्रप्रत्ययेनाभिधानं न स्यादित्यत आह युवसंज्ञायामित्यादि । गोत्रसंज्ञाया युवसंज्ञा प्रतिपक्षः प्रत्यनीकः । सा चेन्निवृत्ता गोत्रसंज्ञैव प्रवर्त्तते । प्रतिपक्षाभावात् । अतो न वक्तव्येति भावः । गार्ग्यो जाल्म इति । जाल्मशब्दस्य कुत्सावचनस्य प्रयोगेण कुत्सां गमयति । कुत्सा पुनरिह यूनो वृद्धतयाभिधानस्यैवानभिमतत्वात् । अतएवाकुत्सिते युवेति वाक्यार्थं पदमन्वाख्यायते । सा च कुत्सा यान्या वा तनो वेति विशेषो नाश्रीयते यथा कत्रादिविषये देवदत्तादीनाम् ।

## १६८ । जनपदशब्दात् क्षत्रियादञ् ।

जनपदवृत्तिशब्दः पञ्चालादिर्जनपद इत्युक्तः । क्षत्रियवृत्तिः क्षत्रिय इत्यभिधानेऽभिधेयोपचारात् साहचर्याद्वा । ननु पञ्चालादयः शब्दाः

क्षत्रियशब्दाः । ते तस्य निवास इति (४।२।६९) तद्धितं कृतं तस्य जनपदे लुबिति (४।२।८१) लुपि च जनपदे वर्त्तन्ते । तत् कथमवरकालया जनपद-शब्दतया नित्याः क्षत्रियशब्दा विशेष्यन्ते ? कथं पुनः क्षत्रियसम्बन्धादेते जनपदे वर्त्तन्त इत्येतदभिधातुमर्हति विद्वान् । सूत्रकारेण हि तदशिष्यं संज्ञाप्रमाणत्वाल्लुब्योगाप्रख्यानादिति (१।२।५३-५४) युक्तवद्भावं लुपश्च प्रत्यादिशता जनपदे क्षत्रियेष्विव स्वत एव पञ्चालादिशब्दस्य वृत्तिरुक्ता । यथा शब्दा नित्यास्तथा पञ्चालादिरपि जनपद इति कुतो जनपद-वचनात्ताया अवरकालता ? पाञ्चाल इत्यादि । पञ्चालादयः शब्दा देशे सन्तः क्षत्रियवाचिनोऽपि भवन्ति स्वभावत एव । तेभ्योऽपत्यार्थेऽञ् । ऐक्ष्वाक इति । इक्ष्वाकुशब्दस्य दाण्डिनायनहास्तिनायनेत्यादौ सूत्र (६।४।१७४) उकारलोपो निपातितः । द्रौह्यव इति । द्रुह्युशब्दः क्षत्रियवचन एव । न जनपदशब्दः । तेनाणेव भवति । पाञ्चालिवैदेहिरिति । इह पञ्चाल-विदेहशब्दौ भवतो जनपदशब्दौ । ननु क्षत्रियवचनौ । अपि तु ब्राह्मण-वचनौ । तेनेञेव भवति । क्षत्रियसमानशब्दादित्यादि । क्षत्रियवचन एव शब्द उपचारेण क्षत्रिय इत्युक्तः । जनपदशब्दो जनपद इति । क्षत्रियेण समानःशब्दो यस्य स तथोक्तः । तस्मात् क्षत्रियसमानशब्दादस्येति षष्ठी-समर्थाद् राजन्यभिधेयेऽपत्यवत् प्रत्ययोत्पत्तिरिति वक्तव्यम् । अवृद्धादपि बहुवचनविषयादिति (४।२।१२५) प्राप्तस्य वुञोऽपवादः । यथा पञ्चालस्या-पत्यमित्यत्र भवति पाञ्चालस्तथा पञ्चालानां राजा पाञ्चाल इत्यत्रापि भवति । मागध इति । यथा मगधशब्दादपत्ये द्व्यञ्मगधेत्यादिनाण् (४।१।१७०) भवति तथा तस्य राजत्यत्रापि ।

१६९ । साल्वेयगान्धारिभ्याञ्च ।

१७० । द्व्यञ्मगधकलिङ्गसूरमसादण् ।

१७१ । वृद्धेत्कोशलाजादाञ्ञ्यङ् ।

वृद्धग्रहणेनेह वृद्धिर्यस्याचामादिस्तद् वृद्धमिति (१।१।७३) गृह्यते । तस्यैव हि जनपदशब्दता क्षत्रियवाचित्वं च सम्भवति । न शास्त्रान्तरपरिभाषितस्य ।

आम्बष्ठ्यः । सौवीर्य्य इति । आम्बष्ठसौवीरशब्दाभ्यां ञ्यङ् । आवन्त्यः कौन्त्य इति । अवन्तिकुन्तिशब्दाभ्यां ञ्यङ् । कौमार इत्यत्राञ् भवति । अण् वक्तव्य इति । क्षत्रियञ्यङोऽपवाद इति । उकार श्छिलोपार्थ इति । स च वान्यस्मिन् सपिण्ड इत्यतो (४।१।१६५) मण्डूकप्लुतिन्यायेन वेत्यनुवृत्तेर्लभ्यते । तथैवमति-प्रसङ्गो भवति । व्यवस्थितविभाषात्वात् स न भविष्यति । अन्यस्मात् पाण्डव इति । यः पाण्डुशब्दः क्षत्रिये वर्त्तते तस्मादौत्सर्गिकेऽणि कृते पाण्डव इति भवति ।

## १७२ । कुरुनादिभ्यो ण्यः ।

अञणोरपवादः । कुरुशब्दस्य तु ह्रस्वलक्षणस्याणः । कुरुशब्दात् कुर्वादिभ्यो ण्य इति (४।१।१५१) पूर्वमपत्ये उक्तः । तस्य यो जनपदशब्दः क्षत्रियो न भवति सोऽवकाशः । यस्तु जनपदशब्दः क्षत्रियस्तस्मात् परत्वादञि प्राप्ते तदपवादो ह्रस्वलक्षणोऽण् स्यात् । अतस्तं बाधितुं पुनर्ण्यो विधीयते ।

## १७३ । साल्वावयवप्रत्यग्रथकलकूटाश्मकादिञ् ।

अणपीष्यत इति । तन्नामिकालक्षणः । कुतो विज्ञायते ? साल्व इति निपातनात् । तदवयवा जनपदानां वाचकाः क्षत्रियाणां समाना भवन्ति । अतस्तेऽप्यौपचारिकं साल्वापदेशमासादयन्ति ।

## १७४ । ते तद्राजाः ।

गोत्रयुवसंज्ञाकाण्डेन व्यवहितत्वादिति । गोत्रयुवसंज्ञाप्रकरणं हि यद-स्मात् व्यवधायकं कृतं तस्यैतदेव प्रयोजनम् । तेन ये व्यवहिताः पूर्वेऽणादय स्तेषां ते तद्राजा इत्यत्र सर्वनाम्ना प्रत्यवमर्शो मा भूदिति । तथाचैवोदा-हृतम् । तद्राजस्य बहुषु तेनैवास्त्रियामित्यत्र (२।४।६२) कार्य्याश्रयमुदाहृतम् । इह तु प्रकरणे रूपाश्रयम् ।

## १७५ । कम्बोजाल्लुक् ।

चोलः शक इति । ह्रस्वमगधलक्षणस्याणो (४।१।१७०) लुक् । केरल इत्यञः ।

## १७६ । स्त्रियामवन्तिकुन्तिकुरुभ्यश्च ।

अवन्ती । कुन्तीति । तद्धितलुकि कृत इतो मनुष्यजातेरिति (४।१।६५) ङीष् । कुरूरिति । ऊङुतः (४।१।६६) ।

## १७७ । अतश्च ।

तकारो विस्पष्टार्थ इति । तकारे ह्यसतश्चेति निर्देशेन भवितव्यम् । ततश्च समानत्वात् निर्देशस्य सन्देहः स्यात् किमयमवर्णस्य निर्देश आहो-स्विदिदम इति । तकारे तु सत्येष दोषो न भवति । तपरस्य वर्णेष्वेव प्रसिद्धत्वात् । दीर्घनिवृत्त्यर्थस्तु तकारो न भवति । दीर्घस्यासम्भवात् । सूरसेनी । मद्रीति । सूरसेनशब्दाद् योऽञ् मद्रशब्दाद् यो द्व्यञ्लक्षणोऽण् तयो-र्लुकि कृते जातेरस्त्रीविषयादयोपधादिति (४।१।६३) ङीष् । दरदिति । दरच्छब्दाद् द्व्यञ्मगधलक्षणस्याणो (४।१।१७०) लुक् । यद्यत इति वर्णस्येदं ग्रहणमेवं सति वर्णग्रहणं तदन्तविधिं प्रयोजयतीतीहापि प्राप्नोतयाम्बष्ठ्या सौवीर्या इति । अतआह अवन्त्यादिभ्यो लुगित्यादि । यद्यत तदन्तविधिः स्यादवन्त्यादिभ्यो लुग्वचनमनर्थकं स्यात् । अनेनैव सिद्धत्वात् । तदन्तवि-धावसतश्कारग्रहणमात्रेण न सिध्यतीत्यवन्त्यादिभ्यो लुग्वचनमर्थवद् भवति ।

## १७८ । न प्राच्यभर्गादियौधेयादिभ्यः ।

पाञ्चाली वैदेहीति । जनपदशब्दादित्यादिनाञ् (४।१।१६८) । शार्ङ्गर-वाद्यञो ङीन् (४।१।७३) । आङ्गी मागधीति । द्व्यञ्मगधेत्यादिनाण् (४।१।१७०) । जातेरस्त्रीविषयादयोपधादिति (४।१।६३) ङीष् । भर्गशाल्व-शब्दाभ्यां द्व्यञ्मगधलक्षणोऽण् । (४।१।१७०) शेषेभ्यस्त्वञ् । भार्गीत्यादौ पूर्ववत् ङीष् । यौधेयी शौभ्रेयी शौभ्रेयीति । यौधेयशौभ्रेयशौभ्रेयशब्देभ्यः स्वार्थे पर्श्वादियौधेयादिभ्योऽणञा (५।३।११७) वित्यण् । भार्गीत्यादौ पूर्ववत् ङीष् । कस्य पुनरित्यादि । येनाभिप्रायेण पृष्टवान् तं कथमित्यादिनाविष्करोति । पर्श्वादीत्यादि । पर्शुः क्षत्रियो जनपदेन समानशब्दः । तस्यापत्यं स्त्रीत्व-विशिष्टम् । द्व्यञ्मगधेत्यादिनाण् (४।१।१७०) । तस्यातश्चेति (४।१।१७७)

लुक् । पर्श्वादियौधेयादिभ्योऽणञावित्यनेनापि (५।३।११७) यः स्वार्थिकोऽण् तस्यापि लुक् । एवं रक्षाः । असुरशब्दाज्जनपदशब्दादित्यादिनाञ् (४।१।१६८) । तदन्तात् पूर्ववत् स्वार्थिकोऽण् । तयोर्लुक् । तथाचेत्यादिना ज्ञापकमेव भाष्यकारमतेन द्रढ़यति ।

इति बोधिसत्त्वदेशीयाचार्य्यश्रीजिनेन्द्रबुद्धिपादविरचितायां
काशिकाविवरणपञ्जिकायां चतुर्थस्याध्यायस्य
प्रथमः पादः समाप्तः ॥ ४।१ ॥

अथ

# काशिकाविवरणपञ्जिका।

## चतुर्थोऽध्यायः।

## द्वितीयः पादः।

———:o:———

### १। तेन रक्तं रागात्।

रञ्जिरयमस्त्येवानुरागे द्वेषे रक्तः स्त्रियां रक्त इति। अस्ति च वर्णविशेषे रक्तो गौरिति। लोहित इत्यर्थः। अस्ति शुक्लस्य वर्णान्तरापादने रक्तः पट इति। शुक्लमपनीय रक्तादिकं वर्णान्तरमापादित इत्यर्थः। इह तृतीयेऽर्थे वर्त्तमानो गृह्यते यदाह शुक्लस्येत्यादि। रागशब्दोऽयमस्त्येव भावसाधनः। अस्ति च करणसाधनः। ततेह द्वितीयो गृह्यते यदाह रज्यतेऽनेनेति राग इति। रागग्रहणेन चार्थस्य ग्रहणम्। न स्वरूपस्य। तेन रागविशेषवाचिनः प्रातिपदिकात् प्रत्ययो विज्ञायते। ननु रागशब्दादेवेत्यत आह रागविशेषवाचिनः प्रातिपदिकादिति। अथ स्वरूपग्रहणं कस्मान्न भवति? अर्थपरत्वान्निर्देशस्य। यत्र शब्दपरो निर्देशस्तत्र स्वरूपं गृह्यते। न यत्रार्थपरो निर्देश इति प्राक् प्रतिपादितमेव। अर्थपरत्वञ्च निर्देशस्याविच्छिन्नाचार्य्यपारम्पर्य्योपदेशाद् गम्यते। यदि तर्हि शुक्लस्य वर्णान्तरापादनं रञ्जेरिहार्थः काषायौ गर्द्दभस्य कर्णौ हारिद्रौ कुक्कुटस्य पादाविति न सिध्येत्। न ह्यत्र शुक्लस्य वर्णान्तरापादनमित्यभिप्रायेणाह कथमिति। उपमानादित्यादि परिहारः। यथा गौर्वाहीक इत्युपमानाद् गोशब्दोऽर्थान्तरे वाहीके वर्त्तते तथेहापि काषायादिशब्दो गर्द्दभकर्णादाविति भावः।

२ । लाक्षारोचनाशकलकर्दमाट् ठक् ।

शकलकर्दमाभ्यामणपीष्यत इति । स च वान्यस्मिन् सपिण्ड इत्यतो (४।१।१६५) मण्डूकप्लुतिन्यायेन वाग्रहणानुवृत्तेर्लभ्यते । न चैवं सत्यतिप्रसङ्गो भवति । व्यवस्थितविभाषाविज्ञानात् ।

३ । नक्षत्रेण युक्तः कालः ।

इह कालं क्रियात्मानं केचिदिच्छन्ति । अपरे द्रव्यात्मानमाकाशादि-कल्पम् । दर्शनद्वयमपि चैतदिहाश्रयितुमयुक्तम् । पूर्वस्मिन् दर्शने समाश्रीयमाणे सूर्यादिद्रव्यान्तरस्थाया वा क्रियाया नक्षत्रेण योगः स्यात् ? आत्मस्थाया वा ? पूर्वस्यास्तावन्न सम्भवति । अर्थान्तरासमवायात् । अन्यथा ह्याकाशादयोऽपि क्रियावन्तः स्युः । नह्यर्थान्तरसमवायिन्या अपि क्रियाया द्रव्यान्तरेण योगः स्यात् । आत्मस्थायास्तु क्रियाया विद्यते नक्षत्रेण योगः । किन्तु युक्तग्रहणं विशेषणं नोपपद्यते । व्यवच्छेद्याभावात् । नहि पुष्यादिस्थायाः कालस्य पुष्यादिभिः कदाचिद् योगो युज्यते यद्व्यवच्छेदार्थं युक्तग्रहणं क्रियते । एवं तावत् क्रिया काल इत्येतद् दर्शनमत्राश्रयितुमयुक्तम् । द्वितीयमप्ययुक्तमेव । यस्मात् कालविशेषावधारणहेतुरिह योगोऽभिप्रेतः । तथाहि कालविशेषावधारणार्थमेव पौषीत्यादि लोके प्रयुज्यते । स चैवंविधो योगस्तयोरेव भवतीति ययोः सन्निकर्षविप्रकर्षौ स्तो यथा पुष्यचन्द्रमसोः । तयोर्हि कदाचित् सन्निकर्षो भवति । कदाचिद्विप्रकर्षः । न च नक्षत्र-कालयोः कदाचित् सन्निकर्षविप्रकर्षौ स्तः । तयोर्नित्यत्वादित्येतच्चेतसि कृत्वाह कथं पुनरित्यादि । न कथञ्चिदित्यभिप्रायः । नक्षत्रनिकटवर्त्तिनि चन्द्रमसि वर्त्तमानः सूत्रे नक्षत्रशब्द उपात्त इत्येतत् सूचयन्नाह पुष्यादिसमीपस्थ इत्यादि । यथैव हि सामीप्याद् गङ्गायां घोष इति गङ्गासमीपस्थे देशे गङ्गाशब्दो वर्त्तते तथेहापि पुष्यादयो नक्षत्रविशेषवाचिनः शब्दाः पुष्यादि-समीपस्थे चन्द्रमसि वर्त्तन्ते । तेन तत्रैव ते वर्त्तमानाः प्रत्ययमुत्पादयन्ति । तेन पुष्यादिसमीपस्थचन्द्रमसा कालस्य विशेषावधारणहेतुर्योग उपपद्यते । तदवस्थस्य चन्द्रमसः कादाचित्कत्वात् । पुष्यसमीपस्थेन चन्द्रमसा युक्त

इत्यर्थः। तदवस्थे चन्द्रमसि पुष्यशब्दस्य वृत्तिः। पौषीति। सूर्य्यतिष्यागस्त्यमत्स्यानां य उपधाया इत्यत्र (४।१।१५८) तिष्यपुष्ययो र्नक्षत्राणि यलोप इति वचनाद् यलोपः।

४। लुबविशेषे।

यद्यविशेषे लुब् भवतीहापि प्राप्नोति पौषी रात्रिः पौषमहरिति। अत्राप्यविशेषो गम्यत एव। तथाहि पौषी रात्रिरित्युक्ते ऽद्य श्वो वेति विशेषो न गम्यत इत्यत आह नचेत् नक्षत्रयुक्तस्येत्यादि। एवं मन्यते। नक्षत्रेण युक्तः काल (४।२।३) इत्यनुवर्त्तते। तेन तद्विशेष एव न भवतीति। रात्र्यादिविशेष इति। आदिशब्देनाहर्मुहूर्त्तौ लव इत्येते विशेषा गृह्यन्ते। यावानित्यादि। अनन्तरोक्तमेवार्थं विस्पष्टीकरोति। कियांश्च कालो नक्षत्रेण युज्यते? अहोरात्रः। तदेवं यावान् कालो नक्षत्रेण युज्यते तस्याविशेषे गम्यमाने लुपा भवितव्यम्। तेन च पौषी रात्रिः पौषमहरित्यत्र यावान् कालो नक्षत्रेण युक्तस्तस्याविशेषो न गम्यते। अपि तु तदेकदेशस्य रात्रे रह्नो वेति नायं लुपो विषयः। यद्येवं प्रत्ययस्यापि कथमेकदेशो विषयः? समुदायद्वारेण तदन्तःपातिनो गृह्यन्ते। एकदेशानामपि योगात् पूर्वेण प्रत्ययोत्पत्तिः सिद्धा भवति। पुनरिहावयवस्यैकदेशो लुपो विषय इति। इह तर्हि प्राप्नोति। पौषोऽहोरात्र इति। अत्र यावान् कालो नक्षत्रेण युक्तस्तस्याविशेषो गम्यते। तथाह्यहोरात्र इत्युक्ते न ज्ञायते किमतीतोऽथानागतोऽथ वर्त्तमान इति। नैष दोषः। अविशेष इति प्रसज्यप्रतिषेधोऽयम्। तेन नक्षत्रयुक्तस्य कालस्य यत्र विशेषो रात्र्यादिस्तत्र न लुब् भवतीति ज्ञायते। नतु यत्राविशेषः। तत्र तु लुब् भवतीति।

५। संज्ञायां श्रवणाश्वत्थाभ्याम्।

लुपि युक्तवद्भावः कस्मान्न भवतीति? यदि स्यात् श्रवणशब्दस्य पुंलिङ्गता स्यात्। निपातनादित्यादिना परिहारः। गतार्थः।

६। द्वन्द्वाच्छः।

नक्षत्रग्रहणं यत्प्रकृतं तदिहार्थात् षष्ठ्यन्तं विपरिणम्यते। तेन नक्षत्राणां

यो द्वन्द्वस्तस्मात् प्रत्ययो विज्ञायत इत्याह नक्षत्रद्वन्द्वादिति । विशेषे चाविशेषे चेति । अविशेषग्रहणस्य निवृत्तत्वात् । अद्य राधानुराधीयमिति । ननु चाविशेषे लुपा भवितव्यम् । तत् कथं प्रत्ययस्य श्रवणमित्याह लुपं परत्वाद् बाधत इति ।

## ७। दृष्टं साम ।

## ८। कलेर्ढक् ।

तीयादिति। द्वे स्तीय इति (५।२।५४) तीयः। त्रेः संप्रसारणञ्चेति (५।२।५५) तीयं वक्ष्यति। तदन्तात् स्वार्थे ईकग् वक्तव्यः। न विद्याया इति। विद्याया अभिधाने तीयादीकङ् न भवति। गोत्रादङ्कवदिति (४।३।८०)। यथा तस्याङ्क इत्यत्रार्थे विवक्षिते गोत्रात् प्रत्ययो भवति तेन दृष्टं साम इत्यत्रार्थे (४।२।७) विवक्षिते तथैवेष्यते। औपगवेन दृष्टं सामेति। औपगवशब्दस्तस्यापत्यमिति (४।१।९२) गोत्रप्रत्ययान्तः। गोत्रचरणाद् वुञ् भवतीति। यथौपगवस्यायमङ्क औपगवक इतत्रौपगवशब्दाद् गोत्रप्रत्ययान्तादङ्के वुञ् भवति तथा तेन दृष्टं सामित्यत्रापि। ननु च गोत्रचरणाद्वुञित्यत्र (४।३।१२३) नाङ्कार्थ उपात्तः। तत् कथमनेनाङ्कवदित्युच्यमाने वुञ् भवति? नैष दोषः। तत्राङ्कवदित्यनेन विहितस्येदमर्थो विवक्ष्यते। तेन गोत्रप्रत्ययान्ताद् यथा तस्येदमित्यत्रार्थे (४।३।१२३) प्रत्यय इष्यते तथा तेन दृष्टं सामित्यत्रापीत्यर्थः (४।२।७)। दृष्टे सामनीति संग्रहः। गतार्थः।

## ९। वामदेवाड् ड्यड्ड्यौ ।

वामदेव्यम्। वामदेव्यमिति। एकस्मिंस्तित्स्वरेणान्तस्वरितः। द्वितीयः प्रत्ययस्वरेणान्तोदात्तः। डित्करणं किमर्थमिति। यस्येति चेत्येवं (६।४।१४८) लोपस्य सिद्धत्वाड् डित्करणस्यानर्थक्यं मन्यते। ड्यड्ड्यावित्यादि। न वामदेव्यमवामदेव्यमिति। अत्र नञो गुणप्रतिषेधे सम्पाद्यर्हहितालमर्थास्तद्धिता इत्यतो ( ६।२।१५५ ) नञ इत्यनुवर्तमाने ययतोश्चातदर्थे ( ६।२।१५६ ) इत्युत्तरपदस्यान्तोदात्तत्वे विधीयमानेऽनयोर्ग्रहणम् मा भूदित्येवमर्थं डित्करणम्। असति च तत्रानयोर्ग्रहणे नञ एव स्वरो भवति। स पुनरुदात्तः। निपाता

आद्युदात्ता भवन्तीति (फिट्, ४।८०) वचनात्। अथ क्रियमाणे ङित्करणे कस्मादनयोर्ग्रहणं न भवतीत्याह निरनुबन्धकग्रहणे न सानुबन्धकस्येति परिभाषया ञ्यङ्ञ्योरपि निवृत्तिः क्रियते। यद्ग्रहणेऽप्येकानुबन्धकग्रहणे न द्व्यनुबन्धकस्येति परिभाषया यतः। अनयोश्च परिभाषयोरस्तित्व एतदेव ङित्करणं लिङ्गम्। संग्रहश्लोकेऽतदर्थे इत्यनेन ययतोश्चातदर्थे इत्येतत् सूत्रं (६।२।१५६) लभ्यते। एतस्मिन् सूत्रे इत्यर्थः। नञ्स्वर इति। नञो यः स्वरः स नञ्स्वरः। शेषो गतार्थः।

## १०। परिवृतो रथः।

चार्म्मण इति। अन्निति (६।४।१६७) प्रकृतिभावे टिलोपो न भवति। न संयोगाद् वमन्तादित्यल्लोपो (६।४।१०७) न भवति। अथेह कस्मान्न भवति च्छात्रैः परिवृतो रथ इति? अत्राह समन्ताद् वेष्टित इत्यादि। वृणोतिरयं वेष्टने वर्त्तते। तस्य परिणा सर्व्वतो भावो द्योत्यते। तस्माद् यः सर्वतो वेष्ट्यते तत्रैव प्रत्ययेन भवितव्यम्। नतु छात्रै रथः सर्वतो वेष्टितः। ततो न तत्र प्रत्ययस्य प्रसङ्गः। यस्तु च्छात्रैः परिवृतो रथ इति प्रयोगः स परिवृतस्याध्यारोपितौपचारिकः। न च मुख्ये सति परिवृतत्वे गौणस्याध्यारोपितस्य ग्रहणं युक्तम्।

## ११। पाण्डुकम्बलादिनिः।

पाण्डुकम्बलीति। सौ चेति (६।४।१३) दीर्घः। मत्वर्थीयेनैव सिद्ध इति। यद्धि येन समन्ताद् वेष्टितं तत् तस्यास्ति। तस्मादत इनिठनाविति (५।२।११५) मत्वर्थीयेनेनिना सिद्धे यत् तद्वचनं तदणो निवृत्त्यर्थम्। यदि लभ्येत तन्नारभ्येत। यदि ह्येतद्वचनं न स्यात् तदा परिवृतो रथ इत्यण् प्रसज्येत। ततश्च पाण्डुकम्बल इति स्यात्। पाण्डुकम्बलीति चेष्यते। तस्मादण्निवृत्त्यर्थमुच्यते।

## १२। द्वैपवैयाघ्रादञ्।

द्वीपिव्याघ्रयोर्विकार इत्यादि। द्वीपिनो विकारश्चर्म व्याघ्रस्य विकारश्चर्मेत्यर्थविवक्षायां प्राणिरजतादिभ्यो ऽञित्यञ्—(४।३।१५४) प्रत्ययान्तत्वात्

द्वैपवैयाघ्रशब्दयोः। ताभ्यामिह द्वीपिव्याघ्रविकारत्वाच् चर्म्मणी अभिधीयेते। चर्म्मणैव द्वीपिव्याघ्रविकारेण रथस्य परिवृतत्वं सम्भवति। न विकारमात्रेणेति चर्म्मणी इह द्वैपवैयाघ्रशब्दाभ्यां विवक्षिते इति गम्यते।

## १३। कौमारापूर्ववचने।

अपूर्ववचन इति। अपूर्वस्य वचन इति। अपूर्वाभिधान इत्यर्थः। कस्यापूर्ववचनमित्याह पाणिग्रहणस्येत्यादि। एतच्च सामान्योक्तावपि निपातनसामर्थ्याल्लभ्यते। यथैव हि निपातनसामर्थ्यादन्यदपि किञ्चिद-लाक्षणिकं कार्य्यं लभ्यते तथेदमपि। उभयतः स्त्रियामित्यादि। यदि कौमार इति पुमानभिधीयत एवमप्यस्यापूर्वत्वं यदा स्त्रिया एव विशेषणं भवति। अथापि कौमारीति स्त्र्यभिधीयत एवमप्यपूर्वत्वं यदा स्त्रिया एव विशेषणं भवति। न पुंसः। एवमेतन्निपात्यते। नान्यथेत्यर्थः। अपूर्व-पतिमिति। नास्याः पूर्वः पतिरिति बहुव्रीहिः। पत्या सह यस्याः पाणि-ग्रहणं निवृत्तं साऽपूर्वपतिः। तां पतिरुपपन्नः प्राप्तवानित्यर्थः। अपूर्व-पतिरिति। अयमपि बहुव्रीहिः। कौमारापूर्ववचन इत्यादि। कौमारइत्ये-तन्निपात्यते। अपूर्ववचने। किं पुनरिह निपात्यत इत्याह कुमार्य्या अण् विधीयत इति। कुमारीशब्दादण् निपात्यत इत्यर्थः। कदेत्याह अपूर्वत्वं यदा तस्या इति। इह हि निपातनेन पुमानभिधीयते स्त्री वा तत्र द्वयोरपि पक्षयोरपूर्वत्वम्। यदा तस्याः स्त्रिया विशेषणं भवति न पुंसस्त-देतन्निपातनम्। नान्यथेत्यर्थः। कुमार्य्यां भवतीति वेति। अनेन योगः प्रत्याख्यायते। यो हि कुमारीं प्राप्तवानसौ तत्र भवति। ततश्च तत्र भव इति (४।४।३) शैषिके भवार्थे ऽणन्तं कौमारशब्दं व्युत्पद्येत ततः पुंयोगलक्षणे ङीषि सति हि कुमारीत्येतत् सिद्धम्। स्वरकृतो विशेषो नास्त्येव। तथा-ह्यसन्तान् ङीष्यपि कृते यस्येति चेति (६।४।१४८) लोपे चानुदात्तस्य च यत्रोदात्तलोप (६।१।१६८) इत्युदात्तेन ङीपा भवितव्यम्। ङीष् प्रत्यय-स्वरेणाद्युदात्त एव। ननु चैवं सति कौमारस्य यान्यापि स्त्री कौमारव्यपदेशस्य कारणं सापि कौमारीति प्रसज्यते। नैष दोषः। प्रत्यासत्तेर्हि या तस्य

प्रत्यासन्ना सैव तस्य कौमारीति भविष्यति । का पुनस्तस्य प्रत्यासन्ना ? या कौमारे व्यपदेशस्य हेतुः । यस्यामसौ भवन् कौमार इत्युच्यते सैव । नान्या । यद्यपि व्यासादयोऽपि कुमार्य्यां भवन्ति तथापि तेष्वण् न भविष्यति । अनभिधानात् । एतच्चावश्यमनभिधानमाश्रयणीयमिति । इतरथा हि क्रियमाणेऽपि निपातने तत्र भव (४।४।३) इत्यनेनाण् स्यादेव ।

**१४ । तत्रोद्धृतममत्रेभ्यः ।**

**१५ । स्थण्डिलाच्छयितरि व्रते ।**

समुदायेन चेत्यादिना प्रकृतिप्रत्ययोपाधित्वं व्रतस्य दर्शयति । शास्त्रितशब्दो वाचि यमो व्रत इत्यत्र (३।२।४०) व्युत्पादितः (A) ।

**१६ । संस्कृतं भक्षाः ।**

संस्कृत मिति । अत्र सामान्यशब्दत्वात् संस्कृतशब्दस्य नपुंसकलिङ्गत्वम् । एकवचनत्वञ्च । भक्षा इति । विशेषशब्दत्वाद् भक्षशब्दस्य पुंलिङ्गत्वम् । बहुवचनत्वञ्च । भक्षशब्दोऽयं घञन्त उपात्तः । स च खरविशदाभ्यवहार्य्य एव रूढ इत्याह खरविशद इत्यादि । सुबोधम् ।

**१७ । शूलोखाद् यत् ।**

**१८ । दध्नष्ठक् ।**

ठकं वक्ष्यति । संस्कृतमित्यनेन (४।४।३) । तेनैव सिद्धमिति । यद् दध्नि संस्कृतं तद् दध्ना हि संस्कृतं भवतीत्यभिप्रायः । इह दध्यधिकरणमाधारभूतमिति । यथा शूले संस्क्रियमाणस्य मांसस्य शूलम् । नहि शूलेन मांसस्य कश्चित् संस्कारः क्रियते । अपि तु लवणादिना । आधारभावमात्रं तु मांसस्य शूलं प्रतिपद्यते । यदि तर्हि दधि केवलमाधारभूतं केन तत्र तर्हि संस्कारः क्रियत इत्याह द्रव्यान्तरेणेत्यादि ।

---

(A) Here too, as in 3. 2. 40, the printed काशिका has the reading शास्तत: for शास्त्रित:। But like the न्यासकार, हरदत्त also gives शास्त्रित: and explains it thus संजातशास्त्र इत्यर्थः। यद्वा तृतीयासमर्थाद् विधानेऽर्थे प्रातिपदिकाद् धात्वर्थे इति णिच्। कर्मणि क्तः। शास्त्रेण विहित इत्यर्थः।

## १९ । उदश्वितोऽन्यतरस्याम् ।

औदश्वित्कमिति । इसुसुक्तान्तात् कः (७।३।५१) ।

## २० । चोराड्ढञ् ।

चौरेयीति । टिड्ढाणञिति (४।१।१५) ङीप् ।

## २१ । सास्मिन् पौर्णमासीति संज्ञायाम् ।

ततश्चेद् विवक्षा भवतीति । तत इति प्रत्ययान्तो निर्दिश्यते । एतदुक्तं भवति । यदि प्रत्ययान्ताल्लोकेऽस्य विवक्षा भवत्येवं प्रत्ययो भवति । नान्यथे-त्यर्थः । प्रत्ययान्तेन चेत्यादिना संज्ञायाः समुदायोपाधित्वं स्पष्टीकरोति । एषा संज्ञेति या प्रत्ययान्तेन गम्यते । पौषीति । नक्षत्रेण युक्तः काल (४।२।३) इत्यण् । तदन्तान् ङीप् । इह न भवतीति । संज्ञाया अनवगम्यमानत्वात् । नहि दशरात्रस्य प्रत्ययान्तः संज्ञा । नापि भृतकमासस्य । किं तत् तुल्यं फलमित्याह प्रयोगानुसरणमिति । प्रयोगानुसरणं प्रयोगोपलक्षणमित्यर्थः । संज्ञाग्रहणं ह्येतत् क्रियते । प्रयोगमुपलक्ष्य यत्र प्रयोगो दृश्यते मासार्द्धमाससंवत्सरेषु तत्र प्रत्यय उत्पादयितव्यः । नतु भृतकमासादौ । इतिकरणेनाप्येतदेव क्रियते । तथाहि प्रत्ययान्ताद् यदि लोकस्यार्थविवक्षा भवत्येवं हि प्रत्यय उत्पा-दयितव्यः । नान्यथेति । एवमर्थमितिकरण उपादीयते । ततश्च लोक-विवक्षा मासार्द्धमाससंवत्सरविषया भवति । एवं हि न भृतकमासादि-विषया । तस्मात् प्रयोगानुसरणमुभयोरपि फलं तुल्यमेव । संज्ञेत्यादि । ननु च यथा संज्ञाशब्दः प्रयोगानुसरणफलतया लोके प्रसिद्ध स्तथेतिकरणोऽपि । तत् किमर्थमिह तस्य तेन तुल्यत्वमेव ज्ञायत इत्याह नह्ययमित्यादि । तथाहि लोकेऽयं संज्ञाशब्दः प्रयोगानुसरणफलत्वेन यथा प्रसिद्धो न तथेति-करणः । तस्मादस्य तेन तुल्यता ज्ञापितेति भावः । संज्ञार्थत्वेत्यादिना ज्ञापनस्य प्रयोजनं दर्शयति । संज्ञया तुल्योऽर्थो यस्य स संज्ञार्थः । समासेन गम्यमानत्वात् तुल्यशब्दो न प्रयुज्यते यथा रुच्यर्थानामित्यत्र (१।४।३३) रुचिना समानशब्द इति भावः । संज्ञार्थस्य भावः संज्ञार्थत्वम् । अर्थशब्दश्चायं प्रयोजन-वचनः । तदुपपन्नं भवतीति । यतएव संज्ञाशब्देनेतिकरणस्य तुल्यार्थता ज्ञापिता

तेन यत्र प्रयोगानुसरणार्थं इतिकरणं स्ततस्तत्र विवक्षा भवतीत्युच्यते। तदुपपन्नं भवतीति। इतिकरणस्य संज्ञाप्रयोजनत्वात्। पूर्णमासादणिति। पूर्णो मासो यस्यां तिथाविति तत्रार्थे बहुव्रीहिः। अस्मादेव निपातनादण्। पूर्णमासस्येयं पौर्णमासी। तस्येदमित्यण् (४।३।१२०)। तिथिविशेषस्येयं संज्ञा। व्युत्पत्तिस्तु यथा कथञ्चित् कर्त्तव्या।

२२। आग्रहायण्यश्वत्थाट् ठक्।

२३। विभाषा फाल्गुनीश्रवणाकार्त्तिकीचैत्रीभ्यः।

२४। साऽस्य देवता।

तस्मिन्नभिधेय इति। यागसम्प्रदानभूतदेवतास्वामिनीके पुरोडाशादौ। एष चाभिधेयविशेषः। सामान्योक्तावपीतीतरस्येहानुवृत्तेर्लभ्यते। आदित्यं वार्हस्पतत्रमिति। दित्यादित्यपत्युत्तरपदेत्यादिना (४।१।८५) ण्यः। यागस्य देवतेहाभिप्रेता। ऐन्द्रो मन्त्र इति च प्रयोगे कस्यचित् पुरोडाशादिकस्य देयस्याभावादिन्द्रस्य संप्रदानत्वं नास्ति। अतो नासौ देवतेति प्रत्ययेनात्र न भवितव्यमिति मन्यते। मन्त्रस्तुत्यमिति। यथा देवता पूजार्हा तथा मन्त्रस्तुत्यमपि वस्तु। ततो देवतासाधर्म्यात् तदपि देवतेत्युपचरन्ति विद्वांसः। इन्द्रश्च मन्त्रस्तुत्यो भवति। तस्मादसम्प्रदानभूतमपि तं देवतेत्युपचरन्ति। देवतोपचारं तत्र कुर्व्वन्तीत्यर्थः। नन्वेवमपि नैवात्र प्रत्ययेन भवितव्यम्। मुख्ये सति गौणस्याश्रयणस्यायुक्तत्वात्। नैष दोषः। यथैव हि कश्चिदेकेनैव यत्नेन श्वेतो धावतीति तन्त्रेण वाक्यद्वयमुच्चारयति तथेहाप्याचार्य्येण द्वे वाक्ये तन्त्रेणोच्चारिते। तत्रैकं मुख्यार्थम्। अपरं गौणार्थं भविष्यति। कथमित्यादि। अग्नेर्हि न मुख्यं देवतात्वं नापि गौणम्। तत्र मुख्यं तावन्नास्ति। देयाभावेनासंप्रदानभूतत्वात्। गौणमपि नास्ति। मन्त्रशब्दाभावेन मन्त्रस्तुततयानुपात्तत्वात्। तस्मादत्र प्रत्ययेन न भवितव्यमिति भावः। उपमानाद् भविष्यतीति। देवतास्वामिनीक एवात्र प्रत्यय उपपद्यते। यस्त्वर्थान्तरे प्रत्ययान्तप्रयोगः स आग्नेय इवाग्नेय इत्युपमानाद् भविष्यति यथा काषायौ गर्द्दभस्य कर्णाविति।

ननु च सास्मिन् पौर्णमासीति सेति प्रकृतमेव। तत् किमर्थं पुनरिह समर्थविभक्तिर्निर्दिश्यत इत्यत आह सेति प्रकृत इत्यादि। यदिदं सेति प्रकृतं तत्संज्ञासम्बद्धमिति। तदनुवृत्तौ संज्ञाग्रहणस्याप्यनुवृत्तिः स्यात्। तस्मात् तन्निवृत्त्यर्थं पुनरिह समर्थविभक्तिर्निर्दिश्यत इति।

## २५। कस्येत्।

तकारो मुखसुखार्थः। न दीर्घनिवृत्त्यर्थः। भाव्यमानेनाण्‌ सवर्णानामग्रहणात्। सत्यपि सवर्णग्रहण आन्तरतम्याद् ह्रस्वस्य ह्रस्व एव भविष्यति। न दीर्घः। प्रजापतेर्वाचक इति। अनेनासर्वनामत्वमस्य दर्शयति। इकारस्य यस्येति चेति (६।४।१४८) लोपो न भवति। विधानसामर्थ्यात्। कायमिति। वृद्धयायादेशौ।

## २६। शुक्राद् घन्।

## २७। अपोनप्त्रपान्नप्तृभ्यां घः।

अपोनपात्। अपान्नपादिति। यद्येते देवतानामधेये तत् कथमेतद्विलक्षणं प्रकृतिरूपं सूत्रे श्रूयत इत्याह तयोस्तु प्रत्ययसन्नियोगेनेत्यादि।

## २८। छ च।

अथ किमर्थं योगविभागः क्रियते? नापोनप्त्रपान्नप्तृभ्यां घच्छाविति एकयोग एव क्रियत इत्याह योगविभाग इत्यादि। एकयोगे हि द्वे प्रकृती। प्रत्ययावपि द्वावेव। समसंख्यत्वात् संख्यातानुदेशः स्यात्। अतस्तन्निवृत्तये योगविभागः क्रियते। छप्रकरण इत्यादि। पैङ्गाक्षीपुत्रादिभ्यश्छप्रकरणे छस्योपसंख्यानं प्रतिपादनं कर्त्तव्यम्। तत्रेदं प्रतिपादनम्। चकारोऽत्र क्रियते। स चानुक्तसमुच्चयार्थः। तेन पैङ्गाक्षीपुत्रादिभ्यश्छो भवतीति।

## २९। महेन्द्राद् घाणौ च।

अथ महेन्द्रादण् चेत्येव कस्मान्नोक्तम्? चकाराद् घच्छौ भविष्यतः।

एवमुच्यमाने द्वेष्यमपि विज्ञायते । अनन्तरं छ एव चकारेणानुकृष्यत इति । तस्मात् तथा मा विज्ञायीति यग्रहणम् ।

३० । सोमाट्ट्यण् ।

सौमीति । हलस्तद्धितस्येति (६।४।१५०) यलोपः ।

३१ । वाय्वृतुपित्रुषसो यत् ।

वायव्यम् । ऋतव्यमिति । ओर्गुणः (६।४।१४६) । वान्तो यि प्रत्यय (६।१।७९) इत्यवादेशः । पित्र्यमिति । रीङृत इति (७।४।२७) रीङ् । यस्येति (६।४।४८) लोपः ।

३२ । द्यावापृथिवीशुनासीरमरुत्वदग्नीषोमवास्तोष्पति-गृहमेधाच्छ च ।

अणो ण्यस्य चापवाद इति । वास्तोष्पतिशब्दाद् दित्यादित्येत्यादिना (४।१।८५) प्राप्तस्य ण्यस्यायमपवादः । शेषेभ्यस्त्वौत्सर्गिकस्याणः । वास्तुनः पति र्वास्तोष्पतिः । वास्तुशब्दस्य नपुंसकस्य पुंल्लिङ्गता षष्ठ्यर्थेऽलुक् च निपातनात् । षष्ठ्याः पतिपुत्रपृष्ठेत्यादिना (८।३।५३) षत्वम् । द्यावापृथिव्याविति । दिवो द्यावितिति (६।३।२९) द्यावादेशः । शुनासीरीयमिति । देवताद्वन्द्वे चेत्यानङ् (६।३।२६) । अग्नीषोमीयमिति । ईदग्नेः सोमवरुणयोरितीत्त्वम् (६।३।२७) । अग्नेः स्तुत्स्तोमसमा (८।३।८२) इति षत्वम् ।

३३ । अग्नेर्ढक् ।

३४ । कालेभ्यो भववत् ।

बहुवचनग्रहणेन स्वरूपग्रहणे निरस्ते । कालविशेषवाचिभ्यः प्रत्ययो विज्ञायत इत्याह कालविशेषवाचिभ्य इत्यादि । वत्करणमित्यादि । सर्वस्य साद्दश्यस्य परिग्रहो यथा स्यादित्येवमर्थं वत्करणम् । कालेभ्यो भव इत्युच्यमाने यदि तावत् कालग्रहणं भवप्रत्ययैः सम्बध्यते भवेऽर्थे कालेभ्यो विधास्यन्ते ये प्रत्ययास्ते सास्य देवतेत्येतस्मिन्नर्थे (४।२।२४) भवन्ति तदा च देवताप्रकृतिरविशेषिता स्यात् । एवञ्च देवतामात्रवाचिनः प्रातिपदिकादविशेषेण प्रत्ययाः प्रसज्येरन् । अथ देवताप्रकृतिभिः कालग्रहणं सम्बध्यते भवे ये

विधास्यन्ते ते प्रत्यया: कालेभ्यो देवताभ्य: प्रसज्येरन् । अथाप्युभयेषां सन्निधानाद् विशेष्यभेदेन वाक्यभेदाच्च प्रत्ययै: प्रकृतिभिश्च सम्बध्यते । कालेभ्यो भवेऽर्थे विधास्यन्ते ये प्रत्ययास्ते कालेभ्यो देवताभ्यो भवन्तीत्येवमपि य: कश्चित् कालप्रकृति: प्रत्ययो यत: कुतश्चित् कालाद्देवताया: स्यात् । ऋतुभ्योऽण् (B) मुहूर्त्तादिभ्योऽपि स्यात् । वतौ तु सति तस्य सादृश्यविधानात् सर्वसादृश्यपरिग्रहो भवति । तेन याभ्य: प्रकृतिभ्यो येन विशेषणेन ये प्रत्यया भवार्थे विधास्यन्त इहापि ताभ्य एव प्रकृतिभ्यस्तेनैव विशेषणेन तएव प्रत्यया भवन्तीति न भवत्यनिष्टप्रसङ्ग: । वासन्त इति । सन्धिवेलादि ( ४।३।१६ ) सूत्रेणाण् । प्रावृषेण्य इति । प्रावृष एण्य: (४।३।१७) ।

## ३५ । महाराजप्रोष्ठपदाट् ठञ् ।

## ३६ । पितृव्यमातुलमातामहपितामहा: ।

पितामही मातामहीति । षिद्गौरादिभ्यश्चेति (४।१।४१) ङीष् ।

## ३७ । तस्य समूह: ।

काकम् (C) । शौकम् । वाकमिति । काकशुकवकशब्दा आद्युदात्ता: । प्राणिनां कुपूर्वाणामित्यनेन ( फिट्, १।३० ) । अस्यायमर्थ: । प्राणिविशेषवाचिनां शब्दानां य आदिभूता: कवर्गात् पूर्वे तेषामुदात्तो भवतीति ।

## ३८ । भिक्षादिभ्योऽण् ।

अथाण्ग्रहणं किमर्थम् ? न भिक्षादिभ्यो यथाविहितमेवोच्येतेत्यत आह अण्ग्रहणमित्यादि । भिक्षाशब्दोऽयं गुरोश्च हल (३।३।१०३) इत्यकारप्रत्ययान्तत्वादन्तोदात्त: । तत्रानुदात्तादेरञित्यञ् (४।२।४४) अणो बाधक: प्राप्नोति । तस्य बाधकस्य बाधनार्थमण्ग्रहणम् । ननु च यद्यत्राण् स्यात् पुनर्वचनमनर्थकं स्यात् । नैतदस्ति । परत्वादचित्तलक्षण ठक् प्राप्नोति । अतस्तद्बाधनार्थं पुनर्वचनं स्यात् । अञ्प्रत्ययस्तु स्यादेव । अण्ग्रहणात्

(B) देवताभ्योऽपीति महीशूरपुस्तके पाठ: ।

(C) कौकमिति महीशूरपुस्तके पाठ: ।

पुनरणेवेति न भवत्येष दोषः। गार्भिणमिति। गर्भिणीनां समूहो भस्त्राद्वै तद्धिते (६।३।३५, वा)। सिद्धत्वात् प्रत्ययविधाविति (४।२।३८,वा) पुंवद्भावेन स्त्रीप्रत्ययनिवृत्तिः। ततोऽण्। तस्मिन् न स्तद्धित इति (६।४।१४४) टिलोपः प्राप्तः। इनण्यनपत्य इति (६।४।१६४) प्रकृतिभावान्न भवति। तस्य ग्रहणेति। युवतिशब्दस्य यदि पुंवद्भावो न भवति तदा तस्य प्रत्ययान्तत्वादनुदात्तादेरित्यञि (४।२।४४) प्राप्ते तद्बाधनार्थमिहाण्ग्रहणमर्थवद्भवति। यदि पुंवद्भावः स्यात् तदा तदनर्थकं स्यात्। तथाहि सिद्धत्वात् प्रत्ययविधाविति (४।२।३८,वा) वचनादनुत्पन्न एव तद्धिते बुद्धिस्थे पुंवद्भावेन भवितव्यम्। युवशब्दस्य कनिन् युवृषितक्षिराजिधन्विद्युप्रतिदिव इति (उण्, १।१५४) कनिन्प्रत्ययान्तस्य नित्स्वरेणाद्युदात्तत्वम्। तत्र यदि पुंवद्भावः स्यादुत्सर्गलक्षणेनैवाण् सिद्ध इतीह ग्रहणमनर्थकं स्यात्। तस्माद् मा भूदस्यानर्थक्यमिति तस्य ग्रहणसामर्थ्यादेव पुंवद्भावो न भवति। तेन यौवतमिति सिद्धं भवति।

## ३८। गोत्रोक्षोष्ट्रोरभ्रराजराजन्यराजपुत्रवत्समनुष्याजाद् वुञ्।

अपत्याधिकारादन्यत्र लौकिकं गोत्रं गृह्यत इति। यद्येवं गोत्रग्रहणेनैतस्य सिद्धत्वाद् राजन्यमनुष्ययोरुपादानमनर्थकम्। नैतदस्ति। नहि तौ गोत्रप्रत्ययान्तौ। जातिः प्रत्ययार्थत्वात्। यद्येवं लोपस्य प्राप्तिरेव नास्ति। तत्र यदुक्तं प्रकृत्याके राजन्यमनुष्ययुवान इति (६।४।१६३, वा) यलोपो न भवतीति तदनर्थकं स्यात्। एतत् पुनरेकीयमतमाश्रित्योक्तम्। केचिदाचार्या राजन्यमनुष्ययोरपत्यप्रत्ययान्तत्वमिच्छन्ति। अतस्तन्मतमाश्रित्येतदुक्तमित्यदोषः। तन्मतेन तर्हि राजन्यमनुष्ययोर्ग्रहणमनर्थकं स्यात्। ज्ञापनार्थत्वात्। तेनैतत् ज्ञाप्यते। राजन्यमनुष्ययोर्यकारस्य किञ्चिदपत्याश्रितं कार्य्यं न भवतीति। किं पुनस्तत्? आपत्यव्यपदेशम्। तेन राजन्यकं मानुष्यकमिति। अत्राप्यपत्यस्य तद्धितेऽनातीति (६।४।१५१) यलोपो न भवतीति। तथा सूत्रोपात्त एव राजन्यमनुष्ययोः प्रकृतिभावः प्रकृत्याके राजन्यमनुष्ययुवान (६।४।१६३,वा) इत्यनेनाख्यायत इति वेदितव्यम्। वृद्धाच्चेति वक्तव्यमिति। वृद्धशब्दाद्वुञ्

भवतीत्येतदर्थरूपं व्याख्येयमित्यर्थः । तत्रेदं व्याख्यानम् । इह पुनरुत्तरसूत्राच्चकारोऽनुवर्त्तते सिंहावलोकितन्यायेन । स चानुक्तसमुच्चयार्थः । तेन वृद्धशब्दाद् वुञ् भवतीति । योगश्चायं यथायोगमणञोरपवादः ।

## ४० । कैदाराद् यञ्च ।

गणिकायाश्च यञ् वक्तव्यः । वक्तव्यो व्याख्येय इत्यर्थः । तत्रेदं व्याख्यानम् । इहाप्युत्तरसूत्राच्चकारोऽनुवर्त्तते । स चानुक्तसमुच्चयार्थः । तेन गणिकाशब्दादपि यञ् भवतीति । वुञ् न भवतीति । अनभिधानात् ।

## ४१ । ठञ् कवचिनश्च ।

कवचिन्शब्दो मत्वर्थीयेनिप्रत्ययान्तः । प्रत्ययस्वरेणान्तोदात्तः । तस्मादनुदात्तादिलक्षणेऽञि (४।२।४४) प्राप्ते वचनम् ।

## ४२ । ब्राह्मणमाणववाडवाद् यन् ।

पृष्ठादुपसंख्यानमिति । पृष्ठशब्दाद् यन्प्रत्ययस्योपसंख्यानं व्याख्यानं कर्त्तव्यमित्यर्थः । तत्रेदं व्याख्यानम् । पूर्वसूत्रादिह चकारोऽनुवर्त्तते । स चानुक्तसमुच्चयार्थः । तेन पृष्ठशब्दादपि भविष्यतीति । अह्नीन इति । अह्नष्टखोरेव (६।४।१४४) टिलोपः । आह्न इति । अल्लोपोऽन इत्यकारलोपः (६।४।१३४) । ननु चाचित्तलक्षणेन ठका भवितव्यम् । तत् कथमाह्न इति भवतीत्याह खण्डिकादिष्वित्यादि । णस् वक्तव्य इति । सकारः सिति चेति (१।४।१६) विशेषणार्थः । तेन पार्श्वमित्यत्र भत्वाभावाद्दोर्गुणो न भवति ।

## ४३ । ग्रामजनबन्धुसहायेभ्यस्तल् ।

ग्रामशब्दादचित्तलक्षणे ठकि प्राप्ते । जनशब्दो ञित्स्वरेणाद्युदात्तः । घञन्तत्वात् । तथा बन्धुशब्दोऽपि नित्स्वरेणाद्युदात्त एव । तथाहि स धान्ये निदिति ( उण्, १।९ ) वर्त्तमाने शॄस्वृस्निहित्रप्यसिवसिहनिक्लिदिबन्धिमनिभ्यश्चेत्यनेन ( उण् १।१० ) व्युत्पादित उप्रत्ययान्तः । आद्युदात्तत्वादणि प्राप्ते । सहायशब्दोऽपि लघावन्ते द्वयोश्च बह्वषो गुरुरिति ( फिट् २।४२) मध्योदात्तः । तत्रानुदात्तादेरञि (४।२।४४) प्राप्ते तलो विधानम् । गजाच्चेति

वक्तव्यमिति। गजशब्दात् तल् भवतीत्येतदर्थरूपं व्याख्येयमित्यर्थः। व्याख्यानञ्चेह चकारस्यानुवृत्तिमाश्रित्य कर्त्तव्यम्।

## ४४। अनुदात्तादेरञ्।

कापोतं मायूरमिति। कपोतमयूरशब्दौ लघावन्ते द्वयोश्च बह्वषो गुरुरिति (फिट्. २।४२) मध्योदात्तौ। तैत्तिरमिति। तित्तिरिशब्द इगुपधात् किदिति (उण्, ४।५५८) कित्प्रत्ययान्तः। तरतेः सन्वल्लुक् चाभ्यासस्येति प्रत्ययस्वरेणान्तोदात्तः। ननु च सन्वद्भावादाद्युदात्तः प्राप्नोति। उणादयो बहुलमिति (३ ३।१) बहुलवचनात् स्वरे सन्वद्भावो न भविष्यतीत्यदोषः।

## ४५। खण्डिकादिभ्यश्च।

आद्युदात्तार्थमचित्तार्थञ्च वचनमिति। असत्येतस्मिन्नाद्युदात्तेभ्योऽण् स्यात्। अचित्तेभ्योऽचित्तलक्षणष्ठक् प्रसज्येत। क्षुद्रकाश्च मालवाश्चेति क्षत्रियद्वन्द्व इति। क्षुद्रकस्यापत्यानि बहूनि। जनपदशब्दात् क्षत्रियादञ् (४।१।१६८) मालवस्यापत्यानि बहूनि। वृद्धेत्कोशलाजादाञ् ञ्यङ् (४।१।१७१)। तयोस्तद्राजस्येति (२।४।६२) बहुषु लुक्। पश्चाद् द्वन्द्वः। ततः पूर्ववाञ्ञि सिद्ध इति। समासान्तोदात्तत्वे कृते द्वन्द्वसमासस्यानुदात्तादित्वात्। वचनं गोत्रवुञो बाधनार्थम्। गोत्रोक्षोष्ट्रोरभ्रेतरादिना (४।२।३९) गोत्रलक्षणो वुञ् प्राप्नोति। तद्बाधनार्थं क्षुद्रकमालवकस्येह गणे पाठः। ननु चेतरादि। परत्वादेवाञ् वुञं बाधिष्यत इत्यतो नार्थो वुञो बाधनार्थेनानेन वचनेनेति भावः। एतच्च गोत्रत्व मभ्युपेत्योक्तम्। इदानीं गोत्रत्वमेव न भवतीति दर्शयितुमाह नचेतरादि। गोत्रसमुच्चयोऽयम्। न च गोत्रसमुदायो गोत्रग्रहणेन गृह्यते यथा जनपदसमुदायो न जनपदग्रहणेन। तथा च काशयश्च कोशलाश्च काशिकोशलाः। तेषु भवाः काशिकोशलीयाः। जनपदत्वाभावाज्जनपदतदवध्योश्चेति (४।२।१२४) वुञ् न भवति। वृद्धाच्छ (४।२।११४) एव तु भवति। स्यादेतत्। यद्यपि गोत्रसमुदायो गोत्रं न भवति तदवयवस्तु भवति। क्षुद्रकमालवकशब्दोऽवयवो गोत्रम्। अतस्तदन्तविधिना तदन्ताद् गोत्रसमुदायादपि वुञ् प्राप्नोतीत्यत

आह नचेत्यादि। नहि सर्वस्तदन्तविधिर्भवतीति। तथाहि येन विधिस्तदन्तस्येत्यत्रोक्तं (१।१।७७,वा) समासप्रत्ययविधौ प्रतिषेध उगिद्वर्णग्रहणवर्जमिति। प्रत्ययविधिश्चायम्। येषु तत्र च तदन्तविधिरिष्यते ते तत्रैव भयाद्यादिग्रहणमित्यादिना परिगणिता:। न चास्य तत्र परिगणनम्। ततो नास्ति तदन्तविधि:। एवं तर्हीतयादि। यदयं क्षुद्रकमालवकग्रहणं करोति वुञ्बाधनार्थं तज्ज्ञापयति वुञि पूर्वविप्रतिषेधो भवति। न परविप्रतिषेध:। सामूहिकेषु च तदन्तविधिरस्तीति। किमेतस्य ज्ञापने प्रयोजन मितयाह औपगवकं कापटवकमिति। एतद् वुञ्पूर्वविप्रतिषेधज्ञापनस्य प्रयोजनम्। असति ह्येतस्मिञ् ज्ञापने परविप्रतिषेधेनानुदात्तादेरञितयञ्(४।२।४४)स्यात्। वुञस्तु यत्राद्युदात्तत्वं सोऽवकाशो ग्लोचुकायनकमिति। ग्लुचुकायनशब्दो हि प्राचामवृद्धात् फिन् बहुलमिति (४।१।१६०) फिन्प्रतययान्तत्वाद् नित्स्वरेणाद्युदात्त:। वानहस्तिकम्। गौधेनुकमिति। तदन्तविधिज्ञापनस्य प्रयोजनम्। असत्येतस्मिञ् ज्ञापने ऽचित्तहस्तिधेनो ठगिति (४।२।४७) धेनुहस्तिशब्दाभ्यां विधीयमानठक् न तदन्तात् स्यात्। क्षुद्रकमालवकादिति। गणे क्षुद्रकमालवात् सेनासंज्ञायामिति पठ्यते। तत्र यद्ययमेको योग: स्यादेकेन यत्नेनच ज्ञापनं नियमश्च न लभ्यते। तस्मादत्र योगविभाग: कर्त्तव्य:। तत्र क्षुद्रकमालवादित्येको योग:। सेनासंज्ञाया मिति द्वितीय:। तत्र पूर्वो योगो ज्ञापनार्थ उत्तरो नियमार्थ:। पुनरस्यैवेति। क्षुद्रकमालवादित्यस्यैव योगस्य। क्षौद्रकमालवीति। टिड्ढाणञिति (४।१।१५) ङीप्। क्षौद्रकमालवकमन्यदिति। तदन्तविधिनात्र वुञ् भवति। अञ्सिद्धेरित्यादि। क्षुद्रकमालवशब्दादनुदात्तादेरञित्यञ् (४।२।४४) सिद्ध:। तत् कोऽर्थ: किं प्रयोजनं तस्य गणपाठेन? न किञ्चिदित्यर्थ:। स्यादेतत्। यो गोत्रलक्षणो वुञ् स्यादत स्तद्बाधिनार्थ: पाठ इत्याह गोत्राद्वुञ् विधीयते। न च क्षुद्रकमालवशब्दो गोत्रम्। तत् कुतस्ततो वुञ्प्राप्ति:? तदन्तादित्यादि। यद्यपि क्षुद्रकमालवशब्दो गोत्रसमुदायो गोत्रं न भवति तदवयवस्तु भवति। तेन तदन्तविधिना प्राप्नोत्येव। नच सर्वत इति। न च तदन्तविधि: सर्वत्रैव भवति। परिगणितेष्वेव कार्य्येषु तदन्तविधिरिष्यते। नचेदं तत्र परिगण्यते।

तत् कुत स्तदन्तविधिना वुञ्प्राप्तिः ? ज्ञापकं स्यादित्यादि। इदं हि क्षुद्रकमालवग्रहणं ज्ञापनार्थं भवेत्। एतज् ज्ञापयति सामूहिकेषु तदन्तविधिरस्तीति। एवं कृत्वापिशलेर्विधि रुपपन्नो भवति। विधीयतेऽनेनेति विधिः। स पुन र्धेनोरनञ इति। एतद्धि तत्सूत्रम्। अस्याय मर्थः। धेनुशब्दः समूहेऽर्थे ठक मुत्पादयति न चेद्धेनुशब्दो नञ उत्तरो भवतीति। नञ्पूर्व्वपदो न भवतीति यावत्। यदि तत्र सामूहिकेषु तदन्तविधिर्न स्याद नञिति वचनं नोपपद्यते। असति तदन्तविधौ धेनुशब्दादुच्यमानः प्रत्ययः कः प्रसङ्गो यदधेनुशब्दात् स्यात् ? तदेतदनञिति वचनं परमर्थवद्भवति यदि सामूहिकेषु तदन्तविधिर्भवति। नान्यथा। प्रयोजनान्तरमाह सेनायामित्यादि। सेनासंज्ञायामेव क्षुद्रकमालवशब्दादञ् भवतीत्येष नियमो यथा स्यादित्येवमर्थ स्तस्य गणे पाठ इत्यर्थः। यथेत्यादि। चेति समुच्चये। पूर्वविप्रतिषेधेन वुञा ऽञो बाधनं यथा स्यादित्येवमर्थो गणे पाठः। खण्डिक इति। खण्डिकशब्दो मत्वर्थीयठन्प्रत्ययान्तो नित्स्वरेणाद्युदात्तः। वल संवरणे इत्यस्मादुणादयो बहुलमि—(३।३।१) त्यवन्प्रत्यये डलयोरेकत्वस्मरणाल् लकारस्य डकारादेशे टापि वड़वेति भवति। भिक्षुकशब्दोऽपि कुत्सार्थविवक्षायां (D) कन्नन्तत्वात् पूर्व्वपदाद्युदात्तः। शुकोलकयोरपि प्राणिनां कुपूर्वाणामिति ( फिट्, १।३० ) कुपूर्वादिरुदात्त एव। श्वञ्शब्दःकनिन् युवृषोत्यतः (उण् १।१५४) कनिन्ग्रहणेऽनुवर्त्तमाने श्वन्नुक्षन् पूषन् प्लीहन् क्लेदन् स्नेहन् मूर्धन् मज्जन्नर्यमन्विश्वप्सन् परिज्मन् ( उण्, १।१५७ ) मातरिश्वन् मघवन्निति कनिन्प्रत्ययान्तो निपातितः। तेनासावपि पूर्ववदाद्युदात्तः। युगवरत्राशब्दयोरचित्तार्थः। संहतविग्रहीतार्थं युगवरत्राग्रहणं वर्णयन्ति। यौगम्। वारत्रम्। यौगवरत्रमिति।

## ४६। चरणेभ्यो धर्म्मवत्।

गोत्रचरणाद् (४।३।१२६) वुञित्यारभ्येति। ननु च तत्र धर्मग्रहणं नास्ति। तत् कथं धर्मवदित्यतिदेशः प्रयुज्यत इत्याह तत्रेदमित्यादि।

---

(D) महीशूरपुस्तकेऽनुकम्पार्थविवक्षायामिति पाठः।

इदमेव धर्मवदिति वचनं लिङ्गभूतं गमयति चरणाद्धर्माम्नाययोरितिरतद्वचनं (४।३।१२०,वा) शेषभूतमिति। नहि तेन विनातिदेश उपपद्यते। वतिः सादृश्यार्थ इति। असति हि वतौ यदि चरणग्रहणं धर्मप्रतययैरभिसम्बध्यते चरणेभ्यो धर्मेऽर्थे ये प्रतयया अभिधास्यन्ते ते भवन्ति तस्य समूह इत्येतस्मिन्नर्थे इति समूहप्रकृतिर्न विशेषिता स्यात्। एवञ्चेह प्रकृतिमात्राद्धर्मप्रतययाः प्रसज्येरन्। अथ प्रकृतिः सम्बध्यते धर्मे ये विधास्यन्ते प्रतययास्ते भवन्ति चरणेभ्यः समूह इत्येतस्मिन्नर्थे एवमपि धर्मप्रत्यया न विशेषिताः स्युः। ततश्चाचरणेभ्योऽपि ये धर्मे विधास्यन्ते प्रत्ययास्तेऽपीह चरणेभ्य आपद्येरन्। अथाप्युभयसन्निधानादुभयं विशेष्यते? तेन वाक्यभेदं कृत्वा प्रत्ययैः प्रकृतिभिः सम्बध्यते। चरणेभ्यो धर्मेऽथ ये प्रत्यया विधास्यन्ते ते समूहे भवन्ति चरणेभ्य इति। एवमपि कश्चित् चरणप्रकृतिकः प्रत्ययो यतः कुतश्चिच्चरणात् समूहे स्यात्। कौपिञ्जलहास्तिपदादण् (४।३।१३२) छन्दोगादिभ्योऽपि स्यात्। वतौ तु तस्य सादृश्ये विधानात् सर्वसादृश्यपरिग्रहो भवति। तेन याभ्यः प्रकृतिभ्यश्चरणविशेषणेन ये प्रत्यया विहिता इहापि ताभ्यः प्रकृतिभ्यस्तेनैव विशेषणेन तएव प्रत्यया भवन्तीति न किञ्चिदनिष्टमापद्यते। तस्मात् सर्वसादृश्यपरिग्रहार्थं वत्करणं कर्त्तव्यम्। काठकम्। कालापकमिति। गोत्रचरणाद् वुञ् (४।३।१२६)। छान्दोग्यम्। औक्थिक्यमिति। छन्दोगौक्थिकयाज्ञिकबह्वृचनटां ञ्य इति (४।३।१२९) ञ्यः। आथर्वणमिति। कौपिञ्जलहास्तिपदादण् (४।३।१३२)। आथर्वणिकस्येकलोपश्चेत्यण् (४।३।१३३)। इकलोपश्च। एते प्रत्यया यथा चरणेभ्यो धर्मे भवन्ति तथा समूहेऽपि।

## ४७। अचित्तहस्तिधेनोष्ठक्।

अचित्त इति। अर्थप्रधानत्वान्निर्देशस्यार्थस्येदं ग्रहणम्। न स्वरूपस्य। तेनाचित्तवाचिभ्य ठग् विज्ञायत इत्याह अचित्तवाचिभ्यः शब्देभ्य इति। हस्तिधेनुशब्दयोश्च शब्दप्रधानत्वान्निर्देशस्य स्वरूपग्रहणम्। अतएव हस्तिधेनुशब्दाभ्यामिति। अधेनोरिति वक्तव्यमिति। धेनुशब्दादनञ्पूर्वाट् ठग्

भवतीति।तदर्थरूपं व्याखेययमित्यर्थः। तत्रेदं व्याख्यानम्। वक्ष्यमाणमिहान्यतरस्यांग्रहणमुभयोरपि योगयोः शेषो विज्ञायते। व्यवस्थितविभाषा च। तेन धेनुशब्दादनञ्पूर्वादेव भवतीति। न नञ्पूर्व्वादिति। आधेनवमिति। उत्सादिभ्योऽञ् (४।१।८६)। ननु च धेनुशब्दस्तत्र पठ्यते। तत् कथमधेनुशब्दाद् भवतीति? तत्रापि तदन्तविधेः सम्भवात्। तत् कथं विज्ञायते? वष्कयास इति वष्कयशब्दस्य समासे प्रतिषेधात्। वष्कयशब्दाद्धि प्रत्ययविधानम्। गोवष्कयशब्दान्न प्राप्नोति। किं समासप्रतिषेधेन? इतः प्रतिषेधाद्विज्ञायते ऽस्ति तत्र तदन्तविधिरिति।

## ४८। केशाश्वाभ्यां यञ्छावन्यतरस्याम्।

केशशब्दादचित्तलक्षणे ठकि प्राप्ते वचनमिदम्। अश्वशब्दादण्यपि सूत्रमिदमारभ्यते। अन्यतरस्यांग्रहणाट् ठगणावपि भवतः।

## ४९। पाशादिभ्यो यः।

अचित्तलक्षणके ठकि प्राप्ते वचनमिदम्।

## ५०। खलगो रथात्।

गोशब्दादणि प्राप्ते खलरथाभ्यामचित्तलक्षणे ठकीदं वचनम्। अत्र पाशादिष्वेव खलादीनां पाठः कस्मान्न कृत इत्याह पाशादिष्वपाठ उत्तरार्थं इति। उत्तरसूत्र इनित्रकट्यचः खलादिभ्य एव यथा स्युः। पाशादिभ्यो मा भूदिति।

## ५१। इनित्रकट्यचश्च।

खलादिभ्य इनिर्वक्तव्य इति। वक्तव्यो व्याख्येय इत्यर्थः। तत्रेदं व्याख्यानम्। चकारोऽत्र क्रियते। स चानुक्तसमुच्चयार्थः। तेन खलादिभ्य इनिप्रत्ययो भविष्यति। आदिशब्दश्चायं प्रकारे। खलप्रकार इत्यर्थः। किं पुनस्ते खलप्रकाराः? येभ्य इनिर्दृश्यते। यदि तर्हि खलादिभ्य इनिर्भवति वैषम्याद् यथासंख्यं न प्राप्नोति। वाक्यभेदाददोषः। एकं वाक्यं यथासंख्यं न भवति। इह द्वे वाक्ये इति। इनित्रकट्यचः खलगोरथेभ्यो

भवन्तीत्येकं वाक्यम् । चकारश्चानुक्तसमुच्चयार्थः । ततः खलादिभ्य इनि-र्भवतीति द्वितीयम् । द्वितीये तु वाक्ये खलशब्दस्य तत्र प्रकारोपलक्षणत्वं वेदितव्यम् । न तु प्रकृतित्वम् ।

## ५२ । विषयो देशे ।

योऽसौ विषयो देशश्चेत् स भवतीति । ननु च यो विषयः स देश एव भवति । किं तद्विशेषणेन देशग्रहणेनेत्याह विषयशब्दोऽयमित्यादि । अत्यन्त-शीलित इति । अत्यन्ताभ्यस्त इत्यर्थः ।

## ५३ । राजन्यादिभ्यो वुञ् ।

आकृतिगणश्चायमिति । अपरिसमाप्ततां राजन्यादेर्दर्शयति । आदिशब्द-श्चायं प्रकारार्थः ।

## ५४ । भौरिक्याद्यैषुकार्य्यादिभ्यो विधल्भक्तलौ ।

## ५५ । सोऽस्यादिरिति च्छन्दसः प्रगाथेषु ।

छन्दस इति । न स्वरूपग्रहणम् । नापि मन्त्रब्राह्मणयोः । कस्य तर्हि ? अक्षराणामियत्तावचनश्छन्दःशब्दोऽस्ति यस्य जगत्यादयो विशेषाः । तस्येदं ग्रहणम् । तस्यैव हि प्रगाथ इत्यादौ सम्बन्धः । नेतरस्य । तेन पङ्क्त्यादिभ्यः प्रत्ययो भवतीत्युक्तं भवति । प्रग्रथ्नन्नेनेति । उच्चारणविशेषणेन प्रग्रन्थनात् प्रकर्षाद् गायनार्थाद्वेति । एतेन यन्निमित्तकः प्रगाथशब्दस्तां क्रियां दर्शयति । प्रगाथशब्दोऽयं यदाऽकर्त्तरि च कारके संज्ञायामिति(३।३।१९) कर्मणि घञन्तो व्युत्पाद्यते प्रग्रथ्यतेऽसौ प्रगाथ इति पृषोदरादिपाठाद् ग्रन्थे रेफानुनासिकयोर्लोपश्च तदा प्रग्रन्थनक्रियानिमित्तको भवति । यदा तु कै गै शब्द इत्यस्मादुणादयो बहुलमिति (३।३।१) प्रगाथ स्थन्प्रत्ययान्तो व्युत्पाद्यते तदा गायनक्रियानिमित्तो भवति । नपुंसक इत्यादि । नपुंसकलिङ्गे स्वार्थे एव च्छन्दसः प्रत्ययस्योपसंख्यानम् । तत्रेदं व्याख्यानम् । इतिकरणो विवक्षार्थः । तेन यत्र प्रत्ययान्ताच्छिष्टानां विवक्षा भवति तत्र प्रत्ययेन भवितव्यम् । नपुंसकलिङ्गे स्वार्थेऽपि च सा भवति । अतस्तत्रापि प्रत्ययो भवति । अवश्यं

चैतदेव विज्ञेयम्। यो हि मन्यते सर्वातिप्रसङ्गनिवृत्तिरितिकरणेन क्रियत इति तस्यासावनर्थक एव स्यात्। सर्वातिप्रसङ्गानामुपाधिभिर्निरस्तत्वात्।

## ५६। संग्रामे प्रयोजनयोद्धृभ्यः।

अत्र संग्राम इति प्रत्ययार्थ इति। सप्तम्यन्तत्वात्। प्रयोजनयोद्धृभ्य इति पञ्चम्यन्तत्वात् प्रकृतिनिर्देशः। ततश्च समर्थानां ( ४।१।८२ ) प्रथमाद्वेत्येतद्विरुध्यते। प्रथमस्य प्रत्ययार्थत्वेन द्वितीयस्य प्रकृतित्वेनोपादीयमानत्वादित्यस्य चोद्यस्य निरासायाह सोऽस्येति समर्थविभक्तिः प्रत्ययार्थश्चानुवर्त्तत इति। एतेनैतद् दर्शयति। प्रयोजनयोद्धृभ्य इत्येतदेवमर्थं यस्मात् पूर्वसूत्रादेव स इति प्रथमं तदिहानुवर्त्तते। तद्विशेषणं तु प्रयोजनयोद्धृभ्य इति प्रत्ययार्थोऽप्यस्येति पूर्वसूत्रादनुवर्त्तते। तद्विशेषणं संग्रामः। ततो नास्ति विरोधः। पूर्वसूत्रे यत् प्रथमानिर्दिष्टं तत एव प्रत्ययविधानादिति।

## ५७। तदस्यां प्रहरणमिति क्रीडायां णः।

## ५८। घञः सास्यां क्रियेति ञः।

क्रियेति प्रकृतिविशेषणमिति। यत्र तद् घञन्तं क्रियावाचि चेद् भवतीति। तेन भावे यो घञ् तदन्तात् प्रत्ययो भवतीत्युक्तं भवति। ननु च भावे यो घञ् तेनैव तदन्तं क्रियावाचि। यस्माद् धात्वर्थस्य सिद्धता नाम यो धर्म स्तत्र घञादिभिर्भवितव्यमित्युक्तं प्राक्। धर्मधर्मिणोर्भेदस्याविवक्षितत्वात् क्रियाधर्मोऽपि क्रियाशब्देनोक्त इत्यदोषः। इतिकरणो विवक्षार्थ इति। ननु च पूर्वसूत्रादेवेतिकरणोऽनुवर्त्स्यति। तत् किं पुनरिह तस्योपादानम्? इतिकरणस्येह प्रकरणे ऽनधिकारतां दर्शयितुं पुनरुपादानम्। तेन तदधीते तद् ( ४।२।५९ ) वेदेत्यत्रास्येतिकरणस्याननुवृत्तौ विवक्षानियमाभावादध्येतृवेदितृमात्रे प्रत्ययः सिद्धो भवतीत्येके। वैचित्र्यार्थमितिकरणोपादानमित्यपरे। श्यैनम्पातेति। शल हुल पत्लृ गतौ। भावे घञ्। श्येनस्य पात इति षष्ठीसमासः। ञे विहिते श्येनतिलस्य पाते ञ इति (६।३।७१) मुम्। प्राकार इति। करोतेः प्रपूर्व्वादकर्त्तरि च कारके संज्ञाया-

मिति (३।३।१९) कर्मणि घञ्। उपसर्गस्य घञ्यमनुष्ये बहुलमिति (६।३।१२२) प्रशब्दस्य दीर्घः। भवतीदं घञन्तम्। नतु क्रियावाचि। प्राकारस्य द्रव्यत्वात्। अथेत्यादि चोद्यम्। क्रीडायामित्यनेन तत्सम्बद्धमित्यादि परिहारः। स्यादेतत्। अनुवर्त्ततां क्रीड़ा। तस्याञ्चेदं प्रत्ययविधानमिष्यत इत्यत आह सामान्येन चेत्यादि।

## ५९। तदधीते तद्वेद।

वैयाकरण इति। न य्वाभ्यामित्यादिना (७।३।३) वृद्धिप्रतिषेधः। ऐजागमश्च। द्विस्तद्ग्रहणमित्यादि। यदि तदधीते वेदेत्येवोच्येत प्रत्ययार्थद्वयस्य द्वितीयासमर्थे समुच्चयो विज्ञायेत। ततश्च यस्त्वधीते वेत्ति च तत्रैव स्यात्। यस्त्वधीते केवलं न वेत्ति वेत्ति वा केवलं नाधीते तत्र न स्यात्। द्विस्तद्ग्रहणे तु वाक्यभेदादधीयाने विदुषि च प्रत्येकं प्रत्ययः सिध्यति। तदर्थं द्विस्तद्ग्रहणम्। नैतद् द्विस्तद्ग्रहणस्य प्रयोजनम्। यथैव हि तेन दीव्यति खनति जयति जितमित्यत्र (४।४।२) सकृत् समर्थविभक्त्युपादानेऽपि प्रत्ययार्थचतुष्टयेन तृतीयासमर्थेन समुच्चयो न विज्ञायते तथेहापि न विज्ञास्यते। तेन यथा दीव्यतिप्रभृतिषु प्रत्येकं प्रत्ययो भवति तथेहापि प्रत्येकमधीयाने विदुषि च भविष्यतीति। न ब्रूम इहैव द्विस्तद्ग्रहणमधीयानविदुषोः पृथग्विधानार्थमिति। कुतस्तर्हि? क्रतूक्थादिसूत्रान्तात् ठग् (४।२।६०) वसन्तादिभ्यष्ठगित्यत्र (४।२।६३) च। किं कारणं तत्र न स्यात्? क्रतुशब्दः कर्मनामधेयः। वसन्तादयोऽप्यृतुवचनाः। तेषामध्ययनं नोपपद्यते। तत्सहचरिते ग्रन्थे स्यात्। स च तत्र गौण इति न गृह्यते। मुख्य एवार्थे वेदने सम्भवतीति तेभ्यो विदुष्येव प्रत्ययः स्यात्। नाध्येतरि। पुनर्द्विस्तद्ग्रहणाद् गौणस्यापि ग्रहणं भवतीति प्रत्येकमध्येतृविदुषोरत्र ठक्प्रत्ययो भवति।

## ६०। क्रतूक्थादिसूत्रान्ताट्‌ठक्।

क्रतुशब्दः कर्मनामधेयः। तस्याध्ययनवेदने द्वे न सम्भवत इति साहचर्यात् तदर्थो ग्रन्थो गृह्यते। ननु क्रतुनामा क्रतुरस्तीति तद्विशेषा ये ऽग्निष्टोमादय-

स्तदर्थो ग्रन्थो गृह्यते। तत्र चाह क्रतुविशेषवाचिभ्य इति। अग्निष्टोममधीत इत्यग्निष्टोमेन सहचरितं तदर्थग्रन्थमधीत इत्यर्थः। सूत्रान्तादकल्पादेरिष्यत इति। किमिष्यत एव? ततो न तच्छस्यते लभ्यते च। कुतः? वेत्यनुवृत्तेर्व्यवस्थितविभाषाविज्ञानात्। किं तर्हि? सामलक्षण औक्थिक्ये वर्त्तमान इति। उक्थसंज्ञकानां साम्नां लक्षणं व्याख्याग्रन्थ औक्थिक्यः। छन्दोगौक्थिक्ये-त्यादिना (४।३।१२९) ञ्यः। तत्रौक्थिक्ये सामलक्षणे ग्रन्थे वर्त्तमान उक्थशब्दः प्रत्ययमुत्पादयति। कुत एतत्? गौणेन सह क्रतुशब्देन निर्देशात्। औक्थिक्ये उक्थशब्दस्य वृत्तिस्तादर्थ्याद्भवति। भवति च तादर्थ्यात् ताच्छब्द्यं यथा प्रदीपार्था मल्लिका प्रदीप इति। अथौक्थिक्यं योऽधीते कथं तत्र भवितव्यमित्यत आह औक्थिक्यशब्दाच्चेति। तत्रैव कारणमाह अनभिधानादिति। विद्यालक्षणकर्मसूत्रान्तादित्यस्यातिप्रसक्तस्यापवादमाह विद्या चेत्यादि। विद्याशब्दोऽनङ्गक्षत्रधर्मसंसर्गत्रिपूर्व एव प्रत्ययमुत्पादयति। नाङ्गादिपूर्व इत्यर्थः। त्रैविद्य इति। त्रयवयवा विद्या। शाकपार्थिवादित्वादुत्तरपदलोपी समासः। त्रिविद्यामधीते त्रैविद्यः। यावक्रीतमाख्यानमधीते यावक्रीतिकः। प्रियङ्गुमधीते प्रैयङ्गविकः। वासवदत्तामाख्यायिकामधीते वासवदत्तिकः। सुमनोत्तरामधीते सौमनोत्तरिकः। सर्वसादे र्द्विगोश्च लइति। सर्वादेःसादेर्द्विगो-रुत्पन्नस्य ठको लोपो भवतीत्यर्थः। ननु च द्विगोर्लुगनपत्य (४।१।८८) इत्येवं सिद्धः। सत्यमेतत्। इह तु केचिद् विद्यालक्षणकल्पसूत्रान्तादि-त्यादिना प्रतिपदं प्रत्ययो विधीयते। तद् द्वेष्यमपि जायेत। प्रतिपद-विधानान्न लुक्। ततो लुग्वचनम्। अनुसूर्लक्ष्यलक्षणे चेति। अनुसूशब्दः प्रत्ययमुत्पादयति। लक्ष्यलक्षणे च शब्दरूपे प्रत्ययमुत्पादयतः। आनुसुक इति। इसुसुक्तान्तात् कः (७।३।५१) इति कः। केऽणः (७।४।१३) इति ह्रस्वः। इकन् बहुलं पदोत्तरपदादिति। पदशब्द उत्तरपदं यस्य स तथोक्तः। शतषष्टेः षिकन् पथ इति। शतषष्टिशब्दाभ्यामुत्तरस्मात् पथः षिकन् प्रत्ययो भवति। षकारो ङीषर्थः। नकारः स्वरार्थः। एतत् सर्वमुक्थादिषु पाठादेव सिद्धम्। यदपीह किञ्चिन्न पठ्यते तदपि च बहुलग्रहणेन संगृहीतम्। उक्थादिष्वपि षिकन् बहुलं पदोत्तरपदाच्चेति पठ्यते।

६१ । क्रमादिभ्यो वुन् ।

६२ । अनुब्राह्मणादिनिः ।

ब्राह्मणसदृशोऽयं ग्रन्थो ऽनुब्राह्मणमिति । यथार्थेऽव्ययीभावं दर्शयति । ननु योऽनुब्राह्मणमधीते तस्यानुब्राह्मणमस्तीति । तत्र मत्वर्थीयेनैवेनिना सिद्धम् । तत् किमर्थमिदम् ? अण्बाधनार्थम् । यदीदं नोच्येत तदधीते तद्वेदेत्यण् (४।२।५८) प्रसज्येत ।

६३ । वसन्तादिभ्यष्ठक् ।

वसन्तसहचरितो ग्रन्थो वसन्त इति । यो वसन्ते पठ्यते नियोगेन यत्र च वसन्तो वर्ण्यते स वसन्तसहचरितो भवति । वर्षाशरदमिति । वर्षाश्च शरच्च वर्षाशरदम् । द्वन्द्वाचुदषहान्तात् समाहार इति (५।४।१०६) टच् । समासान्तेन निर्देशः । (E)

६४ । प्रोक्ताल्लुक् ।

युक्तो निर्देशो यदि प्रोक्तनामा ग्रन्थो व्याकरणादिर्भवति । न चासावस्ति । अन्यार्थेन ततःपरः सम्भवतीत्येतं दोषमपाकर्त्तुमाह प्रोक्तसहचरित इत्यादि । साहचर्य्यात् सोऽयमित्यभेदोपचारेण प्रोक्तार्थे यो विहितः प्रत्ययः स प्रोक्त-शब्देनोक्त इति दर्शयति । पाणिनीय इति । वृद्धाच्छः (४।२।११४) तदन्तात् तदधीते ( ४।२।५८ ) तद्वेदेत्यण् । तस्य लुक् पाणिनीयः । आपिशलिना प्रोक्तमित्यण् । तस्य लुक् । आपिशलः । कः पुनरत्र विशेषोऽर्थो लुकि सति ? यावता तदेव रूपमित्याह स्त्रियामित्यादि । असति लुकि टिड्ढाणञिति (४।१।१५) ङीप् स्यात् । सोऽ णः स्वरेणान्तोदात्तः । लुकि हि सति टाब् भवति । स्वरेण तु मध्योदात्तः । आपिशलिशब्दाल्लुकि सति स्वरे नास्ति विशेषः । सत्यपि हि लुक्यन्तोदात्तत्वेन भवितव्यम् । स्त्रियान्तु पूर्वोक्तो विशेषो वर्त्तते । नहि लुकि सति ङीब् भवति । सत्यप्यणि तत्रैवानुपसर्जनादित्यधि-कारात् (४।१।१४) प्रतिषेधात् । प्रोक्तार्थविहितस्य चाण इहोपसर्जनत्वात् ।

---

(E) In the printed काशिका the गण has no compound as वर्षाशरदम् । वर्षा and शरद् are there separately.

## ६५। सूत्राच्च कोपधात्।

कोपधादिति वचनात् स्वरूपग्रहणं न भवतीत्यत: सूत्रवाचिनो ग्रहणं विज्ञायत इत्याह सूत्रवाचिन: प्रातिपदिकादिति। अष्टकमिति। अष्टावध्याया: परिमाणमस्य। तदस्य परिमाणमित्यनुवर्त्तमाने (५।१।५७) संख्याया: संज्ञासङ्घसूत्राध्ययनेष्विति (५।१।५८) च संख्याया अतिशदन्ताया: कन्निति (५।१।२३) कन्। संख्याप्रकृतेरिति वक्तव्यमिति। संख्या प्रकृतिर्यस्य प्रत्ययस्य स संख्याप्रकृति:। तदन्तात् कोपधादुत्पन्नस्य लुक् भवतीत्येतदर्थरूपं वक्तव्यं व्याख्येय मित्यर्थ:। तत्रेदं व्याख्यानम्। वेति वर्त्तते। सा च व्यवस्थितविभाषा। तेन संख्याप्रकृतेरेव भविष्यति। नान्यस्मादिति। चातुष्टयमिति। चत्वारोऽवयवा अस्येति। संख्याया अवयवे तयप् (५।२।४२)। ह्रस्वात् तादौ तद्धित इति (८।३।१०१) मूर्धन्य:। षत्वं भवति। एतत् संख्याप्रकृतिप्रत्ययान्तं नतु कोपधम्। किं तर्हि? योपधम्।

## ६६। छन्दोब्राह्मणानि च तद्विषयाणि।

प्रोक्तग्रहण मनुवर्त्तत इति। तच्चेहार्थात् प्रथमान्तं विज्ञायते। छन्दोब्राह्मणानीत्यस्य समानाधिकरणार्थम्। अत आह च्छन्दांसि ब्राह्मणानि च प्रोक्तप्रत्ययान्तानीति भवन्ति। स्वरूपग्रहणमिह न भवति। तथाहि प्रोक्तग्रहणमिहानुवर्त्तते। नच च्छन्दोब्राह्मणशब्दौ प्रोक्तप्रत्ययान्तौ। तस्माच्छन्दोब्राह्मणवाचिनो ये शब्दा: प्रोक्तप्रत्ययान्तास्ते गृह्यन्ते। किमर्थं पुनरिदमुच्यते? इह प्रोक्तप्रत्ययान्तस्य बहुप्रकारता लभ्यते। तथाहि क्वचित् तदन्तस्य स्वातन्त्र्यमुपलभ्यते यथा पाणिनिना प्रोक्तं पाणिनीयं शास्त्रम्। प्रोक्तार्थ एव वृत्ति: स्वातन्त्र्यम्। पाणिनीयशब्दस्य चात्र प्रोक्तार्थ एव वृत्ति:। क्वचिदुपाध्यन्तरयोगो यथा पाणिनीयं महत् भवत्सु विहितमिति। क्वचिद्वाक्यम् पाणिनीय मधीत इति। क्वचिद् वृत्ति: पाणिनीय इति। तदिह छन्दोब्राह्मणाना मध्येतृवेदितृविषया वृत्तिर्यथा स्यात्। प्रकारान्तरं मा भूदित्येवमर्थ मिदमुच्यते। अध्येतृवेदितृ इति। अध्येतृवेदितृप्रत्ययो विषयो येषामिति बहुव्रीहि:। अनन्यत्रभावो विषयार्थ इति। यथा मत्स्यानां जलं विषय इत्यत्रानन्यत्रभावे

विषयशब्दो वर्त्तते तथेहापि । एतेन यद्यपि ग्रामसमुदायादिष्वप्यर्थेषु विषयशब्दस्य वृत्तिस्तथापीहानन्यत्रभावे वर्त्तमानः संगृह्यत इति दर्शयति । तेनेत्यादिना ऽनन्यत्रभाववृत्तिशब्दस्य फलं दर्शयति । एवं ह्यनन्यत्रभावो भवति यदि स्वातन्त्र्यादि न भवति । उपाध्यन्तरयोगो महत्त्वादिना विशेषेण सम्बद्धः । कठ इति । कठेन प्रोक्तमिति । कलापिवैशम्पायनान्तेवासिभ्यश्चेति (४।३।१०४) णिनिः । तस्य कठचरकाल्लुक् (४।३।१०७) । ततः कठेन प्रोक्तमधीते तद्वेदेति पुनरण् । तस्यापि प्रोक्ताल्लुगिति (४।२।६४) लुक् । मौदाः पैप्पलादा इति । कलापिवैशम्पायनान्तेवासिभ्यश्चेति (४।३।१०४) णिनिः । मोदेन प्रोक्तमिति । कलापिनो ऽणित्यण् (४।३।१०८) । तदन्ताद् तदधीते तद्वेदेत्यण् (४।२।५९) । तस्य प्रोक्ताल्लुगिति (४।२।६४) लुक् । आर्चाभिन इति । ऋचाभेन प्रोक्तमिति कलापिवैशम्पायनान्तेवासिभ्यश्चेति (४।३।१०४) णिनिः । तदन्तात् तदधीते (४।२।५९) तद्वेदे तयण् । वाजसनेयिन इति । वाजसनेयेन प्रोक्तमिति । शौनकादिभ्यश्छन्दसीति णिनिः (४।३।१०६) । तदन्तात् तदधीते तद्वेदेत्यण् (४।२।५९) । तस्य लुक् । ताण्डिन इति । ताण्ड्यशब्दाद् गर्गादियञन्तात् प्रोक्तार्थे पुराणप्रोक्तेषु ब्राह्मणकल्पेष्विति (४।३।१०५) णिनिः । आपत्यस्य च तद्धिते ऽनातीति (६।४।१५१) यलोपः । ततस्तदधीते तद्वेदेतयण् (४।२।५९) । तस्य लुक् । भाल्लविन इति । भाल्लविशब्दादिञन्तात् प्रोक्तार्थे पूर्ववण्णिनिः । तदन्तात् तद्वेदेत्यण् । तस्य लुक् । शाट्यायनिन इति । शाट्यशब्दाद् गर्गादियञन्ताद् यञिञोश्चेति (४।१।१०१) फक् । ततः प्रोक्तार्थे पूर्ववण्णिनिः । तदन्तात् तदधीते तद्वेदेतयण् (४।२।५९) । तस्य लुक् । ऐतरेयिण इति । ऐतरेयशब्दाच् शुभ्रादिढगन्तात् पूर्ववण्णिनिः । ततस्तदधीत इतयण् । तस्य लुक् । ब्राह्मणविशेषप्रतिपत्त्यर्थमिति । ब्राह्मणविशेषः पुराणप्रोक्तत्वम् । तस्य प्रतीतिः प्रतिपत्तिर्यथा स्यादितेयवमर्थं ब्राह्मणग्रहणम् । याज्ञवल्कानीति । याज्ञवल्क्यशब्दाद् गर्गादियञन्तात् प्रोक्तार्थे कण्वादिभ्यो गोत्र इतयण् (४।२।१११) । सौलभानीति । सुलभेन प्रोक्तानीति । पूर्ववत्कलापिनो ऽणितयण् (४।३।१०८) । अत्र स्वातन्त्र्यं भवति । नहीह पुराणप्रोक्तत्वमस्ति । इदानीन्तनेन प्रोक्तत्वात् । काश्यपिनः कौशिकिन इति ।

काश्यपेन प्रोक्तः कल्पः। कौशिकेन प्रोक्त इति। काश्यपकौशिकाभ्यामृषिभ्यां णिनिः। तदन्तात् तदधीत इत्यण्। तस्य लुक्। पाराशरिणः शैलालिन इति। पाराशर्य्येण प्रोक्तं सूत्रं शिलालिना प्रोक्तं सूत्रम्। पाराशर्य्यशिलालिभ्यां भिक्षुनटसूत्रयो (४।३।११०) रिति णिनिः। आपत्यस्य च तद्धितेऽनातीति (६।४।१५१) यलोपः। ततस्तदधीत इत्यण्। तस्य लुक्। कर्मन्दिनः। कृशाश्विन इति। कर्मन्देन प्रोक्तं सूत्रम्। कृशाश्वेन प्रोक्तं सूत्रमिति कर्मन्दकृशाश्वादिनिः (४।३।१११)। तदन्तात् तदधीते तद्वेदेत्यण् (४।२।५९)। तस्य लुक्। पैङ्गी कल्प इति। पिङ्गेन प्रोक्तः कल्पः। पुराणप्रोक्तेत्यादिना (४।३।१०५) णिनिः। तत्र स्वातन्त्र्यमेव भवति। न च तद्विषयता।

## ६७। तदस्मिन्नस्तीति देशे तन्नाम्नि।

प्रत्ययान्तनामेति। यदि तर्हि तन्नाम्नि देशे प्रत्यय इतिकरणोऽनर्थकः। तन्नामग्रहणादेवातिप्रसङ्गनिवृत्तिः। नैतदस्ति। द्विविधं हि नाम। संकेतितमनुवृत्तञ्च। संकेतितं यदद्यापि व्यवहारपदवीं नानुपतति। अनुवृत्तञ्च व्यवहारमनुपतति। तत्रानुवृत्तं यन्नाम तत्रायं योगः। अनुवृत्तञ्च व्यावहारिकम्। तत्प्रतिपत्त्यर्थमितिकरणः क्रियते। ग्रामादिविशेषपरिग्रहार्थश्च। यद्येवमितिकरण एव क्रियताम्। किं तन्नाम्नीत्यनेन ? एतदपि न कर्त्तव्यम्। नामधेयता विरोधिनोऽपि बलीयसोऽपि प्रत्ययान् बाधितुम्। कथम् ? नाप्राप्ते मतुप्यर्थं योग आरभ्यमाणो मतुपमपवादत्वाद् बाधते। तदपवादैस्त्विनिठनादिभिः सह सम्प्रधारणायामपवादविप्रतिषेधादिनिठनादय एव स्युः। नामग्रहणे तु सति बलीयोभिरपि सम्प्रधारणायाः सम्प्रत्ययी भवति यो नामधेयतां गमयति स चातुरर्थिक एवेति। अतः स एव भवति।

## ६८। तेन निर्वृत्तम्।

चतुर्ष्वपीति। अनन्तरातीतेऽस्मिन् वक्ष्यमाणयोश्च योगयोः। कर्त्तरि चेति। लक्ष्यानुरोधेन क्वचिद्धेतौ क्वचित् कर्त्तरि च। सहस्रेणेति। हेतौ। कुशाश्वेनेति। कर्त्तरि। यदा हेतौ तदा वृत्तेरकर्मकत्वान्निर्वृत्त इति कर्त्तरि

निष्ठा । यदा कर्त्तरि तदाऽन्तर्भावितण्यर्थत्वात् कर्मणि । अकर्मका अप्यन्त-र्भावितण्यर्थाः सकर्मका भवन्ति ।

६९ । तस्य निवासः ।

७० । अदूरभवश्च ।

७१ । ओरञ् ।

यथायथमिति । यथास्वम् । तत्र प्रथमे प्रथमासमर्थविभक्तियुक्तात् । द्वितीये तृतीयासमर्थविभक्तियुक्तात् । तृतीयचतुर्थयोः षष्ठीसमर्थविभक्तियुक्तात् । नद्या स्तु परत्वान् मतुबेव भवतीति । नद्यां मतुबित्यनेन (४।२।८५) ।

७२ । मतोश्च बह्वजङ्गात् ।

मालावतमिति । यदि बह्वजिति न भवत्येष दोषः ।

७३ । बह्वचः कूपेषु ।

७४ । उदक् च विपाशः ।

७५ । संकलादिभ्यश्च ।

७६ । स्त्रीषु सौवीरसाल्वप्राक्षु ।

७७ । सुवास्त्वादिभ्योऽण् ।

उवर्णान्तलक्षणस्येत्यादि । य उवर्णान्तास्तेभ्य ओरञिति ( ४।२।७१ ) प्राप्तस्याञोऽपवादः । शेषेभ्यश्च बह्वचः कूपेष्वित्यादिना ( ४।२।७३ ) प्राप्तस्य कूपलक्षणस्य । अथाण्ग्रहणं किमर्थम् ? सुवास्त्वादिभ्यो यथाविहितमेवोच्येत । पुनर्वचनं यो विहितो नच प्राप्नोति तदर्थं विज्ञायते । अणेव च विहितो न प्राप्नोति । अपवादेन बाधितत्वात् । अथ स भविष्यतीत्यत आह अण्ग्रहण-मित्यादि । असति ह्यण्ग्रहणे मध्येऽपवादाः पूर्वान् विधीन् बाधन्ते नोत्तरानिति (प, ६१) नदीमतुपा सह संप्रधारणायां परत्वान्नदीमतुप् स्यात् । अणो ग्रहणादणेव भवति । तस्मान् मतुपो बाधनार्थमण्ग्रहणम् ।

## ७८। रोणी।

कोऽयं निर्देश इति। कुत्सितोऽयं निर्देश इत्यर्थः। कुत्सितत्वं तु लक्षणातिक्रान्तत्वात्। तदेव लक्षणातिक्रान्तत्वं दर्शयितुमाह यावतेत्यादि। सर्वावस्थाप्रतिपत्त्यर्थमित्यादि। सर्वावस्था च केवलस्य तदन्तस्य च प्रतिपत्तिः प्रकृतित्वेन यथा स्यादित्येवमर्थमुच्यते। यदि रोण्या इत्यादिनिर्देशः क्रियेत तदा ग्रहणवता प्रातिपदिकेन तदन्तविधिर्नेति (प, ३२) केवलादेव स्यात्। न तदन्तात्। रोणीति शास्त्रानपेक्षेण निर्देशेन शास्त्रनिरपेक्षत्वमिहोच्यते। तदस्याः परिभाषाया अनपेक्षणादिह तदन्तादपि प्रत्ययः सिद्धो भवति। ननु च ग्रहणवता प्रातिपदिकेन तदन्तविधिः प्रतिषिध्यते। न चेदं प्रातिपदिकम्। स्त्रीप्रत्ययान्तत्वात्। अथ मतं प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणं (प, ७२) भवतीति प्रातिपदिकस्य तदन्तविधेः प्रतिषिध्यमानः स्त्रीप्रत्ययान्तस्यापि प्रतिषिध्यत इति। एतच्च यत्र हि प्रातिपदिकस्य स्वरूपग्रहणं तद्विषया परिभाषेति प्राग् ज्ञापितमेतत्। एवं तर्हि तस्य ज्ञापनस्य प्रायिकत्वं दर्शयति। तेन क्वचिदस्वरूपग्रहणेऽप्येषा परिभाषा प्रवर्त्तते। तेन कुमारीमाचष्टे कुमारयतीत्यत्र णाविष्ठवत् प्रातिपदिकस्येतीष्ठवद्भावः (६।४।१५५, वा) सिद्धो भवति।

## ७९। कोपधाच्च।

## ८०। वुञ्छण्कठजिलसेनिरढञ्ण्ययफक्फिञिञ्ञ्यकक्ठकोऽरीहणकृशाश्वर्श्यकुमुदकाशतृणप्रेक्षाश्मसखिसङ्काशबलपक्षकर्णसुतङ्गमप्रगदिन्वराहकुमुदादिभ्यः।

औत्सर्गिकोऽपि तत्रेष्यत इति। यद्येवं तस्य श्रवणं प्राप्नोतीत्यत आह तस्य चेत्यादि। तथाचोक्तमितरादि। तदेव द्रढयति। औत्सर्गिक इत्येव। शिरीषाणामदूरभवो ग्रामः शिरीषाः। तस्य वनं शिरीषवनमिति भाष्यकारवचनाल्लभ्यते। विशेषविहितानां हि लुपा न भवितव्यम्। अत औत्सर्गिकस्य लुब् भवतीति विज्ञायते।

८१ । जनपदे लुप् ।

८२ । वरणादिभ्यश्च ।

८३ । शर्कराया वा ।

पाठसामर्थ्यादित्यादि । यदि नित्यो लुप् स्याद् गणयोरस्य पाठोऽनर्थकः स्यात् । तस्मात् पाठसामर्थ्यादेव पक्षे श्रवणं भविष्यतीत्यत आह । एवं तर्हीत्यादिना वाग्रहणस्य ज्ञापकं दर्शयति । शर्करेति । औत्सर्गिकस्य लुप् । शार्करमिति तस्यैव पक्षे श्रवणम् । शर्करिकमिति । कुमुदादित्वात् ठच् । शार्करकमिति । वराहादित्वात् कक् । शार्करिकं शार्करीयमिति । उत्तर-सूत्रेण ठक् छौ ।

८४ । ठक्छौ च ।

८५ । नद्यां मतुप् ।

उदुम्बरावतीति । मतौ बह्वचोऽनजिरादीनामिति (६।३।११८) दीर्घः ।

८६ । मध्वादिभ्यश्च ।

८७ । कुमुदनड़वेतसेभ्यो ड्मतुप ।

कुमुदशब्दात् ठच्ठकोः प्राप्तयोः । नड़शब्दादपि नड़शादाड्ड्वलजिति (४।२।८८) नड़ादीनां कुक्चेति (४।२।९१) । अस्मिंश्च विधौ प्राप्ते वेतसशब्दादपि मतुब् विधीयते । महिषाच्चेत्यादि । महिषशब्दान्मतुब् विधीयत इत्येतदर्थरूपं व्याख्येयमित्यर्थः । तत्रेदं व्याख्यानम् । पूर्वसूत्राच्चकारोऽनुवर्त्तते । स चानुक्त-समुच्चयार्थः । तेन महिषशब्दादपि भविष्यतीति ।

८८ । नड़शादाड् ड्वलच् ।

नड़शब्दात् पूर्वसूत्रेण ड्मतुप्यपि प्राप्ते शादशब्दादप्यणि ड्वलज् विधीयते ।

८९ । शिखाया वलच् ।

शिखाया वलचं वक्ष्यतीति । दन्तशिखात् संज्ञाया मित्यनेन (५।२।११३) ।

## ९०। उत्करादिभ्यश्छः।

## ९१। नड़ादीनां कुक् च।

कुञ्चाया ह्रस्वत्वञ्चेति। कुञ्चाशब्दस्य कुग् भवति ह्रस्वत्वञ्च। क्रौञ्चकीयमिति। तक्षन्नलोपश्चेति। तक्षन्नित्येतस्य कुगागमो भवति नलोपश्च तक्षकीयमिति।

## ९२। शेषे।

उपयुक्तादन्यः शेष इत्येतद् ग्रहणकवाक्यम्। तदेवापत्यादिभ्य इत्यादिना विवृणोति। अपत्यादयो हि चातुरर्थ्यपर्यन्ताः प्रत्ययविधौ विनियुक्ताः। तस्मात् तेभ्यो योऽन्यो जातादिरर्थः स शेषः। ननु च निवृत्ता अपत्यादयः। तेभ्यश्चान्तरेषु जातादिषु येषु घादयस्ततोऽपत्यादिषु नैव ते प्राप्नुवन्तीति तत् किं तन्निवृत्त्यर्थेन शेषाधिकारेणेत्यत आह तस्येदमित्यादि। जातादिष्वर्थेषु तस्येदमित्येषोऽर्थः पठ्यते। तच्चापत्यादीनां सामान्यम्। सामान्ये च विधीयमानस्तद्विशेषेऽपि विधीयते। तदुपलक्षणत्वात् सामान्यस्य। अतस्तस्येदं विशेषत्वाज् जाताद्यन्तःपातिष्वपत्यादिषु घादयः प्राप्नुवन्ति। तस्मात् तेषु मा भूवन्निति शेषाधिकारः क्रियते। किञ्चेतरादिना प्रयोजनान्तरं दर्शयति। असति हि शेषाधिकारे घादीनां प्रथमार्थेनैव सम्बन्धमनुभवतां तत्रैव कृतार्थता विज्ञायेत। तत्र द्वितीयादिष्वर्थेषु प्राग्दीव्यतीया एवाणादयः स्युः। न तु घादयः। शेषशब्दस्तूपयुक्तादन्यतया जातादीनर्थानेकीकृतत्र शक्नोत्यभिधातुम्। सर्वत्र घादयः सिध्यन्तीति। अतः साकल्यार्थं वा शेषवचनम्। लक्षणं चाधिकारश्चेति। इह लक्षणस्य विधायकत्वाल्लक्ष्यतेऽनेनेति लक्षणमिति कृत्वा। उत्तरत्राधिकारः स्वरितत्वात्। तत्र यदास्य लक्षणं चाक्षुषादयः सिध्यन्ति। यदा त्वधिकारता तदा सर्वेषु जातादिष्वर्थेषु घादयो भवन्ति। यदि तर्हि शेष इति लक्षणमपीदमनेनैव यथा ग्रहणादिष्वर्थेषु शेषेष्वर्थेषु प्रत्ययो भवति तथा जातादिष्वपि भविष्यतीति जाताद्यनुक्रमणमनर्थकम्। न। अपवादविधानार्थत्वात्। यानि त्वनपवादार्थानि जातनिवृत्तलब्धक्रीतकुशला इत्येवमादीनि तानि शेषग्रहणस्यैव प्रपञ्चो वेदितव्यः।

## ९३ । राष्ट्रावारपाराद् घखौ ।

राष्ट्रशब्दाद्वृद्धाच्छ (४।२।११४) इति च्छे प्राप्ते । अवारपारशब्दादणि घखौ विधीयेते । अवारस्य पारमवारपारमिति षष्ठीसमासः । राजदन्तादिषु दर्शनात् पारावारमित्यपि पक्षे भवति । विगृहीताद् विपरीताच्च लभ्यते । वक्तव्यमेवैतत् । अथवैकशेषो विज्ञास्यते । तत्रैकः समुदायार्थोऽपरोऽवयवार्थो भविष्यति । विपरीतस्याप्येकार्थानां विरूपाणा (१।२।६४,वा) मित्येकशेषो न विरुध्यते । यथा वक्रदण्डश्च कुटिलदण्डश्च कुटिलदण्डाविति । यथाच रुङ्कुलुकाविति । ननु च तस्यैवं प्रकृतयो भवन्ति । पञ्च राष्ट्रादिशब्दाः । प्रत्ययौ तु द्वाविति वैषम्यात् संख्यातानुदेशो न सिध्यति । नैष दोषः । निर्देशापेक्षं हि यथासंख्यत्वम् । निर्देशश्च द्वयोरेव । तदपेक्षया प्रकृते यथासंख्यत्वम् । एवं पञ्चात्मभेद उपजायते । न च यथासंख्यं बाधते । यथा वृञादीनाञ्च गणापेक्षया यथासंख्यं प्रवृत्ते तु यथासंख्येन प्रत्ययोत्पत्तिवेलायां गणेषु यद्यपि प्रातिपदिकरूपाण्यसमसंख्यानि भवन्ति तथात्रापि यथासंख्यं न हीयते । कुतः पुनरवगतमेकशेषोऽयमिति ? व्याख्यानात् । प्रकृतिविशेषोपादानमात्रेणेति । मात्रशब्दो जात्याद्यर्थविभक्तिनिर्देशस्य च व्यवच्छेदाय ।

## ९४ । ग्रामाद् यखञौ ।

वृद्धलक्षणे छे प्राप्ते वचनम् ।

## ९५ । कत्त्र्यादिभ्यो ढकञ् ।

कत्त्र्यादिषु यद्वृद्धं पठ्यते ततश्छे प्राप्ते शेषेभ्यस्त्वणीति योगोऽयमारभ्यते । कत्त्रिशब्दश्च तत्पुरुषः । कुत्सिता स्त्रयः । कोः कदिति (६।३।१०१) योगविभागात् कद्भावः । अतएव निपातनाद् बहुव्रीहि र्वा कुत्सिता स्त्रयो यस्याः सा कत्त्रिः । कुड्यायां यलोपश्चेति । कुड्याशब्दाड् ढञ् भवति यलोपश्च । कौड़ेयकः । ये तु कु (गड्या) ड्याया यलोपश्चेति पठन्ति तेषां कौ ( गड़े ) लेयकः ।

## ९६ । कुलकुक्षिग्रीवाभ्यः श्वास्यलङ्कारेषु ।

अणोऽपवादो योगः ।

## ९७। नद्यादिभ्यो ढक्।

यान्यत्रावृद्धानि तेभ्योऽणि प्राप्ते वृद्धेभ्यस्तु वाराणसीत्येवमादिभ्यश्छे प्राप्ते ऽपवादः। केषाञ्चिद् रोपधेतोः प्राचामिति (४।२।१२७) वुञि प्राप्ते ढगारभ्यते। पौरेयमिति। पुरि भवम्। वने भवं वानेयम्। गैरेयमिति। गिरौ भवम्। तदुभयमपि दर्शनम् प्रमाणभूतमिति। उभयथाप्याचार्य्येण शिष्याणां प्रतिपादितत्वात्। गणे नदीत्येतत् स्वरूपेण ग्रहणम्। न संज्ञाग्रहणार्थम्। संज्ञाग्रहणे हि मह्यादीनां पाठोऽनर्थकः स्यात्।

## ९८। दक्षिणापश्चात्पुरसस्त्यक्।

पश्चात्पुरसोरव्ययत्वात् साहचर्य्याद् दक्षिणाशब्दोऽपि दक्षिणादाजि- (५।३।३६) त्याजन्तमव्ययमेव गृह्यते। एवञ्चाव्ययात् (४।२।१०४) त्यबित्यत्र परिगणनात् त्यपः प्राप्तिर्नास्तीत्यणो ऽपवादोऽयं योगः।

## ९९। कापिश्याः ष्फक्।

वृद्धादिति (४।२।११४) छे प्राप्ते कापिशीशब्दात् ष्फग् विधीयते। वाह्नी-त्यादि। वाह्नीत्यादिभ्यः ष्फग् भवतीत्येतदर्थरूपं व्याख्येयमित्यर्थः। तत्रेदं व्याख्यानम्। उत्तरसूत्रादिह चकारः सिंहावलोकितन्यायेनानुवर्त्तते। तस्यानुक्तसमुच्चयार्थत्वाद् वाह्नयादिभ्योऽपि ष्फग् भवतीति।

## १००। रङ्कोरमनुष्येऽण् च।

ओर्देशे ठञिति (४।२।११९) ठञि जनपदतदवध्योश्चेति (४।२।४) जनपदलक्षणे वुञि कोपधादणित्यणि (४।२।१०२) प्राप्ते वचनम्। कच्छादिपाठादणपि सिद्ध इति। कच्छादिभ्यश्चेत्यत्र (४।२।२२) कोपधादणित्यण्-(४।२।१०२) ग्रहणानु-वृत्तेः। नञिवयुक्तन्यायेनेति। नञ्युक्ते चेवयुक्ते च तत्सदृशसंप्रत्ययो भवति। इह च मनुष्यशब्दो नञ्युक्तः। तस्मान्नेह मनुष्यप्रतिषेधः क्रियते। अपि च मनुष्यसदृशे प्राणिन्येव प्रवृत्तिः। तेन मनुष्यसदृशे प्राणिनि ष्फगणौ भवतः। अप्राणिनि तु कच्छादिपाठादणेव भवति। न ष्फक्। राङ्कवः कम्बल इति। विशेषविहितेनेत्यादि। यदीदमप्यण् न क्रियेत तदा कच्छादिभ्योऽणित्यणो

(४।३।१३३) राङ्कवः कम्बल इत्यत्र सावकाशत्वात् प्राणिनि विशेषविहितेन ष्फका तस्य बाधनं स्यात् । तस्मादेष दोषो मा भूदित्यणपि क्रियते ।

## १०१ । द्युप्रागपागुदक्प्रतीचो यत् ।

अणि प्राप्ते यद् विधीयते । प्रागित्यादयः शब्दा अञ्चते र्ऋत्विगादिना (३।२।५९) क्विनि कृते सत्यात्मानं लभन्ते । ते च द्विविधाः । अव्ययसंज्ञका अनव्ययसंज्ञकाश्च। यदा त्वस्तातिप्रत्ययान्ता भवन्ति तदा तद्धितश्चासर्वविभक्तिरि-(१।१।३८) त्यव्ययसंज्ञाविधानादव्ययसंज्ञकाः । अन्यदा त्वनव्ययसंज्ञाः । तेषामिह विशेषस्यानुपादानादुभयेषामपि ग्रहणम् । प्राच्यम् । अपाच्यमिति । अच (३ ४।१९) इत्यकार लोपः । चाविति दीर्घः (६।३।१३८)। उदीच्यमिति । उद ईदितीकारः (६।४।१३९) । प्राक्तनमिति । प्राक्शब्दाद् दिक्शब्देभ्यः सप्तमी-पञ्चमीप्रथमाभ्यो दिगित्यादिनास्तातिः (५।३।२७) । तस्याञ्चेर्लुगिति (५।३।३०) लुक् । ततोऽ नेन यति प्राप्ते सायञ्चिरमित्यादिना (४।३।२३) ट्युट्युलौ भवतः । यतस्तु यत्र कालवाची सोऽवकाशः ।

## १०२ । कन्यायाष्ठक् ।

अणपवादोऽयं योगः ।

## १०३ । वर्णौ वुक् ।

वर्णुरिति । नदोऽभिधीयते । स्रोतसि च कन्या न सम्भवतीति सामीपिक-मधिकरणं विज्ञायते । अत आह तत्समीपो देशो वर्णुरिति । वर्णुशब्दाददूर-भवश्चेत्यत्रार्थे (४।२ ७०) सुवास्त्वादिभ्योऽणित्यण् (४।२।७१) । तस्य जनपदे लुबिति (४।२।८४) लुपि कृते वर्णुरिति भवति । ननु च प्रतिपदविधानात् प्रत्ययस्य लुब् न भवति । नैवम् । सुवास्त्वादिपाठो हि जनपदादन्यस्मिन् प्रत्ययार्थे कृतार्थो वार्णवो ग्रामो वार्णवं नगरमिति । ननु जनपदे । तत्र तु परत्वाल्लोपेन भवितव्यम् । तद्विषयार्थेति । विषयग्रहणेन वर्णाविति सप्तम्या विषयसप्तमीत्वं दर्शयति । स वर्णुदेशो विषयो यस्य तद्विषयार्थः । सा पुनः कन्थैव ।

## १०४ । अव्ययात् त्यप् ।

अमेहेतयादि परिगणनम् । एतच्चोत्तरसूत्रस्थस्यान्यतरस्यांग्रहणस्योभयोर्योगयोः शेषभूतत्वाद् व्यवस्थितविभाषाविज्ञानाच्च लभ्यते । अमाशब्दः समीपवाची । स्वरादिपाठादव्ययत्वम् । इहेतयादीनां तद्धितश्चासर्वविभक्ति- (१।१।३८) रिति । अमा भवोऽमात्यः । औपरिष्ट इति । उपरिष्टाद् भवतीत्यपि कृतेऽव्ययानां भमात्रे टिलोपो वक्तव्य इति ( ६।४।१४४, वा ) टिलोपः । परतो भावः पारतः । परतःशब्दो विभाषा परावराभ्यामितयसुजन्तः (५।३।२९) । आरातीय इति । अत्र टिलोपो न भवति । वहिषष्टिलोपश्चेत्यत्वामितयत्वस्य (४।१।८५) ज्ञापितत्वात् । त्यब् नेर्ध्रुव इति । निशब्दाद् ध्रुवे वाच्ये त्यब् भवति । नियतं सर्वकाले भवो नित्यः । निसो गत इति । निःशब्दाद् गते वाच्ये त्यब् भवति । निष्ट्य इति । इस्वात् तादौ तद्धित इति (४।३।१०) मूर्धन्यः । एवमाविष्ट्य इतयत्रापि भवति ।

## १०५ । ऐषमोह्यःश्वसोऽन्यतरस्याम् ।

ऐषमःप्रभृतीनि कालवाचीनि प्रातिपदिकान्यव्ययानि । सायंचिरमितयादिना (४।३ २३) परत्वाट्ट्युट्युलोः प्राप्तयोरिदं वचनम् । शौवस्तिकमिति । द्वारादीनाञ्चेत्यैजागमः (७।३।४) ।

## १०६ । तीररूप्योत्तरपदादञ्ञौ ।

अथ तीररूप्योत्तरादित्येवं कस्मान्नोक्तम् ? एवं हि लघु सूत्रं भवतीतयत आह तीररूप्यान्तादितयादि । यदीह तीररूप्यान्तादित्युच्येत बहुच्पूर्वादपि स्यात् । बहुतीरे जात इति । भवति ह्येतत् तीरान्तम् । उत्तरपदग्रहणे ह्येषोऽतिप्रसङ्गो न भवति । नह्येतत् तीरोत्तरपदम् । यस्मात् समासे सत्येतद्भवति । पूर्वपदमुत्तरपदमिति न्यायेन नायं समासः ।

## १०७ । दिक्पूर्वपदादसंज्ञायां ञः ।

पौर्वशाल इति । पूर्वस्यां शालायां भवः पौर्वशालः । तद्धितार्थेत्यादिना (२।१।५१) तद्धितार्थे समासः । ततः प्रत्ययः । अथ पदग्रहणं किमर्थम् ? न

दिक्पूर्वादित्येवोच्येतेत्यत आह पदग्रहणमित्यादि। असति हि पदग्रहणे स्वरूपग्रहणं स्यात्। तथाच दिग्गजो दिग्नागो दिग्भागो दिग्दाह इत्येवमादिः प्रकृतिर्विज्ञायते। पदग्रहणे तु सति दिग्विशेषो गृह्यते। कथम्? पदग्रहणसामर्थ्याद् व्यधिकरणे बहुव्रीहिर्विज्ञायते। दिशः पूर्वपदं यस्य। दिश इति च वाचकापेक्षया षष्ठी विज्ञायते। तेनेह तदभिधायी पूर्वादिदिक्शब्दो गृह्यते।

## १०८। मद्रेभ्योऽञ्।

पौर्वमद्र इति। पूर्ववत् तद्धितार्थे समासः। ततोऽणि प्राप्ते। अवृद्धादपि बहुवचनविषयादिति (४।२।१२५) च वुञि। मद्रवृज्योः कन्निति (४।२।१२१) कन्यञ् विधीयते।

## १०९। उदीच्यग्रामाच्च बह्वचोऽन्तोदात्तात्।

शैवपुरम्। माहानगरमिति। शिवपुरमहानगरशब्दौ समासस्वरेणान्तोदात्तौ। माथुरमिति। मथुराशब्दः प्रातिपदिकस्वरेणान्तोदात्तः। मध्यदेशग्रामस्तु। तेनाणेव भवति। ध्वाजमिति। ध्वजीशब्दः पिप्पल्यादित्वात् ङीषन्तः। गौरादिषु हि पिप्पल्यादयः पठ्यन्ते। तेनासौ प्रत्ययस्वरेणान्तोदात्तः। उदीच्यग्रामश्च बह्वजन्तो भवति। धानशब्द उदात्त इति। गतिकारकोपपदादिति (६।२।१३९) धानशब्दस्य ल्युडन्तस्य प्रकृतिभावात्।

## ११०। प्रस्थोत्तरपदपलद्यादिकोपधादण्।

उदीच्यग्रामलक्षणस्याञोऽपवाद इति। प्रस्थोत्तरपदादीनामुदीच्यग्रामत्वात्। माद्रीप्रस्थः। माहकीप्रस्थ इति। अत्र प्रकृतिः समासस्वरेणान्तोदात्ता। अथोत्तरपदग्रहणं किमर्थम्? न प्रस्थान्तादित्येवोच्येत? नैवं शक्यम्। तदिहापि प्रसज्येत। उत्तमकर्णीप्रस्थः। तत्राप्युत्तरपदग्रहणान्न भवति। नह्यत्र प्रस्थशब्द उत्तरपदम्। किं तर्हि? कर्णीप्रस्थशब्दः। ततश्छञिठयोरपवाद इति। वाहीकग्रामेभ्यश्चेति (४।२।११७) प्राप्तयोः। अथ वाहीकशब्दः किमर्थमिह पठ्यते? यावता कोपधत्वादेवाण् सिद्धः। अत्राह

वाह्णीकशब्द इत्यादि। यदि वाह्णीकशब्द इह न पठ्यते परत्वाद् वृद्धाच्छ इति (४।२।११४) च्छः स्यात्। कोपधस्य तु निलीक इत्यत्रावृद्धमवकाशः। तस्मात् परमपि च्छं बाधित्वा ऽण् यथा स्यादिति कोपधोऽपि वाह्णीकशब्दः पठ्यते। अथाण्ग्रहणं किमर्थम्? न यावता यथाविहितमेवोच्येत? न। पुनर्विधानादणेव भवतीति विज्ञायते। अपवादस्य विधाने पुनर्विधानमनर्थकमित्याह अण्ग्रहणमित्यादि। यदत्र वृद्धं वाह्णीकग्रामस्तस्मात् प्राग्दीव्यतोऽ(४।१।८३)-णित्यतोऽणि प्राप्ते वृद्धाच्छः (४।२।११४) प्राप्नोति। तस्मिन् वाह्णीकग्रामेभ्यश्चेति (४।२।११७) ठञ्ञिठौ। तौ परत्वाद् बाधित्वा यद्यत्राण्ग्रहणं न क्रियेत तदा पुनर्विधानाच्छ एव स्यात्। अण्ग्रहणादणेव भवति। गोष्ठ्यां भवं गौष्ठमिति। तस्मात् बाधकमपि बाधित्वाणेव यथा स्यादित्येवमर्थमण्ग्रहणम्। कोपधग्रहणमिहाजनपदार्थम्। जनपदतदवधि(४।२।१२४)कोपधादणित्यनेन (४।२।१३२) सिद्धः। यक्नल्लोमशब्दः पलद्यादिषु पठ्यते। तस्य नलोपो निपात्यते। अन्यथान्निति (६।४।१६७) प्रकृतिभावे सति यक्नल्लोम्नि भवः याक्नल्लोम इति न सिध्येत्।

## १११। कण्वादिभ्यो गोत्रे।

गोत्रग्रहणमिह न प्रत्ययार्थमिति। शेषाधिकारात्। यदि हि प्रत्ययार्थः स्याच् शेषाधिकारो बाध्येत। न प्रकृतिविशेषणम्। असम्भवात्। नहि कण्वादीनाम् परमप्रकृतिरूपाणामेव गोत्रार्थत्वं सम्भवति। तर्हि गोत्रग्रहणं सम्बध्येतेत्येवमर्थं पृच्छत्येवमित्यादिना प्रत्ययविधिविशेषणं गोत्रग्रहणमिति दर्शयित्वा तेन गोत्रप्रत्ययान्तेभ्यः कण्वादिभ्यो ऽण् भवतीति दर्शयति। छस्यापवाद इति। गोत्रप्रत्ययान्तानां कण्वादीनां वृद्धत्वात्। काण्वाः। गौकक्षा इति। कण्वगोकक्षशब्दाभ्यां गोत्रापत्ये गर्गादित्वाद् यञ्। तदन्तादण्। आपत्यस्येत्यादिना (६।४।१५१) यलोपः। काण्व इति। सास्य देवतेत्यण् (४।२।२४)।

## ११२। इञश्च।

दाक्ष्यादिभ्यो ऽत (४।१।९५) इञितीञन्तेभ्योऽण्। सौतङ्गमीयमिति।

सुतङ्गमेन निर्वृत्तमिति वुञ्छणित्यादिना (४।२।८०) सुतङ्गमशब्दाच्चातु-रर्थिक इञ्।

११३। न द्व्यचः प्राच्यभरतेषु।

पैङ्गीयाः। प्रौष्ठीया इति (F)। प्राच्यगोत्रोदाहरणम्। काशीयाः पाशीया इति। भरतगोत्रोदाहरणम्। कथमित्यादि चोद्यम्। नैतदस्तीति परिहारः। उभयश्चैतत् तदुदाहरणम्। उभयश्चैतदनुगतार्थम्। ननु च भरताः प्राच्या एव। ततः प्राच्यग्रहणेनैव तेषां ग्रहणं भविष्यति। तत् किमर्थं तेषां स्वशब्देनोपादानमित्यत आह ज्ञापकादन्यत्रेत्यादि। क्वान्यत्र। बह्वच इञः प्राच्यभरतेष्वित्यत्र (२।४।६६)।

११४। वृद्धाच्छः।

अव्ययतीरेत्यादि। तत्राव्ययविधिं बाधते। आराद् भव आरातीयः। तीरोत्तर एव विधिस्तत्र। वायसतीरे भवो वायसतीरीयः। रूपोत्तरपदात् तु ञ्यं बाधित्वा धन्वयोपधाद् वुञिति (४।२।१२१) योपधलक्षणो वुञ् भवति। मणिरूप्ये भवो माणिरूप्यक इति। उदीच्यग्रामविधिं बाधते। वाडवाहे भवो वाडवाहीयः। साङ्कलपुरे भवः साङ्कलपुरीयः। कोपधलक्षणम्। औदके भव औदकीयः। चौलुके भवश्चौलुकीयः। तेषां तु विधीनामवृद्धेऽवकाशः।

११५। भवतष्ठक्छसौ।

सकारः पदसंज्ञार्थ इति। सिति चेति पदसंज्ञा (१।४।१६) यथा स्यात्। तस्याञ्च सत्यां भवदीयमित्यत्र झलाञ्जशोऽन्त इति (८।२।३९) जश्त्वं भवति। भावत्क इति। इसुसुक्तान्तात् कः (७।३।५१)। अवृद्धात्तु भवत इति। अवन्तादिति।

११६। काश्यादिभ्यष्ठञ्ञिठौ।

काशिचेदिशब्दाभ्यां जनपदलक्षणे वुञि प्राप्ते साजातेरिञश्चेत्यणि

(F) These two examples do not occur in the printed काशिका।

(४।२।११२) सांवाहादिभ्यो वृद्धाच्छे (४।२।११४) इस्तिकर्षू शब्दादोर्देशे ठञिति (४।२।११८) ठञि परिशिष्टेभ्य: प्रागदीव्यतोऽणित्यणी-(४।१।८३)दमारभ्यते। कथं पुनर्ञकार एव विपर्यस्तदेशेऽनुबन्धे क्रियमाणे विशेष इत्यत आह स्त्रीप्रत्यये विशेष इति। अन्ते हि ञकारेऽनुबन्धे सति टिड्ढाणञिति ङीब् (४।१।१५) भवति। आदौ हि सति टाबेव भवति। वृद्धादित्यनुवर्त्तत इति। यद्येवमत्र ये वृद्धा: पठ्यन्ते तेभ्य: प्रत्ययो न प्राप्नोतीत्याह ये त्ववृद्धा इत्यादि। यदि तर्ह्यवृद्धेभ्योऽपि वचनप्रामाण्यात् प्रत्ययो भवति वृद्धादित्यस्यानुवृत्तिरपार्थिकेत्यत आह देवदत्तशब्द इत्यादि। देवदत्तशब्दस्य प्रागदेश एव हि वर्त्तमानेऽस्य वृद्धसंज्ञा। न वाह्णीकग्रामे। तत्र यदि वृद्धादिति नानुवर्त्तते वाह्णीकग्रामवाचिनोऽपि ततष्ठञ्ञिठौ स्याताम्। तस्मात् तन्निवृत्त्यर्थं वृद्धाधिकारोऽर्थवान् भवतीति भाव:। कथमित्यादिना वृद्धसंज्ञायां देवदत्तीया इति भाष्यकारस्योपन्यासे तदुदाहरणं विघटय्य तन्नैवं वर्णयन्तीत्यादिना समर्थयते। आपदादिपूर्वपदात् कालादिति। आपच्छब्द आदिर्येषां तान्यापदादीनि। तानि पूर्वपदं यस्य तदापदादिपूर्वपदम्। तत: कालात् ठञ्ञिठौ भवत:। आदिशब्देनोर्द्धादय: शब्दा गृह्यन्ते।

११७। वाह्णीकग्रामेभ्यश्च।

११८। विभाषोशीनरेषु।

११९। ओर्देशे ठञ्।

नैषादकर्षुक:। शावरजम्बुक इति। निषादकर्षू शवरजम्बूशब्दाभ्यां ठञ्। इसुसुक्तान्तात् क: (७।३।५१)। केऽण इति (७।४।१३) ह्रस्व:। ननु च ठञ् प्रकृत एव। स एवेहानुवर्त्स्यते। तत् किं ठञ्ग्रहणेनेत्यत आह ठञ्ञिठयोरिति। यथैव हि ठञ् प्रकृत एवं ञिठोऽपि। तत्र द्वयोरपि प्रकरणे ठञ् चानुवर्त्तिष्यते नेतर इत्येतन्न लभ्यते। तस्माद् ञिठस्य निवृत्तये पुनष्ठञ्ग्रहणं कृतम्। ननु चास्वरितत्वादेव ञिठो नानुवर्त्तिष्यते। सत्यमेतत्। तदेवास्वरितत्वं ज्ञापयितुं ञिठस्य ठञ्ग्रहणं कृतम्। तच्चास्वरितत्वमाख्यायते मन्दबुद्धीनामनुग्रहाय।

## १२० । वृद्धात् प्राचाम् ।

आढ़कजम्बुक इति । पूर्ववत् कादेशो ह्रस्वत्वञ्च ।

## १२१ । धन्वयोपधाद् वुञ् ।

धन्वनोऽर्थस्य ग्रहणं न स्वरूपस्य । वृद्धाधिकारात् । नहि धन्वशब्दो वृद्धः । पारेधन्वनि जातः पारेधन्वकः । न स्तद्धितइति (६।४।१४४) टिलोपः । ऐरावते जात ऐरावतकः ।

## १२२ । प्रस्थपुरवहान्ताच्च ।

वृद्धादितिप्रवेति । यदि तर्हि वृद्धादित्यनुवर्त्तते वृद्धाधिकारादेव स्वरूप-ग्रहणाभावात् कथं तदन्तविधिर्भविष्यति । नहि प्रस्थादेः केवलस्य वृद्धत्वं सम्भवति । किं तर्हि ? तदन्तस्य । तत् किमन्तग्रहणेन ? मैवम् । सत्यपि वृद्धाधिकारे यथा धन्वेति वृद्धग्रहणं हि देशस्य विशेषणं तथेहापि स्यात् । तन्निवृत्त्यर्थमन्तग्रहणं कृतम् ।

## १२३ । रोपधेतोः प्राचाम् ।

ईकारान्तश्चेति । कथं पुनर्ज्ञायते दीर्घस्येदं ग्रहणम् ? न ह्रस्वस्येति ? सामर्थ्यात् । प्राग्ग्रहणं हि देशस्य विशेषणम् । वृद्धादिति वर्त्तते । न च वृद्धमिकारान्तं प्राग्देशवाच्यस्ति । तस्माद् दीर्घस्येदं ग्रहणमिति विज्ञायते । एकचक्राशब्दस्य त्वेङ् प्राचामिति (१।१।७५) वृद्धसंज्ञा । अथ तपरकरणं किमर्थम् ? नेह किञ्चित् तस्य व्यावर्त्यमस्तीत्यत आह तपरकरणं विस्पष्टा-र्थम् । असति हि तस्मिन् रोपध इति स्थिते गुणे कृते विभक्तौ च रोपधयोरिति निर्देशः स्यात् । तत्रैवं सन्देहः स्यात् । किं रोपधस्येदं ग्रहणमुत रोपधस्ये-कारान्तस्येति । तपरकरणे तु सति सन्देहो न भवति । ईरोपधादिति नोक्तम् । वैचित्र्यार्थम् ।

## १२४ । जनपदतदवध्योश्च ।

तदवधेरपीत्यादि । जनपदतदवध्योश्चेत्यत्र तच्छब्देन सन्निहितत्वाज्जन-पद एव परामृश्यते । न चायं षष्ठीसमासः । षष्ठीसमासे ह्यजनपदो-

ऽपि यो ऽवधिस्ततोऽपि वुञ् प्रसज्येत । छ एव तस्येष्यते । मौञ्जी नाम वाहीकानामवधिर्ग्रामः । तत्र भवो मौञ्जीय इति । तस्मात् समानाधिकरण एवायं समासः । स एव जनपदोऽवधिर्मर्य्यादा तदवधिरिति । तेन जनपदावधिरेव जनपदा एव गृह्यन्ते । न ग्रामः । किमर्थं तर्हि तदवधिग्रहणमिति । यदि तदवधिरपि जनपद एव गृह्यते निरर्थकं तर्हि तस्य ग्रहणम् । जनपदाच्चेत्येतावदेव वक्तव्यमित्यभिप्रायः । बाधकबाधनार्थमिति । गर्त्तोत्तरपदाद् वक्ष्यमाणश्छ (४।२।१३७) एव परत्वाद् विशेषविहितत्वाच्च बाधकः । तस्य बाधनार्थं तदवधिग्रहणम् । तेन हि त्रिगर्त्तेषु भव स्त्रैगर्त्तक इत्यतोत्तरसूत्रेण गर्त्तोत्तरपदाच्छं (४।२।१२६) बाधित्वा वुञेव भवति ।

## १२५ । अवृद्धादपि बहुवचनविषयात् ।

अणछयोरपवाद इति । अवृद्धादणोऽपवादः । वृद्धाच्छस्य । अथ विषयग्रहणं किमर्थम् ? विनापि तेन विशेषो लभ्यत एव । कथम् ? इह जनपदतदवधिशब्दाभ्यां समानाधिकरणत्वाद् बहुवचनशब्दो न पारिभाषिको विज्ञायते । किं तर्हि ? अन्वर्थः । बहूनामर्थानां वचनो यो जनपदस्तदवधिश्चेति । यश्च बहूनामर्थानां वचनः सोऽर्थान् बहून् ब्रुवन् सामर्थ्यादेव बहुवचनविषयो भवतीत्याह विषयग्रहणमित्यादि । अनन्यत्रभावः कथं नाम लभ्यत इत्येवमर्थं विषयग्रहणम् । अनन्यत्रभावः किमर्थमिष्यत इत्याह जनपदैकदेशः क्रियते । वर्त्तनी च वर्त्तनी च वर्त्तनी च वर्त्तन्यः । तद् बहूनां वाचको भवति । ततश्च यदि विषयग्रहणं न क्रियते ततो वर्त्तनीषु भव इति वुञ् स्यात् । विषयग्रहणे तु सति न भवति । अनन्यत्रभावो विषयः । तेनैवं विज्ञायते । बहुवचनं न यो व्यभिचरतीति । यश्चैकशेषः स बहुवचनं व्यभिचरति । तस्य हि विवक्षाभावे बहुत्वात् । द्वयोरपि च कदाचिद्वृत्तेः । अपिग्रहणमिति । अपिग्रहणं हि वृद्धादपि यथा स्यादित्येवमर्थं क्रियते । वृद्धात् पूर्वेणैव सिद्धः प्रत्ययः । तत् किमपिग्रहणेन ? तक्रकौण्डिन्यन्यायेनेति । यथा ब्राह्मणेभ्यो दधि दीयतां तक्रं कौण्डिन्यायेति सामान्येन प्राप्तस्य दधि दानस्य विशेषे वर्त्तमानेन तक्रदानेन बाधा क्रियते

तथेहापि बहुवचनविषये च सामान्येन प्रवृत्तस्य पूर्वयोगस्य बहुवचनविषये वर्त्तमानेनानेन योगेन बाधा विज्ञायते । तस्माद् वृद्धादपि यथा स्यादित्यपि-शब्देन समुच्चीयते ।

## १२६ । कच्छाग्निवक्त्रगर्त्तोत्तरपदात् ।

कच्छशब्दार्थमुत्तरपदग्रहणम् । स हि केवलोऽपि देशे वर्त्तते । इतरेषां तु केवलानां देशे वृत्त्यसम्भवात् सामर्थ्यादेव तदन्तविधिर्लभ्यत इतीतरान् प्रत्युत्तरपदग्रहणमनर्थकम् । कच्छाग्निवक्त्रगर्त्तान्तादिति नोक्तम् । बहुच्-पूर्वान्मा भूत् । यदाहि कच्छदेशेन देशान्तरस्य गुणसाम्ये सतीषदसमाप्तः कच्छदेश इति कच्छशब्दाद् बहुच् क्रियते तदा बहुकच्छशब्दो देशवचन इति । अन्तग्रहणे तु सति ततोऽपि प्रत्ययः स्यात् । उत्तरपदग्रहणान्न भवति । दारुकच्छक इति । कच्छशब्दस्योत्तरपदस्य वृद्धस्योदाहरणम् । पैप्पली-कच्छक इत्यवृद्धस्योदाहरणम् । एवमग्न्याद्युत्तरपदानामपि । एकमवृद्धस्यो-दाहरणम् । अपरं वृद्धस्य वेदितव्यम् ।

## १२७ । धूमादिभ्यश्च ।

अणादेरपवाद इति । आदिशब्देन कच्छादीनां ग्रहणम् । तत्र देशवचना अवृद्धा ये धूमादयस्तेभ्योऽणोऽपवादः । ये तु वृद्धास्तेभ्यश्छस्य । य उदीच्य-ग्रामास्तेभ्योऽणः । ये वाहीकग्रामास्तेभ्य ठञ्ञिठयोः । तस्य योपधत्वादेव वुञि सिद्ध इति । धन्वयोपधाद्वुञित्यनेन (४।२।१२१) । जनपदलक्षणे वुञि सिद्ध इति । अवृद्धादपीत्यादिना (४।२।१२५) । कुलात् सौवीरेषु इति । कुल-शब्दाद् वुञ् भवति सौवीरेषु । कौलको भवति सौवीरश्चेत् । कौलोऽन्यत् ।

## १२८ । नगरात् कुत्सनप्रावीण्ययोः ।

नागरा ब्राह्मणा इति । अण् । ननु च नगर माहिष्मतीति नगरशब्दः कत्त्र्यादिषु पठ्यते । ततो ढकञा भवितव्यम् । तत् कथं नागरा इति प्रत्युदाह्रियत इत्याह कत्त्र्यादिष्वित्यादि । द्विविधो नगरशब्दः । जाति-वचनः संज्ञाशब्दश्च । तयोः कत्त्र्यादिषु माहिष्मतीशब्देन साहचर्यात् संज्ञाशब्दः

पद्यते। तत्र जातिशब्दान्नागरा इति प्रत्युदाहृतम्। संज्ञाशब्दे तु नागरेयक इति प्रत्युदाहर्त्तव्यम्।

## १२९। अरण्यान् मनुष्ये।

औपसंख्यानिकस्य णस्यापवाद इति। अरण्याण्ण (४।२।१०४) इत्युपसंख्यानात् प्राप्तस्य। पथ्यध्यायन्यायेत्यादि। एषु पथ्यादिषु वुञ् भवतीत्येतदर्थरूपं व्याख्येयमित्यर्थः। तत्रेदं व्याख्यानम्। धूमादिभ्य(४।२।१२७)-श्चेत्यतश्चकारोऽनुवर्त्तते। स चानुक्तसमुच्चयार्थः। तेन पथ्यादिषु वुञ् भवति। वा गोमयेष्विति। गोमयेषु वाच्येषु वा वुञ् भवतीति। स तु तस्यैव चकारस्यानुक्तसमुच्चयार्थस्यानुवृत्तेर्वक्ष्यमाणस्य विभाषाग्रहणस्योभयोः शेषभूतत्वाल्लभ्यते। यदि तर्हि वक्ष्यमाणं विभाषाग्रहणमुभयोर्योगयोः शेषभूतं पथ्यादिष्वपि विकल्पेन विधिः स्यात्। नैष दोषः। व्यवस्थितविभाषा हि सा। तेन गोमयाद् विकल्पेन विधिर्भवति। पथ्यादिषु नित्यमिति।

## १३०। विभाषा कुरुयुगन्धराभ्याम्।

सैषा युगन्धरार्था विभाषेति। न कुरुशब्दार्था। तत्र कच्छादिपाठाद् विनापि विभाषाग्रहणेनाणा भवितव्यम्। ननु युगन्धरशब्दादप्यवृद्धादपि बहुवचनविषयादिति (४।२।१२५) नित्यएव वुञि प्राप्ते वचनमनित्यार्थं भविष्यति। नित्ये हि वुञि पुनरारम्भोऽनर्थकः स्यात्। तस्माद् युगन्धरार्थोऽपि विभाषा न प्रसज्येत। नैतत्। पुनरारम्भो विपर्ययेणापि शक्यते समर्थयितुम्। जनपदलक्षणो यो वुञ् स विभाषा। अयं तु नित्य इति। अस्मात् तु युगन्धरार्थं विभाषाग्रहणं कर्त्तव्यम्। मनुष्यतत्स्थयोस्तु कुरुशब्दान्नित्य एव वुञ् भवति। कच्छादिषु पाठसामर्थ्यात्। अन्यथानयैव विभाषया वुञणोः सिद्धत्वात् कच्छादिपाठोऽनर्थकः स्यात्। अनवकाशत्वात्।

## १३१। मद्रवृज्योः कन्।

जनपदवुञोऽपवाद इति। अवृद्धादपीत्यादिप्राप्तस्य (४।२।१२५)। मद्रवृज्योः कन्निति व्यत्ययस्य परनिपातो द्वन्द्वे घीत्यस्य (२।२।३२) विधेरनित्यत्वज्ञापनार्थम्। तेन धूमाग्नी इत्येवमादि सिद्धं भवति।

## १३२ । कोपधादण् ।

जनपदवुञोरपवाद इति । पूर्ववत् प्राप्तस्य । किं पुनर्देशादन्यत्र वर्त्तमानो नेष्यते ? यो देशे न वर्त्तत इत्याह अन्यत्रेत्यादि । पूर्वेणेति । प्रस्थोत्तरपदादिसूत्रेण (४।२।११०) । अथाण्ग्रहणं किमर्थम् । न कोपधाद् यथाविहितमेवोच्येत । यथाविहितमुच्यमानेऽणपवादो वुञ् स्यादिति चेत् ? न । वुञ्विधाने हि वचनमनर्थकं स्यात् । तेन विना वुञः सिद्धत्वात् । तस्माद् वचनसामर्थ्याद् विहितोऽणेव प्राप्नोति । अन्येन बाधित्वा अतएवाण् भविष्यतीति । स हि प्राग्दीव्यतोऽणिति ( ४।१।८३ ) विहितो बाधितश्च वुञेवेत्यत आह अण्ग्रहणमित्यादि । इक्ष्वाकुषु जात इतीक्ष्वाकुशब्दादोर्देशे ठञ् (४।२।११९) प्राप्तः । तस्मिञ् जनपदवुञा बाधिते यदीहाण्ग्रहणं न क्रियते तदा पुनर्वचनाद् वुञेव भवति । अण्ग्रहणादणेव भवति । ऐक्ष्वाक इति । दाण्डिनायनहास्तिनायनेत्यादा—(६।४।१७४) विक्ष्वाकुशब्दस्योकारस्य लोपो निपातितः ।

## १३३ । कच्छादिभ्यश्च ।

वुञादेरपवाद इति । आदिशब्देन ठञः । तत्र ये जनपदबहुवचनविषयास्तेभ्यो वुञः प्राप्तस्यापवादः । सिन्धुवर्णुशब्दाभ्यामोर्देशे ठञः (४।२।११९) । कच्छशब्दो न बहुवचनविषय इति । तेनावृद्धादपीत्यादिना (४।२।१२५) बाधकस्य वुञोऽप्राप्तावेव सामान्येनाण् सिद्धएवेति दर्शयति । यद्येवं किमर्थं तस्य पाठ इत्याह तस्येत्यादि । उत्तरसूत्रेण वुञ्मनुष्यतत्स्थयोर्यथा स्यादित्येवमर्थः । कच्छस्येह पाठो नत्वनर्थकः । कोपधादेवाण् सिद्ध इति । पूर्वसूत्रेणेति । इह ग्रहणमुत्तरार्थमिति । उत्तरसूत्रे वुञ् यथा स्यात् ।

## १३४ । मनुष्यतत्स्थयोर्वुञ् ।

## १३५ । अपदातौ साल्वात् ।

साल्व इति । कच्छादि पाठादण् ।

## १३६ । गोयवाग्वोश्च ।

## १३७। गर्त्तोत्तरपदाच्छः।

अवृद्धार्थं वचनम्। वृद्धात्तु वृद्धाच्छ (४।२।११४) इत्यनेनैव सिद्धमिति। सति तु वृद्धादपि परत्वादनेनैव भवितव्यम्। अणोऽपवाद इति। नाप्राप्ते तस्मिन्नस्यारम्भात्। वाहीकग्रामलक्षणश्चेत्यादि। यद् गर्त्तोत्तरपदं वाहीकवाचि ततो वाहीकग्रामलक्षणौ ठञ्ञिठौ। बाधितत्वात् परत्वाच्छ एव भवति। तस्य गर्त्तोत्तरपदमवकाश इति। अथोत्तरपदग्रहणं किमर्थम्? स गर्त्तान्ता-दित्येवोच्येतेत्याह उत्तरपदग्रहणमित्यादि। यदि गर्त्तान्तादित्युच्येत तदा बहुगर्त्त इत्येतस्मादपि बहुच्पूर्वात् स्यात्। भवति ह्येतद् गर्त्तान्तम्। उत्तर-पदग्रहणे तु सति न भवति। नह्येतद् गर्त्तोत्तरपदम्। समासे हि सत्येतद् भवति पूर्वपदमुत्तरपदमिति।

## १३८। गहादिभ्यश्च।

अणादेरपवाद इति। आदिशब्देन वुञः। तत्र कामप्रस्थशब्दात् प्रस्थपुरवहान्ताच्चेति (४।२।१२२) प्राप्तस्य वुञोऽपवादः। शेषेभ्यस्त्वौत्सर्गि-कस्याणः। सम्भवापेक्षं विशेषणमिति। सम्भवमपेक्षत इति सम्भवापेक्षम्। येषां देशे चादेशे च वृत्तिः सम्भवति गहादीनां तेषामेवेदं विशेषण-मिति। एतदुभयमपि विशेषणमेवाचार्य्यैः स्मर्य्यते। पृथिवीमध्यस्येत्यादिना तद्विशेषं दर्शयति। चरणसम्बन्धेनेत्यादि। चरणेनार्थेन सम्बन्ध चरण-सम्बन्धः। तेन हेतुना कारणेन वाण् भवति। किंविशिष्टः? निवास-लक्षणः। निवासो लक्षणं यस्य स तथोक्तः। कथं निवासलक्षणः? यः पृथिवीमध्ये निवासभूते वर्त्तमानान् मध्यशब्दाद् भवति स हि निवासेन लक्ष्यते। तदेतदुक्तं भवति पृथिवीमध्यनिवासोऽस्य चरणस्येति। यदायमर्थो विज्ञायते तदाण् भवति। नान्यत्रेति। तेन यदा पृथिवी-मध्याद् गतं चरणमिति विवक्ष्यते तदा च्छ एव भवति मध्यमीय इति। कथं पुनः सामान्योक्तावेष विशेषो लभ्यत इति? सामान्याभिधाने-ऽपि विशेषोपस्थानदर्शनात्। घृतचरणवच्च स ह्यविशेषेणोपदिष्टो घृतादिष्वेवा-वतिष्ठते। तस्मात् सामान्योक्तावपि पृथिवीमध्य एव वर्त्तमानो मध्यशब्दो

मध्यमभावमापद्यते । चरणे च प्रत्ययार्थे निवासलक्षण एवाण् भवति । नहि सर्वेषु जातादिष्वर्थेषु । मुखपार्श्वतसोर्लोप इति । मुखपार्श्वशब्दयोस्तसन्तयोः प्रत्ययसन्नियोगेन लोपो भवति । स चालोऽन्त्यस्येति ( १।१।५२ ) वचनादन्त्यस्य लोपवचनम् । अव्ययानां भमात्रे टिलोप इत्यस्यानित्यत्वज्ञापनार्थम् । तेनारातीय इत्यत्र न भवति । मुखतीयम् । पार्श्वतीयम् । अपादाने चाहीयरुहोरिति (५।४।४५) मुखपार्श्वशब्दाभ्यां तसिः । आद्यादिभ्य उपसंख्यानमित्यौपसंख्यानिके (५।४।४४, वा) सकारस्य लोपे कृते ऽकारस्यापि यस्येति चेति ( ६।४।१४८ ) लोपः । देवस्य चेति वक्तव्यमिति । देवशब्दस्य कुग् भवतीत्येदर्थरूपं व्याख्येयमित्यर्थः । तत्रेदं व्याख्यानम् । कुग्जनस्य परस्येत्यत्र चकारोऽनुवर्त्तते । स चानुक्तसमुच्चयार्थः । तेन देवशब्दादपि भविष्यति ।

१३९ । प्राचां कटादेः ।

१४० । राज्ञः क च ।

१४१ । वृद्धादकेकान्तखोपधात् ।

कोपधलक्षणस्य चेत्यादि । अकेकान्तात् कोपधादण्यित्यणि (४।२।११०) प्राप्तेऽणोऽपवादः । कोपधादपि वाहीकग्रामलक्षणस्य ठञो ञिठस्य च । रोपधेतोः प्राचामिति । अकेकान्तग्रहणमिति । इह सूत्रे ऽकेकान्तग्रहणमपनीय कोपधग्रहणं कर्त्तव्यम् । कोपधादित्येवं वक्तव्यमित्यर्थः ।

१४२ । कन्थापलदनगरग्रामह्रदोत्तरपदात् ।

वाहीकग्रामलक्षणस्येति । ठञ्ञिठयोश्च । अन्तग्रहणेनैव सिद्धे सत्युत्तरपदग्रहणं वैचित्र्यार्थम् ।

१४३ । पर्वताच्च ।

१४४ । विभाषाऽमनुष्ये ।

पार्वतीयानि फलानीति । ननु चामनुष्यशब्दो रक्षःपिशाचादिष्वेव रूढः । तथाहि सभाराजाऽमनुष्यपूर्वेत्यत्रेह ( २।४।२३ ) कस्मान्न भवति काष्ठसभेति । तत्रेदमुक्तम् । अमनुष्यशब्दो रूढिरूपेण रक्षःपिशाचादिष्वेव

वर्त्तत इति । तत् कथममनुष्य इत्युच्यमाने फलादिष्वभिधेयेषु भवति ? नैष दोषः । द्वौ ह्यमनुष्यशब्दौ । रूढो व्युत्पन्नश्च । तत्र सभाराजाऽमनुष्य-पूर्वेत्यत्र ( २।४।२३ ) रूढिशब्दस्य ग्रहणम् । इह त्वितरस्य मनुष्यादन्यत्र वर्त्तमानस्य ।

१४५ । कृकणपर्णाद् भारद्वाजे ।

भारद्वाजशब्दोऽपि देशवचन एव । न गोत्रशब्द इति । देश एव भारद्वाजे कृकणपर्णशब्दवृत्तेः सम्भवात् ।

इति बोधिसत्त्वदेशीयाचार्य्यश्रीजिनेन्द्रबुद्धिपादविरचितायां
काशिकाविवरणपञ्जिकायां चतुर्थस्याध्यायस्य
द्वितीयः पादः समाप्तः ॥ ४।२ ॥

अथ

# काशिकाविवरणपञ्जिका।

## चतुर्थोऽध्यायः।

## तृतीयः पादः।

———:०:———

### १। युष्मदस्मदोरन्यतरस्यां खञ्च।

तत्र वैषम्याद् यथासंख्यं न भवतीति। द्वे हि प्रकृती। प्रत्ययाश्च त्रय इति वैषम्यम्। ननुच खञ्छावेवानेन विधीयेते। अण्प्रत्ययस्त्वन्यतरस्यां ग्रहणेन यथाप्राप्तस्याभ्यनुज्ञाने कृते शास्त्रादेव भवति। तत् कुतो वैषम्यम्? छोऽपि तर्हि तेनैवानेन विधीयते। तस्यापि हि चकारोऽभ्यनुज्ञापक एव। सोऽपि स्वशास्त्रादेव वृद्धाच्छ (४।२।११४) इत्येतस्माद् भवतीति। एवमपि वैषम्यम्। सर्वथा नास्ति यथासंख्यप्रसङ्गः।

### २। तस्मिन्नणि च युष्माकास्माकौ।

तस्मिन्निति साक्षाद् विहितः खञ् निर्दिश्यत इति। तस्मिन्नित्युक्ते प्रागेव तत्रैव प्रतीत्युत्पत्तेः। तत्र पुनः कारणं साक्षाद्विहितत्वम्। आनन्तर्याच्च खञः। तस्यैव निर्देशो युक्तः। ननुच पूर्वसूत्रे खञ्चेति चकारेण च्छोऽनुकृष्यते। वाचकदेशश्च वाच्य इति। खञश्छ एवानन्तरो भवति। स्याद-नन्तरो यदि चकारस्तस्य वाचकः स्यात्। नचासौ तस्य वाचकः। स हि समीपवर्त्तिनः पदार्थान्तरस्य सहायतामात्रमाचष्टे। खञः सहायता माख्याय निवृत्ते चकारे सा सहायता प्रकरणाच् छेनैव विज्ञायते। तस्माच् चकार स्छस्य वाचको न भवतीति नासौ तादृशः। तत्कृतयोस्तस्यानन्तर्य-

निमित्तयोरित्यादि। द्वे हि निमित्ते खञणौ। निमित्तिनावपि द्वावेवादेशौ। ततः समानत्वाद् यथासंख्येनात्र भवितव्यमिति मन्यमानस्य प्रश्नः। योगविभाग इत्यादि परिहारः। युष्मदीयः। अस्मदीय इति। यदि तस्मिन्नणि चेति नोच्यते ततो यथा पूर्वसूत्रविहितयोः खञणोरिमावादेशौ भवतस्तथा छेऽपि स्याताम्। तस्मिंस्तु सति न भवतः।

## ३। तवकममकावेकवचने।

पूर्वेण युष्माकास्माकयोः प्राप्तयोः प्रत्ययोत्तरपदयोश्चेति (७।२।९८) त्वमयोरेकवचने तवकममकावादेशौ विधीयेते। एकवचनपरयोरिति। एकवचनं परं याभ्यां ते तथोक्ते। निमित्तयोस्त्वित्यादि। यथा पूर्व एव सूत्रे योगविभागान्निमित्तयोरादेशौ प्रति यथासंख्यत्वं न भवति तथेहापि न भविष्यति। तस्य च यथासंख्याभावस्य पूर्वसूत्रएव योगविभागो हेतुः। तेन हि पूर्वत्र निमित्ते निवृत्ते यथासंख्ये कृते तस्मादिहाप्यनुवर्त्तेते। ते निवृत्ते यथासंख्ये एवानुवर्त्तेते। अजहद्धर्मत्वादधिकाराणाम्। तस्मादिहापि पूर्वकयोगविभागाद् यथासंख्याभावः। इह सर्वविधिभ्यो लुग्विधिर्बलवानितेरकवचनस्य लुकि कृते युष्मदस्मदोरेकवचनपरता न सम्भवतीति प्रत्ययलोपलक्षणेन समर्थयितव्या। तदपि प्रत्ययलोपलक्षणं प्रतिषेधयितुमाह ननु चेत्यादि। वचनादित्यादि परिहारः। यदि हि प्रत्ययलोपलक्षणं न स्यादिदं वचनमपार्थकं स्यादित्यभिप्रायः। ननु च यस्यैकवचनपरता सम्भवति तस्य विशेषणार्थमेकवचनं स्यात्। कस्यैकवचनपरता सम्भवति? निमित्तस्य खञादेः। निमित्ते त्वेकवचनपरत्वेन विशिष्यमाणे सतीहैव स्यातां यौष्माकः पुत्र आस्माकः पुत्रः। अत्र ह्येकवचनपरत्वं तद्धि तस्योपपद्यते। इह च न स्यातां तावकाः पुत्रा मामकाः पुत्रा इति। नह्यत्र निमित्तस्यैकवचनपरता सम्भवतीति। नैतदस्ति। युष्मदस्मदी पूर्वसूत्रे विशेष्ये अभूताम्। तथाहि खञणि च परतो युष्मदस्मदोरिति खञण्परता तयोः। अतएव युष्मदस्मदी विशिष्येते। तदिहापि तथाभूते एवानुवर्त्तेते। अजहद्धर्मत्वादधिकाराणामिति। तयोरेवैकवचनपरत्वं विशेषणं युक्तम्। अथवा तवक-

ममकयोर्विधेयत्वेन प्राधान्यात् तयोरेवैतद् विशेषणं युक्तम् । तयोरेव तद् विशेषणं भवत् स्थानिद्वारकमेव भवति । यदि स्थानिनोरेकवचनपरत्वेन-मादेशौ स्थानिवत्त्वादेकवचनपरौ भवतः । तदनेनापि प्रकारेण युष्मदस्मदो-रेकवचनविशेषणं युक्तम् । ननु कथञ्चिन्निमित्तस्य खञादेः । अथवेत्यादि । पूर्वं पारिभाषिकमेकवचनमाश्रित्य व्याख्यातम् । इदानीन्त्वर्थमाश्रित्य व्याचष्टे । एकोऽर्थउच्यते येन तदेकवचनम् । अत्र तु व्याख्यान एकवचने इति नेदं सप्तम्येकवचनम् । किं तर्हि ? प्रथमाद्विवचनान्तम् ।

## ४ । अर्धाद् यत् ।

## ५ । परावराधमोत्तमपूर्वाच्च ।

ग्रहणवता प्रातिपदिकेन तदन्तविधिर्नास्तीति तदन्तविधिप्रतिषेधात् पूर्वेणाप्राप्तावयमारम्भः । तत्राधमोत्तमशब्दौ निन्दाप्रशंसावचनौ । तत्-पूर्वादपि प्राप्ते सत्ययमारम्भः । परावरशब्दौ यावदिक्शब्दौ तत्पूर्वादप्यणेव । यौ तु दिक्शब्दौ तत्पूर्वादुत्तरसूत्रेण ठञि यति च । कथं पुनः परावराध-मोत्तमेभ्य इत्युच्यमाने परावरादिपूर्वता शक्या विज्ञातुमित्याह अर्द्धादिति-वर्त्तत इत्यादि । इह हि पूर्वसूत्रादर्धादित्यनुवर्त्तते । तत्र परावराधमोत्त-मेभ्यःपरो योऽर्द्धशब्द इत्येवं विशेष्यमाणेऽर्द्धशब्दसामर्थ्यादेव तस्य परावरादि-पूर्वता विज्ञास्यते । तत् किं पूर्वग्रहणेन ? तत्रेति । परावरयोरदिक्शब्दयोः परेणेति । उत्तरसूत्रेण ठञ्यतौ स्यातामिति । यदि पूर्वग्रहणं न क्रियेते-त्यभिप्रायः । अस्मादित्यादि । परावरादिपूर्वादेव यथा स्यादित्येतदेव हि पूर्वग्रहणस्य प्रयोजनम् । तेन हि पूर्वं कार्य्यं भवति । न परमित्येषोऽर्थः सूच्यते । तस्मात् पूर्वग्रहणाद् दिक्शब्दपक्षेऽपि परावरपूर्वाद् यदेव भवति ।

## ६ । दिक्पूर्वपदाट् ठञ्च ।

पौर्वार्द्धिकमिति । पूर्वस्मिन्नर्द्धे जातः । तद्धितार्थ-इत्यादिना (२।१।५१) समासः । ततस्तद्धितः । अथ पदग्रहणं किमर्थम् ? दिक्पूर्वादित्येवोच्येतेत्याह पदग्रहणमित्यादि । असति हि पदग्रहणे स्वरूपविधिः स्यात् । ततश्च दिगर्द्धे

जात इत्यत्रैव स्यात्। पदग्रहणे तु सति यन्नाम किञ्चिद् दिक्सम्बन्धि पूर्वपदं तस्य ग्रहणमुपपन्नं भवति।

## ७। ग्रामजनपदैकदेशादञ्ठञौ।

यतोऽपवादाविति। पूर्वेण प्राप्तस्य। पौर्वार्द्ध इति। पूर्ववत् समासः। नन्वत्र पूर्व्वस्मिन्नर्द्धे ग्रामस्येति ग्राममपेक्षमाणस्यार्द्धशब्दस्यासामर्थ्यात् समासो नोपपद्यते। नैष दोषः। प्रधानमत्रार्द्धं भवति। प्रधानस्य सापेक्षस्यापि समास इत्येतदुपमितं व्याघ्रादिभिः सामान्याप्रयोग (२।१।५६) इत्यत्र ज्ञापितम्।

## ८। मध्यान्मः।

मध्यशब्दो यो गहादिषु पृथिवीमध्यवचनो मध्यमध्यमञ्चाण् चरण इति पठ्यते ततस्तु तत एव विधिर्भवति। यस्त्वन्यस्तस्येह ग्रहणं वेदितव्यम्।

## ९। अ साम्प्रतिके।

न्याय्यं युक्तमित्यादिभिः पर्य्यायैः साम्प्रतिकशब्दार्थमाचष्टे। साम्प्रतिकं न्याय्यमुच्यते। तथाहि प्रयोगो दृश्यते न वाह्यं प्राप्तमितीत्थं वर्त्तितव्यमसाम्प्रतमिति। अत्र न्याय्यः प्रतिषेधः प्रतीयते। साम्प्रतमेव साम्प्रतिकम्। विनयादेराकृतिगणत्वाद्विनयादिभ्यश्चेति (५।४।३४) ठक्।

## १०। द्वीपादनुसमुद्रं यञ्।

अनुसमुद्रमिति। समुद्रं समयाऽनुसमुद्रम्। अनुर्यत्समयेत्यव्ययीभावः (२।१।१०)। अणो मनुष्यवुञश्चापवाद इति। कच्छादिभ्यश्चेति (४।२।१३३) प्राप्तस्याणः। मनुष्यतत्स्थयोर्वुञिति (४।२।१०४) प्राप्तस्य वुञः।

## ११। कालाट्ठञ्।

कालविशेषवाचिन इति। अनेन कालादित्यर्थग्रहणम्। न स्वरूपस्येति। यदि हि स्वरूपग्रहणं स्यात् सन्धिवेलादिसूत्रेणाणो (४।३।१६) विधानमनर्थकं स्यात्। प्राग्दीव्यतोऽणित्यनेनैव (४।१।८३) सिद्धत्वात्। इह त्वर्थग्रहणे ठञ्बाधनार्थत्वात् तस्यानर्थक्यं भवति। तस्मादर्थग्रहणमेतत्। इह केचिच्छब्दा

मुख्यया वृत्त्या काले वर्त्तन्ते मासोऽर्द्धमास इति। केचिद् गौण्या वृत्त्या। कदम्बपुष्पसाहचर्य्यात् कालः कदम्बपुष्पः। व्रीहिपलालेन साहचर्य्यात् कालो व्रीहिपलाल इति। तेषामिहोभयेषामपि ग्रहणम्। अत एवाह यथा कथञ्चिदिति। येन केनचित् प्रकारेणेत्यर्थः। गुणवृत्त्यापीति। अनेन यथा कथञ्चिदित्यस्यार्थं विस्पष्टीकरोति। औपचारिकी वृत्तिरप्रधानभूता वृत्तिरित्यर्थः। अपिशब्दान्मुख्ययापि वृत्त्या। ननु च मुख्ये सति गौणस्य ग्रहणमयुक्तम्। गौणमुख्ययोर्मुख्ये कार्य्यसंप्रत्ययात्। नैष दोषः। आचार्य्यप्रवृत्तिर्ज्ञापयति गौणस्यापि कालस्य ग्रहणमिति। यदयं सन्धिवेलादिसूत्रे (४।३।१६) प्रकृतेन कालग्रहणेन नक्षत्राणि विशिनष्टि। नहि मुख्यार्थः कालो नक्षत्राणां विशेषणमुपपद्यते। तेषु मुख्यस्य कालत्वस्यासम्भवात्।

१२। श्राद्धे शरदः।

ऋतवणोऽपवाद इति। सन्धिवेलादिसूत्रेण (४।३।१६) प्राप्तस्य। श्राद्ध इति न कर्म गृह्यत इति। क्रियाविशेषः कश्चित् शास्त्रोक्तेन विधिना साध्यः श्राद्धग्रहणेन गृह्यते। नतु श्रद्धावान् पुरुषः। कुत एतत्? तस्य प्रत्ययेनानभिधानात्। शारदिकशब्देन ह्यभिधानशक्तिस्वाभाव्यात् कर्मण एवाभिधानम्। न पुरुषस्य।

१३। विभाषा रोगातपयोः।

१४। निशाप्रदोषाभ्याञ्च।

१५। श्वसस्तुट् च।

तस्य वेति। ठञः। कुत एतत्? तस्य विधीयमानतया प्राधान्यात्। प्रधाने च कार्य्यसंप्रत्ययात्। स च तुड़ागम इकादेशे कृते भवतीति वेदितव्यम्। ननु सन्नियोगशिष्टत्वात् तुटस्तेनैव तावद् भवितव्यम्। पश्चादङ्गसंज्ञायामभिनिर्वृत्तायामिकादेशेन। नैतदस्ति। उपदेशावस्थायामेव ह्रीकादेशे कृते न भवितव्यम्। ज्ञापकात्। यदयं वुञ्छण्कठजिति (४।२।८०) प्रत्ययस्वरार्थमनुबन्धं चकारं करोति। प्रत्ययसंज्ञायाः सन्नियोगाद्धि प्रत्ययस्वरे कृते पश्चादिकादेश इति सिद्धमन्तोदात्तत्वम्। किं चित्करणेन? तस्माच्चित्

करणाद् विज्ञायते सन्नियोगशिष्टेभ्योऽपि पूर्व्वमिकादेशो भवति। तेन ठग्-ग्रहणान्यङ्गसंज्ञाभूतानीकमिव बोधयन्तीति तुड़पि तस्यैव भविष्यतीति विज्ञायते। एताभ्यामित्यादि। श्वःशब्दोऽयमवययं कालवाची। तेन यदा ठञ्त्यपौ न भवत स्तदा सायञ्चिरमित्यादिना ट्युट्युलौ ( ४।३।२३ ) अपि भवतः।

## १६। सन्धिवेलाद्यृतुनक्षत्रेभ्योऽण्।

ठञोऽपवाद इति। कालाट्ठञिति (४।३।११) प्राप्तस्य। अथाण्ग्रहणं किमर्थम्? यथाविहितमेवोच्येत। तेनैवमुच्यमाने न प्राप्नोतीत्याशङ्कनीयम्। यदि ठञ् स्यात् पुनर्वचनमनर्थकं स्यात्। तस्माद् वचनप्रामाण्याद् यो विहितो न स प्राप्नोति। ठञ् प्रत्ययेन बाधितत्वात् स एव भविष्यति। स चाण् चेत्यत आह अण्ग्रहणमित्यादि। सन्धिवेलादिषु पौर्णमासीशब्दो वृद्धः पठ्यते। स्वातिरिति नक्षत्रशब्दो वृद्धोऽस्ति। तत्र यद्यण्ग्रहणं न क्रियेत ताभ्यां परत्वाट् ठञा छे बाधिते पुनर्वचनाच्छ एव स्यात्। तस्मात् तमपि बाधित्वा वृद्धादणेव यथा स्यादित्येवमर्थं पुनरण्ग्रहणम्। तैषम्। पौषमिति। तिष्यपुष्यशब्दाभ्यां नक्षत्रेण युक्तःकाल (४।२।३) इत्यण्। तस्याणो लुबविशेष इति (४।२।४) लुप्। ततोऽनेनाण्। तिष्यपुष्ययोर्नक्षत्राणीति (६।४।१४८ वा) यलोपः। संवत्सरफलपर्वणोरिति। संवत्सरशब्दादण् भवति फले पर्वणि चाभिधेये। सांवत्सरं फलम्। सांवत्सरं पर्व वा। सांवत्सरिकमन्यत्।

## १७। प्रावृष एण्यः।

अथ किमर्थं प्रत्यये मूर्धन्यः पठ्यते। न रषाभ्यामित्यनेनैव ( ८।४।१ ) णत्वं भविष्यति? नैवं शक्यम्। इह हि न स्यात्। प्रावृषेण्यिति। (A) पदान्तत्वात्।

## १८। वर्षाभ्यष्ठक्।

अथ किमर्थं ठग्विधानम्? कालाट् ठञेव (४।३।११) सिद्धत्वात्।

(A) प्रावृषेण्यमाचष्ट प्रावृषेण्यति। ततः क्विप्। णिलोपः (६।४।५१)। लोपो व्योर्वलीति (६।१।६६) यलोपः। प्रावृषेण्।

उभयत्रापि तदेव रूपमिति । नैवम् । ठकि सति प्रत्ययस्वरेणान्तोदात्तत्वं स्यात् । ठञि तु सति ञ्नित्यादिर्नित्यमित्याद्युदात्तत्वम् (६।१।१९७) ।

**१९ । छन्दसि ठञ् ।**

**२० । वसन्ताच्च ।**

**२१ । हेमन्ताच्च ।**

योगविभाग उत्तरार्थ इति । सर्वत्राण् च तलोपश्चेति (४।३।२२) वक्ष्यति । स हेमन्तशब्दस्यैव यथा स्यात् । वसन्तस्य मा भूत् । यदि हेमन्तवसन्ताभ्यामित्येकयोगः क्रियेत ततो वसन्तस्यापि स्यात् । तस्य ह्युत्तरत्रानुवृत्तेः ।

**२२ । सर्वत्राण् च तलोपश्च ।**

छन्दसि पूर्वेण ठञि प्राप्ते भाषायामपि ऋत्वणि चैतदुच्यते । सर्वत्र ग्रहणमित्यादिना सर्वत्रग्रहणस्य प्रयोजनमाचष्टे । छन्दसि भाषायाञ्चेत्यादिना छन्दोऽधिकारनिवृत्तेः फलं दर्शयति । ननु चेत्यादि । अस्वरितत्वादेव च्छन्दसीति नानुवर्त्तिष्यते । ततो नार्थश्छन्दोऽधिकारनिवृत्त्यर्थेन सर्वत्रग्रहणेनेत्यभिप्रायः । सैवेत्यादिना यासावस्वरितत्वादननुवृत्तिः सैव सर्वत्रेत्यनेन शब्देनाख्यायते । किमर्थमित्याह प्रयत्नाधिक्येनेत्यादि । प्रयत्नाधिक्यमेतदेव शब्देनाख्यातम् । तेन हेतुना पूर्वसूत्रेऽपि सर्वत्रशब्दस्य सम्बन्धो यथा स्यादितेऽयमर्थः शब्देनाख्यायते । कस्मात् पुनः पूर्वसूत्रेऽपि सर्वत्रग्रहणस्य सम्बन्ध इष्यत इत्याह हैमन्तिकमिति हीत्यादि । हिशब्दो हेतौ । आचार्य्या हि हैमन्तिकमिति भाषायां ठञं स्मरन्ति । स चैवं भाषायामपि सिध्यति । यदि पूर्वसूत्रेऽपि सर्वत्रग्रहणस्य सम्बन्धो भवति तत्र हि सति पूर्वसूत्रस्यायमर्थो भवति । हेमन्ताच्च सर्वत्र च्छन्दसि भाषायामपि ठञ् भवतीति । कः पुनरनयोरण्णोर्विशेष इति ? न कश्चिदिति भावः । ऋत्वणि हीत्यादिना विशेषं दर्शयति । हैमन्तीति । टिड्ढाणञिति (४।१।१५) ङीप् । तदेवमित्यादि । यत एव पूर्वसूत्रेण ठञ् भवतऽनेनाण् तलोपसहितस्तेन त्रीणि रूपाणि भवन्ति ।

**२३ । सायञ्चिरंप्राह्णेप्रगेऽव्ययेभ्यष्ट्युट्युलौ तुट् च ।**

कालाट् ठञिति (४।३।११) ठञि प्राप्ते सायमादिभ्यष्ट्युट्युलौ विधीयेते ।

तयोश्च तुड़ागमः। ठञपवादत्वाच्च ट्युट्युलौ। ठञैव च्छस्य बाधितत्वादेताभ्यां पुनश्छस्य संप्रधारणैव नास्ति। तेन ह्यहादपि ट्युट्युलाविव भवतः प्राह्णतनमिति। तयोश्चेत्यादि। यद्यनादिष्टयोस्तुट् स्यात् तदा युरूपौ प्रत्ययौ न भवत इत्यनादेशो न स्यात्। तस्मादादिष्टयोस्तयोः कृतादेशयोस्तुड़ागमः। एतच्च घकालतनेषु कालनाम्न इति (६।३।१७) निर्देशाल्लभ्यते। न ह्यनादिष्टयोस्तुड्-विधानेन तनशब्द उपपद्यते। अथ प्रत्यययोष्टित्करणं किमर्थम्? न तुट एव टित्त्वेन प्रत्यययोरपि टित्त्वं विज्ञास्यत इति। यतस्तद्ग्रहणेन ग्रहणादागमानाम्। नैतदस्ति। युक्तं यत् प्रत्ययधर्मा आगमे भवन्ति तस्य प्रत्ययभक्तत्वात्। न त्वागमधर्माः प्रत्यये। तस्माट्टित्कार्य्यार्थं प्रत्यययोरपि टित्त्वमासज्यते। स्यतेरन्तकर्मण इति। षोऽन्तकर्मणीत्यस्य। प्राह्णे प्रगे इत्येकारान्तत्वमिति। निपात्यत इति सम्बन्धः। ननु च घकालतनेषु कालनाम्न इति (६।३।१७) सप्तम्या अलुकैव सिद्धम्। तदपार्थकं निपातनम्। यत्र तर्हि सप्तम्यर्थो नास्ति तदर्थं निपातनम्। प्राह्णः सोढोऽस्य प्राह्णेतनः। प्रगः सोढोऽस्य प्रगेतन इति। अत्र हि तदस्य सोढमिति (४।३।५२) प्रथमासमर्थात् प्रत्ययविधानात् सप्तम्यर्थो नास्ति। तदभावात् सप्तम्यपि नास्त्येव। चिरपरुत्परारिभ्यस्त्नो वक्तव्य इति। व्याख्येय इत्यर्थः। व्याख्यानन्तु तद्धिता (४।१।७६) इत्यत्रैव कृतम्। एवमुत्तरत्रापि वेदितव्यम्। चिरशब्दस्य सूत्रे चोपादानाट् ट्युट्युलावपि भवतः। प्रगस्य च्छन्दसि गलोपश्चेति वक्तव्य इति सम्बन्धः। वक्तव्यशब्दस्य स एवार्थः। व्याख्यानात् त्विहापि प्रत्नपूर्वविश्वेमात् थाल् (५।३।१११) च्छन्दसीति निपातनमाश्रित्य कर्त्तव्यम्। अन्ताच्चेति वक्तव्यम्। अन्तशब्दाड्डिमज भवतीत्येतदर्थरूपं व्याख्येयमित्यर्थः। व्याख्यानन्तु कृतमेव। डिमचो डित्करणं पश्चादित्यस्य टिलोपार्थम्। ननु चाव्ययानां भमात्रे टिलोपो वक्तव्य इत्यनेनैव (६।४।१४४, वा) सिद्धम्। न सिध्यति। अनित्यत्वात् तस्य। यथारातीय इत्यत्र न भवति तथेहापि न भवतीति कस्यचिद् भ्रान्तिः स्यात्। अतस्तन्निरासार्थं डित्करणम्।

## २४। विभाषा पूर्वाह्णापराह्णाभ्याम्।

पूर्वाह्णेतन इति। अह्नः पूर्वो भाग इति पूर्वादि (२।२।१) सूत्रेणैकदेशि-

समासः । राजाहःसखिभ्यष्टजिति (५।४।९१) टच् समासान्तः । अह्नोऽह्न एतेभ्य इत्यह्नादेशः (६।४।८८) । अह्नोऽदन्तादिति (८।४।७) णत्वम् । यदाऽसप्तम्यन्तात् प्रत्ययस्तदा पूर्वाह्णतन इति भवितव्यमिति । सप्तम्यभावात् । सप्तम्यभावस्तु प्रथमासमर्थात् तद्धितोत्पत्तेः ।

## २५ । तत्र जातः ।

अणादयो घादयश्चेति । एकेनादिशब्देनाणादीनामिहोत्सर्गाणां ग्रहणम् । द्वितीयेन घादीनां शेषाधिकारविहितानाम् । स्रौघ्नः । माथुर इति । प्राग्दीव्यतोऽण् (४।१।८३) । औत्सः । औदपान इति । उत्सादिभ्योऽञ् (४।१।८६) । राष्ट्रियः । अवारपारीण इति । राष्ट्रावारपाराद् घखौ (४।२।९३) । शाकलिकः । माकलिक इति । वाहीकग्रामेभ्यश्चेति (४।२।११७) ठञ्ञिठौ कात्रेयक औम्भेयक इति । कत्र्यादिभ्यो ढकञ् (४।१।९५) ।

## २६ । प्रावृषष्ठप् ।

एण्यस्यापवाद इति । प्रावृष एण्य इत्यनेन (४।३।१७) प्राप्तस्य ।

## २७ । संज्ञायां शरदो वुञ् ।

समुदायेन चेत् संज्ञा गम्यत इति । अनेन समुदायोपाधित्वं संज्ञाया दर्शयति । प्रकृतिप्रत्ययसमुदायेन चेत् संज्ञा गम्यत इत्यर्थः । यद्येवं शारदका दर्भा इति दर्भशब्दस्य प्रयोगो न प्राप्नोति । प्रत्ययान्तेनाभिहितत्वात् । नैष दोषः । यथैव हि शारदकशब्दो दर्भविशेषस्य नामधेयं तथा मुद्गविशेषस्यापि । तत्रासति दर्भशब्दप्रयोगे ऽनेकार्थसाधारणत्वात् कस्य नामधेयमिति सन्देहः स्यात् कोऽर्थः शारदकशब्देन विवक्षित इति । तस्मादसन्देहार्थो दर्भशब्द उपादीयते । संज्ञाधिकारमित्यादि । केचिदिति वचनात् केचिन्नानुवर्त्तयन्तीत्युक्तं भवति ।

## २८ । पूर्वाह्णापराह्णार्द्रामूलप्रदोषावस्कराद् वुन् ।

पूर्वाह्णकः । अपराह्णक इति । पूर्ववदेकदेशिसमासादिकं कार्यं विधेयम् । विभाषा पूर्वाह्णापराह्णाभ्यामिति (४।३।२४) । तत्र टुट्युल्विधिश्च । आर्द्रकः ।

मूलक इति। नक्षत्रेण युक्तः काल (४।२।३) इत्यागतस्याणो लुबविशेष इति लुप् (४।२।४)। ततो वुन्। निशाप्रदोषाभ्यामिति। ठञ् विधेः। ठञादय एवेति। आदिशब्देन टुट्युलादयो गृह्यन्ते।

२९। पथः पन्थ च।

३०। अमावास्याया वा।

एकदेशविकृतस्येत्यादि। अमावस्यदन्यतरस्यामित्यत्र (३।१।१२२) ण्यत्य-वृद्धिरेव निपात्यते। अवृद्धिस्तु वृद्धेरेकादेशभूततया विकारो भवतीत्येकदेश-विकृतत्व ममावस्याशब्दस्योपपद्यते। ये तु सन्धिवेलादिषु ह्रस्वोपधमधीयते तेषां ह्रस्वपधस्य ग्रहणं न प्राप्नोति। नहि विकृतिः प्रकृतिं गृह्णाति। तस्माद् दीर्घ एव पाठो युक्तः।

३१। अ च।

अथ योगविभागः किमर्थः? नामावास्याया अ च वेत्येवोच्येत। चकारो वुनोऽनुकर्षणार्थो भविष्यति। वावचनञ्चोभयोर्विकल्पार्थम्। तेन ताभ्यां मुक्तेऽणपि भविष्यति। अस्त्येतत्। किन्त्वेकयोगे सति सिन्धुप-कराभ्यां कन्निति (४।३।३२) कन्नेव विकल्पेन भवतीति कस्यचिद् भ्रान्तिः स्यात्। अतस्तन्निवृत्त्यर्थं योगविभागः। योगविभागे हि सति व्यवधानतया विकल्पस्य कन् नित्यो विज्ञायते।

३२। सिन्धुपकराभ्यां कन्।

अपकरशब्दादौत्सर्गिकोऽणीति। प्राप्ते विधानमिति सम्बन्धः।

३३। अणञौ च।

यथासंख्यार्थो योगविभागः। यदि सिन्धुपकराभ्याञ्च कन्नणञ इत्येक-योगः क्रियेत ततो वैषम्यादेककस्याः प्रकृतेः प्रत्ययास्त्रयःस्युः।

३४ । श्रविष्ठाफल्गुन्यनुराधास्वातितिष्यपुनर्वसुहस्तविशाखाषाढाबहुलाल्लुक् । (B)

नक्षत्राणः श्रवणे प्राप्ते लुगुच्यते । ननु च नक्षत्रेभ्यो बहुलमित्यनेनैव (४।३।३७) लुग् भविष्यति । सत्यमेतत् । तस्यैवायं प्रपञ्चः । उत्तरावपि योगौ प्रपञ्चौ तस्यैव वेदितव्यौ । श्रविष्ठादयश्चैते नक्षत्रेण युक्तः काल (४।२।३) इत्यनेनागतस्याणो लुबविशेष इति (४।२।४) कृते लुबन्ता वेदितव्याः । स्त्रीप्रत्ययस्यापि लुक् तद्धितलुकीति (१।२।४९) लुग् भवतीति ये स्त्रीप्रत्ययान्तास्तेषामुपसंख्यानमिति प्रतिपादनमित्यर्थः । तच्चोपरिष्टात् करिष्यते । चित्रायाष्टापो लुकि कृते पुनष्टाप् क्रियते । गौरादित्वात् ङीषिति । रेवतीरोहिणीत्यत्र । फल्गुन्यषाढाभ्यां टानौ वक्तव्याविति । स्त्रियामित्यपेक्षते । तयोस्तु विधानसामर्थ्यान्न लुग् भवति । टस्य टकारो ङीबर्थः । अनो नकार आद्युदात्तार्थः । वक्तव्यशब्दो व्याख्येये वर्त्तते । व्याख्यानन्तु कृतमेव च । श्रविष्ठाषाढाभ्यां छणपि वक्तव्य इति । अत्र स्त्रियामिति नोपपद्यते । णकारो वृद्ध्यर्थः । वक्तव्यशब्दस्य स एवार्थः । व्याख्यानमपि करिष्यते च । कृतमेव ।

३५ । स्थानान्तगोशालखरशालाच्च ।

गोशालखरशालयो र्ह्रस्वान्तयोः पाठान्नपुंसकयोर्ग्रहणं विज्ञायते । नपुंसकलिङ्गता तु विभाषा सेनासुरेत्यादिना (२।४।२५) । यद्यपि नपुंसकयोर्ग्रहणं तथापि प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणं भविष्यतीति स्त्रीलिङ्गाभ्यामपि लुग् भवत्येव । उदाहरणेऽप्यौत्सर्गिकस्याणो लुक् ।

३६ । वत्सशालाभिजिदश्वयुक्शतभिषजो वा ।

वत्सशालशब्दो नपुंसकलिङ्गो गृह्यते । कुत एतत् । व्यासेन्यायात् । नपुंसकलिङ्गस्य हि ग्रहणे लिङ्गविशिष्टपरिभाषया स्त्रीलिङ्गादपि लुग् न सिध्यति । नतु स्त्रीलिङ्गस्य ग्रहणे नपुंसकात् । बहुलग्रहणस्यायं प्रपञ्च

(B) कृत्तिकापर्य्यायो बहुलाशब्दः । अत्र द्वन्द्वे कवद्भावेन निर्देशः ।

इति । वस्त्रशालशब्दो यद्यपि नक्षत्रवचनो न भवति तथापि बहुलवचनात् ततोऽपि लुग् भविष्यतीत्यभिप्रायः ।

## ३७ । नक्षत्रेभ्यो बहुलम् ।

रोहिण इत्यादौ नक्षत्राणः पक्षे लुक् । मृगशिरा इति । अत्वसन्तस्य चाधातोरिति (६।४।१४) दीर्घः । मार्गशीर्ष इति । ये च तद्धित (६।१।६१) इत्यत्र चकारस्यानुक्तसमुच्चयार्थत्वाच् शिरसः शीर्षभावः । अथ बहुलग्रहणं किमर्थम् ? न पूर्वसूत्रादेव वाग्रहणमनुवर्त्तिष्यते । इदं प्रयोजनम् । न क्वचिदन्यदेव यथा स्यात् । तेन फल्गुन्यषाढ़ाभ्यां टानौ सिद्धौ भवतः । श्रविष्ठाषाढ़ाभ्याञ्छाणपीति ।

## ३८ । कृतलब्धक्रीतकुशलाः ।

ननु चेत्यादि । जन्मवद्वस्तु जातशब्दस्यार्थः । कृतस्यापि जन्मास्त्येव । तस्माद् यद् यत्र कृतं जातमपि तत् तत्र भवति । यच्च क्रीतमित्यादि प्राप्तं लब्धमप्युच्यते । यदपि क्रीतं प्राप्तमपि तद् भवत्येव । तस्मात् क्रीतं लब्धमपि भवति । शब्दस्यार्थस्याभिन्नत्वादिति । स्वजन्मन्यनुभूतकर्त्तृभावो जातशब्दस्यार्थः । जातशब्दस्यैव विशेषोपलक्षितपरव्यापारो स्वजन्मनिष्पत्तौ कृतशब्दस्यार्थः । प्राप्तिसामान्यं लब्धशब्दस्यार्थः । प्राप्तिविशेषो यस्य मूल्यहेतुका प्राप्तिः स क्रीतशब्दस्यार्थः । न च सामान्यविशेषयोरेकार्थता युक्ता । मा भूत्पर्य्यायप्रसङ्ग इति भिद्यते शब्दार्थः । वस्तुमात्रेणेति । क्रीतलब्धयोर्यदाधारभूतं वस्तुमात्रं तस्याभिन्नरूपत्वात् क्रीतं लब्धं भवति । मात्रग्रहणं शब्दार्थव्यवच्छेदार्थम् । अतएवाह शब्दार्थस्तु भिद्यत एव । नहि येन रूपेण क्रीतशब्देन तत्प्रत्याय्यते तेनैव लब्धशब्देन । एवं जातकृतशब्दयोर्वस्तुत्वेनाभिन्नत्वम् । शब्दार्थद्वारेण तु भिन्नार्थत्वमेव । अन्येनैव हि रूपेण जातशब्देन तद्वस्तु प्रत्याय्यते । अनेन कृतशब्देन ।

## ३९ । प्रायभवः ।

प्रायभवग्रहणमनर्थकमिति । वैचित्र्यादन्यस्यार्थस्याभावादनर्थकमित्युच्यते । वैचित्र्येण तु सार्थकमेव । कस्मात् पुनरनर्थकमिति ? तत्र भवेन कृतार्थ-

त्वादिति । यत् प्रायभव इत्यस्य साध्यं तस्य तत्र भव (४।३।५३) इत्यनेनैव साधितत्वादिति भावः । यो हि राज्ये प्रायेण भवति तत्रासौ भवत्येव । ततश्च तत्र भवे तस्यान्तर्भावात् तत्र भव इत्यनेनैव कृतं सम्पादनमिति किं प्रायभवग्रहणेन ? अनित्यभव इत्यादिना परस्योत्तरमाशङ्कते । स्यादेतत् । अनित्यभवः प्रायभवो नित्यभवस्तत्र भव इति । तस्मात् तत्र भवेन प्रायभवस्यासंग्रहात्र सिध्यतीत्याशङ्क्याह मुक्तसंशयेन तुल्यमिति । मुक्तस्त्यक्तः संशयो येन तत् मुक्तसंशयम् । न्याय्यस्तत्र भवोऽयमिति यो निश्चितस्तेन तुल्यं भवति । तथाहि स्रुघ्ने भवो देवदत्तः स्रौघ्न इत्युच्यते । न चासौ स्रुघ्ने सदा भवति । अवश्यं हि कदाचिदुदग्देशादीनपक्रामति । अथच तत्र भवप्रत्ययो भवति । यदि च नित्यभवस्तत्र भवो जिह्वामूले भवो वर्णः जिह्वामूलीय इत्यत्र तत्र भव इत्यधिकारे (४।३।५२) जिह्वामूलाङ्गुलेश्छ इति (४.३।६२) च्छो न स्यात् । नहि वर्णो नित्यं जिह्वामूले भवति । तस्मात् प्रायभवस्य तत्रभवान्तर्भावात् ततो न व्यतिरिच्यत इत्यनर्थकं प्रायभवग्रहणम् ।

## ४० । उपजानूपकर्णोपनीवेष्ठक् ।

जानुनः समीपं कर्णस्य समीपं नीव्याः समीपमिति । अव्ययं विभक्तीत्यादिनाव्ययीभावः (२।१।६) । उपजानुक इति । इसुसुक्तान्तात् कः (७।३।५१) ।

## ४१ । सम्भूते ।

अवक्लृप्तिरित्यादि । अवक्लृप्तिः सम्भावना । प्रमाणानतिरेक आधारप्रमाणादाधेयप्रमाणस्यानतिरिक्तता यस्यां सत्यां सर्वमाधेयमाधारमनुप्रविशति । स्रुघ्ने सम्भवति । यस्तु स्रुघ्ने सम्भाव्यते स्रुघ्नप्रमाणान्नातिरिच्यते तदनुप्रवेशात् स सेनादिकोऽर्थ एवमुच्यते ।

## ४२ । कोशाड्ढञ् ।

कौशेयं वस्त्रमिति । ननु च वस्त्रं कौशेयं न सम्भवति । किन्तु कृमिः । ततश्च कृमावेव स्यात् । न वस्त्रे । अपि च विशेषानभिधानात् खड्गसम्बन्धि-

नोऽपि कोषात् प्रत्ययः प्रसज्येतेत्याह रूढ़िरेषेत्यादि। रूढ़िशब्दो हि यथा कथञ्चिदुत्पाद्यते। न तत्रावश्यमवयवार्थोऽपेक्ष्यः। क्वचिदवयवार्थसम्भवात्। तथाहि तैलं पिबतीत्येवं तैलपायिकाशब्दो व्युत्पाद्यते। स च तैलपानक्रियारहित एव क्वचित् प्राणिविशेषे वर्त्तते। तस्माद् यद्यपि कोशे सम्भूतमित्येवं विगृह्य कोशशब्दात् प्रत्यय उत्पाद्यते तथापि वस्त्रे सूत्रे वा कौशेयशब्दः साधुभावमनुभवति। न क्रमौ। अथ खड्गकोशादुत्पत्तौ को दोषः? येन ततः प्रत्ययो नेष्यते? खड्गस्याभिधानं प्राप्नोति। स हि तत्र सम्भवतीति चेदितरस्मादपि तर्हि कोशात् प्रत्ययोत्पत्तौ च क्रमेरभिधानं प्राप्नोति। स हि तत्र सम्भवति। अथ तत्रापि रूढ़िवशाद् वस्त्रस्याभिधानं न क्रिमेः। इतरस्मादपि तर्हि कोशादुत्पत्तौ वस्त्रस्याभिधानं न खड्गस्य। एवं मन्यते। यद्यपि सम्भूताधिकारे कोशाड् ढञ् विधीयते तथापि कौशेयशब्दान्न सम्भवोऽर्थः प्रतीयते। अपि तु विकारोऽर्थः। रूढ़िवशात्। कौशेयं वस्त्रमिति कोशविकारो वस्त्रमित्यर्थः। तथाच वार्त्तिककारेणोक्तं विकारे कोशाड् ढञ् सम्भूतार्थानुपपत्तेरिति। विकारश्च कौशेयशब्दात् क्रमिकोशस्य प्रतीयते। न खड्गकोशस्य। रूढ़िवशात्। तस्माद् यस्य विकारः प्रतीयते तदभिधायिन एव कोशशब्दाद् युक्तः प्रत्ययः। नेतरस्मात्।

## ४३। कालात् साधुपुष्प्यत्पच्यमानेषु।

कालादिति स्वर्य्यते। प्रकृतीरुत्तरा विशेषयितुम्। न च स्वरूपग्रहणे सत्युत्तराः प्रकृतयः शक्या विशेषयितुम्। स्वरूपस्यासाधारणत्वात्। तस्मादर्थग्रहणमेवैतत्। तेन कालविशेषवाचिभ्यः प्रत्ययो विज्ञायत इत्याह कालविशेषवाचिभ्य इत्यादि। हैमन इति सर्वत्राण् च तलोपश्च (४।३।२२)। शैशिर इत्यादौ सन्धिवेलादिसूत्रेण (४।३।१६) ऋत्वण्।

## ४४। उप्ते च।

योगविभाग उत्तरार्थ इति। उत्तरत्र वुञ् उप्तएव यथास्यात्। साध्वादिषु मा भूत्।

## ४५ । आश्वयुज्या वुञ् ।

ठञोऽपवाद इति । कालाट् ठञिति (४।३।११) प्राप्तस्य । ननु च कालाट् ठञ् विहितः । नचाश्वयुजीशब्दः कालवाची । ततः कुतष्ठञि-त्याशङ्क्य कालवाचित्वमाश्वयुजीशब्दस्य प्रतिपादयितुमाह अश्विनीभ्यां युक्तेत्यादि ।

## ४६ । ग्रीष्मवसन्तादन्यतरस्याम् ।

## ४७ । देयमृणे ।

## ४८ । कलाप्यश्वत्थयवबुसाद्वुन् ।

कथं पुनः कलापादयः शब्दाः काले वर्त्तन्ते ? यावता मयूरादिषु तेषां वृत्तिः प्रसिद्धेत्यत आह कलापादयः शब्दा इत्यादि । एतदेव विषयं स्पष्टी-करोति यस्मिन् काल इत्यादि । अश्वत्थशब्दोऽत्र वृक्षविशेषे रूढः । तेन सर्व्वएव कालः सम्बध्यत इति तद्द्वारेण कालविशेषो न संज्ञायते । तस्मादश्वत्थ-फलसहचारिणि कालेऽश्वत्थशब्दो वर्त्तत इति दर्शयितुमाह यस्मिन्नश्वत्थाः फलन्तीत्यादि । अश्वत्थशब्दो यद्यपि वृक्षे वर्त्तते तथापि फले वर्त्तत एव ।

## ४९ । ग्रीष्मावरसमाद् वुञ् ।

अणठञोरपवाद इति । ग्रीष्मशब्दाट्टलणोरपवादः । अवरसमाशब्दात् कालाट् ठञः । अवरा चासौ समा चेत्यवरसमा ।

## ५० । संवत्सराग्रहायणीभ्यां ठञ् च ।

कालाट् ठञि प्राप्ते वचनम् । तेन ठञ् न वक्तव्य इति । वुञि विकल्पिते विनापि ठञ्ग्रहणेन पक्षे यथाप्राप्तं ठञेव भवतीत्यभिप्रायः । ठञ्ग्रहण-मितग्रादि । तत्र यद्यत्र ठञ्ग्रहणं न क्रियेत सन्धिवेलेत्यादिषु (४।३।१६) संवत्सरात् फलपर्वणोरिति पाठात् सन्धिवेलाद्यण् ठञपवादत्वादण्त्वेन काले विवक्षिते वुञा मुक्तेऽणेव स्यात् । ठञ्ग्रहणादणमपि बाधित्वा ठञेव भवति ।

## ५१। व्याहरति मृगः।

नैशिको नैशः। प्रादोषिकः प्रादोष इति निशाप्रदोषाभ्यां ठञ् (४।३।१४)। तेन मुक्ते पच्च ऋत्वणेव भवति।

## ५२। तदस्य सोढम्।

कालादिति वर्त्तते। न च कालो जीयते। तस्मान्निशासहचरितमिहाध्ययनं गौण्या वृत्त्या निशेत्येवमादिभिरभिधीयत इति विज्ञायते। अतएवाह निशासहचरितमध्ययनं निशेति।

## ५३। तत्र भवः।

## ५४। दिगादिभ्यो यत्।

अणश्छस्य चापवाद इति। यद्दिगादिषु वर्ग्यादि ततश्छस्यापवादः। शेषेभ्यस्त्वणः प्राग्दीव्यतीयस्य। अथ मुखजघनयोश्च किमर्थः पाठो दिगादिषु ? यावता शरीरावयवात् ताभ्यामुत्तरसूत्रेणैव भविष्यतीत्याह मुखजघनयोरिति। सेनावयववाचिनौ हि यौ मुखजघनशब्दौ तौ शरीरावयववाचिनौ न भवतः। पाणिपाद्याद्यवयवस्वभावं हि शरीरम्। न चैवमात्मिका सेना। किं तर्हि ? रथादिसमुदायात्मिका। उदकात्संज्ञायामिति। उदकशब्दात् संज्ञायां गम्यमानायां यद्भवति। उदक्या स्त्री। रजस्वलोच्यते। नचात्र प्रकृत्यर्थः प्रत्ययार्थो वा विद्यते। सा च तयोरविद्यमानता संज्ञाग्रहणेन विज्ञायते। संज्ञायामन्यत्र। औदको मत्स्य इति। अत्राणेव भवति।

## ५५। शरीरावयवाच्च।

अणोऽपवाद इति। नाप्राप्ते तस्मिन्नस्यारम्भात्। यस्तु पादादिभ्यस्ततः परत्वाद् यच्छं बाधते।

## ५६। दृतिकुक्षिकलशिवस्त्यस्त्यहेर्ढञ्।

दृतिकुक्षिभ्यां शरीरावयवत्वाद् यति प्राप्ते। कुक्षिशब्दो धूमादिष्वपि पठ्यते। तस्माद् धूमादिभ्यश्चेति (४।२।१२७) वुञि प्राप्ते शेषेभ्यस्त्वणि ढञ् विधीयते। अस्तिशब्दस्तिङन्तो मा विज्ञायीत्यत आह अस्तिशब्द इत्यादि। विभक्तिस्वर-

प्रतिरूपकाश्चेति निपाता भवन्तीति निपातसंज्ञकं तिङन्तसदृशं प्रातिपदिकमेतत् । न तिङन्तः । एतच्च न तिङन्तेन समानार्थं यथास्तिक्षीरा ब्राह्मणीति । भिन्नार्थञ्च यथा धने वर्त्तते यथा ऽस्तिमानिति । धनवानिति गम्यते । तदिह विशेषस्यानभिधानादुभयस्यापि ग्रहणम् ।

## ५७ । ग्रीवाभ्योऽण् च ।

बहुवचननिर्देशाद् बहुवचनान्तात् प्रत्ययेन भवितव्यम् । अन्यथा ह्येकवचनेनैव निर्देशं कुर्य्यादिति कस्यचिद् भ्रान्तिः स्यात् । अतस्तां निराकर्त्तुमाह ग्रीवाशब्द इत्यादि । अथ विशेषाद् बहुवचननिर्देशः कृतः । ननु बहुवचनान्तादेव यथा स्यादिति दर्शयति ।

## ५८ । गम्भीराञ्ञ्यः ।

बहिर्देवेत्यादि । बहिर्देवपञ्चजनेभ्यश्च ञ्यो भवतीत्येतदर्थरूपं व्याख्येयमित्यर्थः । तत्रेदं व्याख्यानम् । चकारोऽत्र वर्त्तते । तेन बहिरादिभ्योऽपि ञ्यो भविष्यतीति ।

## ५९ । अव्ययीभावाच्च ।

किं तर्हीत्यादि । कथं पुनरव्ययीभावादिति सामान्येनोच्यमानः प्रत्ययः परिमुखादेरेवेत्यत आह परिमुखादीनाञ्चेत्यादि । चशब्दो हेतौ । न ह्यन्यत् कार्य्यमस्ति परिमुखादिगणपाठस्य । तत्र यद्यप्येतदपि न स्याद् विध्यर्थमेव तस्य स्यात् । तस्मात् परिमुखादेरेव भवति । न सर्वस्मादव्ययीभावात् । यद्येवं परिमुखादेरित्येवं वक्तव्यमित्याह तेषामित्यादि । यदि हि परिमुखादेरित्युच्यते ततोऽसत्यव्ययीभावग्रहणे तत्पुरुषेभ्योऽपि परिमुखादिभ्यः प्रत्ययः स्यात् । तस्मिंस्तु सति न भवति । परिगतं मुखं परिमुखमिति प्रादिसमासः । तत्र भवः पारिमुखः । अणेव भवति । अपि चोत्तरार्थमव्ययीभावग्रहणमवश्यमेव कर्त्तव्यम् । अन्तःपूर्वपदाट् ठञ् (४।३।६०) । ग्रामात्पर्य्यनुपूर्वादित्यव्ययीभावाद् (४।३।६१) यथा स्यात् । पारिहनव्यमिति । ओर्गुणः (६।४।१४६) । वान्तो यिप्रत्यय इत्यवादेशः (६।१।७९) ।

औपकूलमिति। अव्ययं विभक्तीत्यादिनाव्ययीभावः (२।१।६१)। एष च परिमुखादिषु न पठ्यत इत्यणेव भवति। अत्र परिमुखमिति कथमव्ययीभावः? यावता अपपरिवहिरञ्चवः पञ्चम्या समस्यन्ते। पञ्चमी च परिणा कर्मप्रवचनीयेन योगे भवति। कर्मप्रवचनीयसंज्ञा त्वपपरी वर्जने (१।४।८८) इत्यनेन। न च परिमुखे वर्जनं गम्यते। किं तर्हि? सर्वतोभावः। एवं तर्ह्यव्ययमिति (२।१।६) योगविभागादव्ययीभावो भविष्यति। अन्ये तु येऽत्र परिहनुप्रभृतयोऽव्ययीभावास्तेऽपपरिवहिरञ्चवः पञ्चम्या (२।१।१२) इत्यनेनैव भवन्ति। अत्र येष्वपि वर्जनं न गम्यते ततस्तेष्वप्यव्ययमिति (२।१।६) योगविभागेनैव। ये तूपसीरादय उपपूर्वास्ते सामीप्येऽव्ययमित्यादिना (२।१।६)। अनुगङ्गमिति। यस्य चायाम इत्यव्ययीभावः (२।१।१६)। अन्ये तु येऽनुसीरादयोऽनुपूर्वास्ते पश्चादर्थेऽव्ययमित्यादिना (२।१।६)।

## ६०। अन्तःपूर्वपदाट् ठञ्।

अन्तःशब्दो विभक्त्यर्थे समस्यत इति। अव्ययं विभक्तीत्यादिना (२।१।६)। विभक्त्यर्थस्त्वधिकरणम्। अन्तः शब्दस्याधिकरणप्रधानत्वात्। समानशब्दाट् ठञ् वक्तव्य इति। वक्तव्यशब्दो व्याख्येये। तत्रेदं व्याख्यानम्। इहान्तः पूर्वादित्येवं सिद्धे यदधिकं पदग्रहणं तदधिकमिह कार्यं भवतीत्येवमर्थं क्रियते। तेन समानशब्दादपि ठञ् भवतीति। एतेन शब्दान्तरादेव। अध्यात्मादिभ्य ऊर्द्धन्दमादूर्द्धदेहाल्लोकोत्तरपदाच्च ठञ् भवतीति वेदितव्यम्। आध्यात्मिकमिति। आत्मन्यधि अध्यात्मम्। विभक्त्यर्थेऽव्ययीभावः। अनुशतिकादीनाञ्चेत्युभयपदवृद्धिः (७।३।२०)। अध्यात्मादिराकृतिगणश्चायमिति। यद्येवं समानशब्दाट् ठञ् वक्तव्य इत्याद्यनर्थकम्। अध्यात्मादिभ्यश्चेत्यनेनैव सिद्धत्वात्। नानर्थकम्। अस्यैव प्रपञ्चार्थत्वात्। अध्यात्मादिरेव तत् प्रपञ्च्यते। ननु चाकारान्त ऊर्द्धशब्दः। तत् कुत इह मकारान्तत्वमायातमित्याह ऊर्द्धंशब्देनेत्यादि। ऐहलौकिकः पारलौकिक इति। पूर्ववदुभयपदवृद्धिः। मुखतीयं पार्श्वतीयमिति। अपादाने चाहीयरुहोरिति (५।४।४५) तसिः। आद्यादिभ्य उपसंख्यानमित्यौपसंख्यानिको (५।४।४४, वा) वा। अव्ययानां भमात्रे

टिलोप इत्यनेन (६।४।१।४) टिलोपः । मण्मीयौ च प्रत्ययौ वक्तव्याविति । मध्यशब्दादित्यपेक्ष्यते । मध्योमध्यंदिनण् चास्मादिति । मध्यशब्दो मध्यम्भावमापद्यते । दिनण् चास्मात् प्रत्ययो भवति । स्थाम्न इति । स्थामशब्दान्तात् प्रातिपदिकात् । अश्वस्येव स्थाम बलमस्येति बहुव्रीहिः । पृषोदरादित्वात् सकारस्य तकारः । अश्वत्थाम्नि भव इत्यण् । तस्य लुक् । अजिनान्ताच्चेति । लुगिति सम्बध्यते । वृकाजिन इति । अणो लुक् । समानस्येति । आनन्तर्य्यलक्षणा षष्ठी । समानशब्दादनन्तरष्ठञिष्यत इत्यर्थः । अध्यात्मादिष्विति । वैषयिकेऽधिकरणे सप्तमी । अध्यात्मादिविषये ठञिष्यत इत्यर्थः । कुरुजनस्य परस्य चेति । चकारादीयश्च प्रत्ययः । ऊर्द्ध्वं दमाच्च देहाच्चेति । ऊर्द्ध्वशब्दात् परस्मात् दमशब्दादूर्द्ध्वशब्दाद्देहशब्दाच्च ठगिष्यत इत्यर्थः । ईयःकार्य्योऽथ मध्यशब्दस्येति । अथशब्दः समुच्चये । मध्यशब्दस्यानन्तर ईयः कार्य्य इत्यर्थः । मण्मीयौ प्रत्ययौ तथेति । मध्यशब्दादित्यपेक्ष्यते । मण्मीयौ मध्यशब्दस्यानन्तरौ कर्त्तव्यौ । अजिनात् तथेति । अजिनान्तात् लुग् वक्तव्य इत्यर्थः ।

## ६१ । ग्रामात् पर्य्यनुपूर्वात् ।

पारिग्रामिकमिति । ग्रामात् परीति । अपपरिबहिरञ्चवः (२।१।१२) । पञ्चम्येत्यव्ययीभावः । आनुग्रामिकमिति । अन्वाप्यनुर्य्यत्समयेति (२।१।१५) ।

## ६२ । जिह्वामूलाङ्गुलेश्छः ।

यतोऽपवाद इति । शरीरावयवाच्चेति (४।३।५५) प्राप्तस्य ।

## ६३ । वर्गान्ताच्च ।

## ६४ । अशब्दे यत्खावन्यतरस्याम् ।

छे प्राप्त इति । पूर्वसूत्रेण ।

## ६५ । कर्णललाटात् कनलङ्कारे ।

कर्णिकाशब्दश्चाभरणविशेषे रूढः । रूढिशब्देषु च नावश्यमपि कर्णसम्बन्धेन भवितव्यम् ।

## ६६। तस्य व्याख्यान इति च व्याख्यातव्यनाम्नः।

तस्य व्याख्यानमिति। व्याख्यायतेऽनेनेति व्याख्यानं करणे ल्युट्। चकारात्। तत्र भवे चेति। ननु च व्याख्यानं प्रत्ययार्थः। तस्य समीपे चकारः श्रूयत इति प्रत्ययार्थमात्रस्यैव समानजातीयस्य तेनानुकर्षणं न्याय्यम्। नतु समर्थविभक्तेरपि। समानजातीयस्य तु चकारः समुच्चयं करोति यथा केदाराद् यञ्चेति (४।२।४०) प्रत्ययसमीपवर्त्तिना चकारेण प्रत्यय एव समुच्चीयते यथा ठञ् कवचिनश्चेति (४।२।४१) प्रातिपदिकसमीपस्थेन चकारेण प्रातिपदिकमेव। तत्र प्रत्ययार्थमात्रस्यैवानुकर्षणे सति समर्थविभक्त्यन्तरोपादानात् पूर्वस्याः समर्थविभक्तेर्निवृत्तौ सत्यां भवार्थेऽपि षष्ठीसमर्थादेव प्रत्ययो युक्तः। तदयुक्तमुक्तं तत्र भवे चेति। तस्य भवे चेति वक्तुं युक्तमित्यत आह वाक्यार्थसमीप इत्यादि। इहेतिकरणेन तस्य व्याख्यान इत्येषोऽर्थः प्रत्यवमृश्यते। ननु व्याख्यानप्रत्ययार्थः। तस्मादितिकरणानन्तरमुच्चारितश्चकार स्तत्प्रत्यवमृष्टस्य वाक्यार्थस्यैव समीपे श्रूयमाणस्तुल्यजातीयमेव वाक्यार्थं समुच्चिनोति। तेन भवार्थे सप्तमीसमर्थादेव प्रत्ययो भवति। नह्यन्यथा पूर्वो व्याख्यार्थ उपपद्यते। इतिकरणश्च वाक्यार्थसमुच्चयो यथा स्यादित्येवमर्थ एव कृतः। अन्यथा हि तस्य व्याख्याने चेत्येवं ब्रूयात्। कः पुनरसौ वाक्यार्थ इत्याह। तत्र भव इति। ननु पाटलिपुत्त्रशब्दो व्याख्यातव्यनामेति। ननु च पाटलिपुत्त्रः कोशलया व्याख्यायते। नियतं तेन व्याख्यातव्येन भवितव्यम्। अन्यथा तस्य व्याख्यानी सुकोशला न स्यात्। तस्य व्याख्यानस्य पाटलिपुत्त्रशब्दो व्याख्यातव्यनाम भवतीति तत् कथमुच्यते न तु पाटलिपुत्त्रशब्दो व्याख्यातव्यनाम भवतीति? नैतदस्ति। यदीह व्याख्यातव्यमभिप्रेतं न तस्यैतन्नाम भवतीति भावः। किञ्चेह व्याख्यातव्यमभिप्रेतम्? यद्व्याख्यातव्यतया लोके प्रसिद्धतरम्। कुत एतत्? व्याख्यातव्यनामग्रहणात्। इह हि व्याख्यातव्यनामग्रहणं व्याख्यातव्यार्थं तु न कर्त्तव्यमेव। विनापि हि तेन व्याख्यातव्यनाम्न एव प्रत्ययसिद्धेः। तथाहि तस्येति। तस्य प्रतियोगि व्याख्यानमुपात्तम्। तच्च व्याख्यातव्यस्यैव सम्भवति।

नान्यस्य। तस्माद् यत् तस्य व्याख्यातव्यं सामर्थ्यात् तदेव तस्येत्यनेन षष्ठ्यन्तेनोपादीयत इति विज्ञायते। ततश्चान्तरेणापि व्याख्यातव्यनामग्रहणं व्याख्यातव्यनामाभिधायिन एव प्रत्ययो भविष्यतीति किं व्याख्यातव्यनामग्रहणेन? तत् क्रियते व्याख्यातव्यतया लोके यः प्रसिद्धस्तदभिधायिन एव प्रत्ययो यथा स्यादित्येवमर्थम्। व्याकरणादयो ग्रन्थविशेषा लोके प्रसिद्धाः। न ते पाटलिपुत्रादयः। एवमपि नामग्रहणं न कर्त्तव्यम्। व्याख्यातव्यग्रहणसामर्थ्यादेव हि व्याख्यातव्यतया प्रसिद्धतरेभ्यः प्रत्ययो लभ्यत एव। नैतदस्ति। व्याख्याने हि प्रत्ययार्थे व्याख्यानादेव व्याख्यातव्यवाचिनः प्रत्यये सिद्धे पुनर्व्याख्यातव्यग्रहणसामर्थ्याद् व्याख्यातव्यतया ये प्रसिद्धास्तेभ्यः प्रत्ययो लभ्यते। न तु तत्र भवे। तत्र सामर्थ्याभावात्। भवेऽपि चार्थे तत्र व्याख्यातव्यतया प्रसिद्धतराः। तदभिधायिभ्य एव प्रत्यय इष्यत इति। न तु यतः कुतश्चित्। तस्माद् भवाधिकारे ऽप्युपसंग्रहार्थं नामग्रहणं कर्त्तव्यम्। अथ किमर्थं भवव्याख्यानयोर्युगपदधिकारः क्रियत इत्याह भवव्याख्यानयोरित्यादि। ठञादीनपवादानत्राभिधास्यामीत्येवमर्थो युगपदनयोरधिकारः। ननु किमुच्यते ऽपवादविधानार्थ इति? न पुनः प्रकृतानामणादीनां प्रत्ययानामर्थनिर्देशो यथा स्यादित्यत आह कृतनिर्देशौ हि ताविति। कृतनिर्देशौ हि तावर्थौ। एकस्तत्र भव इति। अपरस्तस्येदमिति। तस्येदंविशेषत्वाद् व्याख्यानस्य।

## ६७। बह्वचोऽन्तोदात्ताट् ठञ्।

षात्वणत्विकमिति। नातानतिकमिति (C)। उभयत्र द्वन्द्वात् प्रत्ययः। समासस्वरेणान्तोदात्ताः प्रकृतय इति। समासस्येत्यनेन (६।१।२२३)। बहुवचननिर्देशश्चैवंजातीयापरप्रकृत्यपेक्षया। इचष्ठकं वक्ष्यति द्व्यजृद्ब्राह्मणेत्यादिना (४।३।७२)। सौपमिति। तैङमिति। सुप्तिङ्शब्दौ प्रातिपदिकस्वरेणान्तोदात्तौ। गतिस्वरेणाद्युदात्त इति। गतिरनन्तर (६।२।४९) इत्यनेन।

---

(C) नतोऽनुदात्तः। अनत उदात्तः। तयोर्व्याख्यानं सौवरग्रन्थरूपमित्यर्थः।

अन्तग्रहणं विस्पष्टार्थम्। सर्वोदात्तस्य प्रातिपदिकस्यासम्भवात्। सामर्थ्यादेव तदन्तविधिर्भविष्यतीति यथा वर्णादनुदात्तात्तोपधात् तो न इति (४।१।३९)। अपि चोदात्त इति वर्णग्रहणं सर्वत्र तदन्तविधिं प्रयोजयतीति युक्त एव तदन्तविधिः।

६८। क्रतुयज्ञेभ्यश्च।

अन्तोदात्तार्थ आरम्भ इति। यद्येवं राजसूयिकं वाजपेयिकमित्येतदेवोदाहरणद्वयं युक्तम्। राजसूयवाजपेयशब्दयोः कृदन्तोत्तरपदयोः प्रकृतिस्वरेण मध्योदात्तत्वादुत्तरपदस्याद्युदात्तमत्र। एकं क्यबन्तत्वात् कृत्स्वरेण। अपरं यतो नाव इति (६।१।२१७)। समासे च कृते गतिकारकोपपदात् कृदिति (६।२।१३९) प्रकृतिभावेनाद्युदात्तमेवावतिष्ठते। आग्निष्टोमिकं नावयज्ञिकमिति। एतदुदाहरणद्वयमयुक्तम्। अग्निष्टोमनवयज्ञशब्दाभ्यां प्रत्ययस्वरेणान्तोदात्ताभ्यामनेनाप्राप्तेः। नहि पूर्वेणानेन वा ठञि विशेषः। क्रतुसाहचर्यादत्रोदाहृतम्। शब्दः साहचर्याद् वर्त्तत इति विज्ञायते।

६९। अध्यायेष्वेवर्षेः।

७०। पौरोडाशपुरोडाशात् ष्ठन्।

पुरोडाशस्येदमित्यन्तोदात्तः। तस्माद् बह्वचोऽन्तोदात्ताट् ठञि (४।३।६७) प्राप्ते। पुरोडाशस्तु लघावन्ते द्वयोश्च बह्वषो गुरुरिति (फिट्, २।४२) मध्योदात्तः। अस्मादपि प्राप्ते ष्ठन् विधीयते। षकारो ङीषर्थः। नकार आद्युदात्तार्थः। तेषां संस्कारो मन्त्रः पौरोडाश इति। पुरोडाशसहचरित इति। तादर्थ्यात् साहचर्याद्वा पुरोडाशा येन मन्त्रेण संस्क्रियन्ते तत्र पुरोडाशशब्दो वर्त्तते। न पुरोडाशेषु। कुत एतत्? व्याख्यातव्यनामग्रहणानुवृत्तेः। नहि पुरोडाशा व्याख्यातव्यतया प्रसिद्धतराः।

७१। छन्दसो यदणौ।

७२। द्व्यजृद्ब्राह्मणर्क्प्रथमाध्वरपुरश्चरणनामाख्याताट्ठक्।

अणादेरपवाद इति। आदिशब्देन ठञः। तत्र य ऋकारान्ता उद्-

गात्वप्रभृतयो बह्वचोऽन्तोदात्तास्तेभ्यष्ठञोऽपवादः । ब्राह्मणप्रथमाध्वरेभ्योऽपि ठञ एव । तेऽपि बह्वचः प्रातिपदिकस्वरेणान्तोदात्ताः । नामाख्यातशब्दादपि समस्तात् तस्यैव । सोऽपि बह्वच् समासस्वरेणान्तोदात्तश्च । परिशिष्टेभ्योऽण् । पांशुकम् । पाञ्चहोत्रकमिति । इसुसुक्तान्तात् कः (७।३।५१) । पञ्चहोतृचतुर्होतृशब्दाविगन्ते द्विगाविति ( ६।२।२९ ) पूर्वपदप्रकृतिस्वरेणाद्युदात्तौ । पूर्वपदं हि नुः संख्याया ( फिट्, २।२८) इत्युदात्तम् । पुरश्चरणशब्दो ल्युडन्तः कृदुत्तरपदप्रकृतिस्वरेण ( ३।२।१३९ ) मध्योदात्तः । आख्यातशब्दो गतिरनन्तर (६।२।४९) इत्याद्युदात्तः । सङ्घातविगृहीतार्थमिति । तच्चैकशेषसमाश्रयणाल्लभ्यत इति वेदितव्यम् ।

## ७३ । अणृगयनादिभ्यः ।

ठञादेरपवाद इति । आदिशब्देन ठकश्छस्य च । तत्र ये बह्वचोऽन्तोदात्तास्तेभ्यष्ठञः । विद्यान्यायशिक्षाशब्देभ्यो ह्रस्वलक्षणस्य ठकः । व्याकरणशब्दाद्वृद्धाच्छस्य । अण्ग्रहणं किमर्थम् ? न ऋगयनादिभ्यो यथाविहित मेवोच्येत । नचैवं सत्यपवादाष्ठनादयः स्युरिति संभाव्यते । अपवादविधानस्य हि वैयर्थ्यं स्यात् । तस्माद् वचनप्रमाण्याद् यो विहितो न च प्राप्नोतन्येन बाधितत्वात् स एव भविष्यति । स चाणेवेत्यत आह अण्ग्रहणमित्यादि । तत्र यद्यण्ग्रहणं न क्रियेत तदा यदत्र वृद्धमन्तोदात्तं तस्माच्छे ठञा बाधिते पुनर्वचनाच्छ एव भविष्यति । तस्माच्छस्य बाधकस्य बाधनार्थमण्ग्रहणम् । तेन वास्तुविद्य इति सिद्धं भवति । वास्तुविद्याशब्दो वृद्धः समासस्वरेणान्तोदात्तश्च । ऋगयनेत्यादि । ऋगयनमिति । ऋगयनशब्दो भावसाधन ऋचामयनम् । यद्यपि भावे ल्युट् तथाप्यभेदोपचारात् तद्वति ग्रन्थे व्याख्यातव्ये वर्त्तते । स चानो भावकर्मवचन (६।२।१५०) इत्यन्तोदात्तः । यैस्तु करणे ल्युटं कृत्वा ऋगयनशब्दो व्युत्पाद्यते तेषां स कृदुत्तरपदप्रकृतिस्वरेण मध्योदात्तो न गणे पाठं प्रयोजयति । ततः प्राग्दीव्यतोऽणित्येव (४।१।८३) सिद्धः । पदव्याख्यानशब्दः मन्क्तिन्व्याख्यानशयनासनस्थानयाजकादिक्रीता (३।२।१५१) इत्यन्तोदात्तः । मानेति । मनेर्धातोर्यदा घञ् तदा थाथघञ्-

क्ताजवित्रकाणामित्यन्तोदात्तः ( ६।२।१४४ )। अथ मिनातेर्लुरट् तदानो भावकर्मवचन (६।२।१५०) इत्यन्तोदात्तः। छन्दोभाषेति। गतिकारकोपपदात् कृदिति (६।२।१३९) कृत्स्वरेणान्तोदात्तः। भाषाशब्दो गुरोश्च हल (३।३।१०३) इत्यकारप्रत्ययान्तो व्युत्पादितः। छन्दोविचितीति। मन् क्तिन्नित्यादिनान्तोदात्तः ( ६।२।१५० )। पुनरुक्तशब्दस्याथघञ्क्ताजवित्रकाणामित्यन्तोदात्तः (६।२।१४४)। निरुक्तः संज्ञायामनाचितादीनामितरन्तोदात्तः (६।२।१४४)। व्याकरणशब्दो लुरडन्तो मध्योदात्तः। निगमशब्दो गोचरसञ्चरेत्यादिसूत्रे (३।३।१०९) घप्रत्ययान्तो निपातितः प्रत्ययस्वरेणान्तोदात्तः। वास्तुविद्याशब्दोऽङ्गविद्याक्षत्रियविद्येतरते च समासस्वरेणान्तोदात्ताः। उत्पात उत्पाद इत्येतौ थाथादि (६।२।१४४) सूत्रेणान्तोदात्तौ। संवत्सर इति। अर्तेः सर इतरनुवृत्तौ ( उण्, ३।३५० ) वसेः संपूर्वाच्चिदित्येवं ( उण्, ३।३५२ ) वुत्पादितत्वात् संवत्सरशब्दोऽन्तोदात्तः। मुह्यतेर्धातोः क्तः। क्ते ऊरागमः। तेन मुहूर्त्त इतरन्तोदात्तः। निमित्तशब्दोऽपि प्रातिपदिकस्वरेण। उपनिषदिति। उपनिपूर्वात् सदेः क्विप्। कृत्स्वरेणान्तोदात्तः।

## ७४। तत आगतः।

अथ स्रुघ्नादागच्छन् वृक्षमूलादागत इति। अत्र वृक्षमूलशब्दात् प्रतत्ययः कस्मान्न भवतीतराह मुख्यमितरादि। मुखंत प्रधानं विवक्षितम्। तदिह परिगृह्यते। नतु नान्तरीयकमप्रधानम्। नहि मुख्ये सतीतरस्याप्रधानस्य ग्रहणं युक्तम्। मुख्ये कार्य्यसम्प्रतत्ययात्।

## ७५। ठगायस्थानेभ्यः।

## ७६। शुण्डिकादिभ्योऽण्।

आयस्थानठकोऽपवाद इति। बाहुल्यादेवमुक्तम्। यस्मात् कृकणशब्दोऽत्र पठ्यते। तत्र हि कृकणपर्णाद् भारद्वाज इति (४।२।१४५) प्राप्तस्य छस्यापवादः। तीर्थशब्दश्चेह धूमादिषु पठ्यते। ततो धूमादिभ्यश्चेति प्राप्तस्य (४।२।१२७) वुञोऽपवादः। अथाण्ग्रहणं किमर्थम्? न शुण्डिकादिभ्यो यथाविहितमेवोच्येत। नचैवं पठ्यमाने ऽपवाद एव स्यादितराशङ्कनीयम्।

अपवादविधाने हि वचनवैयर्थ्यं स्यात् । तस्मादन्तरेणाप्यण्ग्रहणमणेव भविष्यतीत्यत आह अण्ग्रहणमित्यादि । उदपानशब्दोऽत्र पठ्यत आयस्थानवचनम् । उत्सादिष्वसौ पठ्यते । तत्रासत्यण्ग्रहण आयस्थानठकं बाधित्वोत्सादिभ्योऽञित्यञेव (४।१।८६) स्यात् । तस्मात् तस्य बाधकस्य बाधनार्थमण्ग्रहणम् । तेनोदपान इत्यत्राण् सिद्धो भवति ।

७७ । विद्यायोनिसम्बन्धेभ्यो वुञ् ।

७८ । ऋतष्ठञ् ।

तपरकरणं मुखसुखार्थमिति । अथ दीर्घनिवृत्त्यर्थं कस्मान्न भवति ? असम्भवात् । नहि विद्यायोनिसम्बन्धिषु किञ्चिदृकारान्तं प्रातिपदिकमस्ति यन्निवृत्त्यर्थस्तकारः स्यात् ।

७९ । पितुर्यच्च ।

पित्र्यमिति । रीङ् ऋत इति रीङ् ( ७।४।२७ ) । यस्येति लोपः (६।४।४९) ।

८० । गोत्रादङ्कवत् ।

यदि गोत्रादङ्कवत्प्रत्ययविधिर्भवतीत्युच्यतेऽण एवातिदेशः प्राप्नोति । न वुञः । यस्मादण्विधावेवाङ्कग्रहणमस्ति । सङ्घाङ्कलक्षणेत्यादौ (४।३।१२७) सूत्रेण वुञ्विधौ गोत्रचरणाद्वुञित्यत्रे(४।३।१२६)त्याह अङ्कग्रहणेनेत्यादि । यथा काकेभ्यो दधि रक्ष्यतामित्यत्र काकग्रहणमुपघातसामान्यस्योपलक्षणमेवमिहाप्यङ्कग्रहणं तस्येदमित्यस्य (४।३।१२०) । तेनायं सूत्रार्थो भवति । यथा तस्येदमित्यत्र (४।३।१२०) गोत्राद् प्रत्ययो भवति तथा तत आगत (४।३।७४) इत्यत्रापि । तेन वुञोऽप्यतिदेश उपपद्यते । नन्वेवमप्यणोऽतिदेशो न प्राप्नोति । नहि तद्विधौ गोत्रग्रहणमस्ति । पूर्वसूत्राद् गोत्रग्रहणमनुवर्त्तत इत्यदोषः । सङ्घाङ्कलक्षणेत्यादिना (४।३।१२७) येन सूत्रेणाण् विहितस्तद् दर्शयति ।

८१ । हेतुमनुष्येभ्योऽन्यतरस्यां रूप्यः ।

समादागतमिति । समाद्धेतोरागतमस्यार्थः । केन पुनरिह पञ्चमी ।

अस्मादेव ज्ञापकात् । यदयं पञ्चम्यन्तात् प्रत्ययमाह ततो ज्ञायते हेतौ पञ्चमी भवति ।

## ८२ । मयट् च ।

योगविभागो यथासंख्यनिरासार्थ इति । ननु चान्यतरस्यांग्रहणेनोत्सर्गेऽभ्यनुज्ञायमाने वैषम्याद् यथासंख्यस्य प्राप्तिरेव नास्ति । सत्यमेतत् । यस्तु रूप्यमयटोरपूर्वत्वाद् विधीयमानापेक्षया यथासंख्यत्वं मन्येत तं प्रति योगविभागः क्रियते ।

## ८३ । प्रभवति ।

प्रथम उपलभ्यत इत्यर्थ इति । प्रथम इत्यनेन प्रशब्दस्यार्थमाचष्टे । उपलभ्यत इत्यनेनापि भवतेः । अनेकार्थत्वाद्धातूनां भवतिरिहोपलब्धौ वर्त्तते । हिमवतः प्रभवतीति । भुवः प्रभव इति (१।४।३१) हिमवतोऽपादानसंज्ञा ।

## ८४ । विदूराञ्ञ्यः ।

तत्र तु संस्क्रियत इति । तुशब्दोऽवधारणे । संस्क्रियते एव च तत्र विदूरे नगरे । न ततः प्रभवति । वालवायो विदूरश्चेति । वालवायशब्द एव प्रत्ययमुत्पादयति । न विदूरशब्दः । प्रभवतिशब्दस्य प्रथमत उपलभ्यत इत्यर्थः । प्रभवति च वालवाये पर्वते । तस्माद् यतः प्रभवति तद्वाचो वालवायशब्दः प्रकृतित्वेनाक्षिप्यते । यथा विश्रवणरवणा इत्यादेशावेव शिवादिषु पठ्येते । अपत्याधिकारात् तु येन तयोरपत्यापत्यवत्सम्बन्धः स एव प्रकृतित्वेनाक्षिप्यते विश्रवस्शब्दः । विश्रवसोऽपत्यं वैश्रवणः । रावणः । अथवा प्रकृत्यन्तरमेव विदूरशब्दो वालवाये वर्त्तते । विदूरात् प्रभवति वालवायात् पर्वतात् प्रभवतीत्यर्थः । एवं स्थिते यो ब्रूयात् नैव तत्र वालवाये प्रसिद्धो विदूरशब्द इति तं प्रत्याह जित्वरीवदुपाचरेदिति । यथा वणिज एव वाराणसीं नगरीं जित्वरीत्युच्चारयन्ति मङ्गलार्थं न लोका एवं वैयाकरणा एव वालवायं विदूरमित्युच्चारयन्ति । नियतदेशपुरुषविषया अपि रूढयो भवन्तीत्येतज्जित्वरीवदित्यनेन कथयति ।

## ८५ । तद्गच्छति पथिदूतयोः ।

पथो निष्क्रियत्वाद् गमेः कर्त्तृत्वं नोपपद्यत इत्याह तत्स्थेष्वित्यादि । पुरुषवृत्तिर्गमनं पथ्युपचर्य्यत इति दर्शयति । अथ वेत्यादि । प्राप्तावत्र गमिर्वर्त्तते । अस्ति च प्रत्यासत्त्वगम्यैव स्रुघ्नादीनां पथोऽस्यैवानन्तर्य्यलक्षणा प्राप्तिः ।

## ८६ । अभिनिष्क्रामति द्वारम् ।

कथं पुनः करणत्वेन प्रसिद्धं द्वारं स्वातन्त्र्येणैव विवक्ष्यत इत्याह यथेत्यादि । यथा छेदनक्रियायामसिः करणत्वेन प्रसिद्धोऽपि स्वातन्त्र्येण विवक्ष्यते । ननु चेतनावतोऽभिनिष्क्रमणं भवति । चेतनावता प्रयुक्तस्य वा । देवदत्तोऽभिनिष्क्रामति शकटमभिनिष्क्रामतीति । न च द्वारं चेतनावता प्रयुक्तम् । तस्मान्नोपपद्यते तस्याभिनिष्क्रमणम् । नैष दोषः । अचेतनेष्वप्यभिनिष्क्रामतीति व्यवहारो दृश्यते तद्यथा ऽनेन गुहामुखेन वायुरभिनिष्क्रामतीति । निष्क्रियत्वात् तर्हि नोपपद्यते। तत्स्थेषु निष्क्रामत्सु द्वारमभिनिष्क्रामतीत्युपचर्य्यत इत्यदोषः ।

## ८७ । अधिकृत्य कृते ग्रन्थे ।

ननु कृत इति कर्मणि निष्ठा । ततश्च तयाभिहितत्वात् कर्मणो द्वितीया न प्राप्नोतीत्याह अधिकृत्येत्येतदपेक्षया द्वितीयेति । ल्यबन्तेन या क्रियाभिधीयते तदपेक्षया द्वितीया । नच तस्या यत् कर्म तत् केनचिदभिहितम् । निष्ठया हि ग्रन्थात्मकमेव कर्माभिहितम् । न तु ल्यबन्तक्रियाया यत् कर्म सुभद्रादिकं तदपि । गिरिभिन्नमधिकृत्य कृतो गैरिभित्रः । ययातिमधिकृत्य यायातः । लुबित्यादि । आख्यायिकायायिति तादर्थ्ये चतुर्थी । आख्यायिकार्थमाख्यायिकामभिधातुं प्रत्ययस्य लुग् भवतीत्यर्थः ।

## ८८ । शिशुक्रन्दयमसभद्वन्द्वेन्द्रजननादिभ्यश्छः ।

यमसभमिति । सभाराजेत्यादिना (२।४।२७) नपुंसकलिङ्गता । यदीन्द्रजननादावेव शिशुक्रन्दादयो द्रष्टव्यास्तत् किमर्थं पृथग्ग्रहणमित्यत आह प्रपञ्चार्थमित्यादि । एवञ्च सतीत्यादि । चशब्दो हेतौ । यस्मादिन्द्रजनना-

देराकृतिगणस्य तदन्तर्भूतानामेव शिशुक्रन्दादीनां प्रपञ्चार्थं ग्रहणं तस्मादेव-मर्थेऽस्मिन् स्थिते देवासुरादीनां प्रतिषेधो न वक्तव्यः। प्राप्त्यभावात्। येभ्य एव छप्रत्ययोऽयं दृश्यते तएवेन्द्रजननादयः। न च देवासुरादिभ्यो दृश्यते।

८९। सोऽस्य निवासः।

९०। अभिजनश्च।

तत्सम्बन्धाद् देशोऽप्यभिजन उच्यत इति। यथा यष्टीः प्रवेशयेति यष्टिसम्बन्धाद् यष्टिशब्दः पुरुषे वर्त्तते तथाभिजनशब्दो देशे वर्त्तते। कः पुन-रसौ योऽभिजनसम्बन्धादभिजन उच्यत इत्यत आह यस्मिन्नित्यादि। इह देशवाचिन इत्यादि। कथं पुनर्मुख्येऽभिजने गौणात् प्रत्ययो भवतीत्याह निवासप्रत्ययासत्तेरिति। निवासोऽनुकृष्यते। तेनाभिजनो विशेष्यते। निवा-सो योऽभिजन इति। तस्माद् देशवाचिन एव प्रत्ययो भवति। न बन्धुभ्यः। तेषामनिवासत्वात्। निवासाभिजनयोः को विशेषः? नास्त्येव कश्चिद् विशेषः। अभिजनस्य निवासभूतत्वादिति मन्यते। यत्रेत्यादिना विशेषं दर्शयति। योगविभाग उत्तरार्थ इति। उत्तरेषु योगेष्वभिजनप्रत्यया यथा-स्युर्निवासे मा भूवन्निति।

९१। आयुधजीविभ्यश्छः पर्वते।

आयुधजीविभ्य इति तादर्थ्ये चतुर्थीति पञ्चमीं निराकरोति। यदि ह्येषा पञ्चमी स्यादायुधजीविभ्य एव पर्वतेऽभिधेये छो भवतीत्येष सूत्रार्थः स्यात्। न चेष्यते। तस्मात् तादर्थ्य एवैषा चतुर्थी। न पञ्चमीति। साङ्काश्यका इति। धन्वयोपधाद्वुञ् (४।२।१२१)।

९२। शण्डिकादिभ्यो ञ्यः।

अणादेरपवाद इति। आदिशब्देन छादेः। अत्र ये शण्डिकादीन् पर्वतानाचक्षते तेषां मतेन पूर्वसूत्रेण प्राप्तस्य छस्यापवादः। ये तु जनपद-शब्दास्तेषामवृद्धादपि बहुवचनविषयादिति (४।२।१२५) प्राप्तस्य वुञः। शण्डिकशब्दात् कोपधादस्मिति (४।२।१३२) प्राप्तस्याणः।

## ९३ । सिन्धुतक्षशिलादिभ्योऽणञौ ।

प्रभृतय इति । प्रभृतिशब्देन मधुवसन्तकम्बोजसाल्वकश्मीर इत्येते गृह्यन्ते । गान्धारि किष्किन्धा सारदि उरस् दरत् इत्येतेषामवृद्धादपीत्यादिना वुञि ( ४।२।१२५ ) प्राप्ते वचनम् । तक्षशिलादिष्वपि कौमेदुरकाण्डवारण ग्रामणी इत्येतेषां वृद्धाच्छ इति (४।२।११४) छे प्राप्ते । शेषाणां प्रागदीव्यतोऽणित्यणि (४।१।८३) ।

## ९४ । तूदीशलातुरवर्मतीकूचवाराड्ढक्छण्ढञ्यकः ।

## ९५ । भक्तिः ।

भज्यते सेव्यत इति भक्तिरिति । भज सेवायामित्येतस्मात् कर्मसाधनः क्तिन् ।

## ९६ । अचित्ताद्देशकालाट्ठक् ।

ननु च देशकालयोरचित्तयोः प्रतिषेधान्नञिवयुक्तन्यायेन प्रकृतिरचेतनैव विज्ञास्यते । तत् किमचित्तग्रहणेन ? नैतदस्ति । विना हि तेनादेशकालादिति न ज्ञायते किमयं प्रकृतिनिर्देश उत देशकालयोः प्रतिषेध इति । तत्रानिष्टमपि विज्ञायते । अदेशशब्दात् कालशब्दाच्चेति । अचित्तग्रहणे तु सति तेनातिप्रसङ्गे सत्यदेशकालादिति प्रतिषेधो विज्ञायते । अस्मादेव च प्रतिषेधादचित्तादिति स्वरूपग्रहणं न भवति । स्वरूपग्रहणे हि देशकालाभ्यां प्रसङ्गो नास्तीति प्रतिषेधं न कुर्यात् ।

## ९७ । महाराजाट्ठञ् ।

ननु च पूर्वसूत्रादेव ठगनुवर्त्तिष्यते । तेनापि हि माहाराजिक इति सिध्यत्येव । तत् कथं ठञ् प्रत्ययान्तरं क्रियत इत्याह प्रत्ययान्तरकरणमित्यादि । ञित्स्वरेणाद्युदात्तत्वं यथा स्यादिति प्रत्ययान्तरकरणम् । ठकि हि सति तद्धितस्य कित इत्यन्तोदात्तत्वं (६।१।१६५) स्यात् ।

## ९८ । वासुदेवार्जुनाभ्यां वुन् ।

वासुदेवशब्दाद्वृद्धाच्छस्यापवादः । अर्जुनशब्दादौत्सर्गिकस्याणः । ननु चार्जुनशब्दः क्षत्रियाख्यः । तस्मादुत्तरसूत्रेण प्राप्तस्य वुञोऽपवादो युक्तः ।

एवं मन्यते। बहुलग्रहणं तत्र क्रियते। तेनार्जुनशब्दाद् वुञ्प्रत्ययस्य प्राप्तिरेव नास्ति। तस्मादस्मादणेव स्यात्। अतस्तदपवादो न्याय्यः। ननु चेत्यादि चोद्यम्। स्यादेतत्। वुञ्वुनोर्विशेषोऽस्ति। अतो वासुदेवशब्दाद्वुन् विधीयत इत्याह नचात्रेत्यादि। वासुदेवशब्दस्य च वुञि वुनि वा सति नास्ति कश्चिद् विशेष इति। तथा ह्युभयत्र तदेव रूपं सएव स्वरः। योऽपि वुञि सति पुंवद्भावप्रतिषेधो वृद्धिनिमित्तस्य च तद्धितस्यारक्तविकार इति (६।३।३८) स वुन्यपि लभ्यत एव न कोपधाया इति (६।३।३७)। संज्ञैषात्यादिना यदुक्तं ननु च वासुदेवशब्दाद् गोत्रक्षत्रियाख्येभ्य इति (४।३।९९) वुञस्त्येवेति तन्निराकरोति। गोत्रक्षत्रियाख्येभ्यो वुञ् विधीयते। नच वासुदेवशब्दो गोत्राख्यं प्रातिपदिकम्। नापि क्षत्रियाख्यम्। तत् कुतो वुञः सम्भवः। अजाद्यदन्तमित्यादि। इतिकरणः प्रत्येकमभिसम्बध्यते। अजाद्यदन्त (२।२।३३) मित्यनेनाल्पाच्तरमित्यनेन (२।२।३४) वार्जुनशब्दस्य पूर्वनिपातमकुर्वंस्तद् विज्ञापित मभ्यर्हितं पूर्वं निपततीति। तेन मातापितरौ श्रद्धामेधे दीक्षातपसी इत्यत्र शास्त्रादेवाभ्यर्हितस्य पूर्वनिपातः सिद्धो भवति। अभ्यर्हितत्वं तु वासुदेवशब्दस्य देवताविशेषत्वात्।

## ९९। गोत्रक्षत्रियाख्येभ्यो बहुलं वुञ्।

ग्लौचुकायनकः। ग्लौचुकायनक इति। ग्लुचुकम्लुचुकशब्दाभ्यां प्राचामवृद्धात् फिन् (४।१।१६१)। तदन्ताद्वुञ्। आख्याग्रहणं किमर्थम्? न गोत्रक्षत्रियेभ्य इत्येवोच्येतेत्यत आह आख्याग्रहणमित्यादि। यद्याख्याग्रहणं न क्रियेत ततो येऽपि यथाकथञ्चित् क्षत्रिये वर्त्तन्ते तेभ्योऽपि स्यात्। नेष्यते। तस्मात् प्रसिद्धक्षत्रियपरिग्रहार्थमाख्याग्रहणं क्रियते। तेनेह न भवति विद्वान् क्षत्रियो भक्तिरस्येति। न विद्वच्छब्दः क्षत्रियशब्द इति प्रसिद्धः। क्षत्रियशब्दस्य तु सामानाधिकरण्यात् क्षत्रिये वृत्तिर्गम्यते। पाणिनीय इति पाणिनोऽपत्यमित्यण्। गाथिविदथीत्यादिना (६।४।१६५) प्रकृतिभावः। पाणिनो भक्तिरस्येति वृद्धाच्छः (४।२।११४) पाणिनीयः। पौरवो भक्तिरस्येति पौरवीयः।

## १०० । जनपदिनां जनपदवत् सर्वं जनपदेन समानशब्दानां बहुवचने ।

एकशब्दा इति । एतेन समानशब्दोऽयमेकवाचीति दर्शयति । प्रत्ययः प्रकृतिश्चेति सर्वशब्देन योऽर्थ उपात्तस्तमाचष्टे । तद्वदङ्गाः क्षत्रिया भक्तिरस्येति । अङ्गादिभ्यः क्षत्रियेभ्यो बहुष्वपत्येषु द्वाञ्मगधेत्यादिना (४।१।१७०) विहितस्याण स्तद्राजस्येत्यादिना (२।४।६२) लुक् क्रियते । बहुवचने ऽङ्गादयो जनपदिनो जनपदेन समानशब्दा भवन्ति । अत्र जनपदवृत्तिभ्योऽङ्गादिभ्यो यथा सोऽस्य भक्तिरित्येतस्मिन् (४।३।८५) विषये जनपदतदवध्योश्चेति (४।२।१२४) वुञ् भवति तथा जनपदिवृत्तिभ्योऽपि पञ्चाला ब्राह्मणा इति । यदा पञ्चालनिवासिषु साहचर्य्यात् पञ्चालादिशब्दो वर्त्तते तदा भवन्ति ब्राह्मणा जनपदेन बहुवचने समानशब्दाः । ननु ते जनपदिनः । तेनातिदेशाभावादणेव भवति । पाञ्चालः । सर्वग्रहणमित्यादि । यदि सर्वग्रहणं न क्रियते तदा प्रत्ययस्य विधीयमानतया प्राधान्यात् प्रधाने कार्य्यसम्प्रत्ययात् तस्यैवातिदेशः स्यात् । न प्रकृतेः । तस्माद् यथा प्रकृतेरप्यतिदेशो भवति तदर्थं सर्वग्रहणं क्रियते । स चेत्यादि । स च प्रकृत्यतिदेशः सर्वग्रहणं द्व्येकयोरेव प्रयोजयति । न बहुषु । जनपदशब्दो नात्र वृद्धः । तस्मादवृद्धो जनपदशब्दो दृश्यते । बहुवचने तु तद्राजस्य बहुषु तेनैवास्त्रियामिति (२।४।६२) लुकि कृते विनाप्यतिदेशेनावृद्धोऽसएव भवतीति तत्र प्रकृत्यतिदेशोऽनर्थकः । ततो नैतदर्थं सर्वग्रहणं कर्त्तव्यम् । वृद्धिनिमित्तेष्वित्यादि । वृद्धिनिमित्तेषु वुञादिष्वादिष्टायामवृद्धायां प्रकृतौ पुनर्वृद्धिभावात् प्रकृतिनिर्ह्रासे कृत इति सर्वग्रहणात् प्रकृत्यतिदेशेन निर्ह्रासः । निर्ह्रासो ऽल्पता ऽपचय इत्यर्थः । माद्र इति । एताञ्च प्रकृतिमपेक्ष्य मद्र इत्येषा प्रकृतिरल्पा भवति । वार्ज्य इत्येताञ्च वृजिरिति । ननु वतेः सर्वसादृश्यार्थत्वाद् वतिनिर्देशेनैव प्रकृतेरतिदेशो भविष्यतीति तत् किं सर्वग्रहणेन ? नैतदस्ति । यथैव तत्र सर्वसादृश्यार्थे वतौ न प्रत्ययार्थौ देवतार्थेऽतिदिश्यते तथेहापि जनपदरूपं जनपदिनि नातिदिश्यते । कस्मात् पुनस्तत्र प्रत्ययार्थौ नातिदिश्यते ? वतिना तयोर्भेदस्य

प्रतिपादितत्वात् । वतिर्हि सादृश्ये विधीयते । सादृश्यञ्च भेदाश्रयम् । यदि भवार्थस्यापि देवतार्थतया विपरिणामः स्यात् तदा वतिरेव न स्यात् । तस्मादन्यस्य कार्य्यस्य सादृश्यं वतिराचष्टे । प्रत्ययार्थयोस्तु भेदमिहापि च जनपदजनपदिनोर्भेदमाचष्ट इति । असति सर्वग्रहणे जनपदरूपं जनपदिनि न लभ्यते । तस्मात् सर्वग्रहणं क्रियते । बहुवचनग्रहणमित्यादि । समानशब्दताया विषयप्रदर्शनं लक्षणम् । तदर्थं बहुवचनग्रहणम् । अन्यथा हीत्यादि । यदि बहुवचनग्रहणं न क्रियेतेत्यर्थः । तत्रैवेति । बहुवचने । बहुवचन एव तद्राजप्रत्ययस्य लुकि कृते समानशब्दता भवति । ततश्च तत्रैवातिदेशः स्यात् । एकवचनद्विवचनयोर्न स्यादिति । तत्र समानशब्दताया अभावात् । बहुवचने त्वित्यादि । बहुवचनग्रहणे तु सति बहुवचने ये जनपदेन समानशब्दास्तेषां यत्र वा तत्र वातिदेशे विज्ञायमाने द्व्येकयोरप्यसौ सिद्धो भवति ।

## १०१ । तेन प्रोक्तम् ।

प्रकर्षेणोक्तमिति । प्रकर्षोऽतिशयः । तेन व्याख्यातं तदध्यापितं वा प्रोक्तमित्युच्यते । नतु कृतमिति । नतु कृतमुत्पादितं प्रोक्तमित्युच्यते । कस्मादित्याह कृते ग्रन्थ इति ( ४।३।११६ ) गतार्थत्वात् । कथं माथुरीत्यण् ? यावता वृद्धाच्छेनैव भवितव्यम् । नैष दोषः । कलापिनो (४।३।१०८) ऽणित्यत्राण्ग्रहणस्यान्येभ्यो भवतीत्येतत् प्रयोजनं वक्ष्यति । तेन माथुरशब्दादप्यण् भवति । पाणिनीयमिति । पाणिनशब्दाद्वृद्धाच्छ इति (४।२।११४) छः । आपिशलम् । काशकृत्स्नमिति । आपिशलिकाशकृत्स्निशब्दाभ्यामिञश्चेत्यण् (४।२।११२) ।

## १०२ । तित्तिरिवरतन्तुखण्डिकोखाच्छण् ।

तैत्तिरीया इति । छण् प्रत्ययास्तेभ्यस्तदधीत इत्यण् (४।२।५९) । तस्य प्रोक्ताल्लुगिति (४।२।६४) लुक् । छन्दोब्राह्मणानि च तद्विषयाणीति (४।२।६६) तद्विषयता । छन्दसीत्यादि । कथं पुनश्छन्दसि लभ्यते ? नहि च्छन्दोग्रहणमस्तीत्याह शौनकादिभ्य इत्यादि ।

## १०३ । काश्यपकौशिकाभ्यामृषिभ्यां णिनिः ।

णकार उत्तरत्र वृद्ध्यर्थ इति । उत्तरेषु योगेषु वृद्धिर्यथा स्यात् । इह

हि षकारस्य प्रयोजनं नास्ति। तस्य हि वृद्धिरेव प्रयोजनम्। काश्यप-कौशिकशब्दौ वृद्धिमन्तौ। तस्यापि चेत्यादि। ननु च च्छन्दोब्राह्मणादीनां तद्विषयता युक्ता। तत् कथं कल्पस्यापि सा भवतीत्यत आह शौनकादिभ्य इत्यादि। स्यादेतत्। यद्यपीदं शौनकादिभ्यश्छन्दसीत्यत्रानुवर्त्तते (४।३।१०३) तथापि च्छन्दोब्राह्मणादीनां तद्विषयतोच्यमाना कल्पस्य न सिध्यत्येव। नहि शौनकादिसूत्रानुवृत्तौ (४।३।१०६) सत्यामस्य योगस्य कल्पश्छन्दोभावं ब्राह्मण-भावमापद्यत इत्यत आह च्छन्दोऽधिकारविहितानाञ्चेत्यादि। कथं पुनरिष्यमाणो-ऽपि च्छन्दोधिकारविहितानां तद्विषयता लभ्यते? एवमर्थं छन्दोब्राह्मणानि च तद्विषयाणीत्यत्र च्छन्दोग्रहणं (४।२।६६) स्वर्य्यते। तेन शौनकादिभ्यश्छन्दसीतीदं (४।३।१०६) प्रकृतयो विहिताः प्रोक्तप्रत्ययाः। तेषां सर्वेषामेव कल्पादावपि तद्विषयता भवति। अथ गुणकल्पनया कल्पादीनामपि च्छन्दस्त्वं विवक्ष्यते। ननु च च्छन्दोब्राह्मणानि चेत्यत्र (४।२।६६) चकारस्यानुक्तसमुच्चयार्थत्वात् तेनैव प्रागेव कल्पादेस्तद्विषयता प्रतिपादिता। तत् किमर्थं पुनरनेन प्रकारेण प्रतिपाद्यते। तत्र वा कल्पादेस्तद्विषयता प्रतिपादनार्थश्चकारः कर्त्तव्योऽयं वा प्रकार आश्रयितव्य इति विकल्पप्रदर्शनार्थम्। इदानीन्तनेनेत्यादि। इदानीन्तनो यः काश्यपः स काश्यपगोत्रप्रभवत्वात् काश्यप इत्युच्यते। तथे-दानीन्तनो यः कौशिकः स कौशिकगोत्रप्रभवत्वात् कौशिक इत्युच्यते। तत्र यदि ऋषिग्रहणं न क्रियेत ततो णिनिः स्यात्। ऋषिग्रहणे तु सति न भवति। कथं न भवतीति? यावता काश्यपकौशिकशब्दावपि ऋषिशब्दावेव। तथाहि प्रवराध्याये ये पठ्यन्ते त ऋषय इति। इमावपि तत्र पठ्येते एव। नैष दोषः। विशेषणोपादानसामर्थ्यादयमृषिशब्दः क्रियाशब्दो विज्ञायत ऋषि-दर्शनादिति। तेन यावनन्यपुरुषसाधारणेनोपदेशिकेन दर्शनेन तद्वन्तौ काश्यप-कौशिकशब्दौ तत्र इदं प्रत्ययविधानम्। नचेदानीन्तनौ काश्यपकौशिक-शब्दावेवंविधौ। ताभ्यां छ एव भवति।

## १०४। कलापिवैशम्पायनान्तेवासिभ्यश्च।

अभिधानेऽभिधेयोपचारात् कलापिवैशम्पायनान्तेवास्यभिधायिनः शब्दा

इह कलापिवैशम्पायनान्तेवासिशब्देन निर्दिष्टाः । अतएवाह कलाप्यन्तेवासिनामिति । ननु च ये व्यवहिताः शिष्यशिष्यास्ते कलापिवैशम्पायनान्तेवासिन एव भवन्ति । तदयुक्तमुक्तं कलाप्यन्तेवासिनश्चत्वारः । वैशम्पायनान्तेवासिनो नवेत्याह प्रत्यक्षकारिण इत्यादि । करोतिरत्राध्ययने वर्त्तते । यैः साक्षादधीतं ते प्रत्यक्षकारिणः । इहान्तेवासिनो गृह्यन्ते चैतावन्त एवेति । किमत्रायुक्तम् ? कुत इह साक्षात्कारिणो गृह्यन्ते । नहि व्यवहिता इत्यत्र हेतुं पृच्छति । कलापिखाण्डायनग्रहणादिति हेतुनिर्देशः । तथाचेत्यादि । अस्यैव विवरणम् । वैशम्पायनस्य कलाप्यन्तेवासी । तस्य येऽन्तेवासिन स्ते वैशम्पायनान्तेवासिनो भवन्त्येव । यदि तत्र ये व्यवहितास्तेऽप्यन्तेवासिनो गृह्येरन् कलापिग्रहणमनर्थकं स्यात् । वैशम्पायनान्तेवासिभ्य इत्येवं ब्रूयात् । तथा वैशम्पायनान्तेवासी कठः । कठान्तेवासी खाण्डायनः । तत्र यदि व्यवहिता अपि गृह्येरंस्ततो वैशम्पायनान्तेवासित्वादनेनैव सूत्रेण सिद्धे शौनकादिषु खाण्डायनशब्दस्य पाठो निष्फल एव स्यात् । तस्मादिहापि कलापिग्रहणं शौनकादिषु खाण्डायनशब्दस्य पाठ एतदुभयमपि साक्षात्कारिग्रहणस्य लिङ्गं ज्ञापकम् । हारिद्रविण इत्यादि । हरिद्रुप्रभृतिभ्यः प्रोक्तार्थे णिनिः । तदन्तात् तदधीते तद्वेदेत्यण् (४।२।५९) । तस्य प्रोक्ताल्लुक् (४।२।६४) । अयञ्च योगश्छन्दोऽधिकारमनुवर्त्तते । तेन तद्विषयता भवति । उलपेन चतुर्थेनेति । सहार्थे तृतीया । कालापकमिति । कलापिन इदं कालापकम् । गोत्रचरणाद् वुञ् (४।३।१२६) । ननु च धर्माम्नाययोर्वुञ् । नचेमे शिष्या धर्माम्नायाः ? तत् कथं वुञ् ? एवं तर्ह्युपमानाद् भविष्यतीति । कालापकमिव धर्मवच्छिष्या उच्यन्ते । यथा धर्मः कलापिसम्बन्धी तथा शिष्या इत्युच्यत उपमानार्थः । आलम्बिर्नाम प्राचां देशः । तत्रोत्पन्नश्चरकः । एवं पलङ्कमलावुभौ । प्राचामेव त्रयः । एते प्राच्याः । वैशम्पायनशिष्या ऋचाभारुणिताण्ड्याश्च मध्यमीयास्त्रयोऽपरे चरकाः । मध्यदेशे भवा मध्यमीयाः । गहादिषु (४।२।१३८) मध्यमध्यमञ्चाण् चरण इति पठ्यते । तस्यायमर्थः । मध्यशब्दो मध्यमभावमापद्यते । छप्रत्ययश्च ततो भवति । चरणे तु प्रत्ययार्थे ऽण् च भवतीति । तत्र यदा ऋचाभा-

दीनां चरणत्वं न विवक्ष्यते तदा छे कृते मध्यमीया इति भवति । चरण-विवक्षायां त्वणि कृते माध्यमा इति भवति । उदक्षु भवा उदीच्याः । द्युप्राग-पागित्यादिना (४।२।१०१) यत् । उदीच्येषु मध्ये श्यामायनिश्चरकः । कठक-लापिनावप्युदीच्येषु चरकौ । तयोरुक्तं कठकलापिनोः । किमुक्तम् ? एकस्य तावदुक्तं कठचरकाल्लुगिति (४।३।१०७) । अपरस्याप्युक्तं कलापिनोऽणिति (४।३।१०८) । ननु च वैशम्पायनान्तेवासिनां कठेनैव चरक इत्येषाख्या । तत् कथं चरक इत्युच्यतेत्याह चरकवैशम्पायनस्येत्यादि । यद्यपि तेषां चरक इत्याख्यानं न भवति तद्गुरोस्तु वैशम्पायनस्य भवति । तत्सम्बन्धेन तच्छिष्या अपि तथोच्यन्ते ।

## १०५ । पुराणप्रोक्तेषु ब्राह्मणकल्पेषु ।

भाल्लविन इति । भाल्लव शाट्यायन ऐतरेय इत्येतेभ्यः प्रोक्तार्थे णिनिः । तदन्तात् तदधीत (४।२।५९) इत्युत्पन्नस्य प्रोक्ताल्लुक् (४।२।६४) । छन्दोब्राह्मणा-(४।२।६६) नीत्यादिना तद्विषयता । पैङ्गीति । आरुणपराजीति । पिङ्गारुण-पराजशब्दाभ्यां णिनिः । याज्ञवल्क्यानीति । आश्मरथ इति । याज्ञवल्क्याश्मर-थ्यशब्दाभ्यां गर्गादियञन्ताभ्यां कण्वादिभ्यो गोत्र (४।२।१११) इत्यण् । आपत्यस्येत्यादिना (६।४।१५१) यलोपः । ननु याज्ञवल्क्यादीन्यपि पुराण-प्रोक्तान्येव ब्राह्मणानि । ब्राह्मणान्तरैः पुराणप्रोक्तैस्तुल्यत्वादित्याह याज्ञवल्क्य इत्यादि । आख्यानेषु ह्येषा वार्त्ता । याज्ञवल्क्यादयोऽपरकालाः प्रवक्तारो ऽन्येभ्यः प्रवक्तृभ्यः । तथाच वस्तुत्वमनपेक्ष्य व्यवहरति सूत्रकार इत्यदोषः । तद्विषयता कस्मान्न भवति ? छन्दोब्राह्मणानीत्यादिनेति (४।२।६६) भावः । प्रतिपदमितरादि । लक्षणप्रतिपदोक्तपरिभाषया हि प्रतिपदं विशेषणम् । ब्राह्मणमुच्चार्य्य ब्राह्मणेषु यः प्रत्ययो विहितस्तस्य तद्विषयता विधीयते । तस्मात् तद्विषयतास्य न भवति । कल्पेषु तर्हि कस्मान्न भवति ? यथा काश्यपेन प्रोक्तं कल्पमधीयते काश्यपिन इत्यत्रेत्याह न चायमितरादि । छन्दोऽधिकारे ये योगास्तद्विहितस्य प्रत्ययस्य तद्विषयता भवति । न चायं योगश्छन्दोऽधिकारमनुवर्त्तते । तेनैतद्विहितस्य प्रत्ययस्याध्येतृवेदि-

त्वविषयता कल्पेषु न भवति। पैङ्गी कल्पः। आरुणपराजी कल्प इति। पुराण इति कोऽयं शब्दः? यावता सायंचिरमित्यादिना (४।३।२३) ट्युट्युलोः सन्नियोगेन तुटि कृते पुरातनमिति भवितव्यमितयत आह पुराण इति निपातनात् तुडभावः। यद्येवं न भवति पुरातनमितयाह न चेतयादि। ननु बाधकान्यपि निपातनानीतयतो भवितव्यमेव बाधकेनेति। अबाधकान्यपि। अबाधकान्यपि भवन्ति। एतच्च शदेरगतौ त इत्यत्र (७।३।४२) प्रतिपादितम्।

## १०६। शौनकादिभ्यश्छन्दसि।

छाणोरपवाद इति। ये वृद्धास्तेभ्यश्छस्यापवादः। शेषेभ्यस्त्वणः। शौनकिनः। वाजसनेयिन इति। शौनकेन प्रोक्तं वाजसनेयेन प्रोक्तमिति-णिनिः। तदन्तात् तदधीत (४।२।५९) इत्यण्। तस्य प्रोक्ताल्लुक् (४।२।६४)। पूर्ववत् तद्विषयता। केवलाद्वेत्यादि। तत् संहतार्थमित्यत्रायं हेतुः। यस्मात् केवलात् कठाल्लुकं वक्ष्यति तस्मात् कठशाठ इति यदत्र पठ्यते तत् संहतार्थम्।

## १०७। कठचरकाल्लुक्।

कठाश्चरका इति। प्रोक्तप्रत्ययस्य लुकि कृते यो ह्यध्येतर्यण् भवति तस्यापि प्रोक्ताल्लुक्। पूर्ववत् तद्विषयता।

## १०८। कलापिनोऽण्।

कालापा इति। पूर्ववत् प्रोक्तप्रत्ययान्तादध्येतर्युत्पन्नस्याणो लुक्। तद्विषयता च। अथेतयादि। ननु चासत्यण्ग्रहणे यथा प्राप्ते विधीयमाने णिनेरेवापवादः स्यात्। नैतदस्ति। एवं हि वचनमनर्थकं स्यात्। तस्माद् यो विहितो न च प्राप्नोत्यनेन बाधितत्वात् स एव भविष्यति। स चाणेव। एवमादीतयादिशब्देन मौदाः पैप्पलादाः शाकला जाजला इत्येतेषां ग्रहणम्। असति त्वण्ग्रहणे सर्वमेव न सिध्येत्। वृद्धाच्छ इति (४।२।११४) छेनाण औत्सर्गिकस्य बाधितत्वात्।

## १०९ । छगलिनो ढिनुक् ।

छागलेयिन इति । इहापि पूर्ववदेवाध्येतर्य्युत्पन्नस्याणो लुक् च तद्-विषयता च । एवमुत्तरयोर्योगयोर्वेदितव्यः ।

## ११० । पाराशर्य्यशिलालिभ्यां भिक्षुनटसूत्रयोः ।

यथासंख्यमित्यादि । पाराशर्य्याद् भिक्षुसूत्रे प्रत्ययः । शिलालिनो नटसूत्रे । तद्विषयता चात्रेष्यत इति । कथं पुनरिष्यमाणापि सा लभ्यत इत्याह तदर्थमित्यादि । ननु चानुवर्त्तमानच्छन्दोग्रहणेनैव तद्विषयता प्राप्नोति । न । भिक्षुनटसूत्रयोरच्छन्दस्त्वादित्याह गुणकल्पनया चेत्यादि । छन्दसस्तूपचार-निमित्तं यो धर्म्मः स इह गुणोऽभिप्रेतः । तद्धेतुका कल्पना । यथा छन्दो यदर्थमधीयते तथा सूत्रमपि तद्धेतुं सम्पादयति । भिक्षुनटयोरित्येवमादिकया गुणकल्पनया भिक्षुनटसूत्रयोश्छन्दस्त्वमौपचारिकम् । पाराशरिण इति । पाराशर्य्यशब्दो गर्गादिषु यञन्तः । आपत्यस्य च तद्धितेऽनातीति (६।४।१५१) यलोपः । शैलालिन इति । न स्तद्धित इति (६।४.१४४) टिलोपः । पाराशरमिति । कण्वादिभ्यो गोत्र (४।२।१११) इत्यण् । शैलालमित्यौ-त्सर्गिकोऽण् । नान्तस्य टिलोपे सब्रह्मचारिपीठेत्यादिना (६।४।१४४, वा) टिलोपः ।

## १११ । कर्मन्दकृशाश्वादिनिः ।

## ११२ । तेनैकदिक् ।

तेनेति । तुल्यार्थैरतुलोपमाभ्यामिति (२।३।७२) तृतीया । सौदामनीति । अन्निति (६।४।१६७) प्रकृतिभावाट् टिलोपाद्यभावः । ननु च तेनेति प्रकृतमेव । तत् किमर्थं पुनरिह तृतीया समर्थविभक्तिरुपादीयत इत्याह तेनेति प्रकृत इत्यादि । पूर्वत्र हि तेनेति च्छन्दोऽधिकारसम्बद्धम् । अतस्तदनुवृत्तौ तस्याप्यनु-वृत्तिः स्यात् । तस्माच्छन्दोऽधिकारनिवृत्तये पुनरिह तृतीया समर्थविभक्ति-रुपादीयते । किमर्थः पुनश्छन्दोऽधिकारः पूर्वत्र क्रियत इत्याह पूर्वसूत्र इत्यादि । पूर्वेषु योगेषु च्छन्दोऽधिकारात् तद्विषयता साध्यते । तस्मात् तत्र

च्छन्दोऽधिकारः कर्त्तव्यः। तस्मिंस्तु क्रियमाणे तन्निवृत्त्यर्थं इह च यत्न आस्थेयः। अन्यथेह च्छन्दस्येव प्रत्ययः स्यात्।

११३। तसिश्च।

११४। उरसो यच्च।

११५। उपज्ञाते।

अकालकमिति। कालपरिभाषारहितमित्यर्थः।

११६। कृते ग्रन्थे।

कः पुनः कृतोपज्ञातयोर्विशेषः? येनोपज्ञायत इति प्रकृते सति कृत-ग्रहणं क्रियत इत्याह उत्पादितमित्यादि।

११७। संज्ञायाम्।

११८। कुलालादिभ्यो वुञ्।

११९। क्षुद्राभ्रमरवटरपादपादञ्।

स्वरे विशेष इति। अणि हि प्रत्ययस्वरेणान्तोदात्तत्वं स्यात्। अञि तु सति ञित्स्वरेणाद्युदात्तत्वं भवति।

१२०। तस्येदम्।

तस्येति। यदि पुंलिङ्गेनायं निर्देशः पुंस्येव स्यात्। न द्विवचनबहु-वचनान्तात्। प्रत्यक्षवाचिनश्च न स्यात्। नापि विशेषवाचिनः। तच्छब्दस्य परोक्षवस्तुमात्रवाचित्वात्। प्रत्ययार्थोऽपीदमित्येकवचनेन नपुंसकलिङ्गेन निर्दिष्ट इत्येकस्मिन्नर्थे स्यात्। नपुंसक एव। नान्यत्र। परोक्षे न स्यात्। इदमः प्रत्यक्षवाचित्वादित्येतत् सर्वमाशङ्क्याह प्रकृतिप्रत्ययार्थयोरित्यादि। प्रकृतौ षष्ठ्यर्थमात्रं विवक्षितम्। प्रत्ययार्थेऽपि षष्ठ्यर्थसम्बन्धिमात्रं येन विना षष्ठ्यर्थो न सम्पद्यते। यदपरमित्यादिना मात्रशब्देन यद् व्यवच्छिन्नं तद्दर्शयति। आदिशब्देन सामान्याभिधायित्वं गृह्यते। अस्य तु सर्वत्र विवक्षाकारणं तस्यापत्यमित्य (४।१।९२) त्रैवोक्तम्। अथेह कस्मान्न भवति?

देवदत्तस्यानन्तरम् । देवदत्तस्य समीपमित्यादि । अनन्तरादिष्वित्यादि । अनभिधानादिति । प्रत्ययान्तेनानन्तरादीनामप्रत्यायनमित्यर्थः । संवहेस्तुरिति । वहेस्तन्तादित्यर्थः । सांवहित्रमिति । संपूर्वाद्वहेस्तुरिट् च । यणादेशः । सिद्ध एवात्राणिति । प्रागदीव्यतोऽणित्यनेन (४।१।८३) । यद्येवं किमर्थमुपसंख्यानमित्याह इडर्थमित्यादि । उपसंख्याने ह्यसतीडागमो न स्यात् । एकाच उपदेशेऽनुदात्तादितीट्प्रतिषेधात् (७।२।१०) । अग्नीध इत्यादि । अग्नीध इत्येतस्मात् शरणे गृहे वाच्ये रञ् वक्तव्यः । भसंज्ञा च वक्तव्या । भसंज्ञायाञ्च सत्यां पदसंज्ञाभावाज्जश्त्वं न भवति । समिधामित्यादि । आधीयन्ते येन मन्त्रविशेषेण समिध स्तस्मिन् समिधामाधानविशेषे समिच्छब्दात् षेण्यण् प्रत्ययो वक्तव्यो व्याख्येयः । व्याख्यानन्तु हविर्निवाससामिधेनीष्वित्येतन्निर्देशमाश्रित्य वक्तव्यम् । सामिधेनीति । षिद्गौरादिभ्यश्चेति (४।१।४१) ङीष् । हलस्तद्धितस्येति (६।४।१५०) यलोपः ।

## १२१ । रथाद् यत् ।

मान्यत्रेति । सन्नाहादौ ।

## १२२ । पत्रपूर्वादञ् ।

## १२३ । पत्राध्वर्युपरिषदश्च ।

पत्राद्वाह्य इत्यवधारणमत्र द्रष्टव्यम् । पत्राद् वाह्य एवेति । अन्यत्र कस्मान्न भवति ? अनभिधानात् । अथ किमर्थं न पूर्वेण सहैकयोग एव क्रियते ? पत्रपूर्वपत्राध्वर्युपरिषदोऽञिति ? नैवं शक्यम् । एवं हि पूर्वपत्रपूर्वात् प्रातिपदिकादन्यतोऽपि प्रसज्येत । योगविभागे पूर्वस्मिन् योगे रथादित्यनुवृत्ते रथ एव पत्रपूर्वग्रहणेन विशेष्यत इति न भवत्यतिप्रसङ्गः । एकयोगे तु रथाद्यनुवृत्तौ सत्यां यथा पत्रपूर्वतया रथो विशेष्यते तथा पत्रादिभिरपि रथ एव विशेष्यते इत्यनिष्टं स्यात् । तस्माद् योगविभाग एव न्याय्यः ।

## १२४ । हलसीराट् ठक् ।

## १२५। द्वन्द्वाद् वुन् वैरमैथुनिकयोः। (1)

बाभ्रवशालङ्कायनिकेति। वुन्नन्तः स्वभावादेव स्त्रियां वर्त्तत इति टाप्। प्रत्ययस्थादित्यादिनेत्त्वम् (७।३।४४)।

## १२६। गोत्रचरणाद् वुञ्।

वुनि प्रकृते वुञ्विधानं वृद्ध्यर्थम्। तच्चावृद्धा एव गोत्रचरणशब्दाः प्रयोजयन्ति। न वृद्धाः। तेषु हि वुञि वुनि वा सति न कश्चिद् विशेषः। ग्लौचुकायनक इति। प्राचामवृद्धात् फिन् बहुलमिति (४।१।१६०) फिन्। तदन्ताद्वुञ्। चरणादित्यादि। चरणाद्धर्माम्नाययोरेवेष्यते। नान्यत्र। अनभिधानादिति।

## १२७। सङ्घाङ्कलक्षणेष्वञ्यञिञामण्।

तेन वैषम्याद् यथासंख्यं न भवति। असति तु घोषग्रहणेऽञादय स्त्रयः सङ्घादयोऽपि त्रय इति समानाद् यथासंख्यं स्यात्। घोषे च प्रत्ययो न स्यात्। वैद इति। अनृष्यानन्तर्य्ये इत्यादिनाञ् (४।१।१०४)। तदन्तादण्। अङ्कलक्षणयोः को विशेष इति? नास्त्येव कश्चिद् विशेषः। पर्य्यायत्वादङ्कलक्षणयोरिति मन्यते। लक्षणमित्यादिना विशेषं दर्शयति। लक्षणं चिह्नं लक्ष्यस्यैव स्वम्। नान्यस्य। यथा विद्या विदानाम्। विदानामेव हि लक्षणानां सम्बन्धिनाम्। नान्यस्य कस्यचित्। अङ्कस्तु गवादिस्थो न गवादीनां स्वम्भवति। किं तर्हि? ततोऽन्येषाम्। गवादिस्वामिनाम्। अथ किमर्थं णित्करणं प्रत्ययस्य? यावताञन्ताद्यञन्ताः प्रकृतयो वृद्धा एवात आह णित्करणमित्यादि। वैदी विद्येत्यत्र ङीप् यथा स्यात्। इह च वैदीविद्य इत्यत्र वृद्धिनिमित्तस्य च तद्धितस्यारक्त विकार इति (६।३।३९) पुंवद्भावप्रतिषेधो यथा स्यात्। एवमर्थं णित्करणम्। न वृद्ध्यर्थम्।

## १२८। शाकलाद् वा।

वुञोऽपवाद इति। चरणलक्षणस्य शाकलशब्दस्य चरणलक्षणत्वात्। शाकला इति। शाकल्यशब्दाद् गर्गादियञन्तात् कण्वादिभ्यो गोत्र (४।२।१११)

(1) मैथुनिका विवाह इत्यर्थः।

इति प्रोक्तार्थेऽण्। आपत्यस्य च तद्धितेनातीति (६।४।१५१) यलोपः। शाकलं इति स्थिते तदधीते तद्वेदेत्यण् (४।२।५९)। तस्य प्रोक्तालुक् (४।२।६४) शाकलाः। तेषां सङ्घः शाकलः शाकलका इति वा।

## १२९। छन्दोगौक्थिकयाज्ञिकबह्वृचनटाञ्ञ्यः।

वुञणोरपवाद इति। छन्दोगादिभ्यश्चरणलक्षणस्य वुञोऽपवादः। नटादौत्सर्गिकस्याणः।

## १३०। न दण्डमाणवान्तेवासिषु।

दण्डप्रधाना माणवा दण्डमाणवा इति। मध्यपदलोपिसमासं दर्शयति। स पुनर्मयूरव्यंसकादित्वाद् वेदितव्यः। मयूरव्यंसकादेराकृतिगणत्वात्। वुञ्प्रत्ययो न भवतीति। एतेन वुञोऽयं प्रतिषेध इति दर्शयति। कथं पुनर्ज्ञायते वुञोऽयं प्रतिषेध इत्याह गोत्रग्रहणमित्यादि। इह हि गोत्रग्रहणमनुवर्त्तते। गोत्रचरणाद् वुञित्यतः (४।३।१२६)। तेनायमर्थो भवति। तस्येदमित्येतस्मिन्नर्थे (४।३।१२०) यः प्रत्ययो गोत्रात् प्राप्नोति स दण्डमाणवान्तेवासिषु न भवतीति गोत्रे वुञेव प्राप्नोतीति। अतस्तस्यैवायं प्रतिषेधो विधीयते। गौकक्ष्यशब्दाद् गर्गादियञन्तात् कण्वादिभ्यो गोत्र (४।२।१११) इत्यण्। पूर्ववद् यलोपः। दाक्षा इति। दाक्षिप्लाक्षिमाहकिभ्य इञश्चेत्यण् (४।२।११२)।

## १३१। रैवतिकादिभ्यश्छः।

पूर्वेणेति। गोत्रचरणाद् वुञित्यनेन (४।३।१२६)। रैवतिकीयमिति। रेवत्या अपत्यमिति रैवतिकः। ततश्छः। स्वापिशीयमिति। स्वापिशिशब्दादिञन्ताच्छः। अथच्छग्रहणं किमर्थम्? नानन्तरसूत्राद् विप्रतिषेधोऽनुवर्त्तिष्यते। तत्र रैवतिकादिभ्यो वुञि प्रतिषिद्धे वृद्धत्वादेवाच्छ एव भविष्यति। भवेत् सिद्धं यत्र छस्यापवादो नास्ति रैवतिकीय इति। ये त्वत्रेञन्ताः पठ्यन्ते स्वापिशि औदमेघि औदवापि इत्येवमादयस्तेभ्य इञश्चेत्यण् (४।२।११२) प्रसज्येत। तस्माच्छग्रहणं कर्त्तव्यम्। अथ क्षेमवृद्धिशब्दोऽत्र कस्मात् पठ्यते?

यावता गर्गादिरसौ। गर्गादित्वाच्छ एव भविष्यति। न सिध्यति। गर्गादिपाठस्यान्यस्तद्धितार्थोऽवकाशः। इदमर्थे तु परत्वाद् वुञेव स्यात्। तस्मादिदमर्थे तु स्यादिति युक्तस्तस्येह पाठः।

## १३२। कौपिञ्जलहास्तिपदादण्।

गोत्राधिकारादिति। गोत्रवुञोऽपवाद इत्यत्रायं हेतुः। अत्र हि गोत्रग्रहणेऽधिक्रियमाणे कौपिञ्जलहास्तिपदशब्दाभ्यां गोत्रवाचकाभ्यामण् विधीयते। स च नाप्राप्ते गोत्रवुञीति तेन तस्यैवापवादो विज्ञायते। कौपिञ्जल इति। कुपिञ्जलस्यापत्यमित्येतस्मादेव निपातनादण्। तदस्मात् कौपिञ्जलस्येदमिति पुनरण्। हास्तिपद इति। हस्तिन इव पादावस्येति हस्तिपादस्यापत्यमित्यस्मादेव निपातनादण्। पादस्य पद्भावः। हास्तिपदस्येदमिति पुनरनेनाण्। अथाण्ग्रहणं किमर्थम्। न यथाविहितमेवोच्येत। ननु चैवमुच्यमाने वृद्धाच्छः ( ४।२।११४) स्यात्। नैतदस्ति। यद्येताभ्याञ्छोऽभीष्टः स्याद् रैवतिकादिष्वेतौ पठेयाताम्। रैवतिकादिभ्यस्तु पृथगुपादानाद् विज्ञायते नैताभ्यां छो भवतीति। वुञ् तर्हि स्यात्। नैतदस्ति। आरम्भो ह्येवमनर्थकः स्यात्। गोत्रादित्येवं वुञः सिद्धत्वात्। नानर्थकः। यत्रासौ प्रतिषिध्यते तत्रारम्भस्य सार्थकत्वात्। क्व चासौ प्रतिषिध्यते ? न दण्डमाणवान्तेवासिषु (४।३।१३०)। तस्मादण्ग्रहणं कर्त्तव्यम्। णित्करणं कौपिञ्जली क्रियेति ङीब् यथा स्यात्। इह च कौपिञ्जली क्रियास्य कौपिञ्जलीक्रिय इति वृद्धिनिमित्तस्य च तद्धितस्यारक्तविकार इति (६।३।३९) पुंवद्भावप्रतिषेधो यथा स्यात्।

## १३३। आथर्वणिकस्येकलोपश्च।

चरणवुञोऽपवाद इति। आथर्वणिकस्य चरणवाचित्वात्। आथर्वण इति। अथर्वणा प्रोक्तमित्यण्। अनिति (६।४।१६७) प्रकृतिभावः। आथर्वण इति स्थिते ऽध्येतरि तदधीते तद्वेदेत्यनुवर्त्तमाने ( ४।२।५९ ) वसन्तादिभ्यष्ठक् (४।२।६३)। आथर्वणिकः। अतएव निपातनात् प्रोक्ताल्लुगिति (४।२।६४) लुग् न भवति। चरणाद्धर्माम्नाययोरिति। पूर्वोक्तमिष्टं स्मारयति।

## १३४ । तस्य विकारः ।

प्रकृतेरवस्थान्तरमिति । प्रकृतेः कारणस्यावस्थान्तरमन्यथात्वम् । अप्राणीति । प्राणिनः प्राणिरजतादिभ्योऽञ् (४।३।१५४) वक्ष्यति । आद्युदात्तमिति । अनुदात्तादेश्चेत्यञ् (४।३।१३८) वक्ष्यति । अवृद्धमिति । वृद्धान्मयट् वक्ष्यति नित्यं वृद्धशरादिभ्य इति (४।३।१४४) । यस्य च नान्यत् प्रतिपदं विधानमिति । गोपयसो र्यदित्येवमादि (४।३।१६०) । ननु चान्निति (६।४।१६७) प्रकृतिभावेन भवितव्यम् । तत् कथमाश्म इति भवतीत्याह अश्मनो विकार इति टिलोप इति । टिलोपार्थमश्मनो विकार इत्येतदुपसंख्यानं कृतम् । नित्स्वरेणाद्युदात्ता एत इति । अश्मादयः शब्दाः । तत्राश्मभस्मशब्दौ मनिन्प्रत्ययान्तत्वाद् नित्स्वरेणाद्युदात्तौ । मृत्तिकाशब्दोऽपि तिकन्प्रत्ययान्तत्वात् । मृदस्तिकन्निति (५।४।३९) । अथ तस्येति वचनं किमर्थम् ? यावता तस्यग्रहणं प्रकृतमेवेतयाह तस्य प्रकरणमितयादि । तद्धि प्रकृतं तस्येति वचनं शैषिकैर्घादिभिः सम्बद्धम् । अतस्तदनुवृत्तौ तेऽप्यनुवर्त्तेरन् । अस्मिंस्तु तस्य ग्रहणे क्रियमाणे पूर्वकं तस्येति वचनं निवर्त्तते । तस्मात् प्रकृतेऽपि तस्येति वचने शैषिकनिवृत्त्यर्थं पुनस्तस्येत्युच्यत इति । ननु च प्रधानं घादयः । विधीयमानत्वात् । तस्येति तु वचनमप्रधानम् । तदर्थत्वात् । तत्रायुक्ता गुणे निवर्त्तमाने प्रधानस्य निवृत्तिः । प्रधानवृत्तिर्हि गुणो भवति । न गुणार्थवृत्तिःप्रधानम् । नैष दोषः । तस्येति वचनसामर्थ्यात् प्रधानस्यापि गुणनिवृत्तौ निवृत्तिर्भवतीति । अन्यथा हि तस्येति वचनमनर्थकं स्यात् । अणादीनामपि तर्हि निवृत्तिः प्रसज्येत । यथैव हि प्रकृतं तस्येतिवचनं घादिभिः सम्बद्धं तथा ऽणादिभिरपि । नैष दोषः । उभयेषां हि निवृत्तौ हि निष्फलः सूत्रस्यारम्भः स्यात् । विधेयस्य कस्यचिदभावात् । तस्मान्न भवतुभयेषां निवृत्तिः । ननु चारम्भसामर्थ्यादुभयेषामन्यतरेषां निवृत्तिरितयतावद् विज्ञायते । तत् किं घादयो निवर्त्तन्ते ? उताणादयः ? सन्देह एव । सन्देहमात्रमेतत् । सर्वसन्देहेष्विदमुपतिष्ठते व्याख्यानतो विशेषप्रतिपत्तिर्न हि सन्देहादलक्षणमिति (प,१) । घादयो निवर्त्तन्त इतयवं व्याख्यास्यामः । स्वरितत्वादणादीनामनुवृत्ति-

भविष्यति। ननु चास्वरितत्वाद् घादीनामननुवृत्तिः। सैव तु तस्येति वचनेनाख्यायते। शैषिकनिवृत्त्यर्थम्। विकारावयवयोरित्यादिना विशेषं दर्शयति। केन पुनर्विकारावयवयोर्घादयः प्राप्नुवन्ति। तस्येदमित्यनेन। तस्येदंविशेषत्वात् तयोः। हालः सैर इति। यदि शैषिका अनुवर्त्तेरंस्ततो हलसीरशब्दाभ्यां हलसीराट् (४।३।१५४) ठगिति ठक् स्यात्। तन्निवृत्तौ त्वणेव भवति।

## १३५। अवयवे च प्राण्योषधिवृक्षेभ्यः।

मौर्वं काण्डमिति। मूर्वाशब्दादवयवे प्रत्ययः। मौर्वं भस्मेति। विकारे। इतउत्तरमित्यादिना वक्ष्यमाणानां प्रत्ययानां विषयविभागं दर्शयति। कथमिति? केन प्रकारेणायं विभागो लभ्यते। प्रत्यक्षमर्थं पृच्छति। इयमपीत्यादि। यतो हेतोरेष विषयविभागो लभ्यते तद्दर्शयति। तत्र फलपाकान्ता ओषधयः। पुष्पवन्तः फलवन्तश्च वृक्षाः। तद्विशेषा वनस्पतयः फलवन्त एव। तत्र वनस्पतिग्रहणेन वृक्षविशेषा स्ततोऽन्येन गृह्यन्ते। वृक्षग्रहणे तु वनस्पतेरपि ग्रहणं विज्ञेयम्। विकारावयवयोरित्यादि। युगपदधिकारे ह्यणादीन् वक्ष्यामीत्येवमर्थौ युगपदधिकारः। अणादीनामर्थनिर्देशार्थोऽपि कस्मान्न भवतीत्याह कृतनिर्देशौ हि ताविति। कृतनिर्देशौ हि तावर्थौ तस्येदमित्यनेनैव (४।३।१२०)। तस्येदंविशेषत्वात् तयोः।

## १३६। बिल्वादिभ्योऽण्।

अञ्मयटोरपवाद इति। यदत्रानुदात्तादि तस्मादनुदात्तादेश्चेति (४।३।१४०) प्राप्तस्याञोऽपवादः। यद्द्वं ततो नित्यं वृद्धशरादिभ्य (४।२।१४४) इति मयटः। तत्र बिल्वशब्दस्य प्रातिपदिकस्वरेणान्तोदात्तत्वे प्राप्ते बिल्वतिष्ययोर्वान्तस्वरितत्वमिति (फिट् १।२,) स्वरितत्वं भवति। उदात्तो वा। व्रीहिमुद्गशब्दौ घृतादित्वादन्तोदात्तौ। मसूरगोधूमशब्दौ लघावन्ते द्वयोश्च बह्वषो गुरुरिति (फिट्, २।४२) मध्योदात्तौ। एवं गवेधुकाशब्दोऽपि। इषेः क्सुरिक्षुः। प्रत्ययस्वरेणान्तोदात्तः। वेणुशब्दोऽपि विभाषा वेण्विन्धानयो-(६।१।२१५) रिति पक्षे ऽन्तोदात्त एव। कर्पासीपाटलीशब्दौ जातेरस्त्रीविषयादयोपधादिति

(४।१।६३) ङीषन्तौ । ङीष्प्रत्ययान्तत्वात् ङीष्प्रत्ययस्वरेणान्तोदात्तौ । कर्कन्धू-शब्दो ऽन्दूदृन्भूजम्बूकफेलूकर्कन्धूदिधिषूरिति ( उण्, १।९३ ) निपातनान्म-ध्योदात्तः । कुटीरशब्दो लघावन्त ( फिट्, २।४२) इत्यादिना मध्योदात्तः । सर्वं एते ऽनुदात्तं पदमेकवर्जमित्यनुदात्तादयः (६।१।१५८) । तेनाञ्बाधनार्थं ग्रहणमिति । अथाण्ग्रहणं किमर्थम् ? न विल्वादिभ्यो यथाविहितमेवोच्येत । नैवं शक्यम् । पाटलीशब्दो ह्यत्र वृद्धः पठ्यते । तस्मादञो बाधके मयटि प्राप्ते पुनर्वचनादञेव स्यात् । अण्ग्रहणात् त्वणेव भवति । तस्मादण्ग्रहणं क्रियते ।

## १३७ । कोपधाच्च ।

यथायोगमिति । प्राण्योषधिवृक्षेभ्यो विकारावयवयोः । अन्येभ्यस्तु विका-रमात्र इत्येषो यथायोगार्थः । अञोऽपवाद इति । ओरञ् ( ४।३।१३९ ) अनु-दात्तादेरित्येताभ्यां (४।३।१४०) प्राप्तस्य । तित्तिडीकमाण्डूकदर्दुरूकमधूकशब्दा लघावन्त इत्यादिना ( फिट्, २।४२) मध्योदात्ताः । तेनानुदात्तादयो भवन्ति ।

## १३८ । त्रपुजतुनोः षुक् ।

ओरञोऽपवाद इति । अनुदात्तत्वात् । अप्राण्यादीति । आदिशब्देनौष-धित्वमवृक्षत्वं च गृह्यते ।

## १३९ । ओरञ् ।

अनुदात्तादेरञ्यदिहोदाहरणमिति । अनुदात्तादेरुत्तरसूत्रेणैव सिद्धत्वात् । दैवदारवम् । भाद्रदारवमिति । देवदारुभद्रदारुशब्दौ पीतद्र्वर्थानामित्याद्यु-दात्तौ (फिट्, २।३७) । तस्यायमर्थः । पीतद्रुरर्थो (E) येषां ते पीतद्र्वर्थाः । तेषां पीतद्र्वर्थवचनानामादिरुदात्तो भवति ।

## १४० । अनुदात्तादेश्च ।

दाधित्थमित्यादि । दधि तिष्ठतीति । कपौ तिष्ठतीति । सुपि स्थ (३।२।४) इति कः । अतो लोप (६।४।४८) इत्यकारलोपः । पृषोदरादित्वात्

---

(E) पीतद्रुः सरलो देवदारुविशेष इति यावत् ।

सकारस्य तकारः। (६।४।४८) उपपदसमासः। समासस्वरेणान्तोदात्तौ। तेन दधित्थकपित्थशब्दावनुदात्तादी भवतः।

## १४१। पलाशादिभ्यो वा।

उभयत्र विभाषेयमिति। प्राप्ते चाप्राप्ते च। तामेवोभयत्र विभाषां स्पष्टीकर्त्तुमाह पलाशखदिरेत्यादि। पलाशशब्दो घृतादित्वादन्तोदात्तः। खदिरशब्दोऽपि चित्स्वरेण। इषिमदिमुदिखिदिच्छिदिभिदिमन्दिचन्दितिमिमिहिमुहिमुचिरुचिरुधिबन्धिशुषिभ्यः किरजित्यनुवर्त्तमाने (उण्, १।५१) ऽजिरशिशिरशिथिलस्थिरस्फिरस्थविरखदिरा इति (उण्, १।५३) किरच् प्रत्ययान्तो निपातितः। शिंशपाशब्दः पान्तानां गुर्वादीनामिति (फिट्,३।५५) मध्योदात्तः। तस्यायमर्थः पाशब्दान्तानां गुर्वादीनां द्वितीयमुदात्तं भवतीति। अथ द्वितीयं ( फिट्, ३।५० ) प्रागीषादित्यत्रानुवर्त्तते। स्यदि किञ्चिच्चलने। अस्मादनुदात्तादेश्च हलादे ( ३।२।१४९ ) रिति युच् स्यन्दनः। चित्स्वरेणान्तोदात्तः। कॄशॄगॄकटिपटिशटिभ्य ( उण्, ४।४७० ) ईरन्। करीरशब्दो नित्स्वरेणाद्युदात्तः। कॄतॄभ्यामीषन् (उण्, ४।४६६)। शॄपॄभ्यां किच्चेति (उण्, ४।४७६) शिरीषशब्दोऽपि नित्स्वरेणाद्युदात्तः। विकङ्कतपूलासयवासाश्च ग्रामादीनाञ्चेत्याद्युदात्ताः ( फिट्, २।३८)।

## १४२। शम्याष्ट्लञ्।

अञोऽपवाद इति। शमीशब्दस्य गौरादित्वात् ङीषन्तस्य प्रत्ययस्वरेणान्तोदात्तस्यानुदात्तादित्वात्। टकारो ङीबर्थः।

## १४३। मयड् वैतयोर्भाषायामभक्ष्याच्छादनयोः।

एतयोरिति। किमनेनेत्यादि चोद्यम्। ये विशेषप्रत्यया इत्यादि परिहारः। आदिशब्देनोष्ट्राद्वुञित्येवमादयो (४।३।१५७) गृह्यन्ते। यदि ह्येतयोरिति नोच्येत ततो य इत उत्तरे विशेषाः प्रत्यया अञादयस्तैः सह संप्रधारणायां परत्वात् त एव स्युः। एतयोरित्युच्यमाने तु विशेषप्रत्ययेष्वपि पक्षे भवन्ति। तेन कपोतमयमित्यादि सिद्धं भवति। अथ क्रियमाणयेतयोरित्येतस्मिन् कथमपवादविषये मयड् भवति ? एतयोरित्यस्य द्वितीयविधानार्थत्वात्

मयट् प्रत्ययो विकारावयवयोर्भवति । एकं विधानमितयोरिति । मयड् भवतीति द्वितीयम् । तत्र यद्येतद् द्वितीयं विधानं तदा प्रापणार्थम् । तेन यत्रापि विशेषप्रत्ययैर्बाधितो मयड् न प्राप्नोति तत्रापि भवति । अथवाग्रहणं किमर्थम् ? यावतोत्तरसूत्रे नित्यग्रहणादेवेह विभाषा विज्ञायते । नैतदस्ति । नित्यशब्दो ह्याभीक्ष्ण्येऽप्यस्ति नित्यप्रहसितो नित्यजल्पितमिति । प्रायेण च भवनमाभीक्ष्ण्यं भवतीति वृद्धशरादिलक्षण एव मयड् नित्यः स्यात् । अयं त्वनित्यः । इह तु वाग्रहणे सति नित्यग्रहणं तत्र नियमेनाव्यभिचारेण भवतीत्येषोऽर्थो विज्ञायते । तस्माद्वाग्रहणं कर्त्तव्यम् ।

## १४४ । नित्यं वृद्धशरादिभ्यः ।

प्राग्दीव्यतीयाणो ह्यपवादो मयड़ारभ्यते । अणं तु कोपधलक्षणम् अञमुवर्णान्तलक्षणमनुदात्तादिलक्षणञ्च परत्वाद् बाधते । आरम्भसामर्थ्यादेव नित्यं भविष्यतीति । यदि ह्यनित्यः स्यादस्य सूत्रस्यारम्भोऽनर्थकः स्यात् । पाक्षिकस्य मयटः पूर्वेणैव सिद्धत्वात् । तदनेन क्रियत इति यत् तदेकेषा-माचार्य्याणामिष्टम् । तदनेन नित्यग्रहणेन सफलं क्रियत इत्यर्थः । कथं योगविभागः क्रियते ? तद् यथा द्वारं द्वारमिति शब्दाधिक्यादर्थाधिक्यं भवतीति नित्यग्रहणेनायमर्थः सूच्यते । यद्येवं नित्यग्रहणादेव मृच्छब्दा-दपि नित्योऽयं मयट् सिद्ध स्तदपार्थकोऽस्य शरादिषु पाठः । नानर्थकः । नित्यग्रहणस्यैवोदाहरणप्रदर्शनार्थत्वात् ।

## १४५ । गोश्च पुरीषे ।

गव्यमिति । गोरिदमित्यर्थविवक्षायां सर्वत्र गोरजादिप्रसङ्गे यदिति यत् (४।१।८५,वा) । वान्तो यि प्रत्यय इत्यवादेशः (६।१।७९) । पुरीषं न विकारो नाप्यवयव इति । प्रकृतत्वाद् गोरिति गम्यते । तत्र विकारस्तावन्न भवति । प्रकृतेरवस्थान्तरं विकारः । न च गोरवस्थान्तरं पुरीषम् । गोधर्मान्वयादो-दनवत्सूपकारस्य समुदायस्यैकदेशो ह्यारम्भको ऽवयवो भवति यथा हस्तादि शरीरस्य । न चैवं गोः पुरीषम् । क्व तर्हीदं विधानमित्याह तस्येदं विषय इति । गवा भावितत्वात् पुरीषस्य तत् तस्याः कार्य्यमिति तस्येदमर्थो भवति ।

तस्मात् तत्रैवेदं मयटो विधानम् । विकारावयवयोस्तर्हि केन भवितव्यमित्यत आह विकारावयवयोस्त्वित्यादि ।

१४६ । **पिष्टाच्च ।**

अणोऽपवाद इति । पिष्टशब्दोऽयं निष्ठा च द्व्यजनादित्यादुदात्तः (६।१।२०५) । तेन तस्मादौत्सर्गिकः प्राप्नोति । ततस्तस्यायमपवादः ।

१४७ । **संज्ञायां कन् ।**

मयटोऽपवाद इति । पूर्वसूत्रेण प्राप्तस्य । ननु च संज्ञायां कनं वक्ष्यत्येव । तदपार्थकं तद्विधानम् । नैतदस्ति । स ह्यन्यादिष्वर्थेषु । अयन्तु विकारे । तदिदं सार्थकमर्थभेदात् ।

१४८ । **व्रीहेः पुरोडाशे ।**

१४९ । **असंज्ञायां तिलयवाभ्याम् ।**

तिलयवशब्दावाद्युदात्ताविति । तस्मादण् प्राप्नोति । अतस्तस्यायमपवादः । आद्युदात्तत्वं तु तयोस्तृणधान्यानां द्व्यषामित्यनेनैव ( फिट् २।२७) भवितव्यम् । अस्यायमर्थः । तृणधान्यानां द्व्यचामादिरुदात्तो भवतीति । यावक इति । विकारेऽण् । तदन्तात् तु यावादिभ्यः कन्निति कन् (५।४।२९) ।

१५० । **द्व्यचश्छन्दसि ।**

१५१ । **नोत्त्वद्वर्ध्रविल्वात् ।**

मौञ्जमिति । मुञ्जशब्दस्य पूर्वपदाद्युदात्तत्वेन तस्मादौत्सर्गिक एवाण् । गार्मुतमिति । मृग्रोरुतिर्गार्मुट्चेति (उण्, १।९४-९५ ) प्रत्ययस्वरेण गर्मुच्छब्दोऽन्तोदात्तः । तस्मादनुदात्तादेश्चेत्यञ् (४।३।१४०) । वार्ध्रीति वृधिवपिभ्यां रन् (उण्,२।१८५) । वर्ध्रशब्दो नित्स्वरेणाद्युदात्तः । तस्मात् प्राग्दीव्यतोऽण् (४।१।८३) । टिड्ढाणञिति (४।१।१५) ङीप् । वैल्वमिति । विल्वादिभ्योऽण् (४।३।१३६) । अथ मतुपा निर्देशः किमर्थः ? न नोद्वर्ध्रविल्वादित्येवोच्येतेत्यत आह मतुम् निर्देश इति । नोद्वर्ध्रविल्वादित्युच्यमान उदिति वर्ण-

ग्रहणं स्यात् । अत्र वर्णग्रहणे सर्वत्र तदन्तविधिं प्रयोजयतीति तस्मात् तन्निषेधाय मतुम् निर्देशः । कः पुनस्तदन्तविधौ सति दोषः स्यादित्यत आह इहैवेत्यादि । एवकारेण मुञ्जादिभ्यो न स्यादिति दर्शयति । वैणवीति । बिल्वादित्वादण् ।

## १५२ । तालादिभ्योऽण् ।

मयडादीनामपवाद इति । आदिशब्देनाञः । प्रकृतिभेदात् तयोर्बहुत्वस्य विवक्षितत्वाद् द्वयोरपि बहुवचनम् । तत्र तालश्यामाकशब्दाभ्यां वृद्धलक्षणस्य मयटोऽपवादः । बर्हिणो विकारो ऽवयवो वेति प्राणिरजतादिभ्योऽञित्यनेन ( ४।३।१५४ ) बार्हिणशब्दोऽपि विकारावयवप्रत्ययान्तः । तेन तस्मादञ् ञितश्च तत्प्रत्ययादिति (४।३।१५५) प्राप्तस्याञोऽपवादः । शेषेभ्यस्त्विन्द्रालिशादिभ्यो ऽनुदात्तादिलक्षणस्याञः । लिशिदृशिभ्यामिन्द्र उपपदे कप्रकरणे मूलविभुजादिभ्य उपसंख्यानमिति (३।२।५, वा) कप्रत्ययः । अन्येषामपि दृश्यत इति दीर्घत्वम् (६।३।१३७) । गतिकारकोपपदात् कृदिति ( ६।२।१३९ ) कृत्स्वरेणान्तोदात्ताविन्द्रालिशेन्द्रादृशशब्दौ । इन्द्रायुधशब्दः समासस्वरेणान्तोदात्तः । चप सान्त्वने । पचाद्यच् । चपशब्दोऽन्तोदात्तः । पीयूक्षाशब्दो लघावन्त इत्यादिना ( फिट्, २।४२ ) मध्योदात्तः । यद्यप्यस्य टापि कृते लघावन्त इति नास्ति प्राक् तु टापो विद्यत एव । तस्यामेवावस्थायां मध्योदात्तत्वं भवति । तालाद् धनुषीति पठ्यते । तालशब्दादण् प्रत्ययो भवति धनुष्यभिधेय इति । तालं धनुः । तालमयमन्यत् । अथाण्ग्रहणं किमर्थम् ? न यथाविहितमेवोच्येत । नैवं शक्यम् । बार्हिणशब्दाद् वृद्धिलक्षणो मयण् ञितश्च तत्प्रत्ययादित्यणा (४।३।१५५) बाधितः । तत्रारम्भसामर्थ्यान् मयडेव स्यात् । श्यामाकशब्दो लघावन्त इत्यादिना (फिट्, २।४२ ) मध्योदात्तः । तस्मादनुदात्तादेरञ् (४।२।४४) । परत्वाद् वृद्धलक्षणेन मयटा बाधित इति पुनरारम्भसामर्थ्यादञेव स्यात् । अण्ग्रहणादणेव भवति ।

## १५३ । जातरूपेभ्यः परिमाणे ।

बहुवचननिर्देशादित्यादि । यदि स्वरूपग्रहणमभीष्टं स्यात् तस्यैकत्वा-

देकवचनेनैव निर्देशं कुर्य्यादिति भावः। मयड़ादीनामिति। आदिशब्दे-नाञो ग्रहणम्। बहुवचनं तु पूर्ववत्। तत्र ये वृद्धा हाटकजातरूपप्रभृतय स्तेभ्यो मयटोऽपवादः। ये तु तपनीयप्रभृतयोऽनुदात्तादयस्तेभ्योऽञः। ताप-नीयमिति। तपनीयशब्दो लघावन्त (फिट्, २।४२) इत्यादिना मध्योदात्तः।

## १५४। प्राणिरजतादिभ्योऽञ्।

अणादीनामपवाद इति। आदिशब्देन मयट् परिगृह्यते। बहुवचनं तु पूर्ववत्। तत्र ये प्राणिशब्दा आद्युदात्तास्तेभ्योऽणपवाद इति। ये तु वृद्धास्तेभ्यो मयट् परिगृह्यते। रजतादिष्वपि यदाद्युदात्तं तस्मादणोऽपवादः। यत् पुनरनुदात्तादि तस्मान् मयटः। ततो ह्यनुदात्तादेश्चेत्यनेनैवाञि (४।३।१४) सिद्धे पुनर्वचनमञेव यथा स्याद्। मयड्वैतयोरित्यादिना ( ४।३।१४० ) मयड् मा भूदित्येवमर्थम्। तत्र रजतं घृतादिपाठादन्तोदात्तम्। सीस लोहेति नब्विषयस्यानिसन्तस्येत्याद्युदात्तम् ( फिट्, २।३६ )। अस्यायमर्थः। नपुंसकविषयस्य शब्दस्यानिसन्तस्यादिरुदात्तो भवतीति। नबिति नपुंसकस्य संज्ञा। अन्त्यात् पूर्वमित्यनुवर्त्तमाने शिशुमारोदुम्बरबलीवर्द्दोष्ट्रारपुरूरवसाञ्चे-त्युदुम्बरेऽन्त्यात् ( फिट्, ३।६४ ) पूर्वमच्चरमुदात्तम्। नीलदारुरोहितकवि-भीतक इत्येतेषां लघावन्त इत्यादिना ( फिट्, २।४२ ) मध्योदात्तत्वम्। पीतदारुशब्दमपि केचित् पठन्ति। स नब्विषयस्यानिसन्तस्येत्याद्युदात्तः ( फिट्, २।३६ )। तरते ड्रिरिति (उण्, ५।७४४) ड्रिप्रत्ययान्तत्वात् त्रिशब्दस्य प्रत्ययस्वरेणाद्युदात्तत्वम्। त्रयः कण्टका अस्येति बहुव्रीहिः। बहुव्रीहौ प्रकृत्या पूर्वपदमिति (६।२।१) त्रिकण्टकशब्द आद्युदात्तः। कण्वं करोतीति कर्मण्यण्। कण्वकारशब्दः कृत्स्वरेणान्तोदात्तः।

## १५५। ञितश्च तत्प्रत्ययात्।

मयटोऽपवाद इति। वृद्धलक्षणस्य सर्वस्य ञित्प्रत्ययान्तस्य वृद्धत्वात्। एते प्रतश्या गृह्यन्त इति। ननु चैकानुबन्धपरिभाषया ष्ट्लञो ग्रहणं न प्राप्नोति। नैष दोषः। ञितश्चेति हि चकारस्तत्समुच्चयार्थः। तेन तस्यापि ग्रहणं भविष्यति। ओरञो (४।३।१३९) ग्रहणेनानुदात्तादेश्च (४।३।१४०) पलाशादिभ्यो

(४।३।१४१) वेतेरतत्सूत्रविहितस्याञो ग्रहणं वेदितव्यम् । अभिन्नत्वात् । य एवमोरञित्यनेनाञ् विहितः (४।३।१३९) स एवास्मिन् सूत्रद्वयेऽनुवर्त्तते । दैवदारवस्य विकारो ऽवयवो वेत्यादिना यथायोगमेषां प्रत्ययानामुदाहरणादीनि दर्शयति । कांस्यम् । पारशवमिति । कंसाय हितमिति प्राक्क्रीताच्छः (५।१।१) कंसीयः । परशवे हितमित्युगवादित्वाद् (५।१।२) यत् । परशव्यस्य विकारो ऽवयवो वेति कंसीयपरशव्ययोर्यञञौ लुक् चेति (४।३।१६८) यथासंख्यं यञञौ भवतः । छयतोश्च लुक् । कांस्यम् । पारशवः । तयोर्विकारोऽवयवो वेत्यनेनाञ् । वैल्वमयमिति । विल्वशब्दो विल्वादिभ्यो (४।३।१३६) ऽणित्यत्रान्तः । ततो वृद्धलक्षणो मयडेव भवति । वैदमयमिति । अनुष्वेत्यादिनाञ् (४।१।१०४) । वैदः । भवत्ययमञ्प्रत्ययो ञित् । न तु विकारावयवलक्षणः । तेन मयडेव भवति ।

## १५६ । क्रीतवत् परिमाणात् ।

अणादीनामपवाद इति । आदिशब्देनाञादीनां ग्रहणम् । संख्यापि परिमाणग्रहणेन गृह्यत इति । कथं पुनरेतल्लभ्यते ? यावता परिमाणशब्दः प्रस्थादिषु रूढ़ः । न संख्यायाम् । नैष दोषः । यथैव हि प्रस्थादि परिच्छेदहेतुस्तथा संख्यापि । अत उपमानात् संख्यायामपि परिमाणशब्दो वर्त्तिष्यते परिमाणमिव परिमाणमिति । नन्वेवं मुख्ये सति गौणग्रहणमयुक्तम् । अयमत दोषः । इह हि तन्त्रेण द्वौ परिमाणशब्दावुच्चारितौ । तत्र द्वितीयं पदमुपात्तम् । तेन संख्यापि गृह्यते । नैष्किकमिति । प्राग्वतेष्ठञ् (५।१।१८) । शत्यः शतिक इति । शताच्च ठन्यतावशते (५।१।२१) । साहस्रमिति । शतमानविंशतिकसहस्रवसनादण् (५।१।२७) । अध्यर्धपूर्वेत्यादिना (५।१।२८) साहस्रार्थे वतौ सति यदिष्टं सम्पद्यते तद्दर्शयति । आदिशब्देन प्रकृत्यादिपरिग्रहः । द्विसहस्रमिति । द्वयोः सहस्रयोर्विकार इति तद्धितार्थे द्विगुः । प्राग्वतेः संख्यापूर्वपदात् तदन्तविधिरलुकीति (५।१।२०, वा) तदन्तविधेरभ्यनुज्ञानाद् यथा क्रीतार्थे शतमानविंशतिकसहस्रवसनादिति (५।१।२७) द्विसहस्रादण् भवति तथा विकारेऽपि । तस्य च क्रीतार्थे विभाषा कार्षापणसहस्राभ्यामिति (५।१।२९) पक्षे लुग् भवति ।

तथेहापि। द्विसाहस्रमिति। संख्यायाः संवत्सरपूर्वस्येत्युत्तरपदवृद्धिः (७।३।१५)। द्विनिष्क इति। यथा क्रीतार्थे निष्कशब्दात् प्राग्वतेष्ठञ् (५।१।१८) भवति तस्य द्वित्रिपूर्वान्निष्कादिति (५।१।३०) पक्षे लुक् तथेहापि द्विनैष्किकमिति। परिमाणान्तस्या-(७।३।१७) संज्ञाशाणयोरित्युत्तरपदवृद्धिर्भवति।

१५७। उष्ट्राद् वुञ्।

१५८। उमोर्णयोर्वा।

उमाशब्दस्तृणधान्यमित्यादिनाद्युदात्तः ( फिट्, २।२७)। ऊर्णाशब्दोऽपि प्रातिपदिकस्वरेणान्तोदात्तः। ताभ्यां यथासंख्यमणञोः प्राप्तयोर्विभाषा वुञारभ्यते।

१५९। एण्या ढञ्।

पुंसस्त्वञेव भवतीति। यदिह पुंसो ढञ् स्यात् पुंलिङ्गेनैव निर्देशं कुर्य्यादिति। पुंलिङ्गेन हि निर्देशे प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणं भवतीत्येणीशब्दादपि प्रत्ययो लभ्यत एव। तस्मात् स्त्रीलिङ्गनिर्देशादेव पुंसोऽञ् भवति। न ढञ्।

१६०। गोपयसो र्यत्।

मयड्विषये तु विधीयत इति। अजादिप्रसङ्ग इति (४।१।८५, वा) वचनात्। मयटोऽनजादित्वात् तद्विषये न प्राप्नोतीत्यत स्तत्र गोशब्दाद् विधीयते। पयःशब्दस्तु पिबतेरित्यसुन्प्रत्ययान्तो नित्स्वरेणाद्युदात्तः। तस्मात् प्राग्दीव्यतोऽणित्यण् (४।१।८३) प्राप्नोति। अतस्तदपवादोऽयं यद्विधीयते।

१६१। द्रोश्च।

१६२। माने वयः।

१६३। फले लुक्।

तद्विषय इति। विकारावयवविषये। आमलकमिति। नित्यं वृद्धशरादिभ्य इति (४।३।४४) मयट्। तस्य लुक्। स्त्रीप्रत्ययस्य लुक् पूर्ववत्। ननु

च फलं वृक्षस्य न विकारो नाप्यवयवः । विकारो द्विधा भवति । यो वा प्रकृतिं निगृह्णाति खादिरं भस्मेति । यो वा प्रकृतिव्यपदेशं करोति खादिरो यूप इति । नच फलं वृक्षमपगृह्णाति । नापि फलेन युक्तस्य व्यपदेशान्तरं भवतीत्यत आह फलितस्येत्यादि । यथा पल्लवो न वृक्षमपगृह्णाति नापि तस्य व्यपदेशान्तरं जनयत्यथच तस्य विकारस्तथा फलमपि । स्यादेतत् । पल्लवितावस्थां वृक्षस्यापगृह्णन् पल्लव उपजायते । अतो युक्ता तस्य तद्विकारावयवतेति । फलमपि तस्य फलितावस्थां वृक्षस्यापगृह्णन् फलमुपजायते । तस्यापि युक्त एव तद्विकारभावः । यदप्युक्तं नावयवोऽनारम्भकत्वादिति तदप्ययुक्तम् । फलं ह्युपजायमानं शाखाद्यवयवसहायमन्यमेव विशिष्टं वृक्षावयवमारभते । तद् यथा पल्लवो विशिष्टं समुदायान्तरमारभमाणोऽवयवो भवति तथा फलमपीति वेदितव्यम् ।

## १६४ । प्लक्षादिभ्योऽण् ।

अञोऽपवाद इति । तत्रेक्षुककर्कन्धूशब्दाभ्यामुवर्णान्तलक्षणस्याञोऽपवादः । शेषेभ्यस्त्वनुदात्तादिलक्षणस्य । सर्वे हि तेऽन्तोदात्तत्वादनुदात्तादयः । तत्र प्लक्षन्यग्रोधाश्वत्थशब्दाः प्रातिपदिकस्वरेणान्तोदात्ताः । इङ्गुदीबृहतीशब्दौ तु गौरादिङीषन्तत्वात् प्रत्ययस्वरेणान्तोदात्तौ । विधानसामर्थ्यादित्यादि । यद्यणो लुक् स्याद् वचनमनर्थकं स्यात् । नह्यणो वाञो वा लुकि कृते कश्चिद् विशेषोऽस्ति । नैयग्रोधमिति । न्यग्रोधस्य च केवलस्येत्यैजागमः (७।३।५) ।

## १६५ । जम्ब्वा वा ।

अञस्तु भवत्येवेति । तस्य हि लुकि सति विधानमनर्थकं भवति । अश्रूयमाणत्वात् । जम्बूनीति । लुकि कृतेऽभिधेयलिङ्गं नपुंसकं भवति । ह्रस्वो नपुंसके प्रातिपदिकस्येति (१।२।४७) जश्शसोः शि (७।१।२०) । नुम् । नोपधाया इति (६।४।७) दीर्घः ।

## १६६ । लुप् च ।

कः पुनर्लुपि सति विशेषो यतो लुकि प्रकृते स विधीयत इत्याह युक्तवद्भावो विशेष इति । लुपि सति युक्तवद्भावो भवति लुपि युक्तवद्व्यक्तिवचने

(१।२।५१) इति। लुपि सत्येव विशेष इति। जम्बूः फलमिति। अत्र युक्तवद्भावेन प्रकृतिगतमेव लिङ्गं भवति। तेन नपुंसकलिङ्गं न प्रवर्त्तते। लुप्प्रकरण इत्यादि। फलपाकेन शुष्यन्तीति फलपाकशुषः। अन्येभ्योऽपि दृश्यत (३।२।३२०) इति क्विप्। व्रीहयो मुद्गा इति। बिल्वादिभ्योऽ णो (४।३।१३६) लुप्। यवा माषा इति। अत औत्सर्गिकस्याणः। एते तृणधान्यानामित्यादिनाद्युदात्ताः (फिट्, २।२७)। पुष्पमूलेषु बहुलमिति। पुष्पमूलेषु चाभिधेयेषु बहुलं लुब् भवति। मल्लिका। नवमल्लिका। जातिः। विदारी। अंशुमती। बृहती। अत्रानुदात्तादिलक्षणस्याञो लुप्। मल्लिकानवमल्लिकाशब्दौ लघावन्ते द्वयोश्च बह्वषो गुरुरिति (फिट्, २।४२) मध्योदात्तौ। जातिशब्दश्च क्तिच्क्तौ च संज्ञायामिति (३।३।१७४) क्तिच्प्रत्ययान्तत्वादन्तोदात्तः। वदरीबृहतीशब्दावपि गौरादिङीषन्तत्वादन्तोदात्तावेव। अंशुमतीशब्द उगितश्चेति-(४।१।६) ङीबन्तः। अंशुशब्दस्य प्रातिपदिकस्वरेणान्तोदात्तत्वान् मध्योदात्तः। पाटलानीति। बिल्वादित्वादण्। शाल्वानि मूलानीति। शाल्वानीत्यनुदात्तादिलक्षणोऽञ्। शाल्वशब्दः प्रातिपदिकस्वरेणान्तोदात्तः। शाल्व इति शाक इति यस्य प्रसिद्धिः। क्वचिदन्यदपीति। लुपोऽन्यत्रापि क्वचित् कार्य्यं भवति। तत् पुनर्लुक्। लुक्लुपोरभावश्च। कदम्बमित्यादावनुदात्तलक्षणस्याञो लुक्। कदम्बादयः शब्दा लघावन्त इत्यादिना (फिट्,२।४२) मध्योदात्ताः। वैल्वानीति। अत्रोभयाभावः। बिल्वादिभ्योऽण् (४।३।१३६)। एतत् तु सर्वं हरीतक्यादिपाठादेव सिद्धमिति नापूर्वं वक्तव्यम्। यतो हरीतक्यादिषु येषाञ्च फलपाकनिमित्तः शोषः पुष्पमूलेषु बहुलमिति पठ्यन्ते।

## १६७। हरीतक्यादिभ्यश्च।

हरीतक्यादिषु कण्टकारिका गर्गारिका शेफालिका इत्येते संज्ञायां कनिति (५।३।७५) कन्नन्तत्वान् नित्स्वरेणाद्युदात्ताः। तेनैव तेभ्य औत्सर्गिकस्याणो लुप्। शेषेभ्यस्त्वनुदात्तादिलक्षणस्याञः। सर्वे हि तेऽन्तोदात्तत्वादनुदात्तादयः। तत्र काला द्राक्षा ध्राक्षा इत्येतेभ्यः प्राक् ये पठ्यन्ते ते ङीषन्तत्वादन्तोदात्ताः। तत्र श्वेतपाकी अर्जुनपाकी इत्येतौ पाककर्णपर्णेत्यादिना

( ४।१।६४ ) ङीषन्तौ । शेषेभ्यस्तु गौरादित्वाद् गौरादिभ्यश्चेति (४।१।४१) । कालद्राक्षधाक्षशब्देभ्यः प्रातिपदिकस्वरेणान्तोदात्तेभ्यष्टाप् । सवर्णदीर्घत्वम् । एकादेश उदात्तेनोदात्त (८।२।५) इत्युदात्तत्वम् । अतः कालादयोऽप्यन्तोदात्ताः ।

## १६८ । कंसीयपरशव्ययोर्यञञौ लुक् च ।

कंसीय इति । उणादौ कंसशब्दः सप्रत्ययान्तो व्युत्पादितः । परशुशब्दोऽपि पृभिदिव्यधिगृधिधृषिभ्यः कुरित्यनुवर्त्तमान (उण्,१।२३) आङ्परयोः खनिशृभ्यां डिच्चेति (उण्,१।३३) कुप्रत्ययान्तः । तदनयोरपि धातुप्रत्यययोर्लुक् कस्मान्न भवतीत्याह प्रातिपदिकाधिकारादित्यादि । प्रातिपदिकादिति वर्त्तते । तेन प्रातिपदिकेभ्यो यो विहितस्तस्य लुग् भवति । न चेमौ प्रातिपदिकाद् विहितौ । किं तर्हि ? धातोः । अतो ऽनयो र्लुग् न प्रवर्त्तते । अनुदात्तत्वादेवेति । परशव्यशब्दो हि तित्स्वरितमित्यन्तस्वरितः (६।१।१८५) । तेनानुदात्तादिरिति । इतीति तत्र वर्त्तत इति । यस्येति चेत्यतः (६।४।१४८) ।

इति बोधिसत्त्वदेशीयाचार्य्यश्रीजिनेन्द्रबुद्धिपादविरचितायां
काशिकाविवरणपञ्जिकायां चतुर्थस्याध्यायस्य
तृतीयः पादः समाप्तः ॥ ४।३ ॥

अथ

# काशिकाविवरणपञ्जिका।

## चतुर्थोऽध्यायः।

## चतुर्थः पादः।

———:०:———

१। प्राग्वहतेष्ठक्।

अथ प्राग्ग्रहणं किमर्थम्? अर्थविशेषे प्रत्ययान्तरेणापवादेन निवर्त्तितस्य ठक उत्तरस्मिन् ग्रन्थान्तरे पुनरुपस्थानं यथा स्यादित्येवमर्थम्। तद्यथा संस्कृतमित्येतस्मिन्नर्थविशेषे (४।४।३) कुलत्थकोपधादित्यणा (४।४।४) निवर्त्तितस्योत्तरत्रार्थान्तरे तरतीत्येतस्मिन्नर्थे (४।४।५) पुनरुपस्थानं यथा स्यादिति। ठक्प्रकरण इत्यादि। तदिति कर्माभिधायिभ्य आर्हत्येतस्मिन्नर्थे माशब्दादिभ्यष्ठक उपसंख्यानम्। वाक्यादेतत् प्रत्ययविधानमिति। स एव हि वाक्यार्थ इति नावसृष्टः कर्मभावमुपगतः। तदार्हेति निर्दिश्यते। तदभिधायिन एव वाक्यात् प्रत्यय इति। पदसमुदायो हि वाक्यमिति। मेत्येतस्य च शब्द इत्येतस्य च पदस्य यः समुदायस्तद् वाक्यम्। एवमन्यत्रापि वेदितव्यम्। कथं पुनः प्रातिपदिकाधिकारे वाक्यात् प्रत्ययविधिरित्यत आह प्रभूतादिभ्य इति। पुनर्वचनात्। यदि ह्यनेनापि प्रातिपदिकादेव प्रत्ययविधिः स्यादेवं सत्यार्हेति प्रभूतादिभ्य इति पुनरुपसंख्यानमनर्थकं स्यात्। अनेनैव सिद्धत्वात्। प्रभूतादयोऽपि हि माशब्दादयो भविष्यन्ति। ते च कर्माभिधायिन एव प्रत्ययमुत्पादयन्ति। क्रियाविशेषणाभिधायित्वात्। क्रियाविशेषणानां हि कर्मत्वं तत्प्रत्यनुपूर्वमीपलोमकूल (४।४।२८) मित्यत्र प्रतिपादयिष्यते। प्रत्ययार्थोऽप्यार्हेति। स एव तस्मादार्हेति प्रभूतादिभ्य इति पुनर्वचनाद् वाक्या-

देव प्रत्ययविधानं विज्ञायते । क्रियाविशेषणादिति । प्रभूतादिशब्दः क्रियाविशेषणाभिधायित्वादभिधानेऽभिधेयोपचारं कृत्वा क्रियाविशेषणशब्देनोक्तः ।

## २ । तेन दीव्यति खनति जयति जितम् ।

तेनेति प्रत्येकमभिसम्बध्यते । सर्वत्र करणे तृतीयेति । दीव्यतीत्यादौ कर्त्तरि लकार इति । तेनैव कर्त्तुरभिहितत्वात् कर्त्तरि तृतीया नोपपद्यते । तस्मात् करण एव तृतीया । अथ हेतौ तृतीया कस्मान्न भवति ? अनभिधानात् । जितमित्यत्र कर्मणि निष्ठाविधानाद् यद्यपि कर्त्तर्य्यपि तृतीया सम्भवति तथापि दीव्यतीत्यादिभिः साहचर्य्यात् करण एव तृतीया विज्ञायते । देवदत्तेन जितमित्यत्र कर्त्तरि तृतीया । तेन वाक्यमेव भवति । न प्रत्ययः । इह सूत्रे दीव्यतीत्यादिनैकवचनान्तेनैकसंख्यस्य प्रत्ययार्थस्य वर्त्तमानेन च कालेन निर्द्देशः । ततश्चैकस्मिन्नेव प्रत्ययार्थे प्रत्ययः स्यात् । न द्विबह्वोः । तथा वर्त्तमान एव काले । न भूतभविष्यतोरिति यश्चोदयेत् तं प्रत्याह प्रत्ययार्थे संख्याकालयोरविवक्षेति । अविवक्षा तु तयोर्नान्तरीयकत्वात् । अवश्यं हि यया कयाचित् संख्यया येन केनचित् कालेन निर्देशः कर्त्तव्य इति । न तौ प्रधानम् । न च तयोर्विवक्षेति । यदि तर्हि संख्याकालयोरविवक्षेति साधनस्याप्यविवक्षा प्राप्नोति । एकप्रकरणत्वात् । नैष दोषः । यस्य हि विवक्षामन्तरेण द्वितीयस्य पदस्योच्चारणमनर्थकं भवति तन्नियोगतो विवक्षितव्यम् । दीव्यतीत्यादिष्वन्वर्थमात्रे विवक्ष्यमाणे द्वितीयस्य पदस्योच्चारणमनर्थकमापद्येतेति न युक्ता साधनस्याप्यविवक्षा । इह दिव्यतीत्येवमादौ क्रियाप्रधानमाख्यातमिति क्रियैव पदेन प्राधान्येनाख्यायते । कर्त्ता तु गुणीभूतः । तद्धितस्त्वाक्षिक इति प्राधान्येन कर्त्तारमेवात्र वक्ति । क्रियां तु गुणभावेन । एतच्चायुक्तम् । आख्यातेषूत्पन्नैः प्रत्ययैर्यथासौ तिङन्तेनाभिधीयते तथैव प्रत्ययान्तेनापि युक्तोऽभिधातुमिति यश्चोदयेत् तं प्रत्याह क्रियाप्रधानत्वेऽपि चेत्यादि । अभिधानस्वभावश्चायं येन क्रियाप्राधान्यस्याप्यनुविधीयमानस्तद्धितः कर्तृप्रधानो भवति । तस्मात् कर्त्तृस्वभावोऽत्रापेक्षितव्यः । नहि स्वभावोऽपि पर्य्यनुयोगमर्हतीति ।

## ३। संस्कृतम्।

योगविभाग उत्तरार्थः। कुलत्थकोपधादणित्ययमपवादः (४।४।४) संस्कृत एव यथा स्याद् दीव्यतीत्यादौ (४।४।२) मा भूदित्येवमर्थो योगविभागः।

## ४। कुलत्थकोपधादण्।

## ५। तरति।

## ६। गोपुच्छाट् ठञ्।

स्वरे विशेष इति। ठकि हि सति तद्धितस्य कित (६।१।१६५) इत्यन्तोदात्तत्वं स्यात्। ठञि सति ञित्स्वरेणाद्युदात्तत्वं भवति।

## ७। नौद्व्यचष्ठन्।

इह प्रकरणे केषुचित् सांहितिकः षकारो दृष्टः। केषुचित् प्रत्ययस्यैवानुबन्धः। तदिह ठगधिकारे न ज्ञायते कः सांहितिकः कः प्रत्ययानुबन्ध इति। अतोऽसन्देहार्थं परिगणनं कृतम्। तत्राकर्षात् पर्पादिभ्य इत्यादिना श्लोकेन करोति। आकर्षात् ष्ठल् (४।४।६)। पर्पादिभ्यष्ठन् (४।४।१०)। भस्त्रादिभ्यष्ठन् (४।४।१६)। कुसीददशैकादशात् ष्ठन्ष्ठचौ ( ४।४।३१ )। आवसथात् ष्ठल् (४।४।७४)। किशरादिभ्यः ष्ठन्निति (४।४।५०) षितः षडेते। ननु चान्यतो (४।१।४०) ङीषित्यादयोऽन्येभ्योऽपि षितः सन्त्येव। तत् किमुच्यते षडेत इत्यत आह ठगधिकार इत्यादि। ठकः प्रकृतत्वात् तदधिकारे यो षितः तएव परिगृह्यन्त इति दर्शयति। नन्वेवमपि सति सप्त भवन्ति। कुसीदादिसूत्रे (४।४।३१) षित्प्रत्ययद्वयविधानादित्यत्राह विधिवाक्यापेक्षं तु षट्त्वमिति। षितः (४।४।३१) प्रत्ययानां सप्तत्वात्। एतेनैव योगाः षितः प्रत्युक्ताः। षित्प्रत्ययार्थाः षडेते योगा इत्यर्थः।

## ८। चरति।

## ९। आकर्षात् ष्ठल्।

लकारः स्वरार्थ इति। लिति प्रत्ययात् पूर्वस्योदात्तत्वं यथा स्यात्।

षकारो ङीषर्थ इति । षिद्गौरादिभ्य (४।१।४१) इति ङीष् यथा स्यात् । आकर्षिकीति । स्वर्णपरीक्षार्थो निकषोपल उच्यत इति । आकृष्यते स्वर्णमिति कृत्वा ।

## १० । पर्पादिभ्यः ष्ठन् ।

पर्पादिषु पादः पच्चेति पठ्यते । तस्यायमर्थः । पादशब्दात् ष्ठन् प्रत्ययो भवति तत्सन्नियोगेन च पदित्ययमादेशः । पदिकः । पदिकी । यद्येवं पद्यत्यतदर्थ इति (६।३।५३) पद्भाव इके चरतावुपसंख्यानमिति (६।३।५३, वा) कस्मादुपसंख्यायते ? नैष दोषः । पादः (६।४।१३०) पदित्यस्यापौराणिकत्वात् ।

## ११ । श्वगणाट् ठञ्च ।

श्वागणिक इति । शुनां गणः श्वगणः । ननु च श्वन्शब्दो द्वारादिषु पठ्यत इति द्वारादीनाञ्चेति (७।३।४) वृद्धिप्रतिषेधेनैजागमेन भवितव्यम् । तत्र तदादिविधेरिष्टत्वात् । तत् कथं श्वागणिक इति भवतीत्याह श्वादेरिञीत्यादि । द्वारादिकार्य्ये च प्रतिषिद्धे सत्यादिवृद्धिरेव भवति ।

## १२ । वेतनादिभ्यो जीवति ।

## १३ । वस्नक्रयविक्रयाट् ठन् ।

क्रयविक्रयग्रहणं संघातविगृहीतार्थमिति । इह तन्त्रेण क्रयविक्रयशब्दावुच्चारितौ । तत्रैकस्य संघातार्थं ग्रहणम् । अपरस्य तु विगृहीतार्थं वेदितव्यम् ।

## १४ । आयुधाच्छ च ।

## १५ । हरत्युत्सङ्गादिभ्यः ।

## १६ । भस्त्रादिभ्यः ष्ठन् ।

भस्त्रादिषु शीर्षभार इति पठ्यते । तत्रास्मादेव निपातनाच्छिरसः शीर्षभावः । सप्तमीति (२।१।४०) योगविभागात् समासः । तत्पुरुषे कृति बहुलमिति (६।३।१४) पक्षे सप्तम्या अलुक् ।

## १७ । विभाषा विवधवीवधात् ।

पर्य्याहार इति । परितः स ह्रियत इति पर्य्याहारः । मण्डलादिक-मुच्यते ।

## १८ । अण् कुटिलिकायाः ।

## १९ । निर्वृत्तेऽक्षद्यूतादिभ्यः ।

## २० । त्रेर्मम् नित्यम् ।

ड्वितः क्त्रिरित्ययं (३।३।८८) त्रिशब्दो गृह्यत इति । संख्याशब्दः कस्मान्न गृह्यते ? अनभिधानात् । नहि त्रिरित्युक्ते विवक्षितार्थस्य प्रतीतिर्भवति । उप्त्रिममिति । वचिस्वपियजादीनां किताति ( ६।१।१५ ) संप्रसारणम् । नित्यग्रहणं स्वातन्त्र्यनिवृत्त्यर्थमिति । केवलस्य त्रिप्रत्ययान्तस्य मप्प्रत्ययरहितस्य प्रयोगः स्वातन्त्र्यम् । तन्निवृत्त्यर्थं नित्यग्रहणम् । स्वातन्त्र्यनिवृत्त्यर्थे नित्यग्रहणे सति योऽर्थः सम्पद्यते तं त्वन्त इत्यादिना दर्शयति । विषयान्तर इत्यादिना यदेवकारस्य व्यवच्छेद्यं तदाचष्टे । मप्प्रत्ययविषयार्थादन्यविषये यत्र प्रत्ययो न भवति तद्विषयान्तरम् । नित्यग्रहणं तन्निवृत्तिर्यथा स्यादित्येवमर्थं वेदितव्यम् ।

## २१ । अपमित्ययाचिताभ्यां कक्कनौ ।

अपमित्येति । उदीचां माङो व्यतीहार ( ३।४।१९ ) इति क्त्वा । तस्य ल्यबादेशे कृते ऽपमितेऽति भवति । तस्य च क्त्वातोसुन्कसुन ( १।१।४० ) इत्यव्ययसंज्ञा । तेन तृतीयासमर्थविभक्त्यधिकारेऽप्यविभक्तिकादेवास्मात् प्रत्यय-विधिः ।

## २२ । संसृष्टे ।

ननु च संस्कृत (४।४।३) इत्येव संसृष्टे प्रत्ययो भविष्यति । यत् पुनर्येन संसृष्टं तत्तेन संस्कृतं भवति । नैतत् । सतो ह्युत्कर्षाधानं संस्कारः । एकीभावः संसर्गः । न च तत्रोत्कर्षेण भवितव्यम् । स्वशुचिद्रव्यसंसर्गे स्वप्रकर्ष एव भवति । नोत्कर्षः । संसर्गमात्रे प्रत्यय इष्यते । तस्मात् संसृष्ट

इति वक्तव्यमेतत् । एतदेव क्रियताम् । किं संस्कृतमित्यनेन (४।४।३) ? असत्यपि संसर्गे यत्र संस्कृतमस्ति तत्रापि प्रत्यय इष्यते । वैद्यिकः । न विद्यया संसर्ग उपपद्यते । संसर्गो द्रव्ययोरेव भवति यथा दण्डपुरुषयोः । मूर्त्तिमतस्तद्धर्मत्वात् । न तु विद्या मूर्त्तिमती । कुलत्थकोपधादण् (४।४।४) विधानार्थं संस्कृतग्रहणं कर्त्तव्यम् । नहि संसृष्टमात्रे प्रत्यय इष्यते । किन्तु तत्कृतगुणाधाने ।

## २३ । चूर्णादिनिः ।

ननु च चूर्णेन ये संसृष्टास्तेषां चूर्णमस्ति । तत्र मत्वर्थीयेनैवेनिना सिद्ध-मिति तदपार्थकमिदम् । नैतत् । अस्तिविवक्षायां मत्वर्थीयेन सिद्धं स्यात् । संसृष्टविवक्षायां पुनर्न सिध्यति । तत्र हि ठक् स्यात् । ठको बाधनार्थत्वे कुतोऽस्यानर्थक्यम् ?

## २४ । लवणाल्लुक् ।

द्रव्यवाचीत्यादि । लवणशब्दोऽयमस्त्येव गुणवचनो यो रसविशेषे वर्त्तते । रसस्य गुणत्वात् । अस्ति द्रव्यवचनो यथा पञ्च लवणानीति । तत्र यो गुणवचनः स लुकं न प्रयोजयति । गुणैर्हि यद्यपि द्रव्यं न संसृज्यते तथापि गुणशब्दाः सोऽयमित्यभेदेन सम्बन्धाद् द्रव्ये वर्त्तन्ते यथा शुक्लः पटः । मधुरं क्षारम् । अम्लं दधीति । तथा लवणशब्दोऽपि वर्त्तिष्यते । ततः किं लुका ? अवश्यं तदेवं विज्ञेयम् । अन्यथा हि मधुरादिभ्योऽपि लुग् वक्तव्यः स्यात् । द्रव्यशब्दास्त्वन्यत्र सोऽयमित्यभेदसमर्थनान्न वर्त्तन्ते । तस्माद् द्रव्यवाची लवणशब्दो लुकं प्रयोजयति ।

## २५ । मुद्गादण् ।

## २६ । व्यञ्जनैरुपसिक्ते ।

व्यञ्जनैरिति । बहुवचननिर्देशः स्वरूपविधिनिरासार्थः । तेनेत्यधिकारादेव (४।४।२) तृतीयायां समर्थविभक्तौ वर्त्तमानायां तृतीयानुवादः सुखप्रतिपत्तये । संसृष्ट इति (४।४।२२) वर्त्तमान उपसिक्तस्यैतत् प्रयोजनम् । औदनादौ यथा

स्यात् । इह मा भूत् सूपेन संसृष्टा स्थालीति । उदकेनोपसिक्त ओदन इति । उदकं व्यञ्जनं न भवति । व्यञ्जनशब्दस्य सूपादावेव रूढत्वात् । ननु यद् व्यञ्जनैरुपसिक्तं तत्तैः संस्कृतं भवति । तत्र संस्कृतमेव सिद्धम् । न सिध्यति । सतो ह्युत्कर्षाधानं संस्कारः । न चासौ सर्वत्रोपसिक्तः सम्भवति । तथाहि व्यपगते स्वादुरसैः प्रतिभावापन्नैरुपसिक्तेष्वोदनादिष्वपकर्ष एव भवति । नोत्कर्षः । उपसिक्तमात्रेऽपि चेष्यते । तस्मात् प्राक् तस्य पृथगारम्भः ।

## २७ । ओजःसहोम्भसा वर्त्तते ।

वर्त्तत इति । चेष्टत इत्यर्थः । तत्प्रक्रियाविशेषणमित्यादि । अनेन हि वृत्त्यर्थस्य कर्त्तव्यता माचष्टे । वर्त्तत इति वर्त्तमानं करोतीत्यर्थः । स हि वृत्त्यर्थः कर्त्तव्यतया सम्बध्यमानः कर्म सम्पद्यते । तत्सामानाधिकरण्याच्च तद्विशेषणमपि कर्त्तव्यतया युज्यते । तदपि कर्म च प्रसक्तम् । क्रियाविशेषणस्यैवाकर्म्मकेऽपि धातौ कर्मत्वमाख्यातम् । तदित्यनेन द्वितीयासमर्थविभक्तौ लब्धायामपि द्वितीयान्ता इह प्रकृतयो निर्दिष्टा विस्पष्टार्थम् । अन्यथा प्रत्ययविधौ पञ्चमी न्याय्येति तदन्ता एव निर्द्दिश्येरन् ।

## २८ । तत्प्रत्यनुपूर्वमीपलोमकूलम् ।

प्रातीपिक इति । प्रतिगता आपोऽस्मिन्निति बहुव्रीहिः । ऋक्पूरब्धूःपथामानक्ष (५।४।७४) इत्यकारः समासान्तः । एवञ्च द्व्यन्तरुपसर्गेभ्योऽप ईदितीत्त्वम् (६।३।९७)। अपरत्र तूदनोर्देश इति देशादन्यत्रोत्त्वमेव (६।३।९८)। ततष्ठक् । प्रातिलोमिकम् । आनुलोमिकमिति । प्रतिगतानि लोमान्यस्य । अनुगतानि लोमान्यस्येति बहुव्रीहिः । अच् प्रत्यन्वित्यादिना ऽच् समासान्तः (५।४।७५) ।

## २९ । परिमुखञ्च ।

पञ्चम्यपाङ्परिभिरिति (२।३।१०) पञ्चमी । अपपरिवहिरञ्चवः पञ्चम्येत्यव्ययीभावः (२।१।१२)। ततष्ठक् । स्वामिमुखं वर्जयित्वा यः सेवको वर्त्तते स पारिमुखिकः । सर्वतोभावे वा परिः । तस्य कुगतिप्रादय इति (२।२।१८)

प्रादिसमासः । यतो यतः स्वामिनो मुखं वर्त्तते ततस्ततो यः सेवको वर्त्तते स पारिमुखिकः ।

## ३० । प्रयच्छति गर्ह्यम् ।

द्विगुणमिति । तादर्थ्यात् ताच्छब्द्यं दर्शयति । अद्विगुणार्थे वस्तुनि द्विगुणशब्दं वर्त्तयित्वा तत्र प्रत्ययं कुर्वतः कोऽभिप्रायः ? एवं मन्यते । द्वैगुणिक इति । उत्तमर्ण उच्यते । नचासौ द्विगुणं प्रयच्छति । किं तर्हि ? स्कन्दयित्वा द्विगुणं गृह्णाति । अन्यथा हि विपर्य्यये सति प्रशस्यमेव स्यात् । नतु गर्ह्यम् । यदैकस्मिन्नर्थे तादर्थ्याद् द्विगुणशब्दो वर्त्तते तदैकमेव द्विगुणार्थं प्रयच्छतो द्विगुणमेव भवतीति गर्ह्यमिति । गर्हा पुनरिह प्रतिषिद्धस्य शास्त्रेण दीयमानस्य प्रत्यवायहेतुत्वाद्वेदितव्या । प्रकृत्यन्तरमित्यादिनोपसंख्यानं प्रत्याचष्टे । तत्रापि तादर्थ्याद् वृद्ध्यर्थं यद्दीयते तद् वृधुषिशब्देनोच्यते । ननु च तत्प्रत्याख्याने वृद्धिशब्दात् प्रत्यये सति वार्धिक इत्यपि स्यात् । नैष दोषः । अव्यविकन्यायेन हि वृद्धिशब्देन वाक्यमेव भवति । वृधुषिशब्देन वाक्यं वृत्तिश्च ।

## ३१ । कुसीददशैकादशात् ष्ठन्ष्ठचौ ।

तत्रापि कुसीदार्थे वस्तुनि दशैकादशार्थेषु च दशसु दशैकादशशब्दं वर्त्तयित्वा ततः प्रत्ययः । सर्वतः पूर्ववदभिप्रायो वेदितव्यः । दश चैकादश चेति समानाधिकरणसमासः । ननु च भिन्नविषययोः सामानाधिकरण्यं नोपपद्यते । दशैकादशशब्दोऽप्येकादशार्थेषु दशस्वेवोपचाराद् वर्त्तत इत्यदोषः । यो दश प्रयच्छत्येकादशएव स्युरिति स दशैकादिश इत्युच्यते । दशैकादशादिति निर्देशादकारान्तत्वं निपात्यते । किमर्थम् ? वाक्येऽप्यकारान्तत्वश्रवणार्थं दशैकादशान् प्रयच्छतीति ।

## ३२ । उञ्छति ।

उञ्छतीति । उद्धुनोतीत्यर्थः ।

## ३३ । रक्षति ।

## ३४ । शब्ददर्दुरं करोति ।

तदित्यनेनैव द्वितीयासमर्थविभक्तौ लब्धायां शब्ददर्दुरमिति (A) द्वितीया-निर्देशो लौकिकवाक्यप्रदर्शनार्थः। शब्ददर्दुरं करोतीत्येतद् व्यावहारिकं वाक्यम्। अस्य प्रतिग्रहो यत्र लोके व्यवहारस्तत्र प्रत्ययो भवति नान्यत्रे-त्यर्थं सूचयति। तेन शब्दं करोति खर इत्यत्र न भवति। लोके स शाब्दिक इत्युच्यते यः शब्दं वेत्ति। वैयाकरण एव शब्दं वेत्ति। तेन तत्रैव प्रत्ययो भवति। न खरे। असौ वैयाकरणः प्रत्ययप्रकृत्यादिना सर्वं शब्दं जानाति।

## ३५ । पक्षिमत्स्यमृगान् हन्ति ।

स्वरूपस्य पर्य्यायाणाञ्च तद्विशेषणानाञ्च ग्रहणमिष्यत इति। कथं पुनरिष्यमाणमपि पर्य्यायादीनां ग्रहणं लभ्यते? अर्थप्रधानत्वान्निर्देशस्य। शब्दप्रधाने हि निर्देशे स्वरूपस्य ग्रहणं भवति। नार्थप्रधान इति प्रति-पादितमेतत् प्राक्। यदि तर्हि पर्य्यायाणामपिग्रहणमजिह्मान् हन्त्यनिमि-षान् हन्तीत्यत्रापि प्राप्नोति। नैष दोषः। इह द्वितीयासमर्थविभक्तौ लब्धायां पुनर्द्वितीयासमर्थविभक्तिनिर्देशो लौकिकवाक्यप्रदर्शनार्थः। अस्य परिग्रहो यत्र लौकिकवाक्यव्यवहारस्तत्र प्रत्ययो भवति नान्यत्रेत्यस्यार्थस्य सूचनार्थम्। तेनाजिह्मान् हन्तीत्यादौ प्रत्ययो न भवति। अजिह्मान् हन्त्य-निमिषान् हन्तीत्यस्यार्थस्य विवक्षायामाजिह्मिक आनिमिषिक इति लोके न व्यवहारोऽस्ति। तत्र पक्षिषु पाक्षिक इति स्वरूपस्योदाहरणम्। शाकुनिक इति पर्य्यायस्य। मायूरिकः। तैत्तिरिक इति विशेषस्य। मत्स्येषु मात्स्यिक इति स्वरूपस्य। मैनिक इति पर्य्यायस्य। शाफरिकः शाकुलिक इति विशेषस्य। मृगेषु मार्गिक इति स्वरूपस्य। हारिणिक इति पर्य्यायस्य। सौकरिकः सारङ्गिक इति विशेषस्य।

---

(A) दर्दुरशब्दः पात्रविशेषवाची। तेन दार्दुरिकः कुलाल इति केचित्। अन्ये त्विमसनक्करण-शब्दमाहुः।

## ३६ । परिपन्थञ्च तिष्ठति ।

यथा परिमुखञ्चेति परिमुखशब्दस्याव्ययीभावत्वं तत्पुरुषत्वञ्च तथेहापि परिपन्थशब्दस्य तद्द्वयं वेदितव्यम् । तदिति द्वितीयासमर्थादिति । ननु च तिष्ठतिरयमकर्मकः । तत् कथं द्वितीयया सह सम्बन्धः ? नैष दोषः । अकर्मणामपि हि कालभावाध्वनः कर्मसंज्ञां प्रतिपद्यन्ते । तथाचोक्तम्—कालभावाध्वगन्तव्याः कर्मसंज्ञा ह्यकर्मणामिति (१।४।५१,वा) । पारिपन्थिकश्चौर इत्यव्ययीभावः । चौरो यः पन्थानं वर्जयित्वा तिष्ठति स पारिपन्थिकशब्देनोच्यते । तत्पुरुषपक्षे तु यश्चौरः सर्व्वान् पथो व्याप्य तिष्ठति स पारिपन्थिक उच्यते । चकार इत्यादि । तिष्ठति चेत्यत्र प्रत्ययार्थसमनन्तरमेव चकारो द्रष्टव्यः । तेन समानजातीयस्यैव प्रत्ययस्यार्थस्य समुच्चयं करोति । अथ प्रकृतेरेव समुच्चयः कस्मान्न विज्ञायते ? कर्मत्वानुपपत्तेः । तत्र हि द्वितीया समर्थविभक्तिरनुवर्त्तते । तिष्ठतेश्चाकर्मकत्वात् प्रकृताया मव्यादेः प्रकृतेः कर्मभावो नोपपद्यते । कालभावाध्वनामेव ह्यकर्मकाणां कर्मसंज्ञेष्यते । न मव्यादीनाम् । लौकिकवाक्यप्रदर्शनार्थं तदेतद् द्वितीयोच्चारणं करोतीत्याह परिपथपर्य्याय इति । किमेतस्य ज्ञापने प्रयोजनमित्याह स विषयान्तर इत्यादि । असति ह्यस्मिन् ज्ञापने ठक्प्रत्ययसन्नियोगेन प्रकृतिर्निर्दिश्यमाना प्रत्ययाभावेन प्रसज्यते । ज्ञापने तु सति यत्रापि प्रत्ययो न भवति तत्रापि प्रयोग उपपद्यते ।

## ३७ । माथोत्तरपदपदव्यनुपदं धावति ।

दण्डभावो माथो दाण्डमाथः । ऋजुःपन्था उच्यते । तं धावति दाण्डमाथिकः । शुल्कस्य माथः शुल्कमाथः । शौल्कमाथिकः । पदस्य पश्चादनुपदम् । पश्चादर्थेऽव्ययीभावः । अनुपदं धावत्यानुपदिकः । प्रत्यासत्त्या धावतीत्यर्थः । द्वितीयायां समर्थविभक्तौ लब्धायां पुनर्द्वितीयानिर्देश इष्टाद् द्वितीयान्ताद् यथा स्याद् । अनिष्टाद् मा भूदित्येवमर्थम् । तेन योऽनुर्यत्समया (२।१।१५) यस्य चायामः (२।१।१६) कुगतिप्रेत्यादि (२।२।१८) भिर्योगैरनुशब्दस्य समास स्ततो न भवति ।

## ३८ । आक्रन्दाट्ठञ्च ।

आर्त्तायनमिति । परित्राणार्थमीयते गम्यत इत्ययनम् । आर्त्तानामयनमार्त्तायनम् । शरणमित्यर्थः ।

## ३९ । पदोत्तरपदं गृह्णाति ।

पदग्रहणेन स्वरूपमेव गृह्यते । न सुप्तिङन्तं पदम् । अतएवाह पदशब्द उत्तरपदं यस्येति । एतच्च द्वितीयायां प्रकृतायां लौकिकवाक्यप्रदर्शनार्थत्वाद् द्वितीयानिर्देशाल्लभ्यते । पदोत्तरपदं गृह्णातीत्येतल्लौकिकं वाक्यम् । अस्य प्रदर्शनेनैतत् सूचितं लौकिकस्य हि पदस्य ग्रहणं न पारिभाषिकस्येति । अथ पदान्तादित्येव कस्मान्नोक्तमित्याह पदान्तादिति नोक्तमित्यादि । गतार्थम् । पदमेवोत्तरपदं यस्य तस्माद् यथा स्यात् । इह तु श्लोकपादपदं गृह्णातीति वाक्यमेव भवतीति केचित् ।

## ४० । प्रतिकण्ठार्थललामञ्च ।

कण्ठं कण्ठं प्रति प्रतिकण्ठम् । यथार्थेऽव्ययीभावः । आभिमुख्ये वा । लक्षणेनाभिप्रती आभिमुख्य इति (२।१।१४) । कण्ठस्याभिमुख्य इति । कण्ठस्याभिमुख्यं प्रतिकण्ठम् । प्रातिकण्ठिकः स उच्यते सर्वं कण्ठं यो गृह्णाति यो वा कण्ठमाभिमुख्येन गृह्णाति । द्वितीयासमर्थप्रकरणे पुनर्द्वितीयान्तप्रकृतिनिर्देश इष्टाद् यथा स्यात् । अनिष्टान्मा भूत् । तेन प्रतिगतः कण्ठमिति कुगतिप्रादय इति (२।२।१८) तत्पुरुषो यः प्रतिकण्ठशब्दस्ततो न भवति ।

## ४१ । धर्मञ्चरति ।

चरतिरासेवायामिति । आसेवा पौनःपुन्यम् । अधर्माच्च वक्तव्यमिति । अधर्मशब्दाच्चरतीत्येतस्मिन्नर्थे ठग् भवतीत्येतदर्थरूपं व्याख्येयमित्यर्थः । तत्रेदं व्याख्यानम् । पूर्वसूत्रादिह चकारोऽनुवर्त्तते । स चानुक्तसमुच्चयार्थो वेदितव्यः । तेनाधर्मादपि भविष्यति ।

## ४२ । प्रतिपथमेति ठंश्च ।

प्रतिपथिकमिति । पूर्ववद् वीप्सायामाभिमुख्ये वाव्ययीभावः । पन्थानं

पन्थानं प्रति प्रतिपथम् । आभिमुख्ये पथ आभिमुख्यं प्रतिपथम् । यः सर्वान् पथएति । आभिमुख्येन वा पन्थानमेति स प्रातिपथिक इति चाभिधीयते ।

४३ । **समवायान् समवैति ।**

समवायः समूह उच्यते । न सम्प्रधारणेति । कुत एतत् ? तत्र समवैतीत्यस्य प्रत्ययार्थस्यायोगात् । आगत्य तदेकदेशीभवतीति समवैतिशब्दस्यार्थः । संप्रधारणा चामूर्त्तिश्चैतसिको धर्म्मः । न च तदेकदेशीभवितुं शक्यते । तस्मात् समूह एव समवायशब्दस्यार्थः । नैतीत्यस्यार्थः । एतीति वर्त्तमाने समवैतीति वचनमर्थविशेषप्रतिपत्त्यर्थम् । एतीति प्राप्तिमात्रं कुर्वन्नुच्यते । समवैतीतत्रागत्य तदेकदेशीभवतीति ।

४४ । **परिषदो ण्यः ।**

४५ । **सेनाया वा ।**

४६ । **संज्ञायां ललाटकुक्कुट्यौ पश्यति ।**

अभिधेयनियमार्थ इति । अभिधेये सेवकविशेषे भिक्षुविशेषे च प्रत्ययान्तस्य नियमः । तत्रैव वृत्तिर्यथा स्यादित्येवमर्थम् । नतु रूढ्यर्थमिति । लालाटिककौक्कुटिकशब्दयो रूढ्यामिकत्वात् । तदनेनेत्यादि । यत एव सर्वावयवेभ्यो ललाटं दूरे दृश्यते तस्मादनेन ललाटदर्शनेन सेवकस्य स्वामिनं प्रत्यनुपश्लेषो लभ्यते । नत्वत्र ललाटार्थो दर्शनं चास्ति । यादृशश्चानुपश्लेषो विवक्षितस्तं कार्य्येष्वनुपस्थायित्वमित्यनेन दर्शयति । कुक्कुटीशब्देनापीत्यादि । कुक्कुट्या ह्यल्पदेशविषयः पातो भवति । तदनेन कुक्कुटीपातदेशस्याल्पता लक्ष्यते । नत्वत्र कुक्कुट्यर्थो देशश्च विद्यते ।

४७ । **तस्य धर्म्यम् ।**

४८ । **अण् महिष्यादिभ्यः ।**

४९ । **ऋतोऽञ् ।**

५० । **अवक्रयः ।**

## ५१ । तदस्य पण्यम् ।

अपूपाः पण्यमस्येति आपूपिकः । अथ यथा वाक्ये पण्यशब्दो युज्यते तथा वृत्तावपि कस्मान्न युज्यत इत्याह पण्यमिति । विशेषणमित्यादि । अथ य एवमवेक्ष्यमाणः पण्यार्थं वृत्तावन्तर्भावयति तेन गतार्थत्वात् पण्यशब्दो न प्रयुज्यते ।

## ५२ । लवणाट् ठञ् ।

## ५३ । किशरादिभ्यः ष्ठन् ।

## ५४ । शलालुनोऽन्यतरस्याम् ।

शलालुक इति । इसुसुक्तान्तात् कः (७।३।५१) ।

## ५५ । शिल्पम् ।

शिल्पं कौशलमिति । क्रियाभ्यासपूर्वको ज्ञानविशेषः । मृदङ्गवादनं शिल्पमस्येति । मृदङ्गो वाद्यते येन शिल्पेन तन्मृदङ्गवादनम् । ननु च मृदङ्गवादनं शिल्पं यस्येति विगृह्य प्रत्यय उत्पद्यमानो मृदङ्गवादनशब्दादेव प्राप्नोति । नतु मृदङ्गशब्दात् । ततो मार्दङ्गवादनिक इति भवितव्यम् । तत् कथं मार्दङ्गिक इति भवतीत्याह मृदङ्गवादनमित्यादि । मृदङ्गशब्द एव प्रत्ययमुत्पादयति । स तु मृदङ्गवादने वर्त्तमानः । न मृदङ्गे । अत्र शब्द-शक्तिस्वाभाव्यं हेतुः । न चायं नियमो येन विग्रहः क्रियते तत एव प्रत्ययेन भवितव्यमिति । यथा छवेरिदं मांसमाविकम् मांसमित्यविशब्देन विग्रहः क्रियतेऽविकशब्दादेव प्रत्ययो भवति तथेहापि मृदङ्गवादनशब्देन विग्रहः क्रियते प्रत्ययस्तु मृदङ्गशब्दाद् भवति । तेन तत्र गतार्थत्वाच् शिल्पशब्दो न प्रयुज्यत इत्यभिप्रायः ।

## ५६ । मड्डुकझर्झरादणन्यतरस्याम् ।

## ५७ । प्रहरणम् ।

धानुष्क इति । कादेशः । इणः ष इति (८।३।३९) विसर्जनीयस्य षत्वम् ।

## ५८ । परश्वधाट्ठञ्च ।

## ५९ । शक्तियष्ट्योरीकक् ।

अथ दीर्घोच्चारणं किमर्थम् ? इकगेव नोच्येत । इकक्यपि सवर्णदीर्घत्वे कृते शाक्तीको याष्टीक इति सिध्यत्येव । न सिध्यति । इकारस्य यस्येति चेति (६।४।१४८)लोपेन भवितव्यम् । तत् कुतः सवर्णदीर्घत्वम् ? इकारोच्चारणसामर्थ्या- देव लोपो न भविष्यति । ननु चावग्रहनिवृत्तिरिकारस्य प्रयोजनं स्यात् । नैतत् । यदि ह्येतत् प्रयोजनं स्यात् सूत्रारम्भोऽनर्थकः स्यात् । ठकाप्यनवग्रहस्य सिद्धत्वात् । नानर्थकः । वाक्यनिवृत्त्यर्थत्वात् । एवमपि प्रत्ययग्रहणमनर्थकं स्यात् । ठक् प्रत्ययो हि प्रकृतः । तत्रैतावदेव वक्तव्यं शक्तियष्ट्योरिति । एवं पुनर्विधानं वाक्यनिवृत्त्यर्थं भविष्यति । किमीकग्विधानेन ? तस्मादिकग्- ग्रहणसामर्थ्याल्लोपो न भविष्यति । एवमपि ठकैव यस्येति चेति (६।४।१४८) लोपाभावेनानवग्रहे सिद्धे ह्रीकग्ग्रहणमधिकविधानार्थं प्रतीयते । तेन यस्येति चेति (६।४।१४८) लोपो न भवति । यथा तस्मादकः सवर्णे (६।१।१०१) दीर्घोपि न स्यादिति विगृहीतमेव श्रूयेत । तस्मादीकग् वक्तव्यः ।

## ६० । अस्तिनास्तिदिष्टं मतिः ।

किं तर्हि परलोको ऽस्तीति मतिर्यस्येति । कथं पुनरसति विशेषोपादान एतल्लभ्यत इत्याह तदेतदित्यादि । अभिधानशक्तिस्वाभाव्याल्लभ्यते । ननु चास्तीति तिङन्तम् । नास्तीति वाक्यम् । अत एताभ्यां न प्राप्नोति प्रत्ययः प्रातिपदिकाधिकारादित्यत ( ४।१।१ ) आह अस्तिनास्तिशब्दावित्यादि । अभ्युपगम्यापि तिङन्तत्वं वाक्यत्वञ्च परिहारान्तरमाह वचनादाख्याताद् वाक्याच्च प्रत्यय इति ।

## ६१ । शीलम् ।

अपूपभक्षणं शीलमस्येति । शीलविषयत्वादुपचारात् तथा व्यपदेशः । भक्षणक्रिया तद्विषयञ्च शीलं तद्धितवृत्तावन्तर्भवति । तेन तत्र प्रतीयमानत्वाद् भक्षणशीलशब्दौ न प्रयुज्येते इति भावः ।

## ६२ । छत्रादिभ्यो णः ।

छत्रशीलत्वं शिष्यस्य प्रतिपादयितुमाह च्छादनादपवारणाच्छत्रमित्यादि । अपवारणादित्यनेन च्छादनादित्यस्यार्थं व्यक्तीकरोति । आच्छादयति हि यत् तच् छत्रमित्युच्यते । तेन शिष्योऽपि गुरुकार्य्यतत्परो गुरोर्यानि च्छिद्राणि गोपयति तेषामावरणाय प्रवृत्त स्तत युक्तः सच्छत्रसहचरितां क्रियामाचरं श्छत्रशीलो भवति । स्थाशब्दोऽत्र पठ्यते । स चोपसर्गपूर्वो गृह्यत इति । ततश्च तस्मातश्चोपसर्गे इत्यङ् (३।३।१०६) प्रत्ययमुत्पाद्याप्युत्पादितत्वात् । केवलस्य तु पाठः सर्वोपसर्गसंग्रहार्थः । चुरेति पठ्यते । तत्र निपातनादकारप्रत्ययो गुणाभावश्च ।

## ६३ । कर्माध्ययने वृत्तम् ।

क्रियया यद् व्याप्यमानमीप्सिततममनीप्सिततमं वा तत् कर्म । इह त्वनीप्सिततमं गम्यते । अतएवाह यस्याध्ययनप्रयुक्तस्येत्यादि । नहि कस्यचिदध्ययने युक्तस्य परीक्षाकाले पठतः स्खलितपाठरूपमीप्सितं भवति । अध्ययनशब्दो भावसाधनः कर्म्मसाधनो वा । अधीतमधीयते वा ऽध्ययनम् । वृत्तं भूतमुत्पन्नमित्यर्थः । एकमन्यदित्यादि । सम्यक् पाठापेक्षयान्योऽर्थो वेदितव्यः । ऐयन्यिकः । त्रैयन्यिक इति । न य्वाभ्यां पदान्ताभ्यामैजित्यैजागमः (७।३।३) । अध्ययने कर्म वृत्तमित्येतत् सर्वं तद्धितवृत्तावन्तर्भवतीति तेन तत्राध्ययनवृत्तशब्दोऽवगतार्थत्वान्न प्रयुज्यत इति भावः ।

## ६४, । बह्वच्पूर्वपदाट् ठच् ।

द्वादशान्यिक इति । द्वादशशब्दो बह्वच्पूर्वपदम् । द्वौ च दश चेति द्वन्द्वः । द्व्यष्टनः संख्यायामबहुव्रीह्यशीत्योरित्यात्वम् (६।३।४७) । ततो द्वादशान्यानीति विगृह्य तद्धितार्थ इति (२।१।५१) समासः । ननु चैकादेशे कृते पूर्वोत्तरपदाभावाद् बह्वच्पूर्वपदं न भवति । नचान्तादिवद्भावोऽस्ति । उभयत आश्रये नान्तादिवदिति । नैष दोषः । नेन्द्रस्य परस्येति (७।३।२२) ज्ञापकादेकादेशात् पूर्वं प्रत्ययः । त्रयोदशान्यिक इति । त्रयश्च दश चेति द्वन्द्वः । त्रे स्त्रय इति (६।४।४८) त्रय आदेशः । अन्यशब्दोऽत्र सम्यक् पाठापेक्षयापपाठे वर्त्तते

इत्यत आह चतुर्द्दंशापपाठा इत्यादि । कथं पुनर्ज्ञायते ऽपपाठेऽन्यशब्दो वर्त्तत इत्याह उदात्त इत्यादि । उदात्ते कर्त्तव्येऽनुदात्तकरणमपपाठः । तत्र य उदात्ते कर्त्तव्येऽनुदात्तं करोति स यस्मादन्यं करोषीत्युच्यते ततो ज्ञायतेऽन्यशब्दोऽपपाठे वर्त्तत इति ।

## ६५ । हितं भक्षाः ।

ननु हितशब्दयोगे चतुर्थ्या भवितव्यम् । हितयोगे चतुर्थी भवतीत्युपसंख्यानात् (२।३।१३,वा) । तस्मै हितमिति (५।१।५) निर्देशात् सामर्थ्याद् विभक्तिविपरिणामो भविष्यतीति । सामर्थ्यं पुनस्तदेवोपसंख्यानम् । लिङ्गञ्च । हितार्था क्रिया तद्धितवृत्तावन्तर्भवति । तेन न प्रयुज्यत इति ।

## ६६ । तदस्मै दीयते नियुक्तम् ।

ननु च तदस्य (४।४।५१) पण्यमित्यतस्तदिति प्रथमा समर्थविभक्तिरनुवर्त्तिष्यते । तदपार्थकं पुनः प्रथमासमर्थविभक्त्युपादानम् । अस्मायिति प्रत्ययार्थोऽप्यपार्थक एव । तथा ह्यस्येत्यनुवर्त्तते । तत्र दीयत इत्यभिसम्बन्धात् तु सम्प्रदानत्वेन भवितव्यम् । ततश्च शेषसम्बन्धे निवृत्ते चतुर्थ्यत्र विपरिणंस्यते । तस्माद्दीयते नियुक्तमित्येतावदेव वक्तव्यम् । अत्रोच्यते । समर्थविभक्त्युपादानं तावत् पूर्वसूत्रे समर्थविभक्तिविशेषः प्रत्ययमुत्पादयतीत्यस्य सूचनार्थम् । तेनेह न भवति । दुःखमस्याध्ययने वृत्तम् । अजयोऽस्याध्ययने वृत्त इति । अपपाठ एव हि वृत्ते प्रत्यय इष्यते । दीयमाने न सर्व्वस्मात् चतुर्थी । अरेः पृष्ठं ददातीति । स च षष्ठ्या एव विषयोऽर्थः । षष्ठ्यर्थ एव प्रत्ययो विज्ञायते । चतुर्थ्यन्ताद् यथा स्यात् । एवमस्मायिति प्रत्ययार्थो निर्दिश्यते ।

## ६७ । श्राणामांसौदनाट्टिठन् ।

अथ ठञेव कस्मान्नोक्त इति । एवं हि लघु सूत्रं भवतीति भावः । स्यादेतत् । ठञ्टिठनो विशेषोऽस्ति । अतष्टिठनुक्तो न ठञित्यत आह न ह्यत्रेत्यादि । द्वयोरप्यनयोर्द्व्यच्त्वान्नास्ति विशेषः । योऽपि वृद्धिनिमित्तस्येत्यादिना (६।३।३९) ठञि पुंवद्भावप्रतिषेध स्तस्य न कोपधाया इति (६।४।३७) टिठन्यप्यभावान् नात्र ठञ्टिठनोः कश्चिद्विशेषोऽस्ति । मांसौदनेनेत्यादिना

विशेषं दर्शयति। केचिदिति वचनाद् विगृहीतग्रहणं केचिन्नेच्छन्तीत्येतदुक्तं भवति। तन्मते ठञेव वक्तव्यः। टिठन्वचनं वैचित्र्यार्थं वेदितव्यम्।

## ६८। भक्तादणन्यतरस्याम्।

## ६९। तत्र नियुक्तः।

अथ नियुक्त इति (४।४।६६) वर्त्तमाने पुनर्नियुक्तग्रहणं कस्मात् क्रियते? अर्थभेदात्। न तस्य ह्यव्यभिचारलक्षणो नित्यभावोऽर्थः। अस्य तु ततोऽन्य एवार्थो यदाह नियुक्तोऽधिकृत इत्यादि।

## ७०। अगारान्ताट्ठन्।

## ७१। अध्यायिन्यदेशकालात्।

अध्येतुं शीलमस्येत्यध्यायी। ताच्छीलिको णिनिः। अध्ययनस्य यौ देशकालौ शास्त्रेण प्रतिषिद्धौ तावदेशकालशब्देनोच्येते इति। अप्रतिषिद्धाभ्यां देशकालशब्दाभ्यामन्यत्वात् पर्य्युदासवृत्त्याऽभक्षास्पर्शनीयवदध्ययनस्येति। अत आह तस्याध्यायिना प्रत्ययार्थेन सन्निधापितत्वात्। नहि विनाध्ययनेनाध्याय्युपपद्यते।

## ७२। कठिनान्तप्रस्तारसंस्थानेषु व्यवहरति।

अल्पाच्तरस्य प्रस्तारशब्दस्य (B) च पूर्वनिपातमकुर्वन्नेतत् सूचयत्यन्यदपि कार्य्यं लक्षणप्राप्तं न भवति। तेन कठिनान्तशब्दस्य ग्रहणं न भवतीति कठिनशब्दान्तं प्रातिपदिकं गृह्यते। हरतिरयमस्ति पणिना समानार्थौ यस्य व्यवहृपणोः समर्थयोरित्यत्र (२।३।५७) ग्रहणम्। अस्ति विवादे व्यवहारे परिहृतमिति। अस्ति च विक्षेपे शलाकां व्यवहरतीति। अस्ति च लौकिके क्रियातत्त्वे लौकिको व्यवहार इति। इह तु क्रियातत्त्वे वर्त्तमानस्य ग्रहणमित्येतद्दर्शयितुमाह व्यवहारः क्रियातत्त्वमिति। क्रियाया अविपरीतस्वभावत्वादि क्रियातत्त्वम्। (C) यथेत्यादि। लौकिको व्यवहार इत्यत्र यथा

---

(B) संस्थानप्रस्तारौ सन्निवेशाविति मिश्रः (पदमञ्जर्याम्)।

(C) यत्र देशे या क्रिया यथानुष्ठेया तत्र तस्यास्तथानुष्ठानं क्रियातत्त्वम्।

व्यवहारः क्रियातत्त्वे वर्त्तते तथेहापि दर्शयति । क्रियातत्त्वे वर्त्तमानस्य ग्रहणम् । तत्रेति (४।४।६८) सप्तम्यधिकारे सप्तमीनिर्देशात् प्रसिद्ध्युपसंग्रहणं लभ्यते । वांशकठिनिकश्चक्रचर इति । (D) यश्चक्रचरः (E) सन्ननुष्ठेयां क्रियां शास्त्रोक्तामविगीतां वंशकठिनेऽनुतिष्ठति स एवमुच्यते ।

## ७३ । निकटे वसति ।

निकटे समीप इत्यर्थः । यत्र शास्त्रतो निकटवासस्तत्रायं विधिः । एतच्च सप्तम्यां समर्थविभक्तौ लब्धायां पुनः सप्तमीनिर्देशात् प्रसिद्ध्युपसंग्रहणेन लभ्यते । स ह्येवमर्थः कृतः । इष्टे विषये सप्तम्यन्ते यथा स्यात् । अनिष्टान्मा भूत् । स पुनः शास्त्रतो निकटवास आरण्यकस्य भिक्षोरिति दर्शयत्यारण्यकेन भिक्षुणेत्यादि ।

## ७४ । आवसथात् ष्ठल् ।

## ७५ । प्राग्घिताद्यत् ।

## ७६ । तद्वहति रथयुगप्रासङ्गम् ।

तदिति द्वितीयासमर्थविभक्तौ लब्धायां रथादीनां द्वितीयानिर्देश इष्टाद्यथा स्यात् । अनिष्टान्मा भूत् । तेनेहैव भवति गौर्युग्य इति । इह न भवति युगं वहति राजा कलिं द्वापरं वेति । तथा प्रासज्यत इति प्रासङ्गः । यत् काष्ठं वहनकाले वत्सानां कण्ठ आसज्यते तत्प्रासङ्गः । तं वहति प्रासङ्ग्यः । इह न भवति । प्रसङ्गादागतं प्रासङ्गम् । युग्यञ्च पत्र इति ( ३।१।१२१ ) निपातनाद्युग्यशब्दे सिद्धे युगग्रहणं स्वरार्थम् । न युग्यमयुग्यमित्यत्र नञो गुणप्रतिषेधे सम्पाद्यर्हहितालमर्थास्तद्धिता (६।२।१५५) इत्यतो नञ इत्यनुवर्त्तमाने ययतोश्चातदर्थे इति (६।२।१५६) नञ उत्तरस्यान्तोदात्तत्वं यथा स्यात् । तेन न ह्येकस्वरो लभ्यते । तस्य क्यबन्तत्वात् ।

---

(D) वंशा वेणवः कठिना यस्मिन् देशे स वंशकठिनः । तस्मिन् देशे या क्रियानुष्ठेया तां तथैवानुतिष्ठति यः स वांशकठिनिकः ।

(E) चक्रयुक्तेन शकटेन चरतीति चक्रचर इति मिश्रः । चक्रचर इत्यत्र चक्रधर इत्यपि क्वचित् पाठः ।

## ७७। धुरो यड्ढकौ।

अथ धुरो ढक् चेत्येवं कस्मान्नोक्तम्? चकारो समुच्चयार्थः। यथाभिहिते प्रत्यये विज्ञायमाने यदेव भविष्यति। नैतदेवम्। यो हि धुरं वहति धुरोऽसौ वोढ़ा भवति। तस्य यथाविहिते प्रत्यये विज्ञायमाने तस्येदमित्यणपि (४।३।१२०) स्यात्। यद्ग्रहणात् तस्येदंविवक्षायामपि यदेव भवति।

## ७८। खः सर्वधुरात्।

सर्वधुरमिति। सर्वा चासौ धूश्चेति पूर्वकालैकेत्यादिना (२।१।४९) समासः। ऋक्पूरित्यादिना (५।४।७४) समासान्तः। स्त्रीलिङ्गे न्याय्य इति। तत्पुरुषस्योत्तरपदार्थप्रधानत्वात् परवल्लिङ्गं द्वन्द्वतत्पुरुषयोरिति (२।४।२६) धूःशब्दस्य यल्लिङ्गं तदेव न्याय्यमिति। तत्र सर्वधुराया इति सूत्रे कर्त्तव्ये यतः सर्वधुरादिति नपुंसकलिङ्गेन निर्देशः स शब्दरूपापेक्षः। अर्थापेक्षे हि निर्देशे परवल्लिङ्गता भवति। अयन्तु शब्दरूपापेक्षः। शब्दरूपञ्च नपुंसकमिति नपुंसकेनैव निर्देशो युक्तः। अर्थविवक्षायां तु स्त्रीलिङ्गमेव भवति सर्व्वधुरां वहतीति।

## ७९। एकधुराल्लुक् च।

एकधुरादित्ययमपि शब्दरूपापेक्षया निर्देशः। अर्थापेक्षया हि परवल्लिङ्गता भवति। अत्रापि पूर्ववत् समाससमासान्तौ वेदितव्यौ। वचनसामर्थ्यात् पक्षे लुग् विधीयते। यदि हि नित्यो लुक् स्यात् खस्य विधानमनर्थकं स्यात्। यत एव हि लुकं विदध्यात्। ननु चैकधुरशब्दात् केनचिद् विहितो न यत्। तस्य कथं लुक् शक्यते विज्ञातुम्? लुग्वचनादेव यतोऽपि विधिरनुगम्यते इत्यदोषः।

## ८०। शकटादण्।

रथशकटहलसीरेभ्यः प्रत्ययविधानमनर्थकम्। तस्येदमित्यनेनैव (४।३।१२०) सिद्धत्वात्। शब्दभेदादुविधानमिति चेदन्यो हि शब्दो रथं वहतीत्यन्यो हि रथस्य वोढ़ेति। तदा ऽर्थाश्रयत्वात् प्रत्ययविधानस्यार्थसामान्यात् सिद्धम्।

नहि कश्चिद् रथ्यमित्युक्ते रथस्यायमित्येवावैति । वहत्यर्थः प्रतीयते । तस्मात् स्यादेव रथाद् यत् ।

## ८१ । हलसीराट् ठक् ।

शकटादण् वोत्सर्गः कर्त्तव्यः । एवञ्च वाक्यं करिष्यामो यथा रथस्य वोढ़ा रथ्य इति । न तत्र विधीयते । तत्र प्रत्ययविधाने द्विगोर्लुगनपत्ये (४।१।८८) इत्यनेन लुक् प्राप्नोति । अनेन पुनर्न प्राप्नोति । कस्मात् ? प्राग्-दीव्यतोऽ (४।१।८३) णित्यधिकारात् । ननुच क्रियमाणेऽपीह द्विगोरण् प्रत्ययो न प्राप्नोति ग्रहणवता प्रातिपदिकेन तदन्तविधिर्नास्तीति । न । एतदेव हि शकटादणित्येवमादिकं (४।४।८०) ज्ञापकं भवति तदन्तविधेरिति । तेन द्वैहलिकः । द्वैशकटः । द्वैसीरिकमित्येवमादिकं सिद्धं भवति ।

## ८२ । संज्ञायां जन्याः ।

अस्यत्र गर्भं इतीन् सर्वधातुभ्यः (उण्, ४।५५७) । जनयतीति वा । अत्र कृदिकारादक्तिनः सर्वतोऽक्तिन्नर्थादिति (४।१।३५,प) ङीप् । जनी । तां वहन्ति जन्याः । जामातुर्वयस्याः । विवाहमानिताभिधीयते । केचित् कर्त्तरि जायतेऽस्यां गर्भं इति कृत्यल्युटो बहुलमिति (३।३।११३) ल्युटि जननशब्दाच्च ङीपि नकाराकारयो र्लोपेन साधयन्ति । ननु च जनीशब्दादेव यद् विधेयः । सर्वकालार्थं निपातनमित्येके ।

## ८३ । विध्यत्यधनुषा ।

पद्या इति । पद्यत्यतदर्थे इति (६।३।५३) पादशब्दस्य पद्भावः । जरव्या इति । वान्तो यि प्रत्यय इत्यवादेशः (६।१।७९) । ननु चेत्यादि । धनुरत्र प्रकृत्यर्थः । प्रत्ययार्थेन वाह्यं करणमपेक्ष्यते । तेन सापेक्षमसमर्थं भवतीत्यसामर्थ्यम् । ननु च व्यधनमेवात्र सापेक्षम् । क्रियया करणं सम्बध्यत इति कृत्वा । तच्च व्यधनं क्रियाप्रधानत्वादाख्यातस्य प्रधानं भवति । प्रधानस्य सापेक्षस्य भवत्येव वृत्तिर्यथा राजपुरुषोऽयमभिरूप इति । नैतदस्ति । यद्यपि क्रियाप्रधानमाख्यातं तथापीह प्रत्ययार्थ एव प्रधानम् । प्रत्ययार्थस्य साधनं व्यद्धा । तथाच प्रागुक्तं क्रियाप्रधानत्वेऽपि चाख्यातस्य तद्धितः

स्वभावात् साधनप्रधान इति। अथ क्रियाद्वारेण व्यद्धुरपि करणं प्रत्यपेक्षा भवतीति कल्प्यते ? तथाच सति प्रकृत्यर्थस्यापि क्रियाद्वारेणैव करणं प्रत्यपेक्षा भवतीति केन वार्य्यते ? नहि पादौ विध्यति धनुषेति करणविवक्षायां व्यधनमात्रस्य पादौ कर्म्म धनुष्करणविशिष्टस्य। तस्माद् व्यधनस्यापि क्रिया-करणे प्रत्यपेक्षेत्यसामर्थ्यात् प्रत्ययो न भविष्यति। अनभिधानाच्चेति। अत्रै-वोपपत्त्यन्तरम्। कथं पुनरुपपत्त्यन्तरमित्याह नहीत्यादि। धनुषा पद्य इत्युक्ते धनुषः पद्यं प्रत्युपलक्षणभावः सम्भाव्यते यथा शिखया परिव्राजक मद्राक्षी-दित्यत्र शिखया परिव्राजकं प्रति। धनुषा सह दृष्टः पद्य इत्येषोऽप्यर्थ-श्चाशङ्क्यते। ननु पादौ विध्यति धनुषेत्ययमर्थो विवक्षितः प्रतीयते। एवं तर्हीत्यादिना क्रियाविशेषणपरो धनुषेति निर्द्देशः। न धनुषः करणत्व-प्रतिषेधः। प्रतिषेधे प्रधानमिति दर्शयति तेनेत्यादिना। क्रियत एव धनुषः प्रतिषेधः। तेन क्रिया विशेष्यते। तेन चौरं विध्यतीत्यादौ न भविष्यति। सम्भाव्यते हि चौरादिव्यधनक्रियया धनुषः करणत्वम्।

८४। धनगणं लब्धा।

कथं पुनरत्र द्वितीया समर्थविभक्तिः ? यावता कर्त्तृकर्म्मणोः कृतीति (२।३।६५) षष्ठ्या भवितव्यमित्याह लब्धेति तृन्नन्तमित्यादि। तृन्नन्तस्य हि प्रयोगे न लोकाव्ययनिष्ठाखलर्थतृनामिति (२।३।६९) षष्ठीप्रतिषेधेन द्वितीया भवति।

८५। अन्नाण्णः।

८६। वशं गतः।

वशः काम इच्छा। वशेर्धातोरत एव निपातनादप्रत्ययः। द्वितीया-समर्थविभक्तौ प्रकृतायां वशमिति द्वितीयानिर्देश इष्टे विषये द्वितीयान्ताद् यथा स्यात्। अनिष्टान्मा भूत्। तेनेहैव भवति। वशं गत इच्छाप्राप्तः। विधेय इत्यत्रैव भवति।

८७। पदमस्मिन् दृश्यम्।

कर्म्मणः कृतेवाभिहितत्वाद् द्वितीया न सम्भवति। न च द्वितीया-

प्रथमाभ्यामन्यत्र विभक्तौ पदमिति रूपमुपपद्यते । तस्मात् प्रथमान्तमेवैत-दिति निश्चित्याह निर्देशादेवेत्यादि ।

## ८८ । मूलमस्यावर्हि ।

आवर्हणमावर्ह उत्पाटनमित्यर्थः । वृहेराङ् पूर्वाद्भावे घञ् । आवर्ही-ऽस्यास्तीत्यावर्हीति । द्वितीयाविभक्तिरिह नास्ति । नच प्रथमाद्वितीया-भ्यामन्यस्यां विभक्तौ मूलमित्येतद्रूपमुपपद्यते । तस्मात् प्रथमान्तमेवैतत् । निर्देशादेव प्रथमा समर्थविभक्तिरुपपद्यत इति मत्वाह मूलशब्दात् प्रथमा-समर्थादिति ।

## ८९ । संज्ञायां धेनुष्या ।

यश्च प्रत्यय इति । किमर्थं पुनर्यप्रत्ययो निपात्यत इत्याह अन्तोदात्तो ह्ययमपीष्यत इति । यति सति तित्स्वरेणान्तस्वरितत्वात् । अन्तोदात्तश्चेष्यते । तस्माद् यप्रत्ययएव न्याय्यः । न केवलं संज्ञाविषय एवेष्यतेऽपित्वन्तोदात्तोऽ-पीत्येषोऽपिशब्दस्यार्थः ।

## ९० । गृहपतिना संयुक्ते ञ्यः ।

संयुक्त इति सम्बद्ध इत्यर्थः । अन्यस्यापीत्यादि । यथैव हि गृहपति र्यजमानो गार्हपत्ये कार्य्यं करोति तथा दक्षिणाग्नावाहवनीये च । तस्माद-न्यस्यापि दक्षिणादे र्गृहपतिना संयोगोऽस्ति । यद्येवमतिप्रसङ्गोऽन्यत्र प्राप्नोती-त्याह तत्र संज्ञाधिकारादित्यादि । अभिधेयनियमार्थं संज्ञाग्रहणमनुवर्त्तते । तेनेह न भवत्यतिप्रसङ्गः ।

## ९१ । नौवयोधर्मविषमूलमूलसीतातुलाभ्यस्तार्य्यतुल्य-प्राप्यवध्यानाम्यसमसमितसम्मितेषु ।

कथं पुनरिहापि समर्थविभक्तिर्लभ्यते ? यावता नेहोपात्ता । नाप्यनु-वर्त्तत इत्याह प्रत्ययार्थद्वारेणेत्यादि । द्वारमुपायः । कारकमित्यर्थः । इह तार्य्यादयः प्रत्ययार्थाः । तत्सम्बन्धे कर्त्तरि करणे हेतौ तुल्यार्थयोगे च यथासम्भवं तृतीयैव भवति । ततः समर्थविभक्तिर्लभ्यते । नाव्यमिति । वाह्यो

यि प्रत्यय इत्यवादेशः (६।१।७८)। अत्र नावस्तरणक्रियायां कर्त्तृत्वं करणत्वञ्च विवक्षावशाद् भवतीति करणे कर्त्तरि वा तृतीया। एवमन्यत्रापि यथायोगं वेदितव्यम्। धर्मेण प्राप्यं धर्म्यमिति। तत् पुनर्धर्मस्य फलं स्वर्गाद्युच्यते। ननु चेत्यादि। ननु च धर्मेण यत्प्राप्यं तद्धर्मादनपेतं भवतीति भावः। विष्य इति। विषेण वधमर्हतीत्यर्थः। वध्यशब्दस्य दण्डादिभ्यो य (५।१।६६) इत्यर्हार्थे व्युत्पादितत्वात्। आनाम्यमभिभवनीयमिति। अनेकार्थत्वाद् धातूनामत्र नमिरभिभवे वर्त्तते। पटादीनामुत्पत्तिकारणं मूलमिति। दत्तेन हिरण्येन पटादीनामुत्पत्तिर्भवति। तेनेति। मूलेन। तदिति। मूल्यम्। शेषीक्रियत इति। अनेनाभिभूयत इत्यस्यार्थमाचष्टे। शेषीक्रियते गुणभावमापाद्यतेऽप्रधानीक्रियत इत्यर्थः। अप्रधानीकरणमेवाभिभवः। कथं पुनस्तेन तच्छेषीक्रियत इत्याह मूल्यं हीत्यादि। हिशब्दो हेतौ। मूल्यमिह कर्त्तृ। मूलं कर्म। तत्प्रणयेन हिरण्येन पटादयो विक्रीयन्ते। तत्र यन्मूलातिरिक्तं हिरण्यं लाभस्तन्मूल्यं गुणो भागः। सह तेन वर्त्तत इति सगुणः। गुणः पुनरिह तदेव मूल्यं वेदितव्यम्। तदेतदुक्तं भवति यस्मान् मूल्यभागेनैव भागभूतेन सभागं मूलं करोति न न्यूनं तन्मूल्यमभिधीयत इति। मूल्ये सति तत् तत्र द्विगुणं करोतीत्युच्यते। का पुनरियं युक्तिः? यदि नाम सगुणं मूलं करोतीत्युच्यते तत् कथं मूलेन मूल्यमभिभूयते? यथेयं युक्तिस्तदाख्यायते। इह हि शास्त्रे यत् सिद्धमुपकारि तदङ्गमप्रधानम्। यच्चोपकारसाध्यमनुपकारकं तदङ्गि प्रधानमित्येषा व्यवस्था। तथाचोक्तं

शास्त्रे द्वयमेवेह स्यादङ्गमथवा भवेदङ्गि तत्र।
उपकारि सिद्धमङ्गं साध्यानुपकारकमङ्गीति ॥ १ ॥ इति।

एवञ्च मूल्येन मूलं सगुणं क्रियमाणमुपकार्य्यत्वात् प्रधानं सम्पद्यते। मूल्यं त्वनुपकार्य्यत्वादप्रधानं सम्पद्यते। तन्मूलेन मूल्यमभिभूयते। तदपेक्षया तस्याः प्रधानभावापत्तेः। तुलया सम्मितं तुल्यमिति। अत्र तुल्यार्थयोगे तृतीया। यद्यपि तुल्यार्थयोगे षष्ठ्यपि विधीयते तथापि नौप्रभृतिभ्यस्तृतीयासमर्थेभ्यः प्रत्ययविधानात् तुलाशब्दादपि तृतीयासमर्थादेव प्रत्ययो विज्ञायते। यथेत्यादिना तुलया सादृश्यं दर्शयति। ननु च तुल्यास्यप्रयत्नमिति

(१।१।९) निपातनादेव तुल्यशब्दस्य साधुत्वम् भविष्यति। स च सदृशे एव लोके प्रसिद्ध इति। नार्थस्तुलाशब्दात् सम्मिते प्रत्ययविधानेन। स्वरार्थं तु प्रत्ययविधानम्। यतो नाव (६।१।२१३) इत्याद्युदात्तत्वं यथा स्यात्। नहि निपातने सत्याद्युदात्तत्वं तुल्यशब्दस्य शक्यते विज्ञातुम्।

## ९२। धर्मपथ्यर्थन्यायादनपेते।

निर्देशादेव पञ्चमी समर्थविभक्तिरिति। यद्येव मतिप्रसङ्गः। धुरो (४।४।७७) यड्ढकावित्येवमादावपि निर्देशादेव समर्थविभक्तिर्विज्ञेया। नैष दोषः। तत्र हि द्वितीया समर्थविभक्तिः। एवं ज्ञानं स्याद् द्वितीयानुवृत्तिरपार्थिका स्यात्। इह तु न काचिद् विभक्तिरनुवर्त्तते। पञ्चमी च सूत्रे श्रूयते। तस्मात् सैव समर्थविभक्तिरनुकल्पयितुं युक्ता।

## ९३। छन्दसो निर्मिते।

प्रत्ययार्थसामर्थ्यलभ्येति। निर्मित इति प्रत्ययार्थः। तत्र च्छन्दसः करणत्वमिति सामर्थ्यात् तृतीया समर्थविभक्तिर्लभ्यते। छन्दःशब्दोऽयं वेदे त्रिष्टुबादाविच्छायाञ्च वर्त्तते। इह त्विच्छायां वर्त्तमानो गृह्यते। अतएवाह इच्छया कृत इति। इच्छावृत्तिस्तु संज्ञाग्रहणस्याभिधेयनियमार्थस्यानुवृत्तेर्लभ्यते।

## ९४। उरसोऽण् च।

संज्ञाधिकारादभिधेयनियम इति। तेनोरसा निर्मितं सुखमित्यादौ न भवतीति भावः।

## ९५। हृदयस्य प्रियः।

हृद्य इति। हृदयस्य हृल्लेखेत्यादिना (६।३।५०) हृद्भावः।

## ९६। बन्धने चर्षौ।

ऋषिशब्दोऽयमस्त्येव गुणवति पुरुषविशेषे। अस्ति च वेदे। इह संज्ञाधिकारादेव न मनुष्यग्रहणमिति दर्शयति। ऋषिर्वेदो गृह्यते।

## ९७। मतजनहलात् करणजल्पकर्षेषु।

प्रत्ययार्थसामर्थ्यलभ्येति। करणादयः प्रत्ययार्थाः। तत्र करणादयः

शब्दा भावे करणे च व्युत्पाद्यन्त इति सामर्थ्यादेवोपलभ्यमाना षष्ठीविभक्ति-र्विज्ञायते। यद्यपि कर्षशब्दः परिमाणवचनोऽप्यस्ति तथापि करणादीनां साहचर्य्यात् क्रियाशब्द एव गृह्यते। करणशब्दो भावसाधनः। यदा तु करणसाधन स्तदा क्रियतेऽनेनेति करणम्। रथसीताहलेभ्यो यद्विधाविति (१।१।७२,वा) तदन्तविधिरिष्यते। तस्योदाहरणं द्विहल्य इति दर्शयति। भावसाधनश्चेति। अत्रापि पूर्ववद् विभागो वेदितव्यः।

९८। तत्र साधुः।

सामन्य इति। ये चाभावकर्मणोरिति (६।४।१६८) प्रकृतिभावः। साधुरिह निपुणो योग्य इति भावः।

९९। प्रतिजनादिभ्यः खञ्।

जनं जनं प्रति प्रतिजनम्। यथार्थेऽव्ययमित्यव्ययीभावः (२।१।६)। परस्य कुलममुष्यकुलमिति निपातनादलुक्। षष्ठ्या आक्रोश इति (६।३।२१) वा यदा परकुलत्वेनाक्रुश्यते। यत्रेत्यादि। प्रतिजन सर्व्वजन इत्येवमादिषु केषुचिद्धितार्थ एव प्रतीयते। नतु प्रवीणो योग्यशब्दस्यार्थः। तेन तत्र वचनसामर्थ्यात् परेऽपि प्राक्क्रीतीयाः प्रत्यया बाध्यन्ते। अन्यथा हि वचनमनर्थकं स्यात्।

१००। भक्ताणः।

१०१। परिषदो ण्यः।

१०२। कथादिभ्यष्ठक्।

१०३। गुडादिभ्यष्ठञ्।

१०४। पथ्यतिथिवसतिस्वपतेर्ढञ्।

१०५। सभाया यः।

स्वरे विशेष इति। यति सति यतोऽनाव (६।२।१३) इत्याद्युदात्तत्वं स्यात्। ये तु सति प्रत्ययस्वरेणान्तोदात्तत्वं स्यात्।

१०६ । ढश्छन्दसि ।

१०७ । समानतीर्थे वासी ।

वसतीति वासी । निपातनादेव णिनिः । ग्रहादिलक्षणो वा । अथवा वसनं वासः । सो ऽस्यास्तीति वासी । मत्वर्थीय इनिः । अथ तत्रेति (४।४।९८) वर्त्तमाने पुनः समानतीर्थे इति सप्तम्युपादानं किमर्थम् ? प्रकृतित्वेनेष्टात् सप्तम्यन्ताद् यथा स्यात् । अनिष्टान् मा भूत् । एतेन गुरुवचनो यस्तीर्थशब्दस्तदन्तात् सप्तमीसमर्थात् प्रत्ययो भवति । न तु यः प्रयागादिवचनस्तदन्तात् । अमुमेवार्थं चेतसि कृत्वाह तीर्थशब्देन गुरुरुच्यत इति ।

१०८ । समानोदरे शयित ओ चोदात्तः ।

ओकारश्चोदात्त इति । यतः स्वरे प्राप्त ओकारस्योदात्तत्वं विधीयते । शयितः स्थित इत्यर्थः । अनेकार्थत्वात् तस्य स्थितावपि वृत्तेः । तथाहि आमाशयो जलाशय इति । समानोदर्य्य इति । समानञ्च तदुदरञ्चेति समानाधिकरणसमासं कृत्वा ततः प्रत्ययः ।

१०९ । सोदराद् यः ।

एकदेशविकृतस्यानन्यत्वात् सोदर्य्यशब्दादपि पूर्वेण यत्येव प्राप्ते यो विधीयते । विभाषोदर (६।३।८८) इति विषयसप्तमीति मत्वाह यकारादौ प्रत्यय इत्यादि । ओ चोदात्त इति नानुवर्त्तत इति । प्रत्ययविधानसामर्थ्याद् यउदात्तः ।

११० । भवे छन्दसि ।

अणादीनां घादीनाञ्चापवाद इति । तत्र भव इति (४।३।५३) प्राप्तानाम् । यद्येवं यता बाधितत्वाच्छन्दसि तेषामभावः स्यात् । ततश्च मुञ्जावत्यं (F) मौञ्जावतं वेत्येवमादि न सिध्यतीत्याह सति दर्शन इत्यादि । कथं पुनरेवं लभ्यत इत्याह सर्वविधीनामित्यादि । सर्वविधिव्यभिचारस्तु बहुलञ्छन्दसीति

(F) क्वचिन् मुञ्जीरात्यं मौञ्जीरातमिति पाठः ।

(३।२।८८) बहुलग्रहणाल्लभ्यते। मुञ्जावान् नाम पर्वतः। तत्र भवोऽसौ मौञ्जावतः (G)।

**१११। पाथोनदीभ्यां ड्यण्।**

**११२। वेशन्तहिमवद्भ्यामण्।**

**११३। स्रोतसो विभाषा ड्यड्ड्यौ।**

ड्यड्ड्ययोः स्वरे विशेषः। ड्यति हि सति तित् स्वरितमित्यन्तस्वरितः (६।१।१८५) स्यात्। ड्ये तु प्रत्ययस्वरेणान्तोदात्तत्वं भवति।

**११४। सगर्भसयूथसनुताद् यन्।**

समानो गर्भः। समानो यूथ इति कर्मधारयः। णु स्तुतौ। भावे क्तः। समानं नुतमस्येति बहुव्रीहिः। समानञ्च तन्नुतञ्चेति कर्मधारयो वा। स्वरे विशेष इति। यति सति तित् स्वरितमित्यन्तस्वरितत्वं (६।१।१८५) स्यात्। यनि सति नित्स्वरेणाद्युदात्तत्वं स्यात्। सर्वत्र समानस्य च्छन्दसीति। समानस्य (६।३।८४) च्छन्दस्यमूर्धप्रभृत्युदर्केष्वित्यस्योपलक्षणपर एकदेश उपात्तः।

**११५। तुग्राद् घन्।**

**११६। अग्राद् यत्।**

सामान्येन यद्विहित इति। भवे च्छन्दसीत्यनेन (४।४।११०)। अथ यद्ग्रहणं किमर्थम्? न यथाविहितमेवोच्येत? नैवं शक्यम्। अग्रपश्चाड्डिमजित्येवाग्रशब्दाड् (४।३।२३, वा) डिमजप्युक्तः। तत्र यथाविहिते प्रत्यय उच्यमाने डिमजपि स्यात्। तस्माद् यद्ग्रहणं कर्त्तव्यम्।

**११७। घच्छौ च।**

स्वरे विशेष इति। घे विहिते ऽन्तोदात्तत्वं स्यात्। घनि तु सत्याद्युदात्तत्वं भवति।

---

(G) मुञ्जीराती नामेति······मौञ्जीरात इति पाठान्तरम्।

११८। समुद्राभ्राद् घः ।

ननु चाजाद्यदन्तमल्पाच्तरमितऽभ्रशब्दस्य (२।२।३३-३४) पूर्वनिपातेन भवितव्यम्। तत् कथमपूर्वनिपात इत्याह अभ्रशब्दस्येत्यादि ।

११९। बर्हिषि दत्तम् ।

१२०। दूतस्य भागकर्मणी ।

भावे तस्येदमित्यणि (४।३।१२०) प्राप्ते गुणवचनब्राह्मणादिभ्य इति (५।१।१२४) ष्यञि यतो विधानम्। येषां सख्यु यं इत्यत्र (५।१।१२६) दूतवणिग्भ्याश्चेत्युपसंख्यायते तेषां कर्मणि ये प्राप्ते ।

१२१। रक्षोयातूनां हननी ।

निर्देशादेव समर्थविभक्तिः। सा पुनः षष्ठी कर्त्तृकर्मणोः कृतीति (२।३।६५) कर्मणि द्रष्टव्या। योग्यतामात्रे विवक्षिते हन्यतेऽनयेति हननी। करणे ल्युट्। टिड्ढाणञिति (४।१।१५) ङीप्। ननु च रक्षोयातुशब्दयोर्द्वित्वाद् द्विवचनेन भवितव्यम्। तत् कथमिदमुक्तम्। वचनसामर्थ्यात् सम्भावनमेव स्तुतिरिति दर्शयितुमाह बहुवचनमित्यादि। योगश्चायं तस्येदमित्यणि (४।३।१२०) प्राप्ते वेदितव्यः ।

१२२। रेवतीजगतीहविष्याभ्यः प्रशस्ये ।

षष्ठीसमर्थेभ्य इति। सामर्थ्याद्धि षष्ठ्येव समर्थविभक्तिर्विज्ञायते। यथाहि शंस स्तुतावित्यतोऽस्मादेव निपातनाद् भावे क्यप्प्रत्ययः कृत्यल्युटो बहुलमिति (३।३।११३) बहुलवचनात्। तत्रावश्यं कृद्योगलक्षणया षष्ठ्या भवितव्यम्। अयमपि योगः पूर्ववदणि प्राप्ते वेदितव्यः।

१२३। असुरस्य स्वम् ।

षष्ठीसमर्थादिति। असुरस्येति निर्देशादेव षष्ठी समर्थविभक्तिर्लभ्यते। स्वमित्यात्मीयमित्यर्थः। अणोऽपवाद इति। तस्येदमिति (४।३।१२०) प्राप्तस्य।

१२४। मायायामण् ।

मायायां नेति वक्तव्ये ऽण्ग्रहणं विस्पष्टार्थम्।

१२५। तद्वानासामुपधानो मन्त्र इतीष्टकासु लुक् च मतोः।

स विवक्षितोऽवयवोऽस्मिन्निति तद्वान्। कः पुनरसौ समुदायः। अत एवाह तद्वानित्यवयवेन समुदायो निर्दिश्यत इति। एतेनैकदेशादिदं प्रत्ययविधानमित्युक्तं भवति। वर्चःशब्दोऽस्मिन् मन्त्रेऽस्तीत्यादिना तत्समुदायं प्रदर्शयति। चयनवचन इति। चिनोतेरेव करणे ल्युट्। तेजस्या इति। तेजःशब्दोऽस्य मन्त्रस्यास्ति तेजस्वानुपधानमन्त्रः। शेषं विग्रहवाक्यादि पूर्ववत्। मन्त्रादेव। समुदायान्मा भूत्। यद्यपि समुदायः प्रातिपदिकं न भवति तथापि वचनसामर्थ्यादपि स्यात्। किं हि वचनान्न लभ्यत इत्यभिप्रायः। इतिकरणो नियमार्थ इति। असतीहेतिकरणे मन्त्रे बहूनां पदानां सम्भवे सर्वेण पदेन तद्वान् मन्त्रो गृह्यते। अस्मिंस्तु सति तेन नियमार्थेन येनैव पदेन तद्वता मन्त्रेणेष्टकोपलक्ष्यते तेनैव सर्वो मन्त्रो गृह्यत इत्येतदुपपन्नं भवति। अथ मतुब्ग्रहणं किमर्थम्? यावता मतुबन्तादयं विधीयते। तत्र प्रत्ययस्य लुग् विज्ञायमानो विधानसामर्थ्याच्च मतुप एव भविष्यतीत्यपार्थकं मतुब्ग्रहणम्। नैवम्। उत्तरत्राश्विमानण्-तत्र (४।४।१२६) इत्युपधानमात्रावयवे द्वौ मत्वर्थीयाविनिमतुपौ। तत्रासति मतुब्ग्रहणे द्वयोरपि लुक् स्यात्। अस्मिन् सति मतुप एव भवति।

१२६। अश्विमानण्।

आश्विनीरिति। टिड्ढाणञिति (४।१।१५) ङीप्।

१२७। वयस्यासु मूर्ध्नो मतुप्।

मूर्धन्वतीरिति। उगितश्चेति (४।१।६) ङीप्। वयस्यास्ता मूर्धन्वतयश्चेति। वयस्वानुपधानो मन्त्रः। तासामिति वयस्याः। मूर्धन्वानुपधानो मन्त्रः। तासामिति मूर्धन्वतयः। यत्रेतरादि। नह्येवंविधो यासामुपधानो मन्त्रस्ततो वयस्यास्विति वचनात्। अत्र मूर्धशब्द एवास्ति। न वयःशब्दः। ततो न भवति मूर्धन्वतय इति। वक्तव्य इति। तद्वानित्यधिकारान् मतुबन्ताद्

मूर्धशब्दाद् प्रत्ययेन भवितव्यम् । अतो मूर्धन्वत इति युक्तं वक्तुम् । तन्मतुपो भाविनं लुकं चेतसि कृत्वा । एवं लघु सूत्रं भवति ।

## १२८ । मत्वर्थे मासतन्वोः ।

मत्वर्थे मासतन्वोरिति प्रत्ययार्थविशेषणम् । मत्वर्थग्रहणादेव प्रथमा समर्थविभक्तिरस्त्युपाधिका लभ्यत इत्याह प्रथमासमर्थादस्त्युपाधिकादिति । अनन्तरार्थे चेति । न केवलं मत्वर्थ एव प्रत्ययो वक्तव्यः । ननु च तपः-प्रभृतीनां प्रत्ययार्थमासादिवचनानामभिधेयलिङ्गवचनानि भवन्तीति पुंलिङ्गता प्राप्नोति । तस्याञ्च सत्यामत्वसन्तस्य चाधातोरिति (६।४।१४) दीर्घेण भवितव्यम् । तत् कथं तपश्च सहश्च नभश्चेति प्रयोग इत्यत आह नपुंसकलिङ्गं छान्दसत्वादिति । अयं हि च्छान्दसः प्रयोगः । तत्रेति । पुंलिङ्गे ऽभिधेये । नपुंसकलिङ्गमुपपद्यते । व्यत्ययो बहुलमिति (३।१।८५) लिङ्गव्यत्ययस्य च्छन्दसि विधानात् । इडस्मिन् मासेऽस्तीति इषः । ऊर्गस्मिन् मासे ऽस्तीति ऊर्जः । शुगस्मिन् मासेऽस्तीति शुचिः । शुग् वास्मिन् मासे ऽस्तीति शुक्रः । चोः कुरिति (८।२।३०) कुत्वम् । अर्थग्रहणं किमर्थम् ? यावता मतौ छः सूक्तसाम्नोरित्यत्र यथा (५।२।५९) मतावित्युच्यमाने मत्वर्थे प्रत्यय उच्यते तथेहापि लभ्यते । तस्मान्मतावित्येवं कस्मान्नोक्तम् ? सत्यमेतत् । विस्पष्टार्थमर्थग्रहणम् ।

## १२९ । मधोर्ञ च ।

## १३० । ओजसोऽहनि यत्खौ ।

असन्तत्वादसमायामेधास्रजो विनिरिति ( ५।२।१२१ ) विनिप्रत्यये प्राप्ते मतुपोऽपवादैः सह समावेशान् मतुपि यत्खौ विधीयेते । अथ यद्ग्रहणं किमर्थम् ? नन्वोजसोऽहनि ख चेत्येवोच्येत । चकारेण यथाविहिते प्रत्यये विज्ञायमाने यदिति च भविष्यति । नैवं शक्यम् । चकारेण हि सन्देहः स्यात् किमनेनानन्तरसूत्रविहितो ञोऽनुकृष्यते ? अथ प्रकृतो यदिति ? तस्माद-सन्देहार्थं यद्ग्रहणं कर्त्तव्यम् ।

## १३१ । वेशो यशआदेर्भगाद् यल् ।

लित्करणं स्वरार्थम् ।

## १३२ । ख च ।

योगविभाग इत्यादि । यदि पूर्वसूत्रएव खग्रहणं क्रियते द्वे प्रकृती प्रत्ययावपि द्वावेवेति सामर्थ्याद् यथासंख्यं प्रसज्येत । तस्मात् तन्निरासार्थो योगविभागः । ननु यथासंख्यमनुदेशः समानामित्यत्र इह (१।३।१०) कस्मान्न भवति वेशोयशआदेर्भगाद् यल् ख चेति दर्शयित्वा स्वरितेन लिङ्गेन यथासंख्यमित्युक्तम् ? तदेकयोगतामभ्युपेत्य । भवतु नामैकयोगः । तथापि यथासंख्यं न भवतीति दर्शनार्थम् । तत् कुतो यथासंख्यनिरासार्थो योगविभाग इति ? अत आह उत्तरार्थश्चेति ।

## १३३ । पूर्वैः कृतमिनयौ च ।

पूर्वैः कृतमिनयौ चेति । खएव यथा स्यात् । यन्मा भूत् । पूर्वैरिति । बहुवचनान्तेनेत्यादि । पथिभिः पूर्वैरित्येवमादिभिर्वेदवाक्यैः पूर्वपुरुषकृतत्वेन यदा प्रशंसां प्रतिपादयितुं निष्ठा साध्वेव शक्यते विज्ञातुं तदा पूर्वपुरुषाभिधायिनः पूर्वशब्दात् प्रत्यय उपपद्यते । तस्मात् पूर्वैरिति बहुवचनान्तेन पूर्वपुरुषा अभिधीयन्ते । छन्दसामर्थपरत्वाद् बहुवचनस्य । तेन पूर्वपुरुषाणां पन्था आश्रित सम्पद्यत इति दर्शयितुमाह तत्कृताः पन्थान इति ।

## १३४ । अद्भिः संस्कृतम् ।

संस्कृतमिति प्राग्वहतीये (४।४।१) ठक्ि प्राप्ते यद्विधीयते । निर्देशादेव समर्थविभक्तिरिति । तृतीया । सा पुनःसंस्करणक्रियायामपां करणत्वात् करणे वेदितव्या ।

## १३५ । सहस्रेण सम्मितौ घः ।

निर्देशादेव समर्थविभक्तिरिति । तृतीया । सा पुन तुल्यार्थयोगे वेदितव्या । तत्रापीति । सम्मित्या सादृश्येन धर्मेण सम्मित एव धर्मो

लक्षयितव्यः । किं कारणमित्याह तत्र सम्मित एव वैदिकप्रयोगे दृश्यते । सम्मितिमात्रे ।

## १३६ । मतौ च ।

शब्दे कार्य्यासम्भवान् मतुप्शब्देन मत्वर्थो लक्ष्यत इत्याह मत्वर्थ इत्यादि । मत्वर्थे च प्रत्ययविधानात् प्रथमासमर्थादस्त्युपाधिकात् प्रत्ययो विज्ञायत इत्याह सहस्रमस्य विद्यत इति ।

## १३७ । सोममर्हति यः ।

तदर्हतीत्यर्हार्थे (५।१।६३) ठकि प्राप्ते यो विधीयते । स्वरे विशेष इति । यत्याद्युदात्तत्वं स्यात् । यप्रत्यये तु सत्यन्तोदात्तत्वं भवति ।

## १३८ । मये च ।

रूप्यमयटोरपवादो योग इति । मयट इति । मयडर्थो लक्ष्यत इति । शब्दे कार्य्यासम्भवादिति भावः । तत्र यथायोगं समर्थविभक्तिरिति । तत्रागतार्थे पञ्चमी । विकारावयवयोः षष्ठी । प्रकृतवचने प्रथमेति यथा-योगार्थः ।

## १३९ । मधोः ।

मयडर्थ आगते प्रकृतवचने च यथायोगं रूप्यमयटोः प्राप्तयोर्यद् विधीयते । तत्र मयटो हि द्व्यचश्छन्दसीति (४।३।१५०) प्राप्तस्य नोत्वद्वर्ध्रबिल्वादिति प्रतिषेध (४।३।१५१) उच्यते ।

## १४० । वसोः समूहे च ।

अत्रापि मयडर्थे यथायोगं रूप्यमयटोः समूहे त्वणि ठकि च यद्विधीयते । वसुशब्दोऽप्ययमस्ति देववचनो वसवो देवा इति । अस्ति च धनवचनो वसु धनमिति । तत्र देवतावचनात् समूहविवक्षायामौत्सर्गिकोऽण् प्राप्नोति । धनवचनत्वादचित्तलक्षणष्ठक् । यथायोगं समर्थविभक्तिरिति । समूहे मयडर्थे च षष्ठ्यादिका सामर्थ्यलब्धेति ।

## १४१ । नक्षत्राद् (H) घः । (I)

(H) The following MSS. were at the disposal of the editor for the preparation of the press-copy of the fourth Adhyaya of the Nyasa :—

(ख),

(क) and

(ङ)

as stated respectively, in PP. 331, 484, and 791.

In the MS. (ख), we have, at the end of 4/4,

"युगप्रधानश्रीमज्जिनचन्द्रसूरिचरणसेवाऽविच्छाळिभिः
श्रीपुण्यप्रधानोपाध्यायै र्लिलिखे स्वशिष्यप्रशिष्यादिवाचनकृते ।
वाच्यमान श्चिरं नन्दतात् । श्रीरस्तु । संवत् १६८४ वर्षे ।"

So the date of transcription of this portion of the MS. is 1627 A. D.

At the end of 4/1, as well as at the end of 1/4. it has

"श्रीकाङ्गासरोग्रामे श्रीखरतरगच्छाधिपयुगप्रधानश्रीमज्जिनचन्द्रसूरिशिष्यश्रीपुण्यप्रधानोपाध्यायै रालेखि । शिष्यपण्डितसुमतिसागरगणिशिष्यपण्डितसाधुरङ्गपण्डितज्ञानचन्द्रमुन्योः सम्पठनाय । श्रीरस्तु लेखकपाठकयोः । संवत् १६८२ वर्षे । वैशाखशुल्काष्टम्याम् ।"

This portion therefore was copied in 1625 A. D.

(I) It is gratifying to note that many of the very renowned Indian and European Savants have kindly welcomed the printing and publication of our edition of the Nyasa. A few letters from some of them, are transcribed below :—

From professor H. JOCOBI. (Germany).

Dear Sir,

I got your kind letter and the copy of the Nyasa Part I, for which I render you my most cordial thanks. I had only a cursory look at the edition of the Nyasa by Jinendrabuddhi, but think it done in a scholarly manner. I should thank you for sending me the other parts of the work as they are issued. With kind regards

Yours sincerely

Sd. HERMANN JOCOBI.

59, Niebulvr strasse. Bonn (Germany)

29. 1. 1914.

# १४२ । सर्व्वदेवात् तातिल् ।

From Professor S. KONOW, NORWAY.

Villa Baikuntha,
Bestum,—Kristiania.
26. 2. 1914.

Many thanks for your letter and for the copy of Jinendrabuddhi's Nyasa, Part I which you have been good enough to send me. The edition is very good and scholarlike and I congratulate you on the results of the work of your Society (Varendra Research Society). The only thing which I should have done differently is that I should have printed the text of the Kasika itself together with the commentary. As it now is, it is necessary to keep the text of the Kasika in your table when reading Jinendrabuddhi, and it is always a little more troublesome to have to consult two books. However this is quite a minor point, and on the whole the principles followed by the editor are excellent.

yours sincerely
Sd. STEN KONOW.

From Pundit Gonapati Sastri, Editor of the दुर्घटवृत्ति, व्यक्तिविवेक and the recently discovered Dramas by the Poet भास ।

"Office of the Curator for Publication of Sanskrit MSS.
Trivandrum, Government of Trivancore. 23. 12. 1913.

Dear Sir,

I have duly received your kind letter as also a copy of the Nyasa, Part I and I thank you very much for the same. You have edited the work beautifully and very accurately and it reflects credit on your iudustry. I think that if the text of the Kasika is also printed along with the Nyasa, it will add to the utility of the

## १४३। शिवशर्मरिष्टस्य करे। (J)

work. Your doubt about the genuineness of the quotation from Amara (P. 2,) by Jinendra, is quite correct, as the copy of our Nyasa also does not contain the quotation. The Palm leaf MS. in our possession of the Nyasa is received, on loan, from a private individual. It is written in *Malayalam* character, but not in Canrese or Telugu.

Only Dhatu-Prodeepa of Maitreya Raksita is available here, but no other work of his, nor any copy of the Nyasoddyota or Anunyasa. But if I obtain any of them, I shall let you know about them.

I am, Dear Sir,
Yours faithfully
Sd. T. Gonopati Sastri.

## (J) शुद्धिपत्रम्।

The editor, with extreme regret, states that he had to stay at Rajshahi (Bengal) while the book was printed at Calcutta about 200 miles off from his station. Under the circumstances, misprints and errors of other kinds in such a big book containing 1060 Pages, could not but creep in. Some of them are noticed below. The readers are to kindly correct others where observed.

| Page | line | incorrect | correct |
|---|---|---|---|
| | | In The Text | |
| 49 | 21 | दुर्विन्यस्तकाकपदजनित | दुर्विन्यस्तकाकुपदजनित |
| 72 | 26 | कारमात्रं | षकारमात्रं |
| 138 | 26 | निवर्त्तितं | निवर्त्तितम् |
| 169 | 26 | स्थः | स्थष: |
| 523 | 13 | शब्दान्तरादरिति | शब्दान्तरादैरिति। |
| 654 | 23,24 | शमिनितरां | शमिनितरा |
| | | शमिनितमामिति | शमिनितमेति |
| 809 | 22 | प्राप्ति | प्राप्तिः। |
| 810 | 4 | पञ्चानामज्ञां | पञ्चानामज्ञानां |
| 854 | 22 | कल्पितत्वात् | विकल्पितत्वात् |
| 881 | 16 | वेदितव्यः | वेदितव्यम्। |

१४४ । भावे च ।

इति बोधिसत्त्वदेशीयाचार्य्यश्रीजिनेन्द्रबुद्धिपादविरचितायां काशिका-
विवरणपञ्जिकायां चतुर्थाध्यायस्य चतुर्थः पादः ॥ ४।४ ॥

समाप्तोऽयं चतुर्थाध्यायः ॥ ४ ॥

---

"यत्पञ्चिकानावमिमामासाद्य सुधियः सुखम् ।
तरन्ति काशिकाम्भोधिं स जिनेन्द्रो जयत्ययम्" ॥ १ ॥

---

THE END OF THE VOLUME I.

---

## ERRATA

### IN THE NOTES

| | | | |
|---|---|---|---|
| 226 | 23 | पाणिंनीय | पाणिनीय |
| 332 | 8 | चणी | वीणी , |
| 653 | 26 | स एव च | स एव च पाठो |
| 719 | 25 | मूर्धन्यादेश | मूर्धन्यादेश |
| 849 | 21 | Spells | Spell |
| | 26 | वक्तव्यमित्येवं | वक्तव्यइत्येवं |
| | 29 | allows | allow |
| 894 | 25 | पर्य्यायो | पर्यायो |